GL SANS 891.21
BAN
125556
LBSNAA

त्री राष्ट्रीय प्रशासन अकादमी
l Academy of Administration
मसूरी
MUSSOORIE
पुस्तकालय
LIBRARY

अवाप्ति संख्या
Accession No. — 125556 ~~14601~~
वर्ग सख्या
Class No. GL Sans 891.21
पुस्तक संख्या
Book No. बाणभ BAN

THE
HARSHACHARITA
OF
BÂṆABHAṬṬA
WITH
The commentary (Saṅketa)
OF
S'ANKARA.

EDITED BY

KÂS'INÂTH PÂṆḌURANG PARAB.

Fourth Edition.

REVISED BY

SRÎNIVÂS VENKATRÂM TOPPÛR.

PUBLISHED
BY
TUKÂRÂM JÂVAJÎ,
PROPRIETOR OF THE "NIRNAYA-SÂGAR" PRESS,
BOMBAY.

1918.

(*Registered according to Act XXV of 1867.*)

[All rights reserved by the Publisher.]

Published by Tukaram Javaji, and Printed by Ramchandra Yesu Shedge,
at the 'Nirnaya sagar' Press, 23, Kolbhat Lane, Bombay.


॥ श्रीः ॥

महाकविश्रीबाणभट्टकृतं

हर्षचरितम् ।

महाकविचूडामणिशंकरकविरचितया संकेताख्यया

व्याख्यया समेतम् ।




काशीनाथ पाण्डुरङ्ग परब


इत्यनेन संशोधितम् ।

श्रीनिवास वेंकट्राम तोप्पूर

इत्यनेन संस्कृतञ्च ।



चतुर्थं संस्करणम् ।



तच्च

शाके १८३९ वत्सरे

मुम्बय्यां


निर्णयसागरयन्त्रालयाधिपतिना मुद्रयित्वा प्राकाश्यं नीतम् ।

मूल्यं रूप्यकद्वयम् ।

॥ श्रीः ॥

हर्षचरितम् ।

शंकरकृतया संकेताख्यया व्याख्यया समेतम् ।



प्रथम उच्छ्वासः ।

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शंभवे ॥ १ ॥
हरकण्ठग्रहानन्दमीलिताक्षीं नमाम्युमाम् ।
कालकूटविषस्पर्शजातमूर्च्छागमामिव ॥ २ ॥

संकेतः ।

श्वोतन्मदाम्बुभरनिर्भरचण्डगण्डशुण्डाग्रशौण्डपरिमण्डितभूरिभृङ्गान् ।
विघ्नानिवानवरतं चलगण्डतालैरुत्सारयञ्जयति जातघृणो गणेशः ॥
शंकरनामा कश्चिच्छ्रीमत्पुण्याकरात्मजो व्यलिखत् ।
शिष्टोपरोधवशतः संकेतं हर्षचरितस्य ॥

'सर्वकर्माणि कुर्वीत प्रणिपत्येष्टदेवताम्' इति शिष्टाचारमनुपालयन् 'अपारे काव्यसंसारे कविरेव प्रजापतिः । यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥' इति काव्यलक्षणामपूर्वां सृष्टिं स्थिरां प्रवर्तयन्नेष कविः शिवं बहुशक्तियुतमपि नियतशक्त्यात्मकमेव स्तौति—**नमस्तुङ्गेत्यादिना** । न क्वचित्प्रणतो यो मूर्धा तत्स्पर्शी चन्द्र एव सितवालतुल्यप्रभाप्रसरतया स्वेदादिविनाशाद्विशिष्टस्थानस्थितश्च चामरम् । त्रैलोक्यमेव नानाभङ्गिशोभिलात्नगरं तदारम्भे मूलस्तम्भः।नगरारम्भे हि मूलस्तम्भो भवति । तत्र च पट्टबन्धादिवदुत्प्रेक्षणानन्तरमुन्नते पृष्ठदेशे चन्द्रतुल्यं श्वेतं चामरं क्रियत इति स्थितिः । केचित्पुनः—त्रैलोक्यनगरस्यारम्भे मूलं मूलकारणं परमाणवस्तेषामुपाश्रयेण मूलकारणत्वात्स्तम्भ इव । ते हि तद्वशात्कार्यमारभन्ते । तस्य निमित्तकारणत्वादित्याहुः । 'स्वयंभूः शंभुरादित्यः' इति नामसहस्रे दृष्टत्वाद्धरेः, 'शंभू ब्रह्मत्रिलोचनौ' इत्यभिधाकोशदर्शनाच्च ब्रह्मणोऽपि नमस्कारोऽयमित्यन्ये वदन्ति । व्याकुर्वते च हरिपक्षे—त्रैलोक्याक्रमणकाले । यद्वा 'यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ मही' इत्यभिप्रायेण तुङ्गमुच्छ्रितं द्युलक्षणं यच्छिरस्तच्चुम्बि चन्द्र एव चामरं तेन चारवे । ब्रह्मपक्षे—चन्द्रः स्वर्णं तन्मयं चामरमिव चामरं केशकलापः । हिरण्यकेशो हि ब्रह्मा त्रैलोक्यादीनि सर्वत्र तुल्यमिति ॥ १ ॥

हरेत्यादिना प्रियं प्रति गाढश्लेहादि सौकुमार्यं चोमयोच्यते । कालकूटविषेति प्रशंसार्थः सामान्यपदप्रयोगो मेरुमहीधरचूतवृक्षादिवत् । आगमः प्रारम्भः ॥ २ ॥

नमः सर्वविदे तस्मै व्यासाय कविवेधसे ।
चक्रे पुण्यं सरस्वत्या यो वर्षमिव भारतम् ॥ ३ ॥
प्रायः कुकवयो लोके रागाधिष्ठितदृष्टयः ।
कोकिला इव जायन्ते वाचालाः कामकारिणः ॥ ४ ॥
सन्ति श्वान इवासंख्या जातिभाजो गृहे गृहे ।

संप्रत्युत्कृष्टकवित्वाभिमानेन तादृशमेव कविवरं स्तौति—**नमः सर्वेत्यादिना** । सर्वा वेदादिका विद्या गीतादिकलाश्च वेत्ति यस्तस्मै । तदुक्तम्—'नासौ शब्दो न तद्वाच्यं न सा विद्या न सा कला । जायते यत्र काव्याङ्गमहो भारो महाकवेः ॥' इति कविरेव वेधाः । उक्तं च—'अपारे काव्यसंसारे कविरेव प्रजापतिः' । कवीनां वेधाः । कविशब्दोऽत्रोपचारात्कविबुद्धिषु वर्तते । तेन कविबुद्धीनां श्रेष्ठ इत्यर्थः । तथा चाह मुनिः—'इतिहासोत्तमादस्माज्जायन्ते कविबुद्धयः' इति । यद्वा व्युत्पत्त्युत्पादनद्वारेण कवय एवंभूताः सन्तः क्रियन्ते । मुख्य एव कविशब्दस्यार्थः । यदुक्तम्—'इदं कविवरैः सर्वैराख्यानमुपजीव्यते' इति । पुण्यं पावनम् । यदुक्तम्—'भारताध्ययनात्पुण्यादपि पादमधीयतः । श्रद्दधानस्य पूयन्ते सर्वपापानि देहिनः ॥' इति । सरस्वती वाणी तस्या लताया इव पुष्पादिहेतुत्वाद्वर्षं वृष्टिमिव । वर्षं वा स्थानविशेषः । यतोऽसौ तत्रास्ते । यदुक्तम्—'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्' । भरतानधिकृत्य कृतो ग्रन्थो भारतस्तम् । यद्वा भारतं वर्षमिव । भरतः कश्चिद्राजा तस्य निवासं भारतं वर्षं भूभागैकदेशस्तदिव । उक्तं च—'स्याद्वृष्ट्यां लोकधात्र्यंशे वत्सरे वर्षमस्त्रियाम्' इति । यद्वा भारतवर्षान्तरस्था भावा मनुष्येषु सुलभास्तद्वन्महाभारतस्था सरस्वती । एतदपि सरस्त्याख्यया नद्या पुण्यम् ॥ ३ ॥

एवं सर्वज्ञतागुणकथनेन कविप्रशंसां कृत्वा काव्यप्रशंसामाह—**प्राय इत्यादिना** । काव्यमेवं नाम स्वभावसुभगम् । येनेदृशा अपि कवयः प्रायः प्राचुर्येण कोकिला इव जायन्ते वल्गुवाचः संपद्यन्ते । किं पुनः संविशिष्टा न जायेरन् । केचित्पुनर्भूयसा कुत्सिता कवयो जायन्त इति कुकविनिन्दैवेयमिति व्याख्यातवन्तः । रागो द्वेषपूर्वकोऽनर्थाभिनिवेशस्तेनाधिष्ठिता दृष्टिर्बुद्धिर्येषाम् । वाचाला असंबद्धप्रलापिनः । कामेन स्वेच्छया, न त्वलंकारकृद्दर्शितनीत्या, कुर्वन्ति ये ते । कोकिलपक्षे—कुकन्ति गृह्णन्ति चेतांसीति कुकाः । ते च ते वयो मयूरप्रवराः पक्षिणः । रागो लौहित्यम् । दृष्टिश्चक्षुः । वाचा भारत्या आला आ समन्ताल्लान्त्यावर्जयन्ति यतस्तादृशाः सन्तः । कामं व्यसनं कुर्वन्ति तच्छीलाः । कामोद्दीपनविभावतां यान्तीत्यर्थः यद्वा अवाचालाः । अकारप्रश्लेषोऽत्र ॥ ४ ॥

सन्तीत्यादि । असंख्या अगणनार्हाः । जातिं स्वरूपवर्णनामात्ररूपां वक्रोक्तिशून्यां भजन्ते । 'गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः' इत्यादिवत् ।

उत्पादका न बहवः कवयः शरभा इव ॥ ५ ॥
अन्यवर्णपरावृत्त्या बन्धचिह्ननिगूहनैः ।
अनाख्यातः सतां मध्ये कविश्चौरो विभाव्यते ॥ ६ ॥
श्लेषप्रायमुदीच्येषु प्रतीच्येष्वर्थमात्रकम् ।
उत्प्रेक्षा दाक्षिणात्येषु गौडेष्वक्षरडम्बरः ॥ ७ ॥
नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः ।
विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुष्करम् ॥ ८ ॥
किं कवेस्तस्य काव्येन सर्ववृत्तान्तगामिनी ।

श्वानोऽप्यसंख्या नास्ति संख्यं सङ्क्रामो येषां ते । जातिशब्देनात्र श्वजातिसमवेता अमेध्यभक्षणादयो गृहीताः । यद्वा श्वत्वं नाम जातिस्तत्प्रतिपादनं प्रयोजनान्तरशून्यतामावेदयति । उत्पादका नवनिर्माणकारिणः, ऊर्ध्वपादाश्च । शरभा हि प्राणिभेदाः । अष्टपादा एते । श्वजातीया इति केचित् ॥ ५ ॥

अन्येति । कविश्चौरः सहृदयानां मध्येऽनाख्यातः कथितोऽपि न ज्ञायते । न आ समन्तात्ख्यातः, अपि तु किंचित्प्रथितो वा । अन्ये पूर्वकविनिबद्धविलक्षणा ये वर्णा अक्षराणि तेषां रचनेन बन्धचिह्नं श्रीलक्ष्मीप्रभृतिरचनालिङ्गम् । अन्ये तु भामालंकारप्रभृतिबन्धचिह्नमाहुः । अथ च सतां साधूनां मध्ये चौरो लक्ष्यते । कीदृक् । न ना अना कापुरुषः, अख्यातोऽप्रसिद्धः । केन । अन्यः प्राक्तनच्छायाव्यतिरिक्तस्वासकृतः पाण्डिमादिर्वर्णो मुखरागविशेषस्तत्परिवर्तनेन । यद्वा शूद्रत्वे सति द्विजादिवर्णाश्रयेण । स्वजात्युचितस्य स्वभावस्य त्यक्तुमशक्यत्वाद्भावप्रकटनमवश्यमेव भवति । यतो बन्धः शृङ्खलादिकृतो ग्रन्थिस्तच्चिह्नं लग्नदूषणादि ॥ ६ ॥

श्लेषेत्यादि । मात्रकपदेन श्लेषयमकाद्यलंकारशून्यत्वं दर्शयति । अक्षरेत्यादिनार्थविशेषाभावं प्रसादादिगुणगुम्फनाभावं चाख्याति । एतदुक्तं भवति——क्वचित्कश्चिद्गुणोऽपि भवति । स च भवन्नपि न सहृदयजनावर्जक इति । अमुनैवाभिप्रायेण नव इत्यादीनि प्रत्येकं विशेषणपदानि वक्ष्यति ॥ ७ ॥

नव इत्यादि । नव आद्यैः कविभिरनिबद्धः, चमत्कारी च । जातिः स्वभावोक्तिः । अग्राम्येति, न तु 'गतोऽस्तमर्कः' इत्यादिरूपा । सधर्मेषु तन्त्रप्रयोगः श्लेषः । अक्लिष्टः सम्यगनेकार्थप्रतिपादनक्षमः । स्फुटो दुर्बोधभङ्ग्यादिभिरदूषितो रसः शृङ्गारादिः । विकट उदारतालक्षणबन्धयुक्तः । यत्र सति नृत्यन्तीव पदानि प्रतिभासन्ते ॥८॥

किमित्यादि । वृत्तानि वर्णमात्रागणसमार्धसमविषमरूपाणि तदन्तगमनं तद्विरचनक्षमत्वम् । भारती वाणी । न व्याप्नोति । अदृष्टमपि दृष्टमिव जगत्त्रयं प्रतिभानवशाद्व्युत्पत्तेश्च तथात्वेन प्रकाशयति । यद्वा जगत्त्रयप्रथिता भवतीति स्फुट एवार्थः । भरतानधिकृत्य प्रथिता भारती कथेव । सापि सर्वे ये वृत्तान्ताः सत्पुरुषचरितान्यु-

कथेव भारती यस्य न व्याप्नोति जगत्त्रयम् ॥ ९ ॥
उच्छ्वासान्तेऽप्यखिन्नास्ते येषां वक्त्रे सरस्वती ।
कथमाख्यायिकाकारा न ते वन्द्याः कवीश्वराः ॥ १० ॥
कवीनामगलद्दर्पो नूनं वासवदत्तया ।
शक्त्येव पाण्डुपुत्राणां गतया कर्णगोचरम् ॥ ११ ॥
पदबन्धोज्ज्वलो हारी कृतवर्णक्रमस्थितिः ।
भट्टारहरिचन्द्रस्य गद्यबन्धो नृपायते ॥ १२ ॥
अविनाशिनमग्राम्यमकरोत्सातवाहनः ।

पाख्यानानि च तान्गमयति बोधयति । तथा सर्वत्र ज्ञेया भवति । तथा च—'नारदोऽश्रावयद्देवानसितो देवलः पितॄन् । गन्धर्वयक्षरक्षांसि श्रावयामास वै शुकः ॥' इत्युक्तम् ॥ ९ ॥

अधुना स्वगुरुतः स्वप्रभृतिभिः कृतानाख्यायिकादीन्काव्यभेदान्स्तुवन्नौद्धत्यार्थं सर्वत्र नमस्कारमाह—**उच्छ्वासान्त इति**।उच्छ्वास इवोच्छ्वासो विश्रान्तिस्थानं सर्गादिवत्कथासंधिस्तस्यान्तेऽप्यखिन्ना उच्छ्वासान्तरकरणक्षमाः । अविच्छिन्नप्रतिभाना इति यावत् । गुरुत्वाद्बहुवचनम् । 'नाद्यान्तो ह्यम्बुधेर्वक्त्रम्' इति वक्त्रलक्षणम् । वक्त्रे सरस्वती । वृत्तविशेषयोगिनीत्यर्थः । एतस्मिन्नाख्यायिकाकृद्भिर्भाविवस्तुसंसूचनाय वाग्विरच्यते । तथा चाह भामहः—'वक्त्रं चापरवक्त्रं च काव्ये काव्यार्थशंसिनि' इति । आख्यायिकाः कुर्वन्तीत्याख्यायिकाकाराः । यद्वा आख्यायिकेवाकारो येषाम् । अथ 'कविं पुराणम्'इति न्यायेन कवयश्च त ईश्वरा हरिहरब्रह्माणः । उच्छ्वसन्ति भूतान्यस्मिन्नित्युच्छ्वासः कल्पस्तदन्ते संहारेऽपि तेऽखिन्नाः कल्पान्तरजननोद्योगिनस्तेषां मुखे वागीशी । उक्तं च—'सरस्वतीवाग्बलमुत्तमोऽनिलः' इत्यादि । आख्यायिकाभिराख्यानैराकारो येषाम् । सर्वस्य हि शास्त्रागमसमधिगम्याः, न पुनः प्रत्यक्षलक्ष्याः । ते च वन्द्याः सर्वस्य ॥ १० ॥

कवीनामिति। वासवदत्ता कथा, वासवेन शक्रेण दत्ता च । कर्णः श्रवणं, राधेयश्च । कवीनां काव्यकर्तॄणां, द्रोणादीनां च ॥ ११ ॥

पदेत्यादि। पदानां सुप्तिङन्तानां बन्धः, प्रकृष्टा रचना । रीतिरित्यर्थः । स्वमण्डलावष्टम्भश्च । हारी हृद्यः हारयुक्तश्च । अहारीति वा । न कस्यचिदपि यो हरति । कृता वर्णानामक्षराणां क्रमेण भामहादिप्रदर्शितनीत्या स्थितिरवस्थानं यत्र, कृतयुगवद्वर्णानां द्विजादीनां क्रमेण मन्वादिस्मृतिकारप्रकाशितमार्गेण स्थितिः पालनं यस्मिन्सतीति च । भट्टारेति पूजावचनम् ॥ १२ ॥

अविनाशिनमित्यादि। अविनाशिनं प्रसिद्धम्, अनश्वरं च। अग्राम्यं वैदग्ध्ययुक्तम्, अग्रामभवं च । जातिः स्वभावोक्तिरूपोऽलंकारः । कोशः समुच्चयः,

विशुद्धजातिभिः कोशं रत्नैरिव सुभाषितैः ॥ १३ ॥
कीर्तिः प्रवरसेनस्य प्रयाता कुमुदोज्ज्वला ।
सागरस्य परं पारं कपिसेनेव सेतुना ॥ १४ ॥
सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः ।
सपताकैर्यशो लेभे भासो देवकुलैरिव ॥ १५ ॥
निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।
प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते ॥ १६ ॥
समुद्दीपितकंदर्पा कृतगौरीप्रसाधना ।

गजश्च । सुभाषितैः सूक्तिभिः, शोभनं च भाषितं प्रभावर्णनं येषां तैः ॥ १३ ॥

कीर्तिरित्यादि । प्रवरसेनः कश्चित्कविः प्रवे श्रुते रसो येषां ते प्रवरसा वानरास्तेषामिनः स्वामी । प्रवरा च सेना यस्य स सुग्रीवश्च । कुमुदवत्कैरववत् । यद्वा कुर्भूमिस्तस्या मुत्प्रहर्षस्तयेति, कुमुदेन वानरसेनापतिना च । सेतुः प्राकृतकाव्यग्रन्थः, सेतुश्च ॥ १४ ॥

सूत्रेत्यादि । सूत्रधारः पूर्वरङ्गस्य प्रवक्ता चार्चिक्यः, स्थपतिश्च । भूमिकाः पात्राणि रामाद्यनुकार्यावस्थाभूमयः, उपभोगनिमित्तान्युत्पत्तिस्थानानि । पताका अर्थप्रकृतिः । उक्तं च—'बीजं बिन्दुः पताका च प्रकरी कार्यमेव च । अर्थप्रकृतयो ह्येताः पञ्च सर्वप्रयोगगाः ॥' इति । 'यद्वृत्तं तु परार्थं स्यात्प्रधानस्योपकारकम् । प्रधानवच्च कल्पेत सा पताकेति कीर्त्यते ॥' वैजयन्ती च पताका ॥ १५ ॥

निर्गतास्विति । निर्गता उच्चारितमात्राः । आस्तां तावदर्थावगतिः, आपात एव गीतध्वनिवत्किमपि श्रोत्रहारिण्यः । यदुक्तम्—'अपर्यालोचितेऽप्यर्थे बन्धसौन्दर्यसंपदा । गीतवद्धृदयाह्लादं तद्विदां विदधाति यत् ॥ तत्काव्यम्' इत्यादि । तथा निर्गताः सर्वदेशप्रतीताः अन्यत्र निर्गता अभिनवोद्भिन्नाः । न वा कस्येत्यनेनैतदुक्तम् । आसतां तावत्काव्यतत्त्वविदः सहृदया विवेक्तारः, येऽपि शास्त्राप्रहितबुद्धयो दुर्दुरूढा मत्सरप्रायास्तेषामपि या हृदयमाह्लादयन्ति । तथा चोक्तम्—'असुणिअ परमन्थाण वि हरेइ वाआमणं कइम्माण । आणाणजकुवलअवणमलद्धगन्धाण वि सुहाइ ॥' इति । मधुराश्च ताः सान्द्राः सरसाः । अन्यत्र मधुना मकरन्देन किंजल्केन रसेन सान्द्राः सुगन्धयः ॥ १६ ॥

समुदित्यादि । बृहत्कथा कस्य न विस्मयाय । अपि तु सर्वस्यैव गर्वविनाशाय भवतीत्यर्थः । अद्भुतकथावर्णनाद्वाश्चर्याय । समुद्दीपितो वृद्धिं नीतः कंदर्पो यस्याम् । कामजननानां बहूनां वृत्तान्तानां वर्णनादुद्बोधितः स्मरो ययेति वा । काव्यसेवया हि शृङ्गाररसः समुद्भवति । तथा चोक्तम्—'ऋतुमाल्यालंकारप्रियजनगान्धर्वकाव्यसेवाभिः । उपवनगमनविहारैः शृङ्गाररसः समुद्भवति ॥' यद्वा समुद्दीपितः प्रकाशितः ख्यातिं नीतः कंदर्पो नरवाहनदत्तो यस्यामिति । स हि

हरलीलेव नो कस्य विस्मयाय बृहत्कथा ॥ १७ ॥
आढ्यराजकृतोत्साहैर्हृदयस्थैः स्मृतैरपि ॥
जिह्वान्तः कृष्यमाणेव न कवित्वे प्रवर्तते ॥ १८ ॥
तथापि नृपतेर्भक्त्याभीतो निर्वहणाकुलः ।
करोम्याख्यायिकाम्भोधौ जिह्वाप्लवनचापलम् ॥ १९ ॥
सुखप्रबोधललिता सुवर्णघटनोज्ज्वलैः ।
शब्दैराख्यायिका भाति शय्येव प्रतिपादकैः ॥ २० ॥
जयति ज्वलत्प्रतापज्वलनप्राकारकृतजगद्रक्षः ।

कामांश इत्यागमः । कृतं गौर्या विद्याभेदस्याराधनं यस्याम् । सा हि नरवाहनदत्तेनेशारूपाराधितेति तत्रोक्तम् । यद्वा गौरीं प्रति पूरयति गौरीप्रः । साधनं परिकरबन्धो यथाप्रस्तावो यस्याम् । गौरीप्रेरितेन हि हरेण तथा तस्यां परिकरबन्धः कृतो यथा सातीव पिप्रिये । हरलीलापि समुत्सहर्षा दग्धकामा च । कृतं गौर्याः प्रसाधनं मण्डनं यस्याम् । क्व कामं प्रति तादृग्द्वेषः, क्व च कान्तां प्रति प्रसाधनमिति कृत्वा विस्मयमाश्चर्यम् ॥ १७ ॥

आढ्येति । आढ्यराजः कश्चित्कविः । उत्साहो नृत्ते तालविशेषः । उदीर्यमाणगीत्याधारभूतपदोपचारात्काव्यमप्युत्साह इति केचित् । यत्र पूर्वं श्लोकेनार्थ उपक्षिप्यते, पश्चात्स एव गद्येन वितन्यते, मध्ये वृत्तनिबन्धश्च भवति, स परिसमाप्त्यर्थं उत्साह उच्यत इत्यन्ये । अपिः समुच्चये । यद्वा आढ्यराजहृदयस्था अप्यन्तर्जिह्वां नाकर्षयन्ति, तत्कथं त एव स्मृता इत्यपिशब्दार्थः ॥ १८ ॥

एवमनौद्धत्यमुक्त्वाह—**तथेत्यादि** । तथापीत्थं जानन्नपि जिह्वाप्लवनलक्षणं चापलं करोमि । यतो नृपतेर्भक्त्याहमभि इतः समन्ताद्युक्तः । निर्वहणे समाप्तावाकुलः । जिह्वा चाब्धावकालवातस्तत्र वहन्त्यां कश्चिद्यथाप्लवनरूपं चापलं करोति । अत्र पक्षे—अभीतोऽत्रस्तः । निर्वहणं पारप्राप्तिः । 'कृत्ये च' इति णत्वम् ॥ १९ ॥

सुखेत्यादि । सुखेन जायासंमितत्वेन हृदयाह्लादनपूर्वम्, न तु वेदेतिहासादिवत्, यः प्रबोधः प्रकृष्टं बोधनं धर्मादिसाधनव्युत्पत्तिः । उक्तं च—'कटुकौषधिवत्काव्यमविद्याव्याधिभेषजम् । आह्लादामृतवत्काव्यमविवेकगदापहम् ॥' इति । सुवर्णघटना शोभनाक्षररचना । प्रतिपादकैर्विवक्षिताभिधायकैः । शय्यापक्षे—सुखं यः प्रबोधः स्वापादुत्थानम् । सुवर्णघटना हेमयोजना । प्रतिपादकैः खट्वाया उन्नामकैः । तदा पादानां प्रतिच्छन्दाः प्रतिपादकाः पुरुषयन्त्रोत्थापिताः पादमुद्रास्तैः । अत्र च शोभनो वर्णोऽलक्तादिकृतः ॥ २० ॥

इदानीं यमुद्दिश्येयमाख्यायिका क्रियते तस्य 'तथापि नृपतेर्भक्त्या' इत्यनेन नृपतिशब्देन सामान्येन निर्देशं कृत्वा विशेषेणाह—**जयतीत्यादि** । ज्वलन्दीप्रतया-

सकलप्रणयिमनोरथसिद्धिश्रीपर्वतो हर्षः ॥ २१ ॥

एवमनुश्रूयते—पुरा किल भगवान्स्वलोकमधितिष्ठन्परमेष्ठी विकासिनि पद्मविष्टरे समुपविष्टः सुनासीरप्रमुखैर्गीर्वाणैः परिवृतो ब्रह्मोद्याः कथाः कुर्वन्नन्याश्च निरवद्या विद्यागोष्ठीर्भावयन्कदाचिदासांचक्रे । तथासीनं च तं त्रिभुवनप्रतीक्ष्यं मनुदक्षचाक्षुषप्रभृतयः प्रजापतयः सर्वे च सप्तर्षिपुरःसरा महर्षयः सिषेविरे । केचिदृचः स्तुतिचतुराः समुदचारयन् । केचिदपचितिभाञ्जि यजूंष्यपठन् । केचित्प्रशंसासामानि जगुः । अपरे विवृत-

प्रसरन्प्रताप एव ज्वलनस्तं प्राति पूरयति य आकारस्तेन कृता जगति रक्षा येन सः । सकलानां प्रणयिनां ये मनोरथास्तत्सिद्धौ श्रियां पर्वतो गिरिः । श्रियस्तत्र कूटीभूता इव स्थिता इति यावत् । यद्वा यथा पर्वतस्थः कश्चिद्दुरभिभवः, तद्वद्धर्षस्था श्रीरिति । अथ च श्रीपर्वताख्यो गिरिरीदृगेव । तथा च ज्वलत्प्रकृष्टतापो यो ज्वलनो जठराग्निः स एव निषेधकत्वात्प्राकारः सालस्तेन कृता मुक्तेर्विघ्नहेतुतया जगतो भूलोकस्य रक्षा येन सः । अन्यत्रोत्सादनं तद्यावत् । अन्ये तु—त्रिपुरदाहे यो विघ्नमकरोद्भूणेशस्तदा हरेण ज्वलत्प्रकृष्टतापो ज्वलनप्राकारो निर्मितः । तेन च तत्र रक्षा विधीयत इत्याहुः । ज्वलत्प्रतापो ज्वलनप्राकारश्च द्वौ मुद्रारूपौ मन्त्रविशेषौ स्तः, ताभ्यां कृतजगद्रक्ष इति केचित् । प्रणयिनः सिद्धिकामाः । हर्षः कथानायकः । इतरत्र हर्षकारितया हर्षः । सर्वत्र च परमार्थतो हर्ष एव जयति । तस्यैवाभिलषणीयत्वात्स एव काव्येन क्रियत इति ध्वनति ॥ २१ ॥

एवमिति। अनुश्रूयते पारम्पर्येणाकर्ण्यते । किलेत्यत एवागमसूचनाय । भगवानिति केवलनिर्देश उद्धुण्टनपरिहारार्थम् । ब्रह्मलोकमित्युक्ते सत्युत्कर्षदायिन्यात्मीयताप्रतिपत्तिर्न स्यादिति स्वग्रहणं साभिप्रायम् । अधितिष्ठन्बहुमानेन तद्योगक्षेमादिकमुद्वहन् । परमे पदे तिष्ठतीति परमेष्ठी । विकासिनीति नित्ययोग इनिः । विष्टरमासनम् । सुनासीर इन्द्रः । गिरः स्तुतिरूपा वर्णन्ति भजन्तीति गीर्वाणा देवाः । गीरेव बाणः शरो येषामिति । परिवृतश्चतुर्दिक्कं वृतः परिवलितः । तस्य चतुर्मुखत्वात् । ब्रह्म वदन्तीति ब्रह्मोद्याः । 'वदः सुपि क्यप्च' । ब्रह्मणा वेदेन, ब्रह्मणि परमात्मनि वा वेदितव्या ब्रह्मोद्याः । उक्तं च—'ब्रह्मोद्या सा कथा यस्यामुच्यते ब्रह्म शाश्वतम्' इति । सामान्यविशेषभावेन 'उष्ट्रासिकामासते' इतिवत् । ब्रह्मवदनरूपा वा कथास्तासां वक्ष्यमाणगोष्ठ्यभिप्रायेण प्राधान्यात्स्वयंकरणम् । निरवद्या दोषरहिताः तथा च वात्स्यायनः—'या गोष्ठी लोकविद्विष्टा या च स्वैरविसर्पिणी । परहिंसात्मिका या च न तामवतरेद्बुधः ॥ लोकचित्तानुवर्तिन्या क्रीडामात्रैककार्यया । गोष्ठ्या सह चरन्विद्वांल्लोकसिद्धिं नियच्छति ॥' समानविद्यावित्तशीलबुद्धिवयसामनुरूपैरालापैरेकत्रासनबन्धो गोष्ठी । प्रतीक्ष्यः पूज्यः । सम्य-

क्रतुक्रियातन्त्राम्मन्त्रान्व्याचचक्षिरे । विद्याविसंवादकृताश्च तत्र तेषामन्योन्यस्य विद्याविवादाः प्रादुरभवन् ।

अथातिरोषणः प्रकृत्या महातपा मुनिरत्रेस्तनयस्तारापतेर्भ्राता नाम्ना दुर्वासा द्वितीयेन मन्दपालनाम्ना मुनिना सह कलहायमानः साम गायन्क्रोधान्धो विस्वरमकरोत् । सर्वेषु च शापभयप्रतिपन्नमौनेषु मुनिष्वन्यालापलीलयावधीरयति कमलसंभवे भगवती कुमारी किंचिदुन्मुक्तबालभावे भूषितनवयौवने नवे वयसि वर्तमाना, गृहीतचामरप्रचलद्भुजलता पितामहमुपवीजयन्ती, निर्भर्त्सनताडनजातरागाभ्यामिव स्वभावारुणाभ्यां पादपल्लवाभ्यां समुद्भासमाना, शिष्यद्वयेनेव पदक्रममुखरेण नूपुरयुगलेन वाचालितचरणा, मदननगरतोरणस्तम्भविभ्रमं बिभ्राणा जङ्घाद्वितयम्, सलीलमुत्ककलहंसकुलकलालापप्रलापिनि मेखलादाम्नि विन्यस्तवामहस्तकिसलया, विद्वन्मानसनिवासलग्नेन गुणकलापेनेवांसावलम्बिना ब्रह्मसूत्रेण पवित्रीकृतकाया, भास्वन्मध्यनायकमनेकमुक्तानुयातमपवर्गमार्गमिव

गुदात्तादित्रैस्वर्यादिप्राधान्यादुदचारयन्नगुः । अपचितिः पूजा । सामानि जगुरिति साम्नां गानमेवोचितम् । विद्याविसंवादकृता इति, न तु मात्सर्यादिना । प्रादुरभवन्नित्यनौचित्यशङ्क्या तत्कर्तृत्वपरिहारः ।

प्रकृत्येति । अन्यथा ब्रह्मसंनिधानेन कथमीदृगाक्षेपः । कथमीदृशोऽवकाश इत्याह—**महातपा इति**।मुनिरित्यनेनास्य ज्ञानप्राधान्यात्तुल्यतोद्भासनमतीवापकारः । अत्रेस्तनय इति न केवलं महातपस्त्वेन यावदत्रितनयत्वेन ब्रह्मलोकप्राप्तिरस्य । ततस्तारापतेरित्यादिना तथाभूतपरमप्रजापतिसंबन्धयोग्यत्वमस्याख्यायते। द्वितीयेनेति तत्समत्वमुच्यते । कथं सामगानेऽप्यनवहित इत्याह—**क्रोधान्ध इति** । सर्वेष्वित्यादौ देवी सरस्वती श्रुत्वा जहासेति क्रियाप्रतिपत्तिरस्य मा भूदित्युत्तमप्रकृतित्वादन्येत्याद्युक्तम् । अन्येन सहालापलीलाकथाक्रीडया।**कुमारीति** । कुमारीत्वेनास्या हास्यादिकं नानुचितमिति दर्शयति । भूषितेत्यनेन दर्शनीयत्वमाह । **पितामहमिति** । सर्वप्राधान्यमनेनोक्तम् । निर्भर्त्सनताडनं तेन तदर्थं वा यत्ताडनं रोषाद्भ्रूमिहननं तद्वशाच्च जातरागाभ्यामिव पादपल्लवाभ्यामित्यनेनारुणत्वं सौकुमार्यं चाह । अतएव गाढताडनेन रक्तत्वमुत्प्रेक्षितम् । ताडितो वायं ताडितस्तत्तुल्यो रागो जातो ययोरिति व्याख्येयम्। पदक्रमं पादन्यासपरिपाटी। अन्यत्र च पदानि च क्रमश्च तत्पदक्रमम् । चरणौ पादौ चरणाश्च विशिष्टशाखापाठकता वाचालिताः क्षोभिता ययेति । उत्का उत्सुकाः । मेखलादाम्नि रशनागुणे । मानसं चित्तं, सरोविशेषश्च । गुणा अपि भास्वन्दीप्रो मध्यनायकः पदकं यत्र तत् । अथ च भास्वतो मध्यं

हारमुद्वहन्ती, वदनप्रविष्टसर्वविद्यालक्तकरसेनेव पाटलेन स्फुरता दशनच्छदेन विराजमाना, संक्रान्तकमलासनकृष्णाजिनप्रतिमां मधुरगीताकर्णनावतीर्णशशिहरिणामिव कपोलस्थलीं दधाना, तिर्यक्सावज्ञमुन्नमितैकभ्रूलता, श्रोत्रमेकं विस्वरश्रवणकलुषितं प्रक्षालयन्तीवापाङ्गनिर्गतेन लोचनाश्रुजलप्रवाहेणेतरश्रवणेन च विकसितसितसिन्धुवारमञ्जरीजुषा हसतेव प्रकटितविद्यामदा, श्रुतिप्रणयिभिः प्रणयैरिव कर्णावतंसकुसुममधुकरकुलैरुपास्यमाना, सूक्ष्मविमलेन प्रज्ञाप्रतानेनेवांशुकेनाच्छादितशरीरा, वाङ्मयमिव निर्मलं दिक्षु दशनज्योत्स्नालोकं विकिरन्ती देवी सरस्वती श्रुत्वा जहास।

दृष्ट्वा च तां तथाहसन्तीं स मुनिः 'आः पापकारिणि, दुर्गृहीतविद्यालवावलेपदुर्विदग्धे, मामुपहससि' इत्युक्त्वा शिरःकम्पशीर्यमाणबन्धविशरारोरुन्मिषत्पिङ्गलिम्नो जटाकलापस्य रोचिषा सिञ्चन्निव रोषदहनद्रवेण दश दिशः, कृतकालसंनिधानामिवान्धकारितललाटपट्टाष्टापदामन्तकान्तःपुरमण्डनपत्रभङ्गमकरिकां भ्रु-

---

तेन नयति सः [यदुक्तम्-'परिव्राज्योगयुक्तश्च शूरश्चाभिमुखे हतः। द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ॥' इति। मुक्ता मौक्तिकानि, मोक्षगामिनश्च। हारं मुक्ताकलापश्च, अपवर्गमपि। हारं हरसंबन्धिनं तत्प्रसादप्राप्यत्वात्। 'अलक्तकरसेनेव पाटेलन' इति वा पाठः। स्फुरतेति रोषात्। भगवतीकपोले शशिहरिणस्यैवावतारः संभाव्यत इति शशिपदम्। अत्र हि कपोले ब्रह्मकृष्णाजिनसंक्रान्तिः तत्र कामदसंभावना सामान्यहरिणस्यावतरणे। **कलुषितं प्रक्षालयन्तीवेति**। सलिलस्य क्षालनमेव युक्तमिति समुचितेयमुक्तिः। **श्रुतिप्रणयिभिरिति**। श्रूयते इति श्रुतिर्ध्वनिस्तया प्रणयः प्रसंशातिशयो येषां तैः। यद्वा श्रुती श्रोत्रे तत्कर्तृकः प्रणयः प्रार्थना मधुरध्वनित्वाद्येषां तैः कर्णसंबन्धैरिति तु व्याख्याने कर्णावतंसेत्यादिना पौनरुक्त्यमपरिहार्यम्। श्रुतिर्वेदोऽपि। सूक्ष्मार्थदर्शितत्वात्सूक्ष्मस्तीक्ष्णः, विमलस्तत्त्वग्राही। अन्यत्र सूक्ष्मं तनु, विमलं शुक्लम्। प्रतानः प्रसारः।

दृष्ट्वेत्यादौ स मुनिस्तां तथा हसन्तीं दृष्ट्वा शापजलं जग्राहेति संबन्धः। तथेति पादताडनभ्रूक्षेपादिपूर्वम्। स मुनिरिति प्राग्वर्णितस्वरूपः। आः इत्यक्षमायाम्। मामिति योऽहं त्रैलोक्यप्रख्यातरोषणस्तमेवेति। समीप एव विशीर्यते तच्छीलो विशरारुरितश्चामुतश्च। अतएवोन्मिषत्पिङ्गलिमारोचिषा दीप्त्या। रोषदहनो द्रवो रस इव, द्रवत्वं च यद्यपि विशिष्टस्यैवं तेजसः सुवर्णादि संभवति, तथाप्यत्रोपचारात्सादृश्यम्। कालः कृष्णो गुणो यमश्च। अन्धकारितं संकुचितत्वाददर्शनीयमेव चकितं ललाटपट्टमेवाष्टापदम्। यथा प्रतिपङ्क्ति अष्टौ पदान्यस्येत्यष्टापदं चतुरङ्गफलकम्।

कुटिमाबभ्रन्, अतिलोहितेन चक्षुषामर्षदेवतायै स्वरुधिरोपहारमिव प्रयच्छन्, निर्दयदष्टदशनच्छदभयपलायमानामिव वाचं रुन्धन्दन्तांशुच्छलेन, अंसावस्रंसिनः शापशासनपट्टस्येव ग्रथ्नन्ग्रन्थिमन्यथा कृष्णाजिनस्य, स्वेदकणप्रतिबिम्बितैः शापशङ्काशरणागतैरिव सुरासुरमुनिभिः प्रतिपन्नसर्वावयवः, कोपकम्पतरलिताङ्गुलिना करेण प्रसादनलग्नामक्षरमालामिवाक्षमालामाक्षिप्य कामण्डलवेन वारिणा समुपस्पृश्य शापजलं जग्राह ।

अत्रान्तरे स्वयंभुवोऽभ्याशे समुपविष्टा देवी मूर्तिमती पीयूषफेनपटलपाण्डरं कल्पद्रुमदुकूलवल्कलं वसाना, बिसतन्तुमयेनांशुकेनोन्नतस्तनमध्यबद्धगात्रिकाग्रन्थिः, तपोबलनिर्जितत्रिभुवनजयपताकाभिरिव तिसृभिर्भस्मपुण्ड्राजिभिर्विराजिततललाटाजिरा, स्कन्धावलम्बिना सुधाफेनधवलेन तपःप्रभावकुण्डलीकृतेन गङ्गास्रोतसेव योगपट्टकेण विरचितवैकक्ष्यका, सव्येन ब्रह्मोत्पत्तिपुण्डरीकमुकुलमिव स्फटिकमण्डलुं करेण कलयन्ती, दक्षिणमक्षमालाकृतपरिक्षेपं कम्बुनिर्मितोर्मिकादन्तुरितं तर्जनतरङ्गिततर्जनीकमुत्क्षिपन्ती

अत एवानेन भ्रूरसमुन्नमनमव्यक्तीकृतरेखवत्तया विस्पष्टव्यलीकमेतत् । 'ललाटमुपगीयते । भ्रुवोर्मूलसमुत्क्षेपाद्भ्रुकुटिं परिचक्षते' । सुब्शब्दः सुतरां नैरपेक्ष्यसूचनाय वा चोभयसंबन्धः । **अंसावस्रंसिन इति** । संरम्भाच्छासनपट्टः शुक्लत्वाल्लिपिकाण्यर्याच्च सितासितवर्णसंवलितमध्यः पर्यन्तशुक्लश्च भवति । अत एव ते बिन्दुचित्रत्वादुपान्तशुक्लत्वाच्च कृष्णाजिनमुत्प्रेक्षते । यथा शासनपट्टे सति क्वचिद्ग्रामादावधिकारो भवति, तद्वच्च जनसमूहः प्रार्थनां करोति । सहस्तपादादिके सर्वस्मिन्नङ्गे गलति । कोपेत्यादौ कम्पग्रहणं रोषः । शरीरं बाधत इति यावत् । संनिवेशसाधर्म्यादुक्तम्—**अक्षरमालामिवेति** । सरस्वतीसंबन्धतया चोक्तम्—**प्रसादनलग्नामिति** । विक्षिप्यन्ते । यश्च विरुद्धपक्षः प्रसादयति स विक्षिप्यते तिरस्क्रियते । कामण्डलवेन मुनिकरकभवेन । समुपस्पृश्याचम्य ।

अत्रान्तर इत्यादौ मूर्तैश्चतुर्भिर्वेदैः सह सावित्री समुत्तस्थाविति संबन्धः । अभ्याशे समीपे । गात्रिकाग्रन्थिर्ग्रन्थिविशेषः स्त्रीणामुत्तरीयस्य स्तनोद्देशे भवति । तिलकं पुण्ड्रकं स्कन्धावंसौ वायुस्थानानि च स्कन्धाः । फेनैस्तद्वच्च धवलेन । 'तिर्यग्वक्षसि विक्षिप्तं वैकक्ष्यकमुदाहृतम्' । सव्येन वामेन । पुण्डरीकमुकुलं मुकुलितं पद्म । कलयन्ती क्षिपन्ती, धारयन्ती वा । परिक्षेपः परिवलनम् । कम्बुः शङ्खः । ऊर्मिका वालिका । दन्तुर इव दन्तुरो व्याप्तस्तम् । तर्जनं निर्भर्त्सनम् ।

करम्, 'आः पाप, क्रोधोपहत, दुरात्मन्, अज्ञ, अनात्मज्ञ, ब्रह्मबन्धो, मुनिखेटापसद, निराकृत, कथमात्मस्खलितविलक्षः सुरासुरमुनिमनुजवृन्दवन्दनीयां त्रिभुवनमातरं भगवतीं सरस्वतीं शप्तुमभिलषसि' इत्यभिदधाना, रोषविमुक्तवेत्रासनैरोंकारमुखरितमुखैरुत्क्षेपदोलायमानजटाभारभरितदिग्भिः परिकरबन्धभ्रमितकृष्णाजिनाटोपच्छायाश्यामायमानदिवसैरमर्षनिःश्वासदोलाप्रेङ्खोलितब्रह्मलोकैः सोमरसमिव स्वेदविसरव्याजेन स्रवद्भिरग्निहोत्रपवित्रभस्मसेरललाटैः कुशतन्तुचारुचामरचीरचीवरिभिराषाढिभिः प्रहरणीकृतकमण्डलुमण्डलैर्मूर्तैश्चतुर्भिर्वेदैः सह बृसीमपहाय सावित्री समुत्तस्थौ ।

ततो 'मर्षय भगवन्, अभूमिरेषा शापस्य' इत्यनुनाथ्यमानोऽपि विबुधैः, 'उपाध्याय, स्खलितमेकं क्षमस्व' इति बद्धाञ्जलिपुटैः प्रसाद्यमानोऽपि स्वशिष्यैः, 'पुत्र, मा कृथास्तपसः प्रत्यूहम्' इति निवार्यमाणोऽप्यत्रिणा, रोषावेशविवशो दुर्वासाः 'दुर्विनीते, व्यपनयामि ते विद्याजनितामुन्नतिमिमाम् । अधस्ताद्गच्छ मर्त्यलोकम्' इत्युक्त्वा तच्छापोदकं विससर्ज । प्रतिशापदानोद्यतां सावित्रीम् 'सखि, संहर रोषम् । असंस्कृतमतयोऽपि जात्यैव द्विजन्मानो माननीयाः' इत्यभिदधाना सरस्वत्येव न्यवारयत् ।

तरङ्गिता तर्जिता चलिता । तर्जनी प्रदेशिन्यङ्गुष्ठनिकटाङ्गुलिः । क्रोधोपहतेत्यात्मविनाशायैव ते क्रोध इत्युक्तं भवति । ब्रह्मबन्धो निकृष्टब्राह्मण । अपसदो नीचः । निराकृतोऽस्वाध्यायः । विलक्षो लज्जितः । सुरासुरमनुजाश्च परस्परविरुद्धानुष्ठानाः । अत्र पुनरीदृशामपि न विप्रतिपत्तिरिति भावः । **अभिलषसीति** । इच्छामात्रकमपीदं महत्साहसमित्यर्थः । ॐकार एव मुखरितं मुखं येषां तैः । परिकरबन्धः पर्यङ्कबन्धः । स चोत्थितस्यापि संरम्भभाजो भवति । आटोपो वक्षःप्रदेशे श्यामायमानो रात्रिरिवाचरद्दिवसा यैर्हेतुभिरित्यर्थः । अमर्षनिःश्वासैर्दोलावत्प्रेङ्खोलितश्चलितो ब्रह्मलोको यैः । कुशतन्तूनां चामरमिव चामरं गुच्छः । कुशतन्तुचामरं दर्भपिञ्जूलम्, चीरचीवरं वृक्षत्वग्वस्त्रं ते विद्येते येषां तैः । 'आषाढसंज्ञो दण्डस्तु पालाशो व्रतचारिणाम्' ।

तत इत्यादौ शापोदकं जग्राहेति विससर्जेति संबन्धः । मर्षय क्षमस्व । अनुनाथ्यमानः प्रार्थ्यमानः । प्रत्यूहं विघ्नम् । **उन्नतिमिति** । उच्चदेशस्थश्चाधस्तान्नीयत इति समुचितेयमुक्तिः । असंस्कृतमतयः संस्काररहिताः ।

अथ तां तथाशप्तां सरस्वतीं दृष्ट्वा पितामहो भगवान्कमलोत्पत्तिलग्नमृणालसूत्रामिव धवलयज्ञोपवीतिनीं तनुमुद्वहन्, उद्गच्छदच्छाङ्गुलीयमरकतमयूखलताकलापेन त्रिभुवनोपप्लवप्रशमकुशापीडधारिणेव दक्षिणेन करेण निवार्य शापकलकलमतिविमलदीर्घैर्भाविकृतयुगारम्भसूत्रपातमिव दिक्षु पातयन्, दशनकिरणैः सरस्वतीप्रस्थानमङ्गलपटहेनेव पूरयन्नाशाः, स्वरेण सुधीरमुवाच—'ब्रह्मन्, न खलु साधुसेवितोऽयं पन्थाः येनासि प्रवृत्तः। निहन्त्येष परस्तात्। उद्दामप्रसृतेन्द्रियाश्वसमुत्थापितं हि रजः कलुषयति दृष्टिमनक्षजिताम्। कियदूरं वा चक्षुरीक्षते। विशुद्धया हि धिया पश्यन्ति कृतबुद्धयः सर्वानर्थानसतः सतो वा। निसर्गविरोधिनी चेयं पयःपावकयोरिव धर्मक्रोधयोरेकत्र वृत्तिः। आलोकमपहाय कथं तमसि निमज्जसि। क्षमा हि मूलं सर्वतपसाम्। परदोषदर्शनदक्षा दृष्टिरिव कुपिता बुद्धिर्न त आत्मरागदोषं पश्यति। क्व महातपोभारवैवधिकता। क्व पुरोभागित्वम्। अतिरोषणश्चक्षुष्मानन्ध एव जनः। नहि कोपकलुषिता विमृशति मतिः कर्तव्यमकर्तव्यं वा। कुपितस्य प्रथममन्धकारीभवति विद्या, ततो भ्रुकुटिः। आदाविन्द्रियाणि रागः समास्कन्दति, चरमं चक्षुः।

अथेत्यादौ भगवान्पितामहः सुधीरमुवाचेति संबन्धः। **तथेति**। तेन प्रकारेण। निरपराधां सरस्वतीमित्यर्थः। **धवलयज्ञोपवीतिनीमिति**। प्रशंसायां नित्ययोगे वा मत्वर्थीयः। 'बिसकिसलयच्छेदपाथेयवन्तः' इतिवत्। अन्यथा कर्मधारये कृते मत्वर्थीय एकबुद्ध्यनुमितौ बहुव्रीहौ प्रतिपत्तिर्भवतीति। इतरत्र तु बुद्धिद्वयमिति लघुत्वात्प्रक्रमस्येत्युक्तम्। उद्गच्छन्नच्छाङ्गुलीयमरकतस्य मयूखलता कलापो यस्य तेन करेण। आपीडः समूहः। पातं विन्यासम्। पातयन्कुर्वन्। अत्र हि धात्वर्थगतानुष्ठानमात्रवृत्तिः क्रिया। यथा-'संवस्ते क्षालिते वस्त्रे' इति। पन्था व्यवहारः, मार्गश्च। निहन्ति पातयति। प्रसृतानि गन्तुं प्रवृत्तानि, प्रसृता च जङ्घा। रजो रागः, धूलिश्च। कलुषयति कार्याकार्यदर्शनासमर्थां करोति। दृष्टिं बुद्धिम्, नेत्रं च। अक्षाणीन्द्रियाणि, रथाङ्गं चाक्षः। तेन च रथो लक्ष्यते। कृतबुद्धयः संस्कृतमतयः। असदविद्यमानम्। निसर्गः स्वभावः। आलोको विवेकः, प्रकाशश्च। तमः, अज्ञानमपि। दोषाः, सव्यमण्डलत्वादीनि च। कुपिता कुद्धा, धातुवैषम्यदूषिता च। **आत्मरागदोषमिति**। आत्मभूतगुणदर्शनम्, लौहित्यलक्षणं च विकारम्, 'वोढा भारस्य धीमद्भिर्जनैर्वैवधिकः स्मृतः। दोषैकग्राहिहृदयः पुरोभागी निगद्यते॥'

आरम्भे तपो गलति, पश्चात्स्वेदसलिलम् । पूर्वमयशः स्फुरति, अनन्तरमधरः । कथं लोकविनाशाय ते विषपादपस्येव जटावल्कलानि जातानि । अनुचिता खल्वस्य मुनिवेषस्य हारयष्टिरिव वृत्तमुक्ता चित्तवृत्तिः । शैलूष इव वृथा वहसि कृत्रिममुपशमशून्येन चेतसा तामसाकल्पम् । अल्पमपि न ते पश्यामि कुशलजातम् । अनेनातिलघिम्नाद्याप्युपर्येव प्लवसे ज्ञानोदन्वतः । न खल्वनेऽमूकाः एडा जडा वा सर्व एते महर्षयः । रोषदोषनिषद्ये स्वहृदये निग्राह्ये किमर्थमसि निगृहीतवाननागसं सरस्वतीम् । एतानि तान्यात्मप्रमादस्खलितवैलक्ष्याणि, यैर्याप्यतां यात्यविदग्धो जनः' इत्युक्त्वा पुनराह—'वत्से सरस्वति, विषादं मा गाः । एषा त्वामनुयास्यति सावित्री । विनोदयिष्यति चास्मद्विरहदुःखिताम् । आत्मजमुखकमलावलोकनावधिश्च ते शापोऽयं भविष्यति' इति । एतावदभिधाय विसर्जितसुरासुरमुनिमनुजमण्डलः ससंभ्रमोपगतनारदस्कन्धविन्यस्तहस्तः समुचिताह्निककरणायोदतिष्ठत् । सरस्वत्यपि शप्ता किंचिदधोमुखी धवलकृष्णशारां कृष्णाजिनलेखामिव दृष्टिमुरसि पातयन्ती सुरभिनिःश्वासपरिमललग्नैर्मूर्तैः शापाक्षरैरिव षट्चरणचक्रैराकृष्यमाणा शापशोकशिथिलितहस्ताधोमुखीभूतेनोपदिश्यमानमर्त्यलोकावतरणमार्गेव नखमयूखजालकेन

रागोऽभूतगुणादिनन्दनम्, रक्तता च । जटाः शिखाः, मूलानि वल्कलानि मुनिवस्त्राणि, त्वचश्च । वृत्तमुक्ता शीलेन त्यक्ता, परिवर्तुलमौक्तिका च । 'जायोपजीवी हि जनः शैलूषः कथितो बुधैः' । आकल्पो वेषः । जातं प्रकारः । अतिलघिमानुपादेयता तुच्छतमम् । उपर्येवेत्यन्तःप्रवेशाभावात् । लघुश्च जलोपरि प्लवते । 'कथिता अनेऽमूकाः श्रोतुं वक्तुं च खलु न ये शक्ताः । एडास्तु श्रुतिहीना जडास्तु मूर्खा बुधैः प्रोक्ताः' ॥ रोष एव दोषस्तस्य निषद्या नियमेनावस्थितिर्यत्र तस्मिन्स्वहृदये ते । यद्वा रोषदोषस्य निषद्या आपणत्वं तस्यामन्त्रणम् हे रोषदोषनिषद्ये इति व्याख्येयम् । निगृहीतवान्प्राप्तवान् । 'आगः पापापराधयोः' । वैलक्ष्यं लज्जितम् । याप्यो गर्ह्यः । **पुनराहेति** । अविश्रान्तेऽप्युक्तिक्रमे पुनरित्युपादानं वाच्यतापरिहाराय । वत्से इति प्रसादाविष्करणार्थम् । **एषेति** । या तवैव स्निग्धा । विनोदयिष्यति सुखयिष्यति । सरस्वतीत्यादौ सरस्वत्यपि शप्ता गृहमगादिति संबन्धः । शारशबलां धवलकृष्णामित्येव वक्तव्ये शारग्रहणं संवलितवर्णद्वयप्रतीत्यर्थम् । **अधोमुखीभूतेनेति** । योऽधिकरणवशादनिष्टमुपदिशति

नूपुरव्याहाराहूतैर्भवनकलहंसकुलैर्ब्रह्मलोकनिवासिहृदयैरिवानुगम्यमाना समं सावित्र्या गृहमगात्।

अत्रान्तरे सरस्त्यवतरणवार्तामिव कथयितुं मध्यमं लोकमवततारांशुमाली। क्रमेण च मन्दायमाने मुकुलितबिसिनीविसरव्यसनविषण्णसरसि वासरे, मधुमदमुदितकामिनीकोपकुटिलकटाक्षक्षिप्यमाण इव क्षेपीयः क्षितिधरशिखरमवतरति तरुणतरकपिलपनलोहिते लोकैकचक्षुषि भगवति, प्रस्रुतमुखमाहेयीयूथक्षरत्क्षीरधाराधवलितेष्वासन्नचन्द्रोदयोद्दामक्षीरोदलहरीक्षालितेष्विव दिव्याश्रमोपशल्येष्वपराह्णप्रचारचलिते, चामरिणि चामीकरतटताडनरणितरदने रदति सुरस्रवन्तीरोधांसि स्वैरमैरावते, प्रस्रुतानेकविद्याधराभिसारिकासहस्रचरणालक्तकरसानुलिप्त इव प्रकटयति च तारापथे पाटलताम्, तारापथप्रस्थितसिद्धदत्तदिनकरास्तमयार्घ्यावर्जिते रञ्जितककुभि, कुसुम्भभासि स्रवति पिनाकिप्रणतिमुदितसंध्यास्वेदसलिल इव रक्तचन्दनद्रवे, वन्दारुमुनिवृन्दारकवृन्दवध्यमानसंध्याञ्जलिवने, ब्रह्मोत्पत्तिकमलसेवागतसकलकमलाकर इव राजति ब्रह्मलोके, समुच्चारिततृतीयसवनब्रह्मणि ब्रह्मणि, ज्वलितवैतानज्वलनज्वालाजटालाजिरेष्वारब्धधर्मसाधनशिविरनीराजनेष्विव सप्तर्षिमन्दिरेष्वघमर्षणमुषितकिल्बिषविषगदो-

---

स लज्जादिनावश्यमधोमुखी भवति। जालकं समूहः। व्याहार उक्तिः।

मध्यमं लोकं भूमिम्। अंशुमाली रविः। क्रमेणेत्यादावस्मिन्सति सावित्री सरस्वतीमवादीदिति संबन्धः। विसरशब्द औणादिकः षण्डपर्यायः। मुदिताः संजातमन्मथाः। कामिन्यः शृङ्गारिण्यः। संभोगान्तरायकारी कथमयमद्यापि नास्तमेतीत्यतः कोपः। क्षिप्यमाणश्चातित्वरितं पतति। क्षेपीयस्तूर्णतरम्। लपनं वदनम्। लोकेत्यादिना संभोगविघ्नकारित्वमेव प्रकाश्यते। माहेयी गौः। उद्दामः प्रवृद्धिं गतः। उपशल्यं समीपम्। चामीकरं सुवर्णम्। रदना दन्ताः। रदति विलिखति। सुरस्रवन्ती गङ्गा। रोधस्तटम्। स्वैरं स्वेच्छम्। 'या दूतिका गमनकालमपाहरन्ती सोढुं स्मरज्वरभरार्तिपिपासितेव। निर्याति वल्लभजनाधरपानलोभात्सा कथ्यते कविवरैरभिसारिकेति॥' तारापथो नभः। आवर्जिते प्रकीर्णे। ककुभो दिशः। कुसुम्भं पङ्कम्। रक्तचन्दनद्रवे स्रवति सतीति योजना। वन्दारु वन्दनशीलम्। वृन्दारकशब्दः प्रशंसायाम्। सवनं प्रातर्मध्याह्ने सायं च सोमयागैकदेशः स्नानमित्यन्ये। ब्रह्म वेदः। वैतानो यज्ञभवः। जटालानि व्याप्तानि। अजिराण्यङ्गनानि। आरब्धे धर्मसाधने शिबिरे पुण्योपकरस्कन्धावारे नीराजनाख्यं शान्तिकर्म येषु। धर्मोपकरणविषये मा दोषाः प्रादुरभवन्निति। 'शमनं सर्वपापानां जप्यं त्रिष्वघ-

ह्लाघलघुषु यतिषु संध्योपासनासीनतपस्विपङ्क्तिपूतपुलिने प्लवमान-नलिनयोनियानहंसहासदन्तुरितोर्मिणि मन्दाकिनीजले, जलदेवतातपत्रे पत्ररथकुलकलत्रान्तःपुरसौधे, निजमधुमधुरामोदिनि कृतमधुपमुदि मुमुदिषमाणे कुमुदवने, दिवसावसानताम्यत्तामरसमधुरमधुसपीतिप्रीते सुषुप्सति मृदुमृणालकाण्डकण्डूयनकुण्डलितकंधरे धुतपक्षराजिवीजितराजीवसरसि राजहंसयूथे, तटलताकुसुमधूलिधूसरितसरिति सिद्धपुरपुरंध्रिधम्मिल्लमल्लिकागन्धग्राहिणि सायंतने तनीयसि निशानिःश्वासनिभे नभस्वति, संकोचोद्यदुच्चकेसरकोटिसंकटकुशेशयकोशकोटरकुटीशायिनि षट्चरणचक्रे, नृत्तोद्धूतधूर्जटिजटाटवीकुटजकुड्मलनिकरनिभे नभस्थलं स्तबकयति तारागणे, संध्यानुबन्धताम्रे परिणमत्तालफलत्वक्त्विषि कालमेघमेदुरे, मेदिनीं मीलयति नववयसि तमसि तरुणतरतिमिरपटलपाटनपटीयसि समुन्मिषति यामिनीकामिनीकर्णपूरचम्पककलिकाकदम्बके प्रदीपप्रकरे, प्रतनुतुहिनकिरणकिरणलावण्यालोकपाण्डुन्याश्यानीलनीरमुक्तकालिन्दीकूलबालपुलिनायमाने शातक्रतवे, क्र-

---

मर्षणम्' । गदो रोगः । उल्लाघं स्वस्थताकरम् । यतयश्चतुर्थाश्रमिणः । सद्यो जलल्यक्तं तटं पुलिनम् । नलिनयोनिर्ब्रह्मा । हंसानां हासः शौक्ल्यं हंसा एव वा शुक्लतया हासः । दन्तुरा एव दन्तुरिताः । ये च सहासास्ते लक्ष्यमाणदन्तद्वया दन्तुरा इव दृश्यन्ते । आतपत्रं छत्रम् । पत्ररथाः पक्षिणः । कलत्रं दाराः । मधु मकरन्दः, मद्यं च । मधुपा भ्रमराः, मद्यपाश्च । मुमुदिषमाणे विचकिसिषति । अन्यत्रामोदितुमिच्छति । प्रारिप्स्यमानगीतादिगोष्ठीबन्ध इति यावत् । 'मद्याः क्रोशन्ति' इतिवत् । **ताम्यदिति** । ताम्यन्ति, न तु तान्तानि, प्रदोषस्य न तावत्प्रवृत्तत्वात् । मधु, मद्यमपि । सपीतिस्तु सहपानम् । अनेन तु प्रेमातिशय आवेद्यते । सुषुप्सति निद्रासति । **मृद्धिति** । कण्डूयनं विक्रियाविशेषम् । कुण्डलिता चक्रीकृता । राजीवं पद्मम् । राजहंसा इत्यत्रैकशेषः । तटशब्दः प्रत्यासत्त्युपलक्षणार्थः । पुरंध्रिरुत्तममहिला । धम्मिलाः संयताः कचाः । मल्लिका भूपदी । एषा च सायमेवोन्मिषति । सायंतने दिनान्तभवे । कोशः कुड्मलम् । कोटरमभ्यन्तरम् । कुटी गेहम् । शयनमत्र विश्रमणम्, न तु स्वापः । पौनरुक्त्यापत्तेः अटवीति विवक्षितम् । तत्रैवाकृत्रिमकुसुमसंबन्धात् । कुटजं गिरिमल्लिका । कुड्मलं कलिका । निकरः समूहः । अनुबन्धः संस्कारः । परिणमज्जरठीभवत् । तालस्तृणराजः । मेदुरं घनम् । मीलयति स्थगयति । नववयसि प्रत्यग्रे । चम्पको हेमपुष्पकः । आश्यानमीषच्छुष्कम् । नीरं जलम् । कालिन्दी यमुना । नीलिमाभिप्रायेणैतत्पदम् । यस्तटभागो वारिणा त्यक्तस्तत्पुलिनम् । कूलं ततोऽन्यत् । क्रशयति तनूकुर्वति ।

शयति तिमिरमाशामुखे खमुचि मेचकितविकचिलकुवलयसरसि शशधरकरनिकरकचग्रहाविले विलीयमाने मानिनीमनसीव शर्वरीशबरीचिकुरचये चापपक्षत्विषि तमस्युदिते, भगवत्युदयगिरिशिखरकटककुहरहरिखरनखरनिवहहेतिनिहतनिजहरिणगलितरुधिरनिचयनिचितमिव लोहितं वपुरुदयरागधरमधरमिव विभावरीवध्वा धारयति श्वेतभानौ, अचलद्युतचन्द्रकान्तजलधाराधौत इव ध्वस्ते ध्वान्ते, गोलोकगलितदुग्धविसरवाहिनि दन्तमयमकरमुखमहाप्रणाल इवापूरयितुं प्रवृत्ते पयोधिमिन्दुमण्डले, स्पष्टे प्रदोषसमये सावित्री शून्यहृदयामिव किमपि ध्यायन्तीं सास्रां सरस्वतीमवादीत्—'सखि, त्रिभुवनोपदेशदानदक्षायास्तव पुरो जिह्वा जिह्वेति मे जल्पन्ती । जानास्येव यादृश्यो विसंस्थुला गुणवत्यपि जने दुर्जनवन्निर्दाक्षिण्याः क्षणभङ्गिन्यो दुरतिक्रमणीया न रमणीया दैवस्य वामा वृत्तयः । निष्कारणा च निकारकणिकापि कलुषयति मनस्विनोऽपि मानसमसदृशजनादापतन्ती । अनवरतनयनजलसिच्यमानश्च तरुरिव विपल्लवोऽपि सहस्रधा प्ररोहति । अतिसुकुमारं च जनं संतापपरमाणवो मालतीकुसुममिव म्लानिमानयन्ति । महतां चोपरि निपतन्नणुरपि सृणिरिव करिणां क्लेशः कदर्थनायालम् । सहजस्नेहपाशग्रन्थिबन्धनाश्च बा-

खमुचि त्यक्ताकाशे । भूभागमवलम्बमान इत्यर्थः । मेचकितं निर्विभागतां नीतम् । शशधरकरैः स्वीकारेण करम्बितेऽत एव क्षयं गच्छति । अन्यत्र चन्द्ररश्मीनां धारणेन सेवनेन किंकर्तव्यतामूढ एवमधिगलत्यार्द्रतां भजमाने । केशपाशपक्षे तु विस्रंसमाने । चापः किकीदिविः पक्षी । हरिः सिंहः । नखरा नखाः । हेतिरायुधम् । विभावरी रात्रिः । श्वेतभानुश्चन्द्रः । अचलोऽर्थादुदयाचलः, गोलोको रश्मिसमूहो वा मकरमुखमिव मुखमग्रमस्येति समासः । विसंस्थुला निर्मर्यादाः । दुर्जनवन्निर्दाक्षिण्याः क्रूराः । क्षणभङ्गिन्य इत्याश्वासनगर्भेयमुक्तिः । वामाश्च स्त्रिय ईदृश्य एव । निकारः परिभवः । कणिका लेशः, शर्करिका च । कलुषयति दूषयति । कालुष्यं नयति च । मानसं चेतः, सरश्च । अनवरतमश्रुणा सिच्यमानः । अनवरतं घटसारणीप्रणालादिना नयनं प्रापणं यस्य तादृशा जलेनोक्ष्यमाणश्च । विपल्लव आपल्लेशः, विगतपल्लवश्च । प्ररोहति स्थिरीभवति । तरुपक्षे प्ररोहा विद्यन्ते यस्य स प्ररोहः, स इवाचरति प्ररोहतीति व्याख्या । संतापः खेदः, ऊष्मा च । मालतीकुसुमं सुमनःपुष्पमतिसुकुमारम् । महान्त उत्तमाः द्राघीयांसश्च । सृणिरङ्कुशः । मातरोऽपि जन्मभूमयः । दारुणो विषमः, काष्ठस्य च । क्रकचः कर-

न्धवभूता दुस्त्यजा जन्मभूमयः । दारयति दारुणः क्रकचपात इव हृदयं संस्तुतजनविरहः । सा नार्हस्येवं भवितुम् । अभूमिः खल्वसि दुःखक्ष्वेडाङ्कुरप्रसवानाम् । अपि च पुराकृते कर्मणि बलवति शुभेऽशुभे वा फलकृति तिष्ठत्यधिष्ठातरि प्रष्टे पृष्टतश्च कोऽवसरो विदुषि, शुचाम् । इदं च ते त्रिभुवनमङ्गलैककमलममङ्गलभूताः कथमिव मुखमपवित्रयन्त्यश्रुबिन्दवः । तदलम् । अधुना कथय कतमं भुवो भागमलंकर्तुमिच्छसि । कस्मिन्नवतितीर्षति ते पुण्यभाजि प्रदेशे हृदयम् । कानि वा तीर्थान्यनुग्रहीतुमभिलषसि । केषु वा धन्येषु तपोवनधामसु तपस्यन्ती स्थातुमिच्छसि । सज्जोऽयमुपचरणचतुरः सहपांसुक्रीडापरिचयपेशलः प्रेयान्सखीजनः क्षितितलावतरणाय । अनन्यशरणा चाद्यैव प्रभृति प्रतिपद्यस्व मनसा वाचा क्रियया च सर्वविद्याविधातारं दातारं च श्वःश्रेयसस्य चरणरजःपवित्रितत्रिदशासुरं सुधासूतिकलिकाकल्पितकर्णावतंसं देवदेवं त्रिभुवनगुरुं त्र्यम्बकम् । अल्पीयसैव कालेन स ते शापशोकविरतिं वितरिष्यति' इति ।

एवमुक्ता मुक्तमुक्ताफलधवललोचनजललवा सरस्वती प्रत्यवादीत्—'प्रियसखि, त्वया सह विचरन्त्या न मे कांचिदपि पीडामुत्पादयिष्यति ब्रह्मलोकविरहः शापशोको वा । केवलं कमलासनसेवासुखमार्द्रयति मे हृदयम् । अपि च त्वमेव वेत्सि मे भुवि धर्मधामानि समाधिसाधनानि योगयोग्यानि च स्थानानि स्थातुम्, इत्येवमभिधाय विरराम । रणरणकोपनीतप्रजागरा चानिमीलितलोचनैव तां निशामनयत् ।

पत्रम्, हृदयं चित्तम्, मध्यं च । संस्तुतः परिचितः । **सेति** । सर्वनामपदं जानासीत्यादि पूर्वोक्तार्थगर्भीकारेण । अभूमिरस्थानम्, अक्षेत्रं च । क्ष्वेडो विषम् । **शुभेऽशुभे वेत्यादि** । सप्रतिपक्षा लोकोक्तिरियम् । 'अव्युत्पन्नमतिः कृतेन न सता नैवासताप्याकुलः', 'गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः' इत्यादिवत् । अधिष्ठातरि स्वामिनि । प्रष्टेऽप्रगामिनि । अपवित्रतां नयन्ति, न तु शोभां त्याजयन्ति । धामसु स्थानेषु । तपस्यन्ती तपश्चरन्ती । सज्जः प्रगुणः । आज्ञाकार्ययमिति दृष्टस्वरूपः । निःसामान्यविस्रम्भभाजनतामभिव्यनक्ति सखीजनशब्दः । श्वःश्रेयसस्य कल्याणस्य दातारम् । सुधासूतिश्चन्द्रः । कलिका तरिका । शापविरतिर्ब्रह्मणैवोक्ता । अतस्तत्र किमन्यापेक्षयेत्याशङ्क्याह—**अल्पीयसैव कालेनेति** ।

आर्द्रयति स्नेहयति । धर्मधामानि मध्यदेशादीनि । समाधिश्चित्तैकाग्र्यम् ।

अपरेद्युरुदिते भगवति त्रिभुवनशेखरे खणखणायमानस्खलत्खलीनक्षतनिजतुरगमुखक्षिप्तेन क्षतजेनेव पाटलितवपुष्युदयाचलचूडामणौ जरत्कृकवाकुचूडारुणारुणपुरःसरे विरोचने नातिदूरवर्ती विविच्य पितामहविमानहंसकुलपालः पर्यटन्नपरवक्त्रमुच्चैरगायत्—

'तरलयसि दृशं किमुत्सुकामकलुषमानसवासलालिते ।
अवतर कलहंसि वापिकां पुनरपि यास्यसि पङ्कजालयम्' ॥२१॥

तच्छ्रुत्वा सरस्वती पुनरचिन्तयत्—'अहमिवानेन पर्यनुयुक्ता । भवतु । मानयामि मुनेर्वचनम्' इत्युक्त्वोत्थाय कृतमहीतलावतरणसंकल्पा परित्यज्य वियोगविक्लवं स्वपरिजनं ज्ञातिवर्गमवगणय्यावगणा त्रिः प्रदक्षिणीकृत्य चतुर्मुखं कथमप्यनुनयनिवर्तितानुयायित्रतित्राता ब्रह्मलोकतः सावित्रीद्वितीया निर्जगाम ।

ततः क्रमेण ध्रुवप्रवृत्तां धर्मधेनुमिवाधोधावमानधवलपयोधराम्,

योगे हि तदुक्तम्—'आदौ समाधिमासीत पश्चाद्योगमुपाचरेत्' इति । रणरणको दुःखमरतिकृतम् ।

अपरेद्युरपरस्मिन्नहनि । एते च कालाः संख्यादयो व्यवहारा इहत्या ब्रह्मलोक उपचरिताः । शेखर इव शेखरो मुण्डमालकः । खलीनं कविका । क्षतजं रक्तम् । कृकवाकुः कुक्कुटः । चूडा मांसमयी शेखरिका । विविच्य विचार्य । विमानपालः स्वप्रस्तावे हंसीं यदाह तेन सरस्वती पर्यनुयोजितेवाभूत् । अपरवक्राख्यं वृत्तमाख्यायिकासु प्रयोज्यम् । तथा चाह भामहः—'वक्त्रं चापरवक्त्रं च काव्ये काव्यार्थशंसिनि' इति । **तरलयसीत्यादि** । अकलुषं मानसं यस्य स निर्मलचेता ब्रह्मा, मानसाख्यं च सरः । लालिता शीलिता । वापिका पुष्करिणी उप्यन्तेऽस्यां तानि कर्माणीति वापिका मर्त्यभूमिरपि । पङ्कजमालयो यस्य स ब्रह्मा, सरश्च । पर्यनुयुक्ता उपपत्त्या बोधिता । अवगणा केवला सावित्रीव्यतिरेकेण नान्यपरिवारा । **कथमपीति** । न भृत्यादिवत् । व्रतित्रातस्तत्पक्षिसमूहः ।

तत इत्यादावीदृशं मन्दाकिनीमनुसरन्ती सरस्वती मर्त्यलोकमवततारेति संबन्धः । ध्रुवं नित्यं वियत् । तस्मात्प्रवृत्ताम् । ध्रुवस्तारकविशेषो ध्रुवान्नित्यस्थानाद्वा विष्णोर्वा ध्रुवावूरू पश्चाद्भागौ सक्थिनी ध्रुवे वा तयोः प्रकर्षेण वृत्तां परिवर्तुलां वा । अध इति पदेन धावनक्रियासहत्वाज्जलस्य ग्रहणं सूच्यते । अत एव धवलाः शुक्लाः पयोधरा मेघा यस्यास्ताम् । इतरत्राधोधावमानाः पयःपूर्णत्वाल्लम्बमानाः क्षीरस्रुतेश्च धवलाः स्तना यस्याः । अधोधावमानं वेगेन प्रसरद्धवलं पयो धारयति या ताम्, अधोधावमानो धवलो यः पयोधो वत्सस्तं राति ददाति या ताम्, धवलो वृषस्तस्मै पयो धारयति या तां वेत्यादिकाः कुव्याख्या एव । उद्धुर उद्भटः । अन्ध-

उद्धुरध्वनिमन्धकमथनमौलिमालतीमालिकाम्, आलीयमानवालखिल्यरोधसमरुन्धतीधौततारवत्वचम्, त्वङ्गत्तुङ्गतरङ्गतरत्तरलतरतारतारकाम्, तापसवितीर्णतरलतिलोदकपुलकितपुलिनाम्, आप्लवनपूतपितामहपातितपितृपिण्डपाण्डुरितपाराम्, पर्यन्तसुप्तसप्तर्षिकुशशयनसूचितसूर्यग्रहसूतकोपवासाम्, आचमनशुचिशचीपतिमुच्यमानार्चनकुसुमनिकरशाराम्, शिवपुरापतितनिर्माल्यमन्दारदाम कामनादरदारितमन्दरदरीदृषदम्, अनेकनाकनायकनिकायकामिनीकुचकलशविलुलितविग्रहाम्, ग्राहग्रावग्रामस्खलनमुखरितस्रोतसं, सुषुम्णास्रुतशशिसुधाशीकरस्तबकतारकिततीराम्, धिषणाग्निकार्यधूमधूसरितसैकतां, सिद्धविरचितवालुकालिङ्गलङ्घनत्रासविद्रुतविद्याधराम्, निर्मोकमुक्तिमिव गगनोरगस्य, लीलाललाटिकामिव त्रिविष्टपविटस्य, विक्रयवीथीमिव पुण्यपण्यस्य, दत्तार्गलामिव नरकनगरद्वारस्य, अंशुकोष्णीषपट्टिकामिव सुमेरुनृपस्य, दुगूलकदलिकामिव कैलासकुञ्जरस्य, पद्धतिमिवापवर्गस्य, नेमिमिव कृतयुगस्य, सप्तसागरराजमहिषीं मन्दाकिनीमनुसरन्ती मर्त्यलोकमवततार । अपश्यच्चाम्बरतलस्थितैव हारमिव वरुणस्य, अमृतनिर्झरमिव चन्द्राचलस्य, शशिमणिनिष्यन्दमिव विन्ध्यस्य, कर्पूरद्रुमद्रवप्रवाहमिव दण्डकारण्यस्य, लावण्यरसप्रस्रवणमिव दिशाम्, स्फाटिकशिलापट्टशयनमिवाम्बरश्रियाः, स्वच्छशिशिरसुरसवारिपूर्णं भगवतः पितामहस्यापत्यं हिरण्यवाहनामानं महानदम्, य जनाः शोण इति कथ-

---

कमथनः शिवः । आलीयमानाः श्लिष्यन्तः । वालखिल्या मुनिभेदाः । रोधस्तटम् । त्वङ्गच्चरत् । आप्लवनं स्नानम् । पितरो देवविशेषाः, आज्यपाः, सोमपाः, बर्हिषधश्च । आचमनेत्यादिना पितामहत्वन्न स्नानादिनिष्ठात्वमस्योच्यते । अत एव शचीपदेन संभोगासक्तत्वमिव पोषितम् । निकायः समूहः । सुषुम्णाख्योऽमृतमयो रविरश्मिः । धिषणो बृहस्पतिः । सिद्धकृतत्वेन लिङ्गेषु भगवत्संनिधानमावेद्यते । निर्मोकः सर्पकञ्चुकः । विस्रंसतया शुक्लत्वेन लहरिकावलीत्वेन च निर्मोकमुक्तिमिवेत्युत्प्रेक्षा । गगनमिवोरगः कृष्णतया । ललाटिका ललाटालंकारः । विटो भुजङ्गः । उष्णीषं शिरोवेष्टनं दिक्षु प्रसिद्धम् । दुगूलशब्दो दुकूलसमानार्थः । पद्धतिर्मार्गः । अपवर्गो मोक्षः । कृतयुगस्य रचितयुगकाष्ठस्य रथस्येत्यर्थः । यथा नेमिवशाद्रथग्रहणं तथा तद्वशात्कृताख्यस्य युगस्य । सप्तसागरराजः क्षीरसमुद्रः । चन्द्राख्यः पर्वत इति केचित् । शशिमणिश्चन्द्रकान्तः । **पितामहस्येति** । तद्भक्त्या तदाश्रयणम् । सिकता विद्यन्ते यस्य स सिकतिलः । मत्तशब्देन सशब्दत्वम्, वेणीपदेन च तन्त्रीसंनिवेश-

यन्ति। दृष्ट्वा च तं रामणीयकहृतहृदया तस्यैव तीरे वासमरचयत्। उवाच च सावित्रीम्—'सखि, मधुरमयूरविरुतयः कुसुमपांशुपटलसिकतिलतरुतलाः परिमलमत्तमधुपवेणीवीणारणितरमणीया रमयन्ति मां मन्दीकृतमन्दाकिनीद्युतेरस्य महानदस्योपकण्ठभूमयः। पक्षपाति च हृदयमत्रैव स्थातुं मे' इति। अभिनन्दितवचना च तथेति तया तस्य पश्चिमे तीरे समवातरत्। एकस्मिंश्च शुचौ शिलातलसनाथे तटलतामण्डपे गृहबुद्धिं बबन्ध। विश्रान्ता च नातिचिरादुत्थाय सावित्र्या सार्धमुचितार्चनकुसुमा सस्नौ। पुलिनपृष्ठप्रतिष्ठितसैकतशिवलिङ्गा च भक्त्या परमया पञ्चब्रह्मपुरःसरां सम्यङ्मुद्राबन्धविहितपरिकरां ध्रुवागीतिगर्भामवनिपवनवनगगनदहनतपनतुहिनकिरणयजमानमयीमूर्तीरष्टावपि ध्यायन्ती सुचिरमष्टपुष्पिकामदात्। अयत्नोपनतेन फलमूलेनामृतरसमप्यतिशिशयिषमाणेन च स्वादिम्ना शिशिरेण शोणवारिणा शरीरस्थितिमकरोत्। अतिवाहितदिवसा च तस्मिंल्लतामण्डपशिलातले कल्पितपल्लवशयना सुष्वाप। अन्येद्युरप्यनेनैव क्रमेण नक्तंदिनमत्यवाहयत्।

एवमतिक्रामत्सु दिवसेषु गच्छति च काले याममात्रोद्गते च रवावुत्तरस्यां ककुभि प्रतिशब्दपूरितवनगह्वरं गम्भीरतारतरं तुरङ्गहेषितह्रादमशृणोत्। उपजातकुतूहला च निर्गत्य लतामण्डपाद्विलोकयन्ती विकचकेतकीगर्भपत्रपाण्डुरं रजःसंघातं नातिदवी-

---

सादृश्यमाह। वेणी पङ्क्तिः। लिङ्ग्यतेऽनेनेति लिङ्गमाकारः। पञ्च ब्रह्माणि सद्योजातः, वामदेवः, अघोरः, तत्पुरुषः, ईशानश्चेति। मुद्राबन्धो विशिष्टः कराङ्गुलिसंनिवेशः। ध्रुवाख्या विशिष्टा गीतिः। वनं तोयम्। यजमान उग्रः। अष्टौ पुष्पाण्येवाष्टपुष्पिका। तत्र प्रभृति गन्धप्रधानं पार्थिवम्, अर्घस्नानादिकं रसप्रधानमाप्यम्, प्रदीपाभरणप्रभादिरूपप्रधानं तैजसम्, अनुलेपनप्रभृति स्पर्शप्रधानं वायवीयम्, सुधिरातोद्यगीतादिकं शब्दप्रधानमाकाशीयम्, अनुध्यानं मानसम्, अस्ति सर्वत्रैवेश्वर इति निश्चयो बौद्धम्, अहमेवेश्वर इत्याहंकारिकम्। यद्वा आसनवर्गप्रभृतिष्वष्टसु प्रत्येकमष्टपुष्पिका। अतिशेतुमभिभवितुमिच्छतातिशिशयिषमाणेन। स्वादिम्ना मृष्टत्वेन। **शरीरस्थितिमिति**। न त्वातृप्तिभोजनम्। अन्येद्युरन्यस्मिन्नहनि।

यामः प्रहरः। नक्तंदिनशब्देन तत्कालनिवर्तनीयं कर्मैव लक्ष्यते। गम्भीरश्चिरकालस्थितः। तारतरो दूरदेशश्रूयमाणः। हेषितमश्वशब्दः, तद्रूपो ह्रादो ध्वनिस्तम्। क्रमेणेत्यादावश्ववृन्दं संददर्शेति संबन्धः। शफरा मत्स्याः। तदुदरवत्तैश्च धूसरे। प्रलम्बेत्यादिना सज्जत्वमुक्तम्। कचाः केशाः। सौकुमार्यात्पल्लवानीव। घ-

यसि संमुखमापतन्तमपश्यत् । क्रमेण च सामीप्योपजायमानाभिव्यक्ति तस्मिन्महति शफरोदरधूसरे रजसि पयसीव मकरचक्रं प्लवमानं पुरः प्रधावमानेन, प्रलम्बकुटिलकचपल्लवघटितललाटजूटकेन, धवलदन्तपत्रिकाद्युतिहसितकपोलभित्तिना, पिनद्धकृष्णागुरुपङ्ककल्कच्छुरणकृष्णशबलकषायकञ्चुकेन, उत्तरीयकृतशिरोवेष्टनेन, वामप्रकोष्ठनिविष्टस्पष्टहाटककटकेन, द्विगुणपट्टपट्टिकागाढग्रन्थिग्रथितासिधेनुना, अनवरतव्यायामकृशकर्कशशरीरेण, वातहरिणयूथेनेव मुहुर्मुहुः खमुड्डीयमानेन, लङ्घितसमविषमावटविटपेन, कोणधारिणा, कृपाणपाणिना, सेवागृहीतविविधवनकुसुमफलमूलपर्णेन, 'चल चल, याहि याहि, अपसर्पापसर्प, पुरः प्रयच्छ पन्थानम्' इत्यनवरतकृतकलकलेन युवप्रायेण, सहस्रमात्रेण पदातिबलेन सनाथमश्ववृन्दं संददर्श ।

मध्ये च तस्य सार्धचन्द्रेण मुक्ताफलजालमालिना विविधरत्नखण्डखचितेन शङ्खक्षीरफेनपाण्डुरेण क्षीरोदेनेव स्वयं लक्ष्मीं दातुमागतेन गगनगतेनातपत्रेण कृतच्छायम्, अच्छाच्छेनाभरणद्युतीनां निवहेन दिशामिव दर्शनानुरागलग्नेन चक्रवालेनानुगम्यमानम्, आनितम्बविलम्बिन्या मालतीशेखरस्रजा सकलभुवनविजययार्जितया रूपपताकयेव विराजमानम्, उत्सर्पिभिः शिखण्डखण्डिकापद्मरागमणेररुणैरंशुजालैरदृश्यमानवनदेवताविधृतैर्बालपल्लवैरिव प्रमृज्यमानमार्गरेणुपरुषवपुषम्, बकुलकुड्मलमण्डलीमुण्डमालामण्डनमनोहरेण कुटिलकुन्तलस्तबकमालिना मौलिना मीलितातपं

टितललाटजूटता दाक्षिणात्येषु वेशः । दन्तपत्रिका कर्णाभरणभेदः । पिनद्धो बद्धः । कृष्णागुरुणः पङ्को निर्घृष्टं कृष्णागुरुः, तस्य शुक्लस्य सतः कल्कश्चूर्णः, तच्छुरणात्कृष्णेन गुणेन शबलं कषायं साधिवासितं कञ्चुकं वारबाणं यस्य । उत्तरीयेत्यादिना संनद्धतां वर्मादिप्रसङ्गं चाह । वामेत्यनेनाश्रमिखभाववर्णना शङ्कारिता चोक्ता । 'प्रकोष्ठमन्तरं विद्यादरत्निमणिबन्धयोः' । हाटकं स्वर्णम् । यदेव द्विगुणात एव गाढग्रन्थिसहत्वम् । ग्रथितविस्रंसिनी । असिधेनुश्छुरिका । वातहारिणो यो वाताभिमुखं धावति । अवट उन्मार्गः । कोणो लगुडः ।

मध्य इत्यादौ तस्य च मध्येऽष्टादशवर्षदेशीयं युवानमद्राक्षीदिति संबन्धः । क्षीरोदस्याप्यर्धचन्द्रादि सर्वं योज्यम् । छाया कान्तिरपि । चक्रवालेन समूहेन । नितम्बशब्दो मुख्यार्थः । 'पश्चान्नितम्बः स्त्रीकट्याः' इत्यर्थः । शिखण्डखण्डिका चूडाभरणम् । **प्रमृज्यमानेति** । वर्तमानकालोऽत्र विवक्षितः । बकुलेत्यादिना

पिबन्तमिव दिवसम्, पशुपतिजटामुकुटमृगाङ्कद्वितीयशकलघटितस्येव सहजलक्ष्मीसमालिङ्गितस्य ललाटपट्टस्य मनःशिलापङ्कपिङ्गलेन लावण्येन लिम्पन्तमिवान्तरिक्षम्, अभिनवयौवनारम्भावष्टम्भप्रगल्भदृष्टिपाततृणीकृतत्रिभुवनस्य चक्षुषः प्रथिम्ना विकचकुमुदकुवलयकमलसरःसहस्रसंछादितदशदिशं शरदमिव प्रवर्तयन्तम्, आयतनयननदीसीमान्तसेतुबन्धेन ललाटतटशशिमणिशिलातलगलितेन कान्तिसलिलस्रोतसेव द्राघीयसा घोणावंशेन शोभमानम्, अतिसुरभिसहकारकर्पूरककोललवङ्गपारिजातकपरिमलमुचा मत्तमधुकरकुलकोलाहलमुखरेण मुखेन सनन्दनवनं वसन्तमिव वसन्तम्, आसन्नसुहृत्परिहासभावनोत्तानितमुखमुग्धहसितैर्दशनज्योत्स्नाव्याप्तदिङ्मुखैः पुनःपुनर्नभसि संचारिणं चन्द्रालोकमिव कल्पयन्तम्, कदम्बमुकुलस्थूलमुक्ताफलयुगलमध्याध्यासितमरकतस्य त्रिकण्टककर्णाभरणस्य प्रेङ्खतः प्रभया समुत्सर्पन्त्या कृतसकुसुमहरितकुन्दपल्लवकर्णावतंसमिवोपलक्ष्यमाणम्, आमोदितमृगमदपङ्कलिखितपत्रभङ्गभास्वरम्, भुजयुगलमुद्दाममकराक्रान्तशिखरमिव मकरकेतुकेतुदण्डद्वयं दधानम्, धवलब्रह्मसूत्रसीमन्तितं सागरमथनसामर्षगङ्गास्रोतःसंदानितमिव मन्दरं देहमुद्वहन्तम्, कर्पूरक्षोदमुष्टिच्छुरणपांशुलेनेव कान्तोच्चकुचचक्रवाकयुगलविपुलपुलिनेनोरःस्थलेन स्थूलभुजायामपुञ्जितम्, पुरो विस्तारयन्तमिव दिक्चक्रम्, पुरस्तादीषदधोनाभिनिहितैककोणकमनीयेन पृष्ठतः कक्ष्याधिकक्षिप्तपल्लवेनोभयतः संवलनप्रकटितोरुत्रिभागेन हारीतहरिता निबिडनिपीडितेनाधरवाससा विभज्यमानतनुतरमध्यभागम्, अनवरतश्रमोपचितमांसकठिनविकटमक-

---

निपीयमानातपतुल्यवस्तुनिर्देशः। कुन्तलः केशहस्तः स एव स्तबकः। पुष्पस्तबकः पुष्पसंघातः। सहजाकृत्रिमा, सहोत्पन्ना च लक्ष्मीः शोभना, श्रीश्च। लावण्यमत्र कान्तिः। अवष्टम्भो गर्वः। द्राघीयसा दीर्घतरेण। सहकारः सुगन्धद्रव्यभेदः सहकारफलेनेव क्रियते। पारिजातकोऽनेकद्रव्यसंस्कृतः मुखवासविशेषः, देवतृक्षश्च। वसन्तश्चैवंविधेनैव मुखेन प्रारम्भेनोपलक्षितो भवति। रत्नत्रितयेन कृतं त्रिकोणकण्टकाख्यं कर्णाभरणम्। मृगमदः कस्तूरिका। संदानितं बद्धम्। वेष्टितमित्यर्थः। कुचावत्र कान्तासंबन्धिनावेव। चक्रवाकयुगलं तस्य कृते पुलिनसदृशम्। कोणः पल्लवः पृष्ठतः पश्चाद्भागे कक्ष्यायाः परिवलनादधिकश्रुतिरित्युक्तः। क्षिप्तो लम्बमानः पल्लवो यस्य तत्। संवलनं संकोचनम्। हारीतः पक्षिभेदः। हरिता नीलेन।

रमुखसंलग्नजानुभ्यां विशालवक्षःस्थलोपलवेदिकोत्तम्भनशिलास्तम्भाभ्यां चारुचन्दनस्थासकस्थूलकान्तिभ्यामूरुदण्डाभ्यामुपहसन्तमिवैरावतकरायामम्, अतिभरितोरूभारवहनखेदेनेव तनुतरजङ्घाकाण्डं कल्पपादपपल्लवद्वयस्येव पाटलस्योभयपार्श्वावलम्बिनः पादद्वयस्य दोलायमानैर्नखमयूखैरश्वमण्डनचामरमालामिव रचयन्तम्, अभिमुखमुच्चैरुदञ्चद्भिरतिचिरमुपरिविश्राम्यद्भिरिव वलितविकटम्, पतद्भिः खुरैः खण्डितभुवि प्रतिक्षणदशनविमुक्तखणखणायितखरखलीने दीर्घघ्राणलीनलालिकललाटलुलितचारुचामीकरचक्रके शिञ्जानशातकौम्भजयनशोभिनि मनोरंहसि गोलाङ्गूलकपोलकालकायलोम्नि नीलसिन्धुवारवर्णे वाजिनि महति समारूढम्, उभयतः पर्याणपट्टश्लिष्टहस्ताभ्यामासन्नपरिचारकाभ्यां दोधूयमानधवलचामरिकायुगलम्, अग्रतः पठतो वन्दिनः सुभाषितमुत्कण्टकितकपोलफलकेन लग्नकर्णोत्पलकेसरपक्ष्मशकलेनेव मुखशशिना भावयन्तम्, अनङ्गयुगावतारमिव दर्शयन्तम्, चन्द्रमयीमिव सृष्टिमुत्पादयन्तम्, विलासप्रायमिव जीवलोकं जनयन्तम्, अनुरागमयमिव मार्गान्तरमालयन्तम्, शृङ्गारमयमिव दिवसमापादयन्तम्, रागराज्यमिव प्रवर्तयन्तम्, आकर्षणाञ्जनमिव चक्षुषोः, वशीकरणमन्त्रमिव मनसः, स्वस्थावेशचूर्णमिवेन्द्रियाणाम्, असंतोषमिव कौतुकस्य, सिद्धयोगमिव सौभाग्यस्य,

---

मकरमुखं जानुनोरुपरिभागः । उत्तम्भनं धारणम् । स्थासकश्चन्द्रकः । आयामो दैर्घ्यम् । न केवलमायामं शुक्लत्वमप्युपहसन्तम् । धर्मयोरेकनिर्देशोऽन्यसंवित्साहचर्यात् । 'अतिभरितोरूभारवहनेन' इति पाठः । ऊरू एव भारः । प्रशस्ता जंघा जंघाकाण्डम् । कल्पपादपसंबन्धितया न केवलं लौहित्यं सौकुमार्याद्युच्यते । यावत्सकलसंपत्फलप्रदत्वादिप्रकर्षान्तरम् । अतिचिरमित्यादिनानाकुलत्वमुच्यते । यदुक्तम्—'आवृता कुञ्चिता स्थूलदलपाल्यग्रसंस्थिताः । विवर्ज्याश्चाकुलपदन्यासेन गमनेन च ॥' इति । विकटं चित्रम् । **खुरैरिति** । तद्व्यापारवैचित्र्याद्बहुत्वमग्रिमयोरेव । एवंविधसंनिवेशसंभवात् । खलीनं कविका । लालिका कविकाशेखरम् । जयनं हयमण्डनमाला । गोलाङ्गूलः कृष्णमुखो वानरः । नीलेत्यादौ कुमुदकुन्दमृणालगौर इत्यादिवन्न पौनरुक्त्यम् । **महतीति** । उक्तं च—'सर्वलक्षणहीनोऽपि महाकायः प्रशस्यते' इति । आसन्नेत्यनेन विश्वसनीयत्वमुक्तम् । **अनङ्गयुगेति** । अनङ्गजन्मना यदुपलक्षितं युगं कालविशेषस्तस्य नूतनमदनसादृश्यात् । यद्वा अनङ्गयोर्युगं तदवतारमिव । द्वित्वसंख्यापूर्वकत्वात् । चन्द्रमयीमिवेति कान्तिमत्त्वेन । आकर्षणाञ्जनं वशीकरणार्थं कज्जलम् । **असंतोषमिवेति** । यस्यैनं प्राप्य कौतुकं न निवर्तते,

पुनर्जन्मदिवसमिव मन्मथस्य, रसायनमिव यौवनस्य, एकराज्यमिव रामणीयकस्य, कीर्तिस्तम्भमिव रूपस्य, मूलकोषमिव लावण्यस्य, पुण्यकर्मपरिणाममिव संसारस्य, प्रथमाङ्कुरमिव कान्तिलतायाः, सर्गाभ्यासफलमिव प्रजापतेः, प्रतापमिव विभ्रमस्य, यशःप्रवाहमिव वैदग्ध्यस्य, अष्टादशवर्षदेशीयं युवानमद्राक्षीत्।

पार्श्वे च तस्य द्वितीयमपरसंश्लिष्टतुरङ्गम्, प्रांशुमुत्तप्ततपनीयस्तम्भाकारम्, परिणतवयसमपि व्यायामकठिनकायम्, नीचनखश्मश्रुकचम्, शुक्तिखलतिम्, ईषत्तुन्दिलम्, रोमशोरःस्थलम्, अनुल्बणोदारवेशतया जरामपि विनयमिव शिक्षयन्तम्, गुणानपि गरिमाणमिवानयन्तम्, महानुभावतामपि शिष्यतामिवानयन्तम्, आचारस्याचार्यकमिव कुर्वाणम्, धवलवारबाणधारिणम्, धौतदुकूलपट्टिकापरिवेष्टितमौलिं पुरुषम्।

अथ स युवा पुरोयायिनां यथादर्शनं प्रतीत्य विस्मितमनसां कथयतां पदातीनां सकाशादुपलभ्य दिव्याकृति तत्कन्यायुगलमुपजातकुतूहलः प्रतूर्णतुरगो दिदृक्षुस्तं लतामण्डपोद्देशमाजगाम। दूरादेव च तुरगादवततार। निवारितपरिजनश्च तेन द्वितीयेन साधुना सह चरणाभ्यामेव सविनयमुपससर्प। कृतोपसं-

---

तस्य संतोष एव नास्ति। केषांचिदेव द्रव्याणां संबन्धी यो न कदाचित्कार्ये व्यभिचरति स सिद्धयोगः। सौभाग्यं तावत्सर्वं किंचन वशीकुरुते, एवं चास्य तदेव सिद्धयोग इव तदाश्रयणतन्निःशेषलोकवशीकरणक्षमत्वम्। जन्मदिवसमिति तद्रोचरपतिता'नां कामोत्पत्तेः। **रसायनमिवेति**। यथा रसायनवशात्कश्चित्परिपूर्णश्च स्थिरश्च भवति, तद्वदेतदाश्रयेण यौवनम्। ईषदसमाप्तोऽष्टादशवर्षोऽष्टादशवर्षदेशीयस्तम्। न परेण संश्लिष्टस्तुरङ्गो यस्य तम्। दधीचस्य तु पर्याणश्लिष्टाद्युक्तम्। परिणतवयस्त्वेन सत्यवादिना सावित्रीसरस्वत्यौ प्रति च विस्रम्भकारित्वमुच्यते। अन्यथोपक्रम एव संभाषणमात्रं न प्रवर्तते।

शुक्तिखलतिं शुक्राकारखल्वाटम्। तुन्दिलं लम्बोदरम्। अत एवास्य विकुक्षिरिति नाम। अनुल्बणोऽनुद्धतः। उदारः श्रेष्ठः। **जरामिति**। जरा किल सर्वं विनयं शिक्षयति। महानुभावता महाशयता। अनुभावयति कार्यमकार्यं वा बोधयतीत्यनुभावः। **शिष्यतामिति**। परशासनदक्षकर्म महानुभावतया तत एवावसीयत इत्युक्तं भवति। आचारः शास्त्रकारप्रदर्शिता विशिष्टा नीतिः। स च सर्वस्मिन्नाचार्यकमवलम्बते। संस्कारातिशयमापादयतीत्यर्थः। वलक्षः शुक्लः। वारबाणः कञ्चुकः। मौलेयाः केशाः।

अथेति। नतु गतागतिकतया सर्वचेतनाभिप्रायेण सौन्दर्यमेतयोरभिव्यज्यते। प्रतीत्य न पुनः प्रसङ्गत उपेत्य। कन्यकात्वादेतन्नानुचितम्। प्रतूर्णो वेगगामी।

ग्रहणौ तौ सावित्री समं सरस्वत्या किसलयासनदानादिना सकुसुमफलार्घ्यावसानेन वनवासोचितेनातिथ्येन यथाक्रममुपजग्राह । आसीनयोश्च तयोरासीना नातिचिरमिव स्थित्वा तं द्वितीयं प्रवयसमुद्दिश्यावादीत्—'आर्य, सहजलज्जाधनस्य प्रमदाजनस्य प्रथमाभिभाषणमशालीनता, विशेषतो वनमृगीमुग्धस्य कुलकुमारीजनस्य । केवलमियमालोकनकृतार्थाय चक्षुषे स्पृहयन्ती प्रेरयत्युदन्तश्रवणकुतूहलिनी श्रोत्रवृत्तिः । प्रथमदर्शने चोपायनमित्रोपनयति सज्जनः प्रणयम् । अप्रगल्भमपि जनं प्रभवता प्रश्रयेणार्पितं मनो मध्विव वाचालयति । अयत्नेनैव चातिनम्रे साधौ धनुषीव गुणः परां कोटिमारोपयति विस्रम्भः । जनयन्ति च विस्मयमतिधीरधियामदृष्टपूर्वा दृश्यमाना जगति स्रष्टुः सृष्टतिशयाः यतस्त्रिभुवनाभिभावि रूपमिदमस्य महानुभावस्य । सौजन्यपरतन्त्रा चेयं देवानांप्रियस्यातिभद्रता कारयति कथां न तु युवतिजने सहोत्था तरलता । तत्कथयागमनेनापुण्यभाक्कृतमो विजृम्भितविरहव्यथः शून्यतां नीतो देशः । क्व वा गन्तव्यम् । कस्य वायमपहृतहरहुंकाराहंकारोऽपर इवानन्यजो युवा । किंनाम्नः समृद्धतपसः पितुरयममृतवर्षी कौस्तुभमणिरिव हरेर्हृदयमाह्लादयति । का चास्य त्रिभुवननमस्या प्रभातसंध्येव महतस्तेजसो जननी । कानि वास्य पुण्यभाञ्जि भजन्त्यभिख्यामक्षराणि ।

साधुना विनीतेन।'उपसंग्रहणं धीराः कथयन्त्यभिवादनम्'। आतिथ्यमेवोपजग्राहापूजयत्।'प्रवयाः स्यात्परिणतः'। अशालीनता धृष्टता। वनशब्देन मृगीसामान्येऽपि जनसंपर्काद्यभावमाह । उपायनं ढौकनिका । उपनयति ढौकयति । **प्रगल्भमित्यादि**। मनः कर्तृ अप्रगल्भमपि जनं वाचालयति । कीदृशम् । प्रभवता स्वामिना प्रश्रयेण प्रत्यर्पितं दत्तमेवंविधमस्मदीयं युष्मासु मन इति बहिःप्रकाशितं यश्च परतश्च केनापि प्रभावशीलेन ढौकितं मध्वप्रगल्भमपि जनं कुलयोषित्प्रायं वाचालयति किंचन जल्पयति । अत्रापि प्रश्रयेणेति साभिप्रायम् । तथा च—'अन्यथान्यवनितागतचित्तं चित्तनाथमभिशङ्कितदत्या । पीतभूरिसुरयापि न मोदे निर्वृतिर्हि मनसो मदहेतोः ॥' इत्युक्तम् । नम्रे प्रह्वे, कुब्जे च । गुणो विनयादिः, ज्या च । कोटिः प्रकर्षः, धनुःशिखा च । देवानांप्रियस्येति पूजावचनम् । षष्ठ्या अलुक् । अत्रागमनेत्यादिना ब्रह्मोक्तशापबुद्ध्या दधीचस्य तद्भर्तृयोग्यतया कतम इति देशोत्कर्षकुलादिकं पृच्छति। **कस्येति**। देवस्य। सिद्धा देवाः । अनन्यजः कामः। **महतस्तेजस इति**। महश्च तेजः सूर्याख्यम् । अभिख्या नाम । **अयमेव**

आर्यपरिज्ञानेऽप्ययमेव क्रमः कौतुकानुरोधिनो हृदयस्य' इत्युक्तवत्यां तस्यां प्रकटितप्रश्रयोऽसौ प्रतिव्याजहार—'आयुष्मति, सतां हि प्रियंवदता कुलविद्या । न केवलमाननं हृदयमपि च ते चन्द्रमयमिव सुधाशीकरशीतलैरानन्दयति वचोभिः । सौजन्यजन्मभूमयो भूयसा शुभेन सज्जननिर्माणशिल्पकला भवादृश्यो जायन्ते । दूरे तावदन्योन्यस्यालापनमभिजातैः सह दृशोऽपि मिश्रीभूता महतीं भूमिमारोपयन्ति । श्रूयताम्—अयं खलु भूषणं भार्गववंशस्य भगवतो भूर्भुवःस्वस्त्रितयतिलकस्य, अदभ्रप्रभावस्तम्भितजम्भारिभुजस्तम्भस्य, सुरासुरमुकुटमणिशिलाशयनदुर्ललितपादपङ्केरुहस्य, निजतेजःप्रसरप्रुष्टपुलोम्नश्यवनस्य बहिर्वृत्तिजीवितं दधीचो नाम तनयः जनन्यस्य जितजगतोऽनेकपार्थिवसहस्रानुयातस्य शर्यातस्य सुता राजपुत्री त्रिभुवनकन्यारत्नं सुकन्या नाम । तां खलु देवीमन्तर्वत्नीं विदित्वा वैजनने मासि प्रसवाय पिता पत्युः पार्श्वात्स्वगृहमानाययत् । असूत च सा तत्र देवी दीर्घायुषमेनम् । अनेहसावर्धत तत्रैवायमानन्दितज्ञातिवर्गो बालस्तारकराज इव राजीवलोचनो राजगृहे । भर्तृभवनमागच्छन्त्यामपि दुहितरि नासेचनकदर्शनमिममुच्चन्मातामहो मनोविनोदनं नप्तारम् । अशिक्षतायं तत्रैव सर्वा विद्याः सकलाश्च कलाः । कालेन चोपारूढयौवनमिममालोक्याहमिवासावप्यनुभवतु मुखकमलावलोकनानन्दमस्येति मातामहः कथंकथमप्येनं पितुर-

---

क्रम इति । यथास्योत्पत्त्यादिकं तद्वद्भवतोऽपीत्यर्थः । कला उपायः । भूरिति रेफान्तो भूवाची । भुव इति रेफान्तः पातालवाची । भूश्च भुवश्च स्वश्च भूर्भुवःस्वः । एषां त्रयमिति समासः । अदभ्रोऽनल्पः । जम्भारिरिन्द्रः । स ह्यश्विभ्यां यज्ञभागभुजौ कुर्वाणमिति चिरं प्रार्थितः । तथेति प्रतिपद्य ताभ्यां भागं ददद्भिन्द्रेणोद्यतवज्रेण रोषितः । ततस्तेनास्य सवज्रः स्तम्भितो भुज इति । दुर्ललितोऽलभ्यविषयः । **प्रुष्टपुलोम्न इति** । अनवरतं रुदत्यां दुहितरि कोपान्मात्रा गृहाणेमामिति पुलोम्नो राक्षसस्योक्तम् । ततस्तां प्रतिगृह्य तत्रैव स्थापयित्वा क्वापि गते रक्षसि सा भृगुणा विवाहिता । ततः सगर्भा सती पुलोम्नागत्यापह्रियमाणतया च्यवनं गर्भमत्याक्षीत् । तेन चान्वर्थनाम्ना तद्रक्षो दृष्ट्वैवादह्यत । अन्तर्वत्नीं गर्भिणीम् । वैजनने मासि प्रसवमासे । दीर्घायुषमिति साभिप्रायम् । रूपकुलाद्युत्कर्षे वर्णिते सत्येतदेव वरगुणवर्णनमवशिष्यते । अनेहसा परिपूर्णेन कालेन । 'न जायते यत्र तृप्तिस्तदासेचनकं विदुः' । नप्तारं पौत्रम् ।

न्तिकमधुना व्यसर्जयत् । मामपि तस्य देवस्य सुगृहीतनाम्नः शर्या-तस्याज्ञाकारिणं विकुक्षिनामानं भृत्यपरमाणुमवधारयतु भवती । पितुः पादमूलमायान्तं मया साभिसारमकरोत्स्वामी । तद्धि नः कुलक्रमागतं राजकुलम् । उत्तमानां च चिरंतनता जनयत्यनुजीविन्यपि जने कियन्मात्रमपि मन्दाक्षम् । अक्षीणः खलु दाक्षिण्यकोशो महताम् । इतश्च गव्यूतिमात्रमिव पारेशोणं तस्य भगवतश्च्यवनस्य स्वनाम्ना निर्मितव्यपदेशं च्यावनं नाम चैत्ररथकल्पं काननं निवासः । तदवधिश्चेयं नौ यात्रा । यदि च गृहीतक्षणं दाक्षिण्यमनवहेलं वा हृदयमस्माकमुपरि भूमिर्वा प्रसादानामयं जनः श्रवणार्हो वा, ततो न विमाननीयोऽयं यः प्रथमः प्रणयः कुतूहलस्य । वयमपि शुश्रूषवो वृत्तान्तमायुष्मत्योः । नेयमाकृतिर्दैव्यतां व्यभिचरति । गोत्रनामनी तु श्रोतुमभिलषति नौ हृदयम् । तत्कथय कतमो वंशः स्पृहणीयतां जन्मना नीतः । का चेयमत्रभवती भवत्याः समीपे समवाय इव विरोधिनां पदार्थानाम् । तथा हि । संनिहितबालान्धकारा भास्वन्मूर्तिश्च, पुण्डरीकमुखी हरिणलोचना च, बालातपप्रभाधरा कुमुदहासिनी च, कलहंसस्वना समुन्नतपयोधरा च, कमलकोमलकरा हिमगिरिशिलापृथुनितम्बा च, करभोरुर्विलम्बितगमना च, अमुक्तकुमारभावा स्निग्धतारका च' इति । सा त्ववादीत्—'आर्य, श्रोष्यसि कालेन । भूयसो दिवसानत्र स्थातुमभिलषति नौ हृदयम् । अल्पीयांश्चायमध्वा । परिचय एव प्रकटीकरिष्यति । आर्येण न विस्मरणीयोऽयमनुषङ्ग-

---

साभिसारं ससहायम् । मन्दाक्षमुपरोधम् । गव्यूतिः क्रोशद्वयम् । यात्रा प्रस्थानम् । गोत्रं वंशः । समवाय एकत्रस्थितिः । बालेषु केशेष्वन्धकारं तम इति यस्या बालं प्रत्यग्रम् । भास्वती मूर्तिमती । भास्वत आदित्यस्य च मूर्तिः । न कदाचित्संनिहितबालान्धकारा भवतीति विरोधः । पुण्डरीकं पद्मम्, सिंहश्च यस्या मुखं तत्र कथं हरिणस्य विलोचने स्त इति विरोधः । पयोधरौ स्तनौ, मेघाश्च पयोधराः । कलहंसानां स्वनो यस्यां सा । सरित्कथं प्रावृड् भवतीति विरोधः । करो हस्तः, रश्मिश्च । शिला वातवर्त्रीभूतं हिमम् । यत्र च हिमगिरिशिलाभिः पृथुर्मध्यभागस्तत्र कथं पद्मकोमलकान्तिः । हिमस्पर्शे पद्मनाशात् । 'मणिबन्धादाकनिष्ठं करस्य करभो बहिः' करभश्चोष्ट्रः । विलम्बितं सविलासम् । लम्बितश्च करभो यस्याः । करभोरु कथं विगतकरभगमनेति विरोधः । कुमारभावो बाल्यम्, कुमारे च भावो भक्तिः । स्निग्धो रम्यः, प्रतीतश्च । तारकाक्षणः कनीनिका, दैत्यभेदश्च तारकः स्कन्देन यो हतः । परिचयः संस्तवः । अनुषङ्गः

दृष्टो जनः' इत्यभिधाय तूष्णीमभूत्। दधीचस्तु नवाम्भोभरगम्भीराम्भोधरध्वाननिभया भारत्या नर्तयन्वनलताभवनभाजो भुजगभुजः सुधीरमुवाच—'आर्य, करिष्यसि प्रसादमार्याराध्यमाना। पश्यामस्तावत्तातम्। उत्तिष्ठ। व्रजामः' इति। तथेति च तेनाभ्यनुज्ञातः शनकैरुत्थाय कृतनमस्कृतिरुच्चचाल। तुरगारूढं च तं प्रयान्तं सरस्वती सुचिरमुत्तम्भितपक्ष्मणा निश्चलतारकेण लिखितेनेव चक्षुषा व्यलोकयत्। उत्तीर्य शोणमचिरेणैव कालेन दधीचः पितुराश्रमपदं जगाम। गते च तस्मिन्सा तामेव दिशमालोकयन्ती सुचिरमतिष्ठत्। कृच्छ्रादिव च संजहार दृशम्।

अथ मुहूर्तमिव स्थित्वा स्मृत्वा च तां तस्य रूपसंपदं पुनः पुनर्व्यस्मयतास्या हृदयम्। भूयोऽपि चक्षुराचकाङ्क्ष तद्दर्शनम्। अवशेव केनाप्यनीयत तामेव दिशं दृष्टिः। अप्रहितमपि मनस्तेनैव सार्धमगात्। अजायत च नवपल्लव इव बालवनलतायाः कुतोऽप्यस्या अनुरागश्चेतसि। सालस्येव शून्येव सनिद्रेव दिवसमनयत्। अस्तमुपयाति च प्रत्यक्पर्यस्तमण्डले लाङ्गलिकास्तबकताम्रत्विषि कमलिनीकामुके कठोरसारसशिरःशोणशोचिषि सावित्रे त्रयीमये तेजसि, तरुणतरतमालश्यामले च मलिनयति व्योम व्योमव्यापिनि तिमिरसंचये, संचरत्सिद्धसुन्दरी-

प्रसङ्गः। विकुक्षिप्रार्थितयापि सावित्र्या कौतुकनिवृत्तिर्मा भूदित्यात्मस्वरूपं नोक्तम्। अत एवोत्तरत्र तदनुबन्ध एवोक्तः—**भूयसो दिवसानित्यादिना**। स्वरूपोक्तौ च ज्ञातसरस्वतीकत्वेनापत्यजननकार्यभङ्गो भवेत्। भारती वाक्। भुजगभुजो मयूरान्, भुजग इव भुजावस्येति च उच्चचाल गन्तुं प्रवृत्तः। उत्तम्भितान्युत्क्षिप्तानि।

कुतोऽस्मि कस्मादपि न ज्ञायत इत्यर्थः। मनुष्यतस्तथाविधस्तादृश्याः कथमनुराग इति। कथमेतदस्या उपपद्यत इति न वाच्यम्। यदाह मुनिः—'शापभ्रंशात्तु दिव्यानां तथा चापत्यलिप्सया। कार्यो मानुषसंयोगः शृङ्गाररससंश्रयः॥' इति। अन्यत्र कुतः क्षितेर्नवपल्लवोऽनुरागहतो लतार्थो जायत इत्येवमभिलाषरूपं प्रथमं दशान्तरमालम्ब्येत्यादिना द्वितीयचिन्तनरूपमाह। अनयत्कष्टेनात्यवाहयत्। अस्तमित्यादौ पल्लवशयने तस्थाविति संबन्धः। प्रतीच्यां पश्चिमायाम्। लाङ्गलिका फलिनी। मयूरशिखौषधिरित्यपरे, रक्तिकेत्यन्ये। कमलिनीकामुक इति सरस्वतीदयिताभिप्रायेणोक्तम्। कठोरो जरठः। सारसो लक्ष्मणः। शोणो लोहितः। शोचिर्दीप्तिः। 'ऋग्यजुःसामनामानि त्रयो वेदास्त्रयी स्मृता। वेदे च पठ्यते सैषा'।

नूपुररवावानुसारिणि च मन्दं मन्दं मन्दाकिनीहंस इव समुत्सर्पति शशिनि गगनतलम्, कृतसंध्याप्रणामा निशामुख एव निपत्य विमुक्ताङ्गी पल्लवशयने तस्थौ। सावित्र्यपि कृत्वा यथाक्रियमाणं सायंतनं क्रियाकलापमुचिते शयनकाले किसलयशयनमभजत। जातनिद्रा च सुष्वाप।

इतरा तु मुहुर्मुहुरङ्गवलनैर्विलुलितकिसलयशयनतला निमीलितलोचनापि नाभजत निद्राम्। अचिन्तयच्च—'मर्त्यलोकः खलु सर्वलोकानामुपरि, यस्मिन्नेवंविधानि संभवन्ति त्रिभुवनभूषणानि सकलगुणग्रामगुरूणि रत्नानि। तथा हि। तस्य मुखलावण्यप्रवाहस्य निष्यन्दबिन्दुरिन्दुः। तस्य च चक्षुषो विक्षेपा विकचकुमुदकुवलयकमलाकराः। तस्य चाधरमणेर्दीधितयो विकसितबन्धूकवनराजयः। तस्य चाङ्गस्य परभागोपकरणमनङ्गः। पुण्यभाञ्जितानि चक्षूंषि चेतांसि यौवनानि वा स्त्रैणानि, येषामसौ विषयो दर्शनस्य। क्षणं नु दर्शयता च तमन्यजन्मजनितेनेव मे फलितमधर्मेण। का प्रतिपत्तिरिदानीम्' इति चिन्तयन्त्येव कथंकथमप्युपजातनिद्रा चिरात्क्षणमशेत। सुप्ता च तं दीर्घलोचनं ददर्श।

त्र्यत्येव विद्या तपतीति।'कृत–'इत्यादिना 'तस्थौ'इत्यन्तेन क्रियान्तरत्यागेन वैमनस्यमावेद्यते।'वेपते श्वसते चैव मनोरथविचिन्तनैः। प्रद्वेषेणान्यकार्याणामनुस्मृतिरपीष्यते॥' **निशामुखएवेति**। न पुनरुचिते शयनकाले विमुक्ताङ्गीत्यनेन निःसहाङ्गत्वमस्या दर्श्यते। **तस्थाविति**। न पुनर्निद्रामलभत। यथाक्रियमाणमित्यनेन च सरस्वतीतोऽस्या व्यतिरेकं दर्शयन्सरस्वत्या एवानङ्गावस्थामाह।

विलुलितं विपर्यासितम्। मर्त्यलोक इत्यादिना गुणकीर्तनम्। चतुर्थमवस्थाविशेषमाह। तदुक्तम्—'अङ्गप्रत्यङ्गलीलाभिर्वाक्चेष्टासहितेक्षणैः। नास्त्यन्यः सदृशस्तेन तदेतद्गुणकीर्तनम्॥' इति। गुणा वैदग्ध्यादयः, सूत्राणि च। तद्वशेन गुरूणि बहुमानभाञ्जि। इतरत्र तु तिष्ठतु तावदेकः। गुणग्रामस्यापि गुणिरूपितेनापि दुर्वहानीति यावत्। **तस्येति**। पूर्वानुभूतस्य विन्दुरिति न केवलं लावण्यप्रवाहाभिप्रायेण यावत्संनिवेशसादृश्यात्। विक्षेपाः परतः प्रेरणानि। कुमुदेत्यादयुक्तम्। शुक्लकृष्णरक्तरुचित्वाच्चक्षुषो दीधितय इति मणिशब्दाभिप्रायेण। विकसितशब्देन लौहित्यातिशयमाह। अङ्गानि विद्यन्ते यस्य तदङ्गं शरीरम्। परभागो वर्णस्य वर्णान्तरेण शोभातिशयः। स्त्रैणानि स्त्रीसंबन्धीनि। का प्रतिपत्तिः किमनुष्ठेयम्। मदन–'इत्यादिनोद्वेगरूपं पञ्चममवस्थाभेदमाह। यदुक्तम्—'आसने शयने वापि न हृष्यति न तुष्यति। नित्यमेवोत्सुका च स्यादुद्वेगस्थानमाश्रिता॥ चिन्तानिःश्वासखेदेन हृद्दाहाभिनयेन च। कुर्यात्तदेवमत्यन्तमुद्योगाभिनयेन च॥' इति। दश किल

स्वप्नासादितद्वितीयदर्शना चाकर्णाकृष्टकार्मुकेण मनसि निर्दयमताड्यत मकरकेतुना । प्रतिबुद्धाया मदनशरताडितायाश्च तस्या वार्तामिवोपलब्धुमरतिराजगाम । तथा हि । ततः प्रभृति कुसुमधूलिधवलाभिर्वनलताभिरताडितापि वेदनामधत्त । मन्दमन्दमारुतविधुतैः कुसुमरजोभिरदूषितलोचनाप्यश्रुजलं मुमोच । हंसपक्षतालवृन्तव्रातवितताः शोणशीकरैरसिक्ताप्यार्द्रतामगात् । प्रेङ्खत्कादम्बमिथुनाभिरनूढाप्यघूर्णत वनकमलिनीकल्लोलदोलाभिः । विघटमानचक्रवाकयुगलविसृष्टैरस्पृष्टापि श्यामतामाससाद विरहनिःश्वासधूमैः । पुष्पधूलिधूसरैरदष्टापि व्यचेष्टत मधुकरकुलैः ।

अथ गणरात्रापगमे निवर्तमानस्तेनैव वर्त्मना तं देशमागत्य तथैव निवारितपरिजनश्छत्रधारद्वितीयो विकुक्षिर्डुढौके । सरस्वती तु तं दूरादेव संमुखमागच्छन्तं प्रीत्या सम्यक्समुत्थाय वरमृगीवोद्वीवा विलोकयन्ती मार्गोपरिश्रान्तमस्रपयदिव धवलितदशदिशा दृशा । कृतासनपरिग्रहं तु तं प्रीत्या सावित्री, पप्रच्छ—'आर्य, कच्चित्कुशली कुमारः' इति । सोऽब्रवीत्—'आयुष्मति, कुशली । स्मरति च भवत्योः । केवलममीषु दिवसेषु तनीयसीमिव तनुं बिभर्ति । अविज्ञायमानां चानिमित्तां शून्यतामिवाधत्ते । अपि

कामावस्थाः । तदुक्तम्—'प्रथमे त्वभिलाषः स्याद्द्वितीये चिन्तनं भवेत् । अनुस्मृतिस्तृतीये तु चतुर्थे गुणकीर्तनम् ॥ उद्वेगः पञ्चमे प्रोक्तः प्रलापः षष्ठ उच्यते । उन्मादः सप्तमश्चैव भवेद्व्याधिस्तथाष्टमे ॥ नवमे जडता प्रोक्ता दशमे मरणं भवेत् ॥' इति । अरतिर्दुःखासिका हि । कामवधूप्रतिपक्षभूतेति तदागमनाभिधानम् । हंसपक्षा इव तालवृन्तं व्यजनम् । आर्द्रतां सस्नेहताम्, क्लिन्नतां च । प्रेङ्खद्दोलायमानम् । कादम्बाः कृष्णहंसाः । श्यामता शृङ्गाररसाविष्कारिवैवर्ण्यम् । यदुक्तम्—'शृङ्गारदेवो भगवान्मुरारिः संगीयते श्यामवपुर्मुरारिः । श्यामो मनाक्स्निग्धतरश्च तेन शृङ्गारशंसी मुखराग उक्तः ॥'अथ श्यामता सधूमता । सधूमता इति विरोधाभासः ।

गणरात्रं निशाबह्वयः । **तेनैव वर्त्मनेति** । अनेन तस्य यदृच्छया तदाश्रयमागमनमिति दर्शयति । प्रधानप्रकृतेः स्थवीयसस्तथाविधव्यापारविनियोगादिनौचित्यात् । अत एव वक्ष्यति—'यथाभिलषितं देशमयासीत्' । डुढौके इत्यनेन निमित्तपरतन्त्रया संनिकृष्टमेवैनमालुलोकेति प्रदर्शितम् । यदुक्तम्—'पटुता धाष्टर्यता इङ्गिताकारज्ञानं प्रतारणे देशकालज्ञता कार्येषु विषह्यबुद्धित्वं लघ्वी प्रतिपत्तिः सापाया च इति दूतीगुणाः' । भरतमुनिरपि—'विज्ञानगुणसंपन्ना कथिनी लिङ्गिनी तथा । रङ्गोपजीविनी चापि प्रतिपत्तिविचक्षणा ॥ प्रोत्साहनैककुशलेत्यादिदूतीगुणैर्युता ॥'

च । अन्वक्षमागमिष्यत्येव मालतीति नाम्ना वाणिनी वार्तां वो विज्ञातुम् । उच्छ्वसितं सा कुमारस्य' इति। तच्छ्रुत्वा पुनरपि सावित्री समभाषत—'अतिमहानुभावः खलु कुमारो यदेवमविज्ञायमाने क्षणदृष्टेऽपि जने परिचितिमनुबध्नाति । तस्य हि गच्छतो यदृच्छया कथमप्यंशुकमिव मार्गलतासु मानसमस्मासु मुहूर्तमासक्तमासीत् । अशून्यं हि सौजन्यमाभिजात्येन वः स्वामिसूनोः । अलसः खलु लोको यदेवं सुलभसौहार्दानि येनकेनचिन्न क्रीणाति महतां मनांसि । सोऽयमौदार्यातिशयः कोऽपि महात्मनामितरजनदुर्लभो येनोपकरणीकुर्वन्ति त्रिभुवनम्' इति । विकुक्षिरुच्चावचैरालापैः सुचिरमिव स्थित्वा यथाभिलषितं देशमयासीत् ।

अपरेद्युरुद्यति भगवति द्युमणावुदामद्युतावभिद्युततारके तिरस्कृततमसि तामरसव्यासव्यसनिनि सहस्ररश्मौ शोणमुक्तीर्यायान्ती, तरलदेहप्रभावितानच्छलेनात्यच्छं सकलं शोणसलिलमिवानयन्ती, स्फुटितातिमुक्तककुसुमस्तबकसमत्विषि सटाले महति मृगपतावित्र गौरी तुरंगमे स्थिता, सलीनमुरोवध्नारोपितस्य तिर्यगुत्कर्णतुरगाकर्ण्यमाननूपुरपटुरणितस्यातिबहलेन पिण्डालक्तकेन पल्लवितस्य कुङ्कुमपिञ्जरितपृष्ठस्य चरणयुगलस्य प्रसरद्भिरतिलोहितैः प्रभाप्रवाहैरुभयतस्ताडनदोहदलोभागतानि किसलयितानि रक्ताशोकवनानीवाकर्षयन्ती, सकलजीवलोकहृदयहटहरणाघोषणयेव रशनया शिञ्जानजघनस्थला, धौतधवलनेत्रनिर्मितेन निर्मोकलघुतरेणाप्रपदीनेन कञ्चुकेन तिरोहिततनुलता,

---

इति । अत एवागृह्यकारतः प्रभृतीत्यादि वक्ष्यते । अन्वक्षं प्रत्यक्षम् । वाणिनी दूती । उच्छ्वसितमित्यनेनेति विस्रम्भवत्ता ख्याता । उच्छ्वसितं प्राण इति वा । यदृच्छया यथाकथंचित् । यश्च तथागच्छति यस्य निरवधानतया क्वचिदंशुकादि गलति । आभिजन्यत्वेन महाकुलीनत्वेनोपकरणीकुर्वन्त्यायततां नयन्ति । उच्चावचैः प्रकृतवस्त्वसंस्पर्शिभिः, विचित्रैरिति वा ।

अपरेद्युरित्यादावीदृशी मालती समदृश्यतेति संबन्धः । दिवि मणिरिव द्युमणिः । वियद्भूषणं सूर्यः । अभिद्युता न्यक्कृता । तामरसं पद्मम् । व्यासो विकासः । अतिमुक्तकं पुष्पभेदः । केचिन्मालतीलताकुसुममाहुः । सटास्ति यस्येति । 'प्राणिस्थादातो लजन्यतरस्याम्' । गौरी गौराङ्गी, पार्वती च । सजलतुरङ्गाङ्गस्पर्शपरिजिहीर्षयोरोवध्नेत्याद्युक्तम् । प्रियमधुरशब्दत्वादश्वानामाकर्ण्यमानेत्युक्तम् । पिण्डालक्तकः कथितोऽलक्तकरसः । दोहदोऽभिलाषः । वाद्यविशेषानुगताङ्घ्र्यघोषणा । रशना मेखला । शिञ्जानं शब्दायमानम् । निर्मोकः सर्पत्वक् आप्रपदं प्राप्नोत्या-

छातकश्चुकान्तरदृश्यमानैराश्यानचन्दनधवलैरवयवैः स्वच्छसलिलाभ्यन्तरविभाव्यमानमृणालकाण्डेव सरसी, कुसुम्भरागपाटलं पुलकबन्धचित्रं चण्डातकमन्तःस्फुटं स्फटिकभूमिरिव रत्ननिधानमादधाना, हारेणामलकीफलनिस्तुलमुक्ताफलेन स्फुरितस्थूलग्रहगणशारा, शारदीव श्वेतविरलजलधरपटलावृता द्यौः, कुचपूर्णकलशयोरुपरि रत्नप्रालम्बमालिकामरुणहरितकिरणकिसलयिनीं कस्यापि पुण्यवतो हृदयप्रवेशवनमालिकामिव बद्धां धारयन्ती, प्रकोष्टनिविष्टस्यैकस्य हाटककटकस्य मरकतमकरवेदिकासनाथस्य हरितीकृतदिगन्ताभिर्मयूखसंततिभिः स्खलकमलिनीभिरिव लक्ष्मीशङ्कयानुगम्यमाना, बहलताम्बूलकृष्णिकान्धकारितेनाधरसंपुटेन मुखशशिपीतं ससंध्यारागं तिमिरमिव वमन्ती, विकचनयनकुवलयकुतूहलालीनयालिकुलसंहत्या नीलांशुकजालिकयेव निरुद्धार्धवदना, नीलीरागनिहितनीलिम्ना शितिगलशितिना वामश्रवणाश्रयिणा दन्तपत्रेण कालमेघपल्लवेनेव विद्युदिव द्योतमाना, बकुलफलानुकारिणीभिस्तिसृभिर्मुक्ताभिः कल्पितेन वालिकायुगलेनाधोमुखेनालोकजलवर्षिणा सिञ्चन्तीवातिकोमले भुजलते, दक्षिणकर्णावतंसितया केतकीगर्भपलाशलेखया रजनिकरजिह्वालतयेव लावण्यलोभेन लिह्यमानकपोलतला, तमालश्यामलेन मृगमदामोदनिष्यन्दिना तिलकबिन्दुना मुद्रितमिव मनोभवसर्वस्वं वदनमुद्वहन्ती, ललाटलासकस्य सीमन्तचुम्बिनश्चटुलातिलकमणेरुदञ्चता चटुलेनांशुजालेव रक्तांशुकेनेव कृतशिरोवगुण्ठना, पृष्ठप्रेङ्खदनादरसंयमनशिथिलजूटिकाबन्धा, नीलचामरावचूलिनीव चू-

---

प्रपदीनः पादं यावत् छातस्तनुः । कुसुम्भं पद्मकम् । नानावर्णबिन्दुन्यासः पुलकबन्धः, मणिविशेषाश्च पुलकाः । चण्डातकमर्धोरुकम् । कुचावेव कस्यापि पुण्यवत इवेति वक्ष्यमाणाभिप्रायेण पूर्णकलशौ । कस्यापीत्यलौकिकस्य । वनमाला पत्रपुष्पयोजिता स्रक् । सापि पूर्णकलशयोरुपरि बध्यते । प्रकोष्टः प्रकुञ्चनकः । वेदिका रत्नप्रतिष्ठापीठिका । बहलं पौनःपुन्येन कृतम् । कृष्णिका कृष्णलेखा । मुखमेव तमःपारप्रतिपिपादयिषया शशी । ताम्बूलकारणत्वेन लौहित्यमेव संभवतीति ससंध्यारागमित्युक्तम् । नील्योषधिभेदः । शितिनीलः । पल्लवः पिण्डः । बालिका कर्णोपवेधेऽलंकारः । अधोमुखेन घटादिना जलवर्षिणा लता सिच्यते । मृगमदः कस्तूरिका । तिलकबिन्दुः । परिवर्तुलस्तिलकः । लासको नर्तकः । 'सुवर्ण-

डामणिमकरिकासनाथा, मकरकेतुकेतुपताका, कुलदेवतेव, चन्द्रमसः, पुनःसंजीवनौषधिरिव पुष्पधनुषः, वेलेव रागसागरस्य, ज्योत्स्नेव यौवनचन्द्रोदयस्य, महानदीव रतिरसामृतस्य, कुसुमोद्भूतिरिव सुरततरोः, बालविद्येव वैदग्ध्यस्य, कौमुदीव कान्तेः, धृतिरिव धैर्यस्य, गुरुशालेव गौरवस्य, बीजभूमिरिव विनयस्य, गोष्ठीव गुणानाम्, मनस्वितेव महानुभावतायाः, तृप्तिरिव तारुण्यस्य, कुवलयदलदामदीर्घलोचनया पाटलाधरया कुन्दकुड्मलस्फुटदशनया शिरीषमालासुकुमारभुजयुगलया कमलकोमलकरया बकुलसुरभिनिःश्वसितया चम्पकावदातया कुसुममय्येव ताम्बूलकरङ्कवाहिन्या महाप्रमाणाश्वतरारूढयानुगम्यमाना, कतिपयपरिचारकपरिकरा मालती समदृश्यत । दूरादेव च दधीचप्रेम्णा सरस्वत्या लुण्ठितेव मनोरथैः, आकृष्टेव कुतूहलेन, प्रत्युद्गतेवोत्कलिकाभिः, आलिङ्गितेवोत्कण्ठया, अन्तःप्रवेशितेव

शृङ्गलाबद्धो नानारत्नौघमण्डितः । ललाटलम्ब्यलंकारश्चटुलातिलको मतः ॥' अवचूलं चिह्नम् । मकरिका मकराकारं रूपम् । वेला यथा सागरं क्षोभयति तद्वदेव रागम् । क्षोभेन यथा सागरो दुरुत्तर एवमेतयापि रागः । यथा । ज्योत्स्नया विना चन्द्रोदयो भवन्नपि न क्वापि विलसन्विभाव्यते तथैतया विना यौवनं सविलासमन्यत्र न दृश्यते । रतिप्रधानो रसः शृङ्गार एव । माधुर्यातिशययोगित्वात्प्रकृष्टत्वाच्च । ह्लादनममृतम् । यदुक्तम्—'शृङ्गार एव परमः परः प्रह्लादनो रसः' इति । संप्रयोगो रतं रहःशयनं मोहनमिति पर्यायाः । बालविद्या न कंचन मुञ्चति, तद्वदेष वैदग्ध्यम् । **कौमुदीति** । तथाविधकान्त्यतिशयसंभवात् । ध्रियते येन धृतिः । अस्यां सत्यां धैर्यमपि । यद्वा धृतिः प्रवेशरक्षणम् । यथा प्रविशन्कश्चिद्राजनिकटं ध्रियते केनचित्तथा धैर्यं तावत्प्रसरति । यावदेषा न दृष्टा एतस्यां दृष्टायां सर्वं धैर्यशून्या इति । 'समानविद्यावित्तशीलबुद्धिवयसामनुरूपैरालापैरेकत्रासनबन्धो गोष्ठी मनस्विता' इत्यनेनैतस्या महानुभावताया व्यभिचारित्वमुच्यते। यस्माद्यत्र मनस्विता तत्र महाशयत्वमेवावश्यं संभावयतीति स्थितमेव । **तृप्तिरिवेति** । यथा कश्चित्संजाततृप्तिर्नान्यत्किंचित्पुनरपेक्षते तद्वदासादितमालतीकं तारुण्यम् । एतदाश्रयणेन परिपूर्णवैषयिकोपभोगप्राप्तिस्तारुण्यस्येत्यर्थः । **कुसुममय्येवेति** । कुवलयादिभिर्नयनादीनां विधानम् । तरुणोऽश्वोऽश्वतरः । 'वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वम्' इति तनुत्वे तरप्। अत्र च व्याख्यातम्—'तनुत्वं द्वितीयवयःप्राप्तिः' इति । अश्वतरो वा गर्दभेनाश्वायां जातः । **मालतीति** । एवं दधीचपरिवारभूतया मालत्या गुणवर्णनद्वारेण सरस्वत्या एव निःसामान्यगुणातिशयो ध्वन्यते । **लुण्ठितेवेति** । वक्ष्यमाणं प्रार्थनादि । तया मनोरथैरुत्प्रेक्ष्य स्वीकृतमित्यतस्तैर्लुण्ठितेवे-

हृदयेन, स्नपितेवानन्दाश्रुभिः विलुम्पेव स्मितेन, वीजितेवोच्छ्वसितैः, आच्छादितेव चक्षुषा, अभ्यर्चितेव वदनपुण्डरीकेण, सखीकृतेवाशया सविधमुपययौ । अवतीर्य च तुरगादूरादेवावनतेन मूर्ध्ना प्रणाममकरोत् । आलिङ्गिता च ताभ्यां सविनयमुपाविशत् । सप्रश्रयं ताभ्यां संभाषिता च पुण्यभाजमात्मानमन्यत । अकथयच्च दधीचसंदिष्टं शिरसि विनिहितेनाञ्जलिना नमस्कारम् । अगृह्णाच्चाकारतः प्रभृत्यग्राम्यतया तैस्तैरपि पेशलैरालापैः सावित्रीसरस्वत्योर्मनसी ।

क्रमेण चातीते मध्यंदिनसमये शोणमवतीर्णायां सावित्र्यां स्नातुमुत्सारितपरिजना साकूता मालती कुसुमप्रस्तरशायिनीं समुपसृत्य सरस्वतीमावभाषे—'देवि, विज्ञप्यं नः किंचिदस्ति रहसि । अतो मुहूर्तमवधानदानेन प्रसादं क्रियमाणमिच्छामि' इति । सरस्वती तु दधीचसंदेशाशङ्किनी किं वक्ष्यतीति स्तनविनिहितवामकरनखकिरणदन्तुरितमुद्भिद्यमानकुतूहलाङ्कुरनिकरमिव हृदयमुत्तरीयदुकूलवल्कलैकदेशेन संछादयन्ती, गलतावतंसपल्लवेन श्रोतुं श्रवणेनेव धावमानेनानवरतश्वाससंदोहदोलायितां जीविताशामिव समासन्नलतामवलम्बमाना, समुत्कुल्लस्य मुखशशिनो लावण्यप्रवाहेण शृङ्गाररसेनेव प्लावयन्ती जीवलोकम्, शयनकुसुमपरिमललग्नैर्मधुकरकदम्बकैर्मदनानलदाहश्यामलैर्मनोरथैरिव निर्गत्य मूर्तैरुत्क्षिप्यमाणा, कुसुमशयनीयात्स्मरशरसंज्वरिणी, मन्दं मन्दमुदगात् । 'उपांशु कथय' इति कपोलतलप्रतिबिम्बितां लज्जयेव कर्णमूलं मालतीं प्रवेशयन्ती मधुरया गिरा सुधीरमुवाच—'सखि मालति किमर्थमेवमभिदधासि । काहमवधानदानस्य शरीरस्य प्राणानां वा । सर्वस्याप्रार्थितोऽपि प्रभवत्येवातिवेलं चक्षुष्यो जनः । सा न

त्युक्तम् । लुण्ठनं च पाथेयाभिवितरणमेवमन्यत् । उत्कलिका रुहरुहिका । सविधं समीपम् । अपि च यः स्निग्धो दूरात्सविधमायाति, तस्य लुण्ठनादिसर्वमर्चनावसानं क्रियत इति ध्वनिः । पेशलैर्हृद्यैः ।

आकूतमभिप्रायः । रहस्येकान्ते । सरस्वतीत्यादौ सरस्वती कुसुमशयनीयादुदगादुदतिष्ठदिति संबन्धः । अवतंसपल्लवेन गलतेतीत्थंभूतलक्षणे तृतीया । संदोहः समूहः । संज्वरः संतापः । उपांश्वनुक्तम् । अतिवेलमतिमात्रम् । 'अतिपेशलः' इति पाठे पेशलः सुन्दरः । चक्षुष्योऽनुकूलः । स्नमिव व्यक्तम् । चक्षुष्म इतिभङ्ग्या दधी-

काचिद्या न भवसि मे स्वसा सखी प्रणयिनी प्राणसमा च । नियुज्यतां यावतः कार्यस्य क्षमं क्षोदीयसो गरीयसो वा शरीरकमिदम् । अनवस्करमाश्रवं मे त्वयि हृदयम् । प्रीत्या प्रतिसरा विधेयास्मि ते । व्याबृणु वरवर्णिनि, विवक्षितम्' इति । सा त्ववादीत्—'देवि, जानास्येव माधुर्यं विषयाणाम्, लोलुपतां चेन्द्रियग्रामस्य, उन्मादितां च नवयौवनस्य, पारिप्लवतां च मनसः । प्रख्यातैव मन्मथस्य दुर्निवारता । अतो न मामुपालम्भेनोपस्थातुमर्हसि । न च बालिशता चपलता चारणता वा वाचालतायाः कारणम् । न किंचिन्न कारयत्यसाधारणा स्वामिभक्तिः । सा त्वं देवि, यदैव दृष्टासि देवेन तत एवारभ्यास्य कामो गुरुः, चन्द्रमा जीवितेशः, मलयमरुदुच्छ्वासहेतुः, आधयोऽन्तरङ्गस्थानेषु, संतापः परमसुहृत्, प्रजागर आप्तः, मनोरथाः सर्वगताः, निश्वासा विग्रहाग्रेसराः, मृत्युः पार्श्ववर्ती, रणरणकः संचारकः, संकल्पा बुद्ध्युपदेशवृद्धाः । किं वा विज्ञा-

च इति ध्वनति । स्वसा भगिनी । प्रणयिनी विश्वस्ता । अतिशयेन क्षुद्रमल्पं क्षोदीयः । 'ज्ञेयं गुह्यमवस्करम्' । आश्रवं वचसि स्थितम् । प्रतिसरानुकूला । विधेया वश्या । व्याबृणु प्रकटय । वरवर्णिनि वरारोहे । लोलुपतां साभिलाषत्वम् । 'चलार्थकौ निगद्येते परिप्लवपरिप्लवौ' । बालिशोऽज्ञः । चारणता धूर्तता । असाधारणानन्यसदृशी । देवी देवेनेति च परस्परसमगुणयोगित्वमभिव्यनक्ति । गुरुर्गरीयान्, उपदेष्टा वा । तद्वशवर्तित्वात् । यश्च देवस्तस्य गुरुराचार्यः कश्चिदवश्यं संभवति । जीवितस्येश्वरः स्वामी जीवितेशः । शिशिरतया मदनदाहप्रशमनहेतुत्वात् । अमृतमयत्वेन च जीवितसंधारणसक्तत्वात् । अथ च जीवितेशो मृत्युः । चन्द्रादयो ह्यापातत एव तापं शमयन्ति, अनवरतं सेव्यमानाः पुनः कामोद्दीपकत्वेन मृत्युं दिशन्ति । राजपक्षे जीवितेशः कश्चित्पुरोहितप्रायः । उच्छ्वसनमुच्छ्वासस्तत्र हेतुः। अथ च श्वासोत्कान्तौ कारणम्, इतरत्र सचिवप्राया विश्वसनीयाः । आधयश्चित्तपीडाः । अत एवान्तरङ्गमन्तःशरीरं यानि स्थानानि तेषु, इतरत्रान्तरङ्गान्तर्वंशिकस्तत्स्थानेषु विश्वसनीयजनाधिकारेषु । परं प्रकृष्टम् । असुहरोऽमित्रो वा, अन्यत्र परमसुहृन्मित्रं च आप्तः प्राप्तो बान्धवप्रायः कश्चित् । सर्वगताश्चारा अपि संस्थाख्याः । विग्रहो विरोधः, देहश्च । **मृत्युरिति** । लदनङ्गीकारेण निश्चितं म्रियते । राज्ञोऽपि पार्श्वे मृत्युस्तिष्ठत्येव । रणरणको दुःखमरतिकृतम् । अत एव संचारक एकत्र नरे संभवदितरत्र संचारयति, चरितं वस्तु यः प्रापयते सः । द्विविधा हि चाराः—'संस्थाः, संचारकाश्च ।

पयामि। अनुरूपो देव्या इत्यात्मसंभावना, शीलवानिति प्रक्रमविरुद्धम्, धीर इत्यवस्थाविपरीतम्, सुभग इति त्वदायत्तम्, स्थिरप्रीतिरिति निपुणोपक्षेपः, जानाति सेवितुमित्यस्वामिभावोचितम्, इच्छति दासभावमामरणात्कर्तुमिति धूर्तालापः, भवनस्वामिनी भवसीत्युपप्रलोभनम्, पुण्यभागिनी भजति भर्तारं तादृशमिति स्वामिपक्षपातः, त्वं तस्य मृत्युरित्यप्रियम्, अगुणज्ञासीत्यधिक्षेपः, स्वप्नेऽस्य बहुशः कृतप्रसादासीत्यसाक्षिकम्, प्राणरक्षार्थमर्थयत इति कातरता, तत्रागम्यतामित्याज्ञा, वारितोऽपि बलादागच्छतीति परिभवः। तदेवमगोचरे गिरामसीति श्रुत्वा देवी प्रमाणम्' इत्यभिधाय तूष्णीमभूत्।

अथ सरस्वती प्रीतिविस्फारितेन चक्षुषा प्रत्यवादीत्—'अयि, न शक्नोमि बहु भाषितुम्। एषास्मि ते स्मितवादिनि वचसि स्थिता। गृह्यन्तामम्मी प्राणाः' इति। मालती तु 'यदाज्ञापयस्यतिप्रसादः' इति व्याहृत्य प्रहर्षपरवशा प्रणम्य प्रजविना तुरगेण ततार शोणम्। अगाच्च दधीचमानेतुं च्यवनाश्रमपदम्। इतरा तु सखीस्नेहेन सावित्रीमपि विदितवृत्तान्तामकरोत्। उत्कण्ठाभारभृता च ताम्यता चेतसा कल्पायितं कथंकथमपि दिवसशेषमनैषीत्, अस्तमुपगतवति भगवति गभस्तिमति, स्तिमिततरमवतरति तमसि, प्रहसितामिव सितां दिशं पौरंदरीं दरीमिव केसरिणि मुञ्चति चन्द्रमसि, सरस्वती शुचिनि चीनांशुकसुकुमारे तरङ्गिणी दुगूलकोमले शयन इव शोणसैकते समुपविष्टस्वप्नकृतप्रार्थनापादपतनलग्नां दधीचचरणनखचन्द्रिकामिव ललाटिकां दधाना, गण्डस्थलादर्शप्रतिबिम्बितेन 'चारुहासिनि, अयमसावाहूतो हृदयदयितो जनः' इति श्रवणसमीपवर्तिना निवेद्यमान-

---

वृद्धा महान्तः, स्थविराश्च। अनुरूप इत्यादिनेदमिदं तत्रास्तीति वक्तोक्त्या सातिशयं मालती वैदग्ध्येनाह। प्रक्रम आरम्भः। निपुणोपक्षेपो बुद्धिमत्प्रक्रमः। धूर्तालापः प्रतारणावचनम्। **वारित इति**। भवत्येवेत्यर्थात्।

प्रजविनेति साभिप्रायम्। अस्तमित्यादौ सरस्वती प्रतिपालयामासेति संबन्धः। गभस्तिमान्रविः। पौरंदर्यैन्द्री। दरी खदा। चीनेत्यादि सैकतविशेषणम्। उपमानस्य तु दुगूलकोमल इत्युक्तम्। तरङ्गिणी प्रतिदिनं क्षीयमाणेन वारिणा कृतलेखे भङ्गियुक्ते च चन्द्रिका कान्तिरत्र। ललाटालंकारो ललाटिका।

मदनसंदेशेवेन्दुना, विकीर्यमाणनखकिरणचक्रवालेन बालव्यजनीकृतचन्द्रकलाकलापेनेव करेण वीजयन्ती स्वेदिनं कपोलपट्टम्, 'अत्र दधीचाहते न केनचित्प्रवेष्टव्यम्' इति तिरश्चीनं चित्तभुवा पातितां विलासवेत्रलतामिव बालमृणालिकामधिस्तनं स्तनयन्ती कथमपि हृदयेन वहन्ती प्रतिपालयामास । आसीच्चास्या मनसि—'अहमपि नाम सरस्वती यत्रामुना मनोजन्मना जघन्येव परवशीकृता । तत्र का गणनेतरासु तपस्विनीष्वतितरलासु तरुणीषु' इति ।

आजगाम च मधुमास इव सुरभिगन्धवहः, हंस इव कृतमृणालधृतिः, शिखण्डीव घनप्रीत्युन्मुखः, मलयानिल इवाहितसरसचन्दनधवलतनुलतोत्कम्पः, कृष्यमाण इव कृतकरकचग्रहेण ग्रहपतिना, प्रेर्यमाण इव कंदर्पोद्दीपनदक्षेण दक्षिणानिलेन, उह्यमान इवोत्कलिकावहलेन रतिरसेन, परिमलसंपातिना मधुपपटलेन पटेनेव नीलेनाच्छादिताङ्गयष्टिः, अन्तःस्फुरता मत्तमदनकरिकर्णशङ्खायमानेन प्रतिमेन्दुना प्रथमसमागमविलासविलक्षस्मितेनेव धवलीक्रियमाणैककपोलोदरो मालतीद्वितीयो दधीचः । आगत्य च हृदयगतदयितानूपुररवमिश्रयेव हंसगद्गदया गिरा कृतसंभाषणो यथा मन्मथः समाज्ञापयति, यथा यौवनमुपदिशति, यथानुरागः शिक्षयति, यथा विदग्धताध्यापयति, तथा तामभिरामां

चक्रवालं समूहः बालव्यजनं चामरम् । स्तनमध्ये प्रवेशाभावात्तिरश्चीनमित्युक्तम् । यश्च वेत्री प्रवेशनिषेधननिमित्तं वेत्रलतां पातयति स तिरश्चीनं स्तनयोरधिस्तनम् । विभक्त्यर्थेऽव्ययीभावः । कुचपृष्ठ इत्यर्थः । स्तनयन्ती कलयन्ती । स्तनिः शब्दार्थश्चौरादिकः । 'स्तनन्ति' इति वा पाठः । तपस्विनीषु वराकीषु ।

आजगामेत्यादावाजगामेति संबन्धः । सुरभिगन्धवहो वातः सुरभिगन्धं च यो वहति । धृतिर्धारणम्, प्राणयात्रा च । घनः । सरसं सान्द्रं यच्चन्दनं तेन धवलया तनुलतयाहितत्रप उत्कम्पः कामधर्मो यस्य । अन्यत्र चन्दनांश्च धवांश्च लान्ति श्रयन्ति यास्तन्व्यो लतास्तासामाहित उत्कम्पः कम्पनं येनेति । कृष्यमाण इत्युद्दीपनकारणत्वात् । करा रश्मयः, हस्तश्च करः । हस्तस्य कर्षणं समुचितम् । ग्रहपतिश्चन्द्रः । **प्रेर्यमाण इति** । अनिलस्योचितमेतत्कर्म । **उह्यमान इति** । जलस्योचितमेतत् । उत्कलिका रुहरुहिका, ऊर्मयश्च । रसोऽभिलाषः, जलं च । परिमल आमोदः । पटलं समूहः । प्रतिमा प्रातिच्छन्दकम् । **यथा मन्मथ इति** । मन्मथस्य प्रभवनशीलत्वेनाज्ञादानमुचितम् । एवं सर्वत्रोपदिशतीत्थमित्थं वर्तस्वेत्युपदेशः । देवताविषयं संभोगशृङ्गारवर्णनमनुचितमिति न तत्र विस्तरः प्रवर्तते । कुमारित्वे च गान्धर्वविवाहो विस्तरेण

रामामरमयत्। उपजातविस्रम्भा चात्मानमकथयदस्य सरस्वती। तया तु सार्धमेकं दिवसमिवानयत्संवत्सरमधिकम्।

अथ दैवयोगात्सरस्वती बभार गर्भम्। असूत चानेहसा सर्वलक्षणाभिरामं तनयम्। तस्मै च जातमात्रायैव 'सम्यक्सरस्वत्याः सर्वे वेदाः सर्वाणि च शास्त्राणि सकलाश्च कलाः मत्प्रसादात्स्वयमाविर्भविष्यन्ति' इति वरमदात्। सङ्कर्तृश्लाघया दर्शयितुमिव हृदयेनादाय दधीचं पितामहादेशात्समं सावित्र्या ब्रह्मलोकमारुरोह। गतायां च तस्यां दधीचोऽपि हृदये ह्लादिन्येवाभिहतो भार्गववंशसंभूतस्य भ्रातुर्ब्राह्मणस्य जायामक्षमालाभिधानां मुनिकन्यकामात्मसूनोः संवर्धनाय नियुज्य विरहातुरस्तपसे वनमगात्। यस्मिन्नेवावसरे सरस्वत्यसूत तनयं तस्मिन्नेवाक्षमालापि सुतं प्रसूतवती। तौ तु सा निर्विशेषं सामान्यस्तन्या शनैः शनैः शिशू समवर्धयत्। एकस्तयोः सारस्वताख्य एवाभवत्, द्वितीयोऽपि वत्सनामाभवत्। आसीच्च तयोः सोदर्ययोरिव स्पृहणीया प्रीतिः।

अथ सारस्वतो मातुर्महिम्ना यौवनारम्भ एवाविर्भूताशेषविद्यासंभारस्तस्मिन्सवयसि भ्रातरि प्रेयसि प्राणसमे सुहृदि वत्से वाङ्मयं समस्तमेव संचारयामास। चकार च कृतदारपरिग्रहस्यास्य तस्मिन्नेव प्रदेशे प्रीत्या प्रीतिकूटनामानं निवासम्। आत्मनाप्याषाढी, कृष्णाजिनी, वल्कली, अक्षवलयी, मेखली, जटी च भूत्वा तपस्ततो जनयितुरेव जगामान्तिकम्।

अथ तस्मात्प्रवर्धमानादिपुरुषजनितात्मचरणोन्नतिनिर्गतप्रघोषः, परमेश्वरशिरोधृतः, सकलकलागमगम्भीरः, महामुनिमान्यो

न तथा वर्णितः शापनिर्वाहणमात्रपरत्वादिति। वृत्तस्यान्यथानिजभर्तृत्यागो दोषावहः किमर्थं कृत इत्यादिकाः कुविकल्पा उत्पद्येरन्निति।

अनेहसा कालेन। रहस्यं ज्ञानभागः। ह्लादिनी वज्रम्।

वाक्प्रस्तुता यत्र तद्वाङ्मयम्। 'आषाढसंज्ञो दण्डः स्यात्पालाशो व्रतचारिणाम्। वृक्षत्वङ्निर्मितं वस्त्रं वल्कलं समुदाहृतम्॥' मेखला मुञ्जतृणादिरचितं कटिसूत्रम्। जटा रूक्षसंहतकेशाः।

अथेत्यादौ वत्सात्प्रावर्तत विपुलो वंश इति संबन्धः। प्रवर्धमानाः संतानादिना

विपक्षक्षोभक्षमः, क्षितितललब्धायतिः, अस्खलितप्रवृत्तो भागीरथीप्रवाह इव पावनः प्रावर्तत विपुलो वंशः । यस्मादजायन्त वात्स्यायना नाम गृहमुनयः, आश्रितश्रौता अप्यनालम्बितालीकबककाकवः, कृतकुक्कुटव्रता अप्यबैडालवृत्तयः, विवर्जितजनपङ्क्तयः, परिहृतकपटकीरकुचीकूर्चाकूताः, अगृहीतगह्वराः, न्यक्कृतनिकृतयः, प्रसन्नप्रकृतयः, विगतविकृतयः, परपरिवादपराचीनचेतसः, वर्णत्रयव्यावृत्तिविशुद्धान्धसः, धीरधिषणावधूताध्येषणाः, असङ्कसुकस्वभावाः, प्रणतप्रणयिनः, शमितसमस्तशाखान्तरसंशीतयः, उद्घाटितसमग्रग्रन्थार्थग्रन्थयः, कवयः, वाग्मिनः, विमत्सराः, सरसभाषितव्यसनिनः, विदग्धपरिहासवेदिनः, परिचयपेशलाः, नृत्यगीतवादित्रेष्वबाह्याः, ऐतिह्यस्यावितृष्णाः, सानुक्रोशाः, सत्यशुचयः, साधुसंमताः, सर्वसत्त्वसौ-

वृद्धिं गच्छन्तो य आदिपुरुषाः पूर्वबान्धवाः शुक्राद्यास्तैः कृताः स्वेषां चरणानां कठादिशाखाध्यायिनामुन्नतिरुत्कर्षो यस्य सः । अन्यत्र प्रवर्धमानस्तु वामनरूपो य आदिपुरुषो हरिस्तेन जनिता स्वपदोन्नतिर्माहात्म्यं यस्य स इति। किल त्रैलोक्याक्रान्तिकाले ब्रह्मलोकप्राप्ताद्विष्णुपदाद्ब्रह्मणा कमण्डलुजलक्षालिताद्गङ्गा समभवदिति वार्ता । प्रदोषो यशः, शब्दश्च । परमेश्वरो राजा, हरश्च । सकलानां कलानां वृत्ताद्यानामागमस्तेन सह कलकलेन च सकलकलं यदागमनं तु न च । महामुनिर्नहुरपि । विपक्षाः शत्रवः, शैलाश्च। वीनां पक्षिणां वा पक्षच्छेदेषु सहिष्णुः । आयतिः प्रतापः, विस्तारश्च । स्खलितं स्वाचारच्युतिः । प्रवृत्तः प्रकृष्टवृत्तः । अस्खलितं असंरुद्धं कृत्वा गतश्च । श्रौतं वेदभवम्, चिरवृत्तं च। 'भिन्नो भयाद्वा शोकाद्वा ध्वनिः काकुरुदाहृता'। अत्र च छद्म लक्ष्यते । बकस्य काकुः बकच्छद्म यैश्च चिरवृत्तमाश्रितं ते छद्मचारित्वादाश्रितबककाकवो भवन्त्येव । अमी तु न तथेति विरोधः। कुक्कुटव्रतं नियमविशेषः। यत्र कुक्कुटाण्डप्रमाणग्रासभोजनम्। न बैडाली हिंसावृत्तिर्येषां तैः विरोधे तु कुक्कुटानां व्रतं भक्षणं येन कृतं स कथं बिडालवृत्तिर्न स्यात् । पङ्क्तिर्लोकप्रसिद्धो व्यवहारः, पाको वा । कपटो व्याजवृत्तिः । कूर्चाः स्फुटाः । आत्ममहिम्ना व्यवहारः, समूह इत्यन्ये । एतेष्वाकूतं परिहृतं यैः । गह्वरं पापम् । निकृतिः शाठ्यम्। प्रकृतिः स्वभावः । पराचीनं पराङ्मुखम् । अन्धोऽन्नम् । धीरा स्थिरा । धिषणा बुद्धिः । अध्येषणा याच्ञा । असङ्कसुकः स्थिरः, मृदुर्वा । शाखाः कठाद्याः । संशीतिः संशयः । ग्रन्थिर्दुर्बोधः प्रदेशः । परिहासं विदन्ति, न तु स्वयं कुर्वन्ति । परिचयः संस्तवः । सुकुमाराः अद्वन्द्वकूटा इत्यर्थः। अबाह्याः, न तु तदेकनिष्ठाः। ऐतिह्यमागमः । अनुक्रोशो दया । संमता इष्टाः । सौहार्दं प्रीतिः । सर्वे गुणा धै-

हार्दद्रवार्द्रहृदयाः, तथा सर्वगुणोपेता राजसेनानभिभूताः, क्षमाभाज आश्रितनन्दनाः, अनिस्त्रिंशा विद्याधराः, अजडाः कलावन्तः, अदोषास्तारकाः, अपरोपतापिनो भास्वन्तः, अनुष्माणो हुतभुजः, अकुसृतयो भोगिनः, अस्तम्भाः पुण्यालयाः, अलुप्तकृतुक्रिया दक्षाः, अव्यालाः, कामजितः, असाधारणा द्विजातयः ।

तेषु चैवमुत्पद्यमानेषु, संसरति संसारे, यात्सु युगेषु, अवतीर्णे कलौ, वहत्सु वत्सरेषु, व्रजत्सु वासरेषु, अतिक्रामति च काले प्रसवपरम्पराभिरनवरतमापतति विकाशिनि वात्स्यायनकुले, क्रमेण कुबेरनामा वैनतेय इव गुरुपक्षपाती द्विजो जन्म लेभे । तस्याभवन्नच्युत ईशानो हरः पाशुपतश्चेति चत्वारो युगारम्भा इव ब्राह्मतेजोजन्यमानप्रजाविस्तारा नारायणबाहुदण्डा इव सच्चक्रनन्दकास्तनयाः । तत्र पाशुपतस्यैक एवाभवद्भूभार इवा-

---

र्याद्याः । राज्ञां सेनया चानभिभूता ये च सर्वैर्गुणैः सत्त्वरजस्तमोभिर्युक्तास्ते कथं राजसेन गुणेनानभिभूता भवन्तीति विरोधः । एवमुत्तरत्र विरोध उद्भावनीयः । क्षमा क्षान्तिः, भूश्च । आश्रितानां नन्दना नन्दयितारः, देवोद्यानं नन्दनं च । न निस्त्रिंशा अक्रूराः । विद्यां धारयन्तीति विद्याधराः पण्डिताः, निस्त्रिंशाश्च खड्गा एव । ये च विद्याधरा देवभूतास्ते सखड्गा एव । न त्वनिस्त्रिंशा इति मालाखड्गगुलिकाञ्जनादिना भेदेन भिन्नानामपि विद्याधराणां खड्गहस्तत्वं न व्यभिचरति । अजडा अमन्दधियः अशीताश्च । कलावन्तो गीताभिज्ञाः, कलावांश्चन्द्रः स चाजडोऽशीत इति विरोधः । दोषा द्वेष्याद्याः, रात्रिश्च । तारयन्तीति तारका आचार्याः, नक्षत्राणि च । उपतापः पीडा, उष्णत्वं च । भास्वन्तस्तेजस्विनः, आदित्याश्च । ते परांस्तापयन्ति । ऊष्मा स्मयः, दाहिका शक्तिश्च । हुताशशब्देन हुतमिष्टमुच्यते हुतं भुञ्जते हुतभुजः, आहिताग्नयो वह्नयश्च । कुसृतिः शाठ्यम्, कौ भूमौ सृतिः सरणम् । भोगिनः सुखिनः, सर्पाश्च । स्तम्भः स्तब्धता, सात्विको भावभेदश्च, अप्रणतिर्वा, गृहधारणकाष्ठं च । पुण्यालयाः सुकृतिनः, मठादिस्थानानि च । दक्षाश्चतुराः, प्रजापतिभेदश्च दक्षः । स च लुप्तकृतुक्रियो हररोषजेन वीरभद्रेण । व्यालाः शठाः, सर्पाश्च । कामजितः संतुष्टाः, हरश्च कामजित् । असाधारणाः सर्वोत्कृष्टाः । द्विजातयो विप्राः । येषां च द्वे जाती तेषां कथं नासादृश्यम् ।

काल इति । पूर्वोक्ते । अन्यथैतत्पुनरुक्तं स्यात् । पक्षपातो भक्तिर्यस्यास्ति सः पक्षैश्च यो याति सः । द्विजो विप्रः विधुः, पक्षी च । युगारम्भा अपि चत्वारः । ब्रह्म वेदादि, स्रष्टा च ब्रह्मा । सच्चक्रस्य साधुवृन्दस्य नन्दकास्तोषयितारः । चक्रं

चलकुलस्थितिश्चतुरुदधिगम्भीरोऽर्थपतिरिति नाम्ना समग्राग्रजन्मचक्रचूडामणिर्महात्मा सूनुः । सोऽजनयद्भृगुं हंसं शुचिं कविं महिदत्तं धर्मं जातवेदसं चित्रभानुं त्र्यक्षमहिदत्तं विश्वरूपं चेत्येकादश रुद्रानिव सोमामृतरसशीकरच्छुरितमुखान्पवित्रान्पुत्रान् । अलभत च चित्रभानुस्तेषां मध्ये राजदेव्यभिधानायां ब्राह्मण्यां बाणमात्मजम् । स बाल एव विधेर्बलवतो वशादुपसंपन्नया व्ययुज्यत जनन्या । जातस्नेहस्तु नितरां पितैवास्य मातृतामकरोत् । अवर्धत च तेनाधिकतरमेधीयमानधृतिर्धात्रि निजे ।

कृतोपनयनादिक्रियाकलापस्य समावृत्तस्य चतुर्दशवर्षदेशीयस्य पितापि श्रुतिस्मृतिविहितं कृत्वा द्विजजनोचितं निखिलं पुण्यजातं कालेनादशमीस्थ एवास्तमगात् । संस्थिते च पितरि महता शोकेनाभीलमनुप्राप्तो दिवानिशं दह्यमानहृदयः कथंकथमपि कतिपयान्दिवसानात्मगृह एवानैषीत् । गते च विरलतां शोके शनैः शनैरविनयनिदानतया स्वातंत्र्यस्य, कुतूहलबहलतया च बालभावस्य, धैर्यप्रतिपक्षतया च यौवनारम्भस्य, शैशवोचितान्यनेकानि चापलान्याचरन्नित्वरो बभूव । अभवंश्चास्य वयसा समानाः सुहृदः सहायाश्च । तथा च । भ्रातरौ पारशवौ चन्द्रसेनमातृषेणौ, भाषाकविरीशानः परं मित्रम्, प्रणयिनौ रुद्रनारायणौ विद्वांसौ वारबाणवासबाणौ, वर्णकविर्वेणीभारतः, प्राकृतकृत्कुलपुत्रो वायुविकारः, बन्दिनावनङ्गबाणसूचीबाणौ, कात्यायनिका

सुदर्शनं च । नन्दकः खड्गश्च । बाहवोऽपि चत्वारः । अचलकुलस्थितिरभिन्नवर्षमर्यादः । अचलानां गिरीणां कुलैर्वृन्दैः स्थितिर्यस्य । चतुरुदधिवत्तैश्च गम्भीरः । अग्रजन्मानो द्विजाः । सोमस्तृणभेदः, इन्दुश्च । उपसंपन्ना मृता । निजे धात्रि स्वे गृहे ।

उपनयनं मेखलादानम् । समावृत्तो निष्पादितवृत्तः । स्नातक इत्यर्थः । वेदवेदाङ्गपाठक इत्यन्ये । ईषदसमाप्तश्चतुर्दशवर्षश्चतुर्दशवर्षदेशीयः । 'श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः' । दशामुपेतो दशमीस्थ उदाहृतः, न दशमीस्थः । अपूर्णायुरित्यर्थः । संस्थितो मृतः । आभीलं कष्टम् । द्रुत्वरो गमनशीलः । 'अभयंश्च' इत्यादिनात्मनस्तथाभूतकलावित्संपर्कमैश्वर्यातिशयं दर्शयति । पारशवो द्विजः शूद्रायां जातः । 'परस्त्रीपरश्वम्' इति विद्याद्यञ् परश्वादेशश्च । भाषागेयवस्तुवाचस्तेषु कविः । गाथादिषु गीतिद इत्यर्थः । अपभ्रष्टगीतविद्यः । 'पञ्चाश-

चक्रवाकिका. जाङ्गुलिको मयूरकः, ताम्बूलदायकश्चण्डकः, भिषक्पुत्रो मन्दारकः, पुस्तकवाचकः, सुदृष्टिः, कलादश्चामीकरः, हैरिकः सिन्धुषेणः, लेखको गोविन्दकः, चित्रकृद्वीरवर्मा, पुस्तकृत्कुमारदत्तः, मार्दङ्गिको जीमूतः, गायनौ सोमिलग्रहादित्यौ, सैरन्ध्री कुरङ्गिका, वांशिकौ मधुकरपारावतौ, गान्धर्वोपाध्यायो दर्दुरकः, संवाहिका केरलिका, लासकयुवा ताण्डविकः, आक्षिक आखण्डलः, कितवो भीमकः, शैलालियुवा शिखण्डकः, नर्तकी हरिणिका, पारशरी सुमतिः, क्षणको वीरदेवः, कथको जयसेनः, शैवो वक्रघोणः, मन्त्रसाधकः करालः, असुरविवरव्यसनी लोहिताक्षः, धातुवादविद्विहंगमः, दार्दुरिको दामोदरः, ऐन्द्रजालिकश्चकोराक्षः, मस्करी ताम्रचूडः । स एतैश्चान्यैश्चानुगम्यमानो बालतया निम्नतामुपगतो देशान्तरालोकनकौतुकाक्षिप्तहृदयः सत्स्वपि पितृपितामहोपात्तेषु ब्राह्मणजनोचितेषु विभवेषु सति चाविच्छिन्ने विद्याप्रसङ्गे गृहान्निरगात् । अगाच्च निरवग्रहो ग्रहवानिव नवयौवनेन स्वैरिणा मनसा महतामुपहास्यताम् ।

अथ शनैः शनैरत्युदारव्यवहृतिमनोहृन्ति बृहन्ति राजकुलानि वीक्षमाणः, निरवद्यविद्याविद्योतितानि च गुरुकुलानि सेवमानः, महार्हालापगम्भीरगुणवद्गोष्ठीश्चोपतिष्ठमानः, स्वभावगम्भीरधीर्ध-

द्वर्षदेशीयां वीरां संस्थितभर्तृकाम् । वदन्ति कात्यायनिकां धृतकाषायवाससम्॥' जाङ्गुलिको गारुडिकः । भिषग्वैद्यः । 'स्वर्णकारः कलादः स्यात्तदध्यक्षस्तु हैरिकः'। पुस्तकृल्लेप्यकारः । 'प्रसाधनोपचारज्ञा सैरन्ध्री स्ववशा स्मृता' । संवाहिका या पादादिमर्दनं विधत्ते । लासको नर्तयति यः । युवेत्यादिना वयसः समानत्वमुच्यते । अक्षैर्दीव्यतीत्याक्षिको द्यूतकारः । कितवो धूर्तः । शैलाली स्वयं यो नृत्यति नटः । पारशरी भिक्षुः । असुरविवरव्यसनी पातालाभिलाषी । धातुवादविद्रसवादज्ञः । मस्करी परिव्राट् । निम्नतामस्वातन्त्र्यम्। कौतुकेति। न पुनरर्थाभिलिप्सया । एतदेव सत्स्वपीत्यादिना प्रकाशयति । निरवग्रहः स्वतन्त्रः । ग्रहवान्भूतगृहीतः । स्वैरिणा स्वतन्त्रेण ।

अत्युदारेत्यादिप्रकृतोपयोगी यस्मात्कविना तथाविधवस्तुवेदिनावश्यमेव भवितव्यम्। वीक्षमाण इत्यनेनात्मनः किमपि प्रकृष्टमुत्कर्षातिशययोगित्वमाह। अथ च वीक्षमाणो न तु गुरुकुलवत्सेवमानः । गाहमान इत्यनेन तेजस्विलमाहात्म्यनः । वैपश्चितीं विद्वज्जनोचिताम्। संस्तव आदरः । ज्ञातीनां कर्म ज्ञातेयं बन्धुत्वम् । कवि-

नानि विदग्धमण्डलानि च गाहमानः, पुनरपि तामेव वैपश्चितीमात्मवंशोचितां प्रकृतिमभजत्। महतश्च कालानामेव भूयो वात्स्यायनवंशाश्रयामात्मनो जन्मभुवं ब्राह्मणाधिवासमगमत्। तत्र च चिरदर्शनादभिनवीभूतस्नेहसद्भावैः ससंस्तवप्रकटितज्ञातिभिरात्मैरुत्सवदिवस इवानन्दिताभिगमनो बालमित्रमण्डलस्य मध्यगतो मोक्षसुखमिवान्वभवत्।

इति श्रीबाणभट्टकृतौ हर्षचरिते वात्स्यायनवंशवर्णनं नाम
प्रथम उच्छ्वासः।

ज्ञात्योष्टक्। **आत्मैरिति**। बन्धुभिर्योगिभिश्च। योगिपक्षे बाल इव बालो मित्रो रविर्निस्तेजस्त्वात्। उक्तं च—'तपस्यन्तं रविं दृष्ट्वा निस्तेजा जायते रविः। मोक्षमार्गप्रयत्ने तु तेजो नैवास्य विद्यते॥' इति। मित्रं सखा, सूर्यश्च मित्रः। मण्डलं समूहः। बिम्बम्। मोक्षसुखमपि सूर्यबिम्बगतैरनुभूयत इति। आख्यायिकासु कविभिर्निजवंशवर्णनं कानने तथा वंशः ख्यापितः स्यादिति। आत्मनश्च विटवर्णनम्। सकलकलाकौशलं ममास्तीति। हर्षस्य चरिते च वर्णयितव्ये नाम प्रस्तुतं चैतदिति शिवम्॥

इति श्रीशंकरकविरचिते हर्षचरितसंकेते प्रथम उच्छ्वासः।

द्वितीय उच्छ्वासः ।

अतिगम्भीरे भूपे कूप इव जनस्य निरवतारस्य ।
दधति समीहितसिद्धिं गुणवन्तः पार्थिवा घटकाः ॥ १ ॥
रागिणि नलिने लक्ष्मीं दिवसो निदधाति दिनकरप्रभवाम् ।
अनपेक्षितगुणदोषः परोपकारः सतां व्यसनम् ॥ २ ॥

अथ तत्रानवरताध्ययनध्वनिमुखराणि, भस्मपुण्ड्रकपाण्डुरललाटैः कपिलशिखानालजटिलैः कृशानुभिरिव क्रतुलोभागतैर्बटुभिरध्यास्यमानानि, सेकसुकुमारसोमकेदारिकाहरितायमानप्रघनानि, कृष्णाजिनविकीर्णशुष्यत्पुरोडाशीयश्यामाकतण्डुलानि, बालिकाविकीर्यमाणनीवारबलीनि, शुचिशिष्यशतानीयमानहरितकुशपूलीपलाशसमिन्धि, इन्धनगोमयपिण्डकूटसंकटानि, आमिक्षीयक्षीरक्षारिणीनामग्निहोत्रधेनूनां खुरवलयैर्विलिखिताजिरवितर्दिकानि, कामण्डलव्यमृत्पिण्डमर्दनव्ययप्रयतिजनानि, वैतानवेदीशङ्कव्यानामौदुम्बरीणां शाखानां राशिभिः पवित्रितपर्यन्तानि, वैश्वदे-

अतीत्यादि । यस्य क्रोधादिभावगण इङ्गितादिना परेण न चेल्यते स गम्भीरः। उक्तं च–'यस्य प्रसादादाकारात्क्रोधहर्षभयादयः। भावस्था नोपलभ्यन्ते तद्गाम्भीर्यमुदाहृतम् ॥' इति । अगाधश्च। अवतरणमवतारः, प्रवेशनम् । अवतरन्ति येनेत्यवतारः, सोपानादिश्च । समीहितसिद्धिं राजगृह आत्मनः प्रवेशलक्षणम्, जलग्रहणलक्षणं च । गुणा औदार्यादयः, आकर्षणरज्जवश्च । पार्थिवा राजानः, पृथ्वीविकाराश्च । घटयन्ति वाञ्छितेन प्रयोजयन्तीति घटकाः, कुम्भाश्च । अनेन तादृशे राज्ञि बाणस्य कृष्ण एव समीहितसिद्धीराध्यास्यत इति सूचितम् ॥ १ ॥

रागिणि रक्ते, विषयाभिषङ्गिणी च । लक्ष्मीं शोभाम्, समृद्धिं च । अत्र नलिनादिकमप्रस्तुतम्, बाणाद्यास्त्वप्रस्तुताः । अनेन कृष्ण ईदृशे बाणे राजप्रभवां श्रियं निधास्यतीत्युक्तम् ॥ २ ॥

अथेत्यादि । बाणो बान्धवानां भवनानि भ्रमन्सुखमतिष्ठदिति संबन्धः। शिखा चूडा, ज्वाला च। सोमो यज्ञियं द्रव्यम्। केदारिकं खल्पं क्षेत्रम्। प्रघटनेषु तथोचितत्वात्। अहरिता हरिताः संपद्यमाना हरितायमानाः । लोहितादित्वात्क्यप्। प्रघनान्यङ्गनानि । 'उशन्ति प्रघनाभिख्यामेकदेशे तु वेश्मनः' । पुरोडाशीयेत्यादि सहितेऽर्थ ईयः । बालिकाः कुमार्यः । नीवारा अकृष्टपच्या व्रीहयः । कूटो राशिः । आमिक्षीयमिति तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा। 'आमिक्षा सा स्रुतोष्णे या क्षीरे स्याद्दधियोगतः' इति । तस्यै हितमामिक्षीयम् । आमिक्षाप्रकृतित्वमस्य च योग्यत्वात् । अग्निहोत्रेषु तस्या अनाम्नातत्वात्, यद्वा यदन्नस्य जुहुयादिति । तस्या

वपिण्डपङ्क्तिपाण्डुरितप्रदेशानि, हविर्धूमधूसरिताङ्गानविटपिकिसलयानि, वत्सीयबालकलालितललत्तरलतर्णकानि, क्रीडत्कृष्णशारच्छागशावकप्रकटितपशुबन्धप्रबन्धानि, शुकसारिकारब्धाध्ययनदीयमानोपाध्यायविश्रान्तिसुखानि, साक्षात्त्रयीतपोवनानीव चिरदृष्टानां बान्धवानां प्रीयमाणो भ्रमन्भवनानि, सुखमतिष्ठत् ।

तत्रस्थस्य चास्य कदाचित्कुसुमसमययुगमुपसंहरन्नजृम्भत ग्रीष्माभिधानः संफुल्लमल्लिकाधवलाट्टहासो महाकालः । प्रत्यग्रनिर्जितस्यास्तमुपगतवतो वसन्तसामन्तस्य बालापत्येष्विव पयःपायिषु नवोद्यानेषु दर्शितस्नेहो मृदुरभूत् । अभिनवोदितश्च सर्वस्यां पृथिव्यां सकलकुसुमबन्धनमोक्षमकरोत्प्रतपन्नुष्णसमयः । स्वयमृतुराजस्याभिषेकार्द्राश्चामरकलापा इवागृह्यन्त कामिनीनां चिकुर-

अपि हवनं भवत्येव । वलयैः समूहैः । वितर्दिका वेदिका । कमण्डलुर्मुनिकरकस्तस्मै हिताः कामण्डलव्याः।यत् । 'उगवादिभ्यो यत्' । यतीनां निष्किंचनत्वादादरत्वाच्च स्वयंकरणम् । वितानो यज्ञः । तत्र भवा वैतानी यज्ञाग्निकार्यभूः । शङ्कुः कीलकः । तस्मै हितः शङ्कव्यः । **औदुम्बरीणामिति** । तासां यज्ञियत्वात् । वत्सेभ्यो हिता वत्सीयाः । वत्सपरिचर्याश्चतुराः । तर्णकाः सद्योजाता वत्साः । कृष्णशारेति छागविशेषणम् । तदुक्तम्—'लोहितसारङ्गः कृष्णसारङ्गो वा' इति सारङ्गशब्दः शबले वर्तते । कृष्णशारा मृगा इति केचित् । तत्तु न । तेषां तदानुपयुक्तत्वात् । पशुबन्धा यज्ञाः ।

कुसुमसमयो वसन्तः स एव युगं कल्पस्तल्लक्षणं वा युगं मासद्वयम् । समुत्फुल्लमल्लिकाभिर्धवला अट्टा विकयस्थानानि तेषां विकासो यत्र अन्यत्र तद्वदट्टहास उद्धतं हसितं यस्य । शब्दशक्तिमूलानुरणनव्यङ्ग्यरूपो ध्वनिश्च । प्रकृतवर्णने ह्यन्यदप्यत्र प्रतीयते । न वाच्यतया । तथा च—महाकालः साट्टहासः कल्पमुपसंहरञ्जृम्भते मुखं च विदारयति । महान्कालो ग्रीष्माख्यः, भैरवश्च । पयो जलम्, क्षीरं च।बालापत्यपक्षे—नवमुद्यानमुद्गमनं येषां तेषु।इदंप्रथमतयागमनप्रवृत्तेष्वित्यर्थः । दर्शितस्नेह इत्यनेनास्य विजिगीषुव्यवहार आरोपितः । निर्जितस्य च पुनः प्रतिष्ठापनमेव युक्तम् । स्नेहः आर्द्रता, प्रीतिश्च। मृदुरकठोरः, सदयश्च । **अभिनवोदित इति** । साधारणं विशेषणम् । वासन्तिकपुष्पाभिप्रायेण सकलपदबन्धनं मुन्तकारी च प्रतपन्प्रकर्षेण तपन्, अन्यत्र शत्रुहृदयेषु प्रतापं जनयन् । अभिनवोदितश्च राजा बन्धनमोक्षं करोति । उक्तं हि—'युवराजाभिषेके वा परचक्रावरोपणे । पुत्रजन्मनि वा मोक्षो बन्धनस्य विधीयते ॥' इति । आदरप्रतिपादनाय स्वयंशब्दः । अभिषेकः स्नानम् । अन्यत्र मङ्गलजलपातनं तत्संपर्कवशाच्चार्द्रत्वम् ।

चयाः, कुसुमायुधेन । हिमदग्धसकलकमलिनीकोपेनेव हिमालयाभिमुखीं यात्रामदादंशुमाली ।

अथ ललाटंतपे तपति तपने लिखितललाटिकापुण्ड्रकैरलकचीरचीवरसंवीतैः स्वेदोदबिन्दुमुक्ताक्षवलयबाहिभिर्दिनकराराधननियमा इवागृह्यन्त ललनाललाटेन्दुभिः । चन्दनधूसराभिरसूर्यपश्याभिः कुमुदिनीभिरिव दिवसमसुप्यत सुन्दरीभिः । निद्रालसा रत्नालोकमपि नासहन्त दृशः, किमुत जरठमातपम् । अशिशिरसमयेन चक्रवाकमिथुनाभिनन्दिताः सरित इव तनिमानमानीयन्त सोड्डुपाः शर्वर्यः । अभिनवपटुपाटलामोदसुरभिपरिमलं न केवलं जलम्, जनस्य पवनमपि पातुमभूदभिलाषो दिवसकरसंतापान् ।

क्रमेण च खरखगमयूखे, खण्डितशैशवे, शुष्यत्सरसि, सीदत्स्रोतसि, मन्दनिर्झरे, झिल्लीकाझांकारिणि, कातरकपोतकूजि-

---

चिकुराः केशाः । ते हि तदा स्नानार्द्रतया संयमनात्सुन्दरतया विशेषतः शृङ्गारमुद्दीपयन्ति । तथा च महाकवेः कालिदासस्य—'स्नानार्द्रमुक्तेष्वनुधूपवासं विन्यस्तसायंतनमल्लिकेषु । कामो वसन्तात्यमन्दवीर्यः केशेषु लेभे रतिमङ्गनानाम् ॥' यथा वा । राजशेखरस्य—'तदात्वे स्नातानां दरदलितमल्लीमुकुरिणाम्'इत्यादि । हिमाभिप्राये च हिमालयग्रहणम् । अंशून्मलति धारयतीत्यनेन हिमंप्रति भवनशीलत्वमस्योच्यते ।

ललाटं तपतीति ललाटंतपः इति खश् । खरतर इत्यर्थः । ललाटेऽलंकारो ललाटिका । 'कर्णललाटात्कनलंकारे' । ललाटिकैव पुण्ड्रकं तिलकमिति सर्वत्र रूपकम् । संवीतैः प्रावृतैः । चन्दनेन च तद्वद्धूसराः । **असूर्यंपश्याभिरिति** । आतपासहिष्णुतया । अन्यत्र स्वभावात् । दिवसं सुप्यत इति द्रव्यकर्मणि लादिविधानात्कर्मणि द्वितीयैव । भावे लः । यदातु कर्माप्याख्याततया विवक्ष्यते, तदा दिवसः सुप्यत इति भाव्यमिति निर्णीतम् । स्वापो निद्रा, मुकुलता च । जरठं कठोरम् । यतो ग्रीष्मेण तनूकृता अत आह—**चक्रवाकेत्यादि** । रात्रौ किल चक्रवाकानां वियोगो भवतीत्यल्पतया तैस्ता अभिनन्द्यन्ते । सरितश्च वृत्तिकारिकास्तेषामिति तदभिनन्दनम् । उड्डुपः शशी, ह्रवश्च ।

क्रमेण चेत्यादावेवंविधे निदाघकाले कठोरीभवति सत्युन्मत्ता मातरिश्वानः प्रावर्तन्तेति संबन्धः । खगो रविः । शुष्यदिति साभिप्रायम् । स्रोतसश्च प्रसरणधर्मत्वादाह—**सीददिति** । समन्तादावेगगामिनः । झिल्लिका चीरीनामकः प्राणी यो वर्षासु तरुषु सीत्कारमुच्चैः करोति । **कातरेति** । कपोता हि मेदोम-

तानुबन्धबधिरितविश्वे, विश्वसत्पतत्रिणि, करीषंकषमरुति, विरलवीरुधि, रुधिरकुतूहलिकेसरिकिशोरकलिह्यमानकठोरधातकीस्तबके, ताम्यत्स्तम्बेरमयूथवमथुतिम्यन्महामहीधरनितम्बे, दूयमानद्विरददीनदानाश्यानश्यामिकालीनमूकमधुलिहि, लोहितायमानमन्दारसिन्दूरितसीम्नि, सलिलस्यन्दसंदोहसंदेहमुह्यन्महामहिषविषाणकोटिविलिख्यमानस्फुटत्स्फाटिकदृषदि, धर्ममर्मरितगर्मुति, तप्तपांशुकुकूलकातरविकिरे, विवरशरणश्वाविधि, तटार्जुनकुररकूटज्वरनिवर्तमानोत्तानशफरशारपङ्कशेषपल्वलाम्भसि, दावजनितजगन्नीराजने, रजनीराजयक्ष्मणि, कठोरीभवति निदाघकाले, प्रतिदिशमाटीकमाना इवोषरेषु प्रपावाटकुटीपटलप्रकटलुण्ठकाः,

---

यत्राश्रितान्तं घर्मासहाः । अत एव पतत्रित्वेऽपि पृथगुपादानम् । पतत्रिलाभिप्रायेण श्वासमित्येतावदेव समुचितम्। एषां तथाभूतरुजाभावात्। करीषो गोमयम् । वीरुत्सपर्णशाखाजटिलं कुप्यकादि । **किशोरकेति** । बालत्वेन तृष्णाद्यसहिष्णुता, मुग्धतातिशयश्च द्योत्यते । धातकी लताभेदः । स्तबकः पुष्पगुच्छः । स्तम्बेरमो हस्ती । वमथुः करिकरशीकरः । तिम्यन्त आर्द्रीभवन्तः । नितम्बाः सानवः । द्विरदाः करिणः । दीनं क्षीणम् । आश्याना अप्रसरणधर्मकत्वादीषच्छुष्कश्यामिका मदलेखासंबन्धिनी । लीना अतितर्षाच्छिष्टाः । मूका गुञ्जितहीनाः । अलोहिता लोहिता भवन्तो लोहितायमानाः । मन्दाराः पारिभद्रद्रुमाः। सिन्दूरिता आहितसिन्दूरा इव । लोहितत्वात् । ग्रामस्य ग्रामान्तरेण मर्यादा सीमा । स्यन्दः स्रुतिः । विलिख्यमाना विपाट्यमानाः । मर्मरिताः शुष्कत्वेन शब्दायमानाः। गर्मुतो लताः। कुकूलं तुषाग्निः । विकिराः कुक्कुटाद्याः । श्वाविधः शललाः । सेहिकाख्या हिंस्राः प्राणिनः । तटशब्देन नैकट्यमाह । अर्जुनाः ककुभवृक्षाः । कुरराः क्रौञ्चपक्षिणः । कूटः शब्द एव संतापकारित्वाज्ज्वरस्तेन स्फुरन्तः शफरा मत्स्यास्तैः । शारं सितोदरत्वात् । पल्वले नद्वले । कुरारास्तटस्था यदा कूजन्ति तदा मत्स्याः पीडिताः सन्त उत्प्लवन्तीति वस्तुधर्मोऽयम् । **नीराजनमिति** । नीराजनं शान्तिकर्म । राजयक्ष्मा क्षयव्याधिः । शनैः शनैरपचयकारित्वात् । मातरिश्वानः कीदृशाः प्रावर्तन्तेत्याह—**प्रतिदिशमित्यादि** । आटीकमाना उच्चैर्भ्रमन्तः । साभिप्रायमेतत् । रजोवशादेतेषां तथाविधसंनिवेशात् । ग्रीष्मे ह्येवंविधा मारुताः प्रावर्तन्तेति कालधर्मः । उन्मत्तपक्षे—आटीकमाना इत्यादि सर्वं वक्ष्यमाणयोग्यतया योजनीयम्। उद्धतभ्रमणाद्या ह्युन्मादस्यानुभावाः।तदुक्तम्—'अनिमित्तहसितरुदितोत्कृष्टाबद्धप्रलापशयनोत्थितप्रधावितवृत्तगीतपठितस्मितपांसवधूननिर्माल्यचीरघटवल्कशरावाभरणस्पर्शनोपभोगैरन्यैश्चाव्यवस्थितचेष्टानुकरणादिभिरनुभावैरभिनयेत्' इति । ऊषरं

प्रपक्ककपिकच्छूगुच्छच्छटाच्छोटनचापलैरकाण्डकण्डूला इव कर्षन्तः शर्करिलाः कर्करस्थलीः, स्थूलदृषच्चूर्णमुचः, मुचुकुन्दकन्दलदलनदन्तुराः, समन्ततः पतन्मुखरचीरीगणमुखशीकरशीक्यमानतनवः, तरुणतरतरणितापतरले तरन्त इव तरङ्गिणि मृगतृष्णिकातरङ्गिणीनामलीकवारिणि, शुष्यच्छमीमर्मरमारवमार्गलङ्घनलाघवजवजङ्घालाः, रैणवावर्तमण्डलीरेचकरासरसरभसारब्धनर्तनारम्भारभटीनटाः, दावदग्धस्थलीमषीमलनमलिनाः, शिक्षितक्षपणकवृत्तय इव वनमयूरपिच्छचयानुच्चिन्वन्तः, सप्रयाणगुञ्जा इव

सिकताबहुलो रूक्षो देशः। प्रपा सत्रम्। वाटः कुनालम्। पटलं छदिः। कपिकच्छूः कण्डूदायको द्रव्यभेदः। अत एवाह—**कर्षन्त इति**। शर्कराः पाषाणकणिका विद्यन्ते यासु ताः शर्करिलाः। पिच्छादिलादिलच्। करस्थली ऊषरभूः, पाषाणभूः। अत एवाह—**स्थूलेत्यादिना**। मुचुकुन्दं पुष्पभेदः। कन्दलं नवनालम्। **दन्तुरा इति**। कपिकच्छूस्पर्शचालनेन च ये कण्डूलास्तादृशाश्चूर्णमुचो प्रकटदन्ताः परुषं कषन्ति। शीक्यमानाः सिच्यमानाः। तरुणतरः प्रौढः। तरणिरादित्यः। **तरन्त इवेति**। वालुकावशात्तथा लक्ष्यमाणत्वात्। मृगतृष्णिका मरीचिका। तृषितमृगाणां रविरश्मिखचितासु सिकतासु नीलत्वदर्शनाज्जलबुद्धिः। **वारिणीति**। सतरङ्गे वारिणि ये सभीकास्ते सतापं देशं तरन्ति। उन्मत्तपक्षेऽपि विचित्ततवेनैवंकारित्वम्। शम्योऽग्निगर्भा वल्लीभेदाः। लाघवं नैपुणम्। सव्यायामाश्च विषमं मार्गं लाघवेन तरन्ति। जङ्घाला वेगवन्तः। रैणवावर्ताः पांसुसंबन्धिन आवर्तनरूपाः संनिवेशास्तेषां मण्डली समूहः। रेचयति पृथक्करोतीति रेचकम्। रैणवावर्तमण्डल्या रेचकं तथा रासे रसिते यो रसस्तेन यो रभसस्तद्वशेनारब्धं यन्नर्तनमिव नर्तनं तदारम्भे विषय आरभटीनटा इव आरभटीनटाः। इयरतेति अराः। अराश्च ते भटा अरभटाः। तेषामियमारभटी नटजातिविशेषो वीररसप्रधानः। उक्तं च—'प्रहारपातप्रहतगर्जितानि च्छेद्यानि मायाकृतमिन्द्रजालम्। चित्राणि यूथानि च यत्र नित्यं तां तादृशीमारभटीं वदन्ति॥' इति नृत्तपक्षे—आवर्ता आवृत्तयः। यदाह मुनिः—'यदा नृत्तवशादङ्गं भूयोभूयो निवर्तते। तत्राद्यमभिनेयं स्याच्छेषं नृत्ते नियोजयेत्॥' इति। मण्डलीनृत्तं हलीमकम्। यदाह—'मण्डलेन तु यन्नृत्तं हलीकममिति स्मृतम्। एकस्त्रं तु नेता स्याद्गोपस्त्रीणां यथा हरिः॥' इति। रेचकास्त्रयः—कटीरेचकः, हस्तरेचकः, ग्रीवारेचकश्चेति। रासलक्षणम्—'अष्टौ षोडशद्वात्रिंशद्यत्र नृत्यन्ति नायकाः। पिण्डीबन्धानुसारेण तन्नृत्तं रासकं स्मृतम्॥' इति। अस्यैव तु हलीमकाद्या विशेषाः। **क्षपणकवृत्तय इवेति**। क्षपणकाश्च मषीमलिना बर्हिपिच्छानि शास्त्रचोदनया वहन्ति। उन्मत्तपक्षे—निर्विवेकतया मयूरपिच्छचय इत्युक्तं प्राक्। गुञ्जन्तीति गुञ्जा ढंकाभेदाः। उन्मत्तानां नृत्तावः

शिञ्जानजरत्करञ्जमञ्जरीबीजजालकैः, सप्ररोहा इवातपातुरवनमहिषनासानिकुञ्जस्थूलनिःश्वासैः, सापत्या इवोड्डीयमानजवनवातहरिणपरिपाटीपेटकैः, सभ्रुकुटय इव दह्यमानखलधानवुसकूटकुटिलधूमकोटिभिः, सावीचिवीचय इव महोष्ममुक्तिभिः, लोमशा इव शीर्यमाणशाल्मलिफलतूलतन्तुभिः, दद्रुणा इव शुष्कपत्रप्रकराकृष्टिभिः, सिराला इव तृणवेणीविकिरणैः, उच्छ्रुश्रव इव धूयमाननवयवशूकशकलशङ्कुभिः, दंष्ट्राला इव चलितशललसूचीशतैः, जिह्वाला इव वैश्वानरशिखाभिः, उत्सर्पत्सर्पकञ्चुकचूडाला ब्रह्मस्तम्भरसाभ्यवहरणाय कवलग्रहमिवोष्णैः कमलमधुभिरभ्यस्यन्तः सकलसलिलोच्छोषघर्मघोषणापटहैरिव शुष्कवेणुवनास्फोटनपटुरवैस्त्रिभुवनविभीषिकामुद्भावयन्तः, च्युतचलचाषपक्षश्रेणीशारितसृतयः, त्विषिमन्मयूखलतालातप्लोषकलमाषवपुष इव स्फुटि-

---

सरे सर्व एव करतलादि वादयन्ति । शिञ्जानाः शब्दायमानाः करञ्जो वृक्षभेदः । प्ररोहोऽङ्कुरः । उन्मत्ता अपि खेदान्निःश्वसन्ति । **सापत्या इवेति ।** उन्मत्ता अपि श्वभ्रादिपतनभयादपत्यानि न त्यजन्ति । पेटकैर्यूथैः **सभ्रुकुटय इवेति ।** दह्यमानाभिप्रायेणोक्तम् । उन्मत्ता अपि क्रोधप्राया एव । क्रोधस्य भ्रुकुट्यादयोऽनुभावाः । खलधानं क्षोदादिदेशः । क्षुद्यमानं धान्यमित्यन्ये । सस्यस्य ज्वालाभावाद्धूमवर्णनं समुचितम् । कुटिलपदेन च भ्रुकुटीसादृश्यमाह । अवीचिर्नरकभेदस्तस्य वीचय इव वीचयो ज्वालाः । **महोष्मेति ।** उन्मत्ता अपि खेदादिवशाद्ष्मायन्ते । **लोमशा इवेति ।** उन्मत्ता अपि क्षुरकर्मविना लोमशाः । तूलं कर्पासः । दद्रूः कुष्ठविकारः । सास्यास्तीति दद्रुणः । 'दद्रु हस्वत्वं च'इति नः । उन्मत्ता अप्युद्वर्तनं विना दद्रूयुक्ता भवन्ति । सिरालाः प्रकटस्नायवः । उन्मत्ता अपि कृशत्वात्सिराला भवन्ति । वेणी पङ्क्तिः । सिरासादृश्यप्रतिपादनाय वेणीपदम् । श्मश्रुः कूर्चः । शूकाः किंशारवः । उन्मत्ता अपि केशवपनाभावाद्दीर्घश्मश्रवः दंष्ट्रा बहिर्निर्गता दन्ताः । शललः श्वावित् । सूची दीर्घकण्टकरूपाणि रोमाणि । अन्ये तु—दंष्ट्रालाः शललाः, श्वाविधः पक्षाश्च शलला उच्यन्ते । तथा च—'श्वाविधः शललैरिव' इति महाभारते दृश्यत इत्याहुः । उन्मत्ता अप्येवमादिविकारेण सर्वं भीषयन्ते । एवं जिह्वाला अपि । एवमेव स्नानादिना विनोन्मुक्तचूडत्वादुत्सर्पदित्यादि । कञ्चुकस्त्वक् । ब्रह्मस्तम्भो ब्रह्माण्डः । रसाभ्यवहरणं शोषणम् । रसानां च मधुरादीनां भोजनम् । 'असंचार्यो मुखे पूर्णे गण्डूषः कवलोऽन्यथा' । अभ्यस्यन्तीति । एवमिदं शोषयिष्याम इति । घर्मो ग्रीष्मः । घोषणा श्रावणा । **विभिषिकामिति ।** ये सगर्वा जगद्भसनशीलास्ते त्रिभुवनेऽपि भयमुत्पादयन्ति । चाषः किकीदिविः पक्षिभेदः । उन्मत्तपक्षे—विस्मरणशीलत्वाद्युतेत्यादि योज्यम् । सृतिर्मार्गः । त्विषिमान्रविः । अलातमु-

तगुञ्जाफलस्फुलिङ्गाङ्गाराङ्कितावयवाः, गिरिगुहागम्भीरझांकारभीषणभ्रान्तयः, भुवनभस्मीकरणाभिचारचरुपचनचतुरा रुधिराहुतिभिरिव पारिभद्रद्रुमस्तबकवृष्टिभिस्तर्पयन्तस्तारवान्वनविभावसून्, अशिशिरसिकतातारकितरंहसः, तप्तशैलविलीयमानशिलाजतुरसलवलिप्तदिशः, दावदहनपच्यमानचटकाण्डखण्डखचिततरुकोटरकीटपटलपुटपाकगन्धकटवः, प्रावर्तन्तोन्मत्ता मातरिश्वानः ।

सर्वतश्च भूरिभस्त्रासहस्रसंधुक्षणक्षुभिता इव जरठाजगरगम्भीरगलगुहावाहिवायवः, क्वचित्स्वच्छन्दतृणचारिणो हरिणाः, क्वचित्तरुतलविवरविवर्तिनो बभ्रवः, क्वचिज्जटावलम्बिनः कपिलाः, क्वचिच्छकुनकुलकुलायपातिनः श्येनाः, क्वचिद्विलीनलाक्षारसलो-

ल्मुकम् । कल्माषं रक्तकृष्णम् । गुञ्जा रक्तिकोत्पलानि लोहितकृष्णानि भवन्ति । स्फुलिङ्गा अग्निकणाः । अङ्गाराङ्कितानीवाङ्काङ्कितानि दग्धान्यङ्गानि । ये च साङ्गारास्ते च मलिनशरीरा भवन्ति । उन्मत्ता अप्यग्निशस्त्रश्वभ्रादिषु बलादतिपतन्ति । झांकारभीषणा भ्रमन्ति च । अभिचार उच्चाटनम् । अभिचारिणश्चोच्चाटनमारणार्थं चरुपचनं कुर्वन्ति । रक्तेन चाग्नीन्प्रीणयन्ति । पारिभद्रा निम्बाः । मदना इत्यन्ये । उन्मत्ता अपि निर्विवेकतया रक्तादि यत्किंचिदशुचिप्रायमग्निषु विक्षिपन्ति, तत एव विश्वस्य दोषाय पर्यवस्यन्ति । तारकितमिव । रंहो वेगो येषां ते । शिलाजतुरसमसारः । दावदहनेन पच्यमानानि यानि चटकाण्डानि तेषां विदारणवशात्स्फुटिता ये खण्डाः कपालानि तैः । दोलावदुपरिपतितैः खचितानि कचायमानानि यानि तरुकोटरेषु कीटपटलानि क्रिमिसमूहास्तेषामतिपेशलत्वेन यत एव तप्तैः खण्डैरुपर्याच्छादकतया स्थितैः पुटपाकैः प्रसूतधूमोऽभ्यन्तरपातस्तद्गन्धेन कटव उद्वेजकाः । अत्राग्निपाकेन खण्डत्वं खण्डेभ्यो रसनिःसरणात्खचितत्वं कीटानाम् । **उन्मत्ता इति** । ये चोन्मत्तास्ते सिकताव्याप्ताः कर्दमविलिप्तदिशो गन्धकटवः शाटीकराद्याः पूर्वोक्ताः क्रियाः प्रायेण कुर्वत इति । सर्वत्रात्र महावाक्ये ध्वनिच्छायान्वेष्या । मातरिश्वानो वायवः ।

सर्वतश्चेत्यादौ दावाग्नयः प्रत्यदृश्यन्तेति संबन्धः । भस्त्रा दृतिः । संधुक्षणमुद्दीपनम् । जरठाजगरा वृद्धसर्पाः । गला एव गुहा गलगुहाः । स्वच्छन्दमपविघ्नम्, यथारुचि । चरणं भक्षणम्, गमनम्, । हरिणाः शुक्लाः, मृगाश्च । बभ्रवः कपिलाः, नकुलाश्च । इतरत्र जटामूलानि च कपिलाः पिङ्गलाः । कपिलाख्यमुनिव्रतग्रहणान्मनुष्या एवाभेदोपचारेण कपिलाः। एते च जटावल्कलधारिणः । कुलाया नीडाः । श्येनाः शुक्लाः, पाजिकाश्च । अधरा धर्तुमशक्याः, अधोभवा वा । लाक्षाया विलीनतयापीतत्वात् । ओष्ठाश्चाधराः । आ समन्तात्सादिता आहताः, स्त्री-

हितच्छवयोऽधराः, क्वचिदासादितशकुनिपक्षकृतपटुगतयो विशिखाः, क्वचिद्दग्धनिःशेषजन्महेतवो निर्वाणाः, क्वचित्कुसुमवासिताम्बरसुरभयो रागिणः, क्वचित्सधूमोद्गारा मन्दरुचयः, क्वचित्सकलजगद्ग्रासघस्मराः सभस्मकाः, क्वचिद्वेणुशिखरलग्नमूर्तयोऽत्यन्तवृद्धाः, क्वचिदचलोपयुक्तशिलाजतवः क्षयिणः, क्वचित्सर्वरसभुजः पीवानः, क्वचिद्दग्धगुग्गुलवो रौद्राः, क्वचिज्ज्वलितनेत्रदहनदग्धमकुसुमशरमदनाः कृतस्थाणुस्थितयः, चटुलशिखानर्तनारम्भारभटीनटाः शुष्ककासारस्मृतिभिः, स्फुटन्नीरसनीवारबीजलाजवर्षिभिर्ज्वालाञ्जलिभिरचर्यन्त इव घर्मघृणिम्, अघृणा इव हठहूयमानकठोरस्थलकमठवसाविस्रगन्धगृध्नवः, स्वमपि धूममम्भोदसमुद्भूतिभियेव भक्षयन्तः, सतिलाहुतय इव स्फुटद्बहलबालकीटपटलाः कक्ष्येषु, श्वित्रिण इव प्लोषविचटद्बल्कलधवलशम्बूक-

---

कृताश्च। स्निग्धतया नीरसतया च। शकुनीनां पक्षेषु कृतपटुगतयः। निःसारतया कालस्थापितत्वात्। विगता शिखा ज्वाला येषां ते, विविधशिखाः शराश्च। निःशेषाः समस्ताः, प्राक्तनजन्मान्तरसंचिता अपि। जन्महेतवस्तृणाद्याः, कर्माणि च। निर्वाणाः शान्ताः, मोक्षगामिनश्च। कुसुमं धूमः, पुष्पं च। अम्बरं नभः, वस्त्रं च। रागिणो लोहिताः, शृङ्गारिणश्च। अजीर्णकृतोऽपि धूमोद्गारः। रुचिर्दीप्तिः, भोजनाभिलाषश्च। जगदेव ग्रासः कवलं तद्भक्षणशीलाः। भस्मभूरिकश्वात्यशनव्याधिः वृद्धा वृद्धिं गताः, स्थविराश्च। ते वेणुशिखरमवलम्बन्ते यष्टिं गृह्णन्ति। अचलाः पर्वताः।अन्यत्र क्षयस्य दीर्घकालपर्यवसायित्वादचलमविच्छिन्नं भक्षितशिलाह्वयाः उक्तं च—'शिलाधातुप्रयोगाद्वा प्रासादाद्वाथ शांकरात्। अजामूत्रप्रयोगाद्वा क्षयः क्षीयेत च नान्यथा॥'इति। क्षयोविनाशः,व्याधिभेदश्च यक्ष्माख्यः। रसः सलिलादिः। अत एव पीवानः। अन्यथा कथं सलिलादिभक्षणशक्तित्वमसीषां प्रसज्येत। ये च मधुरादिसर्वरसानुपभुञ्जते ते स्थूला भवन्ति। रौद्रा भीषणाः, रुद्रभक्ताश्च। नेत्राणां मूलानां दहनेन दग्धाः सकुसुमाः काण्डानि मदना वृक्षभेदाश्च यैः। स्थाणुश्छिन्नशाखो वृक्षः, शिवश्च। स्थितिः स्थानम्, व्यवहारश्च। स्थाणुनापि नयनाग्निना सकुसुमशरः कामो दग्धः। चटुलत्वेन नर्तनाम्भः, रवश्च। शुष्कत्वाच्चटुलादेरारभटीग्रहणम्। कासाराणि नङ्वलास्तेषु याः सृतयः। क्वचित् 'स्मृतयः' इति पाठः। इतरत्र तु—शुष्ककं शुष्कगीतं झण्डुमादि। आसार्यन्त इत्यासाराः। आसारितानि यद्यपि गीयन्त एव, तथापि 'वर्धमानमथापीह ताण्डवं यत्र योज्यते' इति। ताण्डवं ह्यारभटीप्रधानम्। **अर्चयन्त इवेति**। तेषां तदभिमुखत्वात्। घर्मघृणिः सूर्यः। अघृणा अजुगुप्साः। कमठः कूर्मः।'विस्रं स्यादामगन्धि यत्'।गृध्नवो लम्पटाः। समुद्भूतिः संभारः। धूमात्किल मेघोत्पत्तिर्मेघाः शमयन्ति। कीटाः कृमयः। प्लोषो

शुक्तयः शुष्केषु सरःसु, स्वेदिन इव विलीयमानमधुपटलगोलगलितमधूच्छिष्टवृष्टयः काननेषु, खलतय इव परिशीर्यमाणशिखासंहतयो महोपरेषु गृहीतशिलाकवला इव ज्वलितसूर्यमणिशकलेषु शिलोच्चयेषु, प्रत्यदृश्यन्त दारुणा दावाग्नयः ।

तथाभूते च तस्मिन्नत्युग्रे ग्रीष्मसमये कदाचिदस्य स्वगृहावस्थितस्य भुक्तवतोऽपराह्णसमये भ्राता पारशवश्चन्द्रसेननामा प्रविश्याकथयत्—'एष खलु देवस्य चतुःसमुद्राधिपतेः सकलराचक्रचूडामणिश्रेणीशाणकोणकषणनिर्मलीकृतचरणनखमणेः सर्वचक्रवर्तिनां धौरेयस्य महाराजाधिराजपरमेश्वरश्रीहर्षदेवस्य भ्राता कृष्णनाम्ना भवतामन्तिकं प्रज्ञाततमो दीर्घाध्वगः प्रहितो द्वारमध्यास्ते' इति । सोऽब्रवीत्—'आयुष्मन्, अविलम्बितं प्रवेशयैनम्' इति ।

अथ तेनानीयमानम्, अतिदूरगमनगुरुजडजङ्घम्, कार्दमिकचेलचीरिकानियमितोच्चण्डचण्डातकम्, पृष्ठप्रेङ्खत्पटच्चरकर्पटघटितगलितग्रन्थिम्, अतिनिबिडसूत्रबन्धनिम्नितान्तरालकृतव्यवच्छेदया लेखमालिकया परिकलितमूर्धानम्, प्रविशन्तं लेखहारकमद्राक्षीत् । अप्राक्षीच्च दूरादेव—'भद्र, भद्रमशेषभुवननिष्कारणबन्धोस्तत्रभवतः कृष्णस्य' इति । सः 'भद्रम्' इत्युक्त्वा प्रणम्य नातिदूरे समुपाविशत् । विश्रान्तश्चाब्रवीत्—'एष खलु स्वामिनो माननीयस्य लेखः प्रहितः' इति विमुच्य चार्पयत् । अथ बाणः सादरं गृही-

---

दाहः । वल्कलशब्दस्त्वगुपलक्षणार्थः । शम्बूकाः शुक्तिमन्तः प्राणिभेदाः । मधुपटलगोलो माक्षिककरण्डः । मधूच्छिष्टं सिक्थकम् । खलतयः खल्वाटाः । शिखा ज्वाला, चूडा च । ऊषरं सिकताबहलो रूक्षो देशः । शिलोच्चयो गिरिः । 'दावो वह्निगतो वह्निर्दीवश्च वनमुच्यते' ।

तथाभूतदेश इत्यादिनात्मानं प्रति तेषामादरातिशयं दर्शयति—**आकुर्वत इति** । न त्वप्रस्तावे । एतेन स्वस्य किमपि माहात्म्यमाह । स्वयमवसरमन्तरेण वा तस्य तदा प्रवेशाभावात् । एतदेव देवस्येत्यादिविशेषणसंदर्भमुखेन द्वारमध्यास्त इत्यनेन पोषयिष्यते । पारशवः शूद्रापुत्रः । शाणो मणिकषणम् । कोणोऽश्रिः । चक्रवर्तिनः सार्वभौमाः । धौरेयो मुख्यः । प्रज्ञाततमोऽतिप्रतीतः । एतेन च बाणं प्रति बहुमान एव गम्यते ।

जडा गमनाशक्ताः । कर्दमेन रक्तं कार्दमिकम् । चेलं वस्त्रम् । चीरिका खण्डिका । उच्चण्डमुच्चम् । गाढमित्यन्ये । चण्डातकमर्धोरुकं वासः । पटच्चरं जीर्णवस्त्रम् । निम्नितं नमितम् । **लेखमालिकेति** । अन्यैरपि तद्धस्ते लेखः प्रहित इति परागतः संबन्धः । 'परिकरित–'इति पाठे वेष्टित इत्यर्थः । तत्रभवतः पूज्यस्य । **नाति-**

त्वा स्वयमेवावाचयत्—'मेखलकात्संदिष्टमवधार्य फलप्रतिबन्धी धीमद्भिरपहरणीयः कालातिपात इत्येतावदत्रार्थजातम् । इतरद्वार्तासंवादनमात्रकम्' । अवधृतलेखार्थश्च समुत्सारितपरिजनः संदेशं पृष्टवान् । मेखलकस्त्ववादीत्—'एवमाह मेधाविनं स्वामी—जानात्येव मान्यः यथैकगोत्रता वा, समानजातिता वा, समं संवर्धनं वा, एकदेशनिवासो वा, दर्शनाभ्यासो वा, परस्परानुरागश्रवणं वा, परोक्षोपकारकरणं वा, समानशीलता वा, स्नेहस्य हेतवः । त्वयि तु विना कारणेनादृष्टेऽपि प्रत्यासन्ने बन्धाविव बद्धपक्षपातं किमपि स्निह्यति मे हृदयं दूरस्थेऽपीन्दोरिव कुमुदाकरे । भवन्तमन्तरेणान्यथा चान्यथा चायं चक्रवर्ती दुर्जनैर्ग्राहित आसीत् । न च तत्तथा । न सन्त्येव ते येषां सतामपि सतां न विद्यन्ते मित्रोदासीनशत्रवः । शिशुचापलापराचीनचेतोवृत्तितया च भवतः केनचिदसहिष्णुना यत्किंचिदसदृशमुदीरितम् । इतरो लोकस्तथैव तद्गृह्णाति वक्ति च । सलिलानीव गतागतिकानि लोलानि खलु भवन्त्यविवेकिनां मनांसि । बहुमुखश्रवणनिश्चलीकृतनिश्चयः किं करोतु पृथिवीपतिः । तत्त्वान्वेषिभिश्चास्माभिर्दूरस्थितोऽपि प्रत्यक्षीकृतोऽसि । विज्ञप्तश्चक्रवर्ती त्वदर्थम्—यथा प्रायेण प्रथमे वयसि सर्वस्यैव चापलैः शैशवमपराधीति । तथेति च प्रतिपन्नं स्वामिना । अतो भवता राजकुलमकृतकालक्षेपमागन्तव्यम् । अवकेशीवादृष्टपरमेश्वरो बन्धुमध्यमधिवसन्नासि मे बहुमतः । न च सेवावैषम्यविषादिना वा परमेश्वरोपसर्पणभीरुणा भवता भवितव्यम् । यतो यद्यपि—

दूर इति । अपि तु दूर एवेति सर्वत्रैव स्वस्य प्रभावातिशयं प्रतिपादयति । फलं प्रतिबध्नाति रुणद्धीति फलप्रतिबन्धी । कालातिपातः कालात्ययः । अर्थजातमभिधेयप्रकारः । अवधृतो ज्ञातः । एकेत्यादि कारणमुत्तरोत्तरमप्रधानम् । अन्यथा चान्यथा चेति । एतेन किंचिदेव संभवतीति दर्शयति । अत एवाह—**न च तत्तथेति** । तथात्वे तु बाणस्य दुर्वृत्तता प्रसज्येत । कृष्णस्यापि तादृशः पक्षपातः स्वामिप्रतारणादि च दोषायैव भवेत् । अत एव वक्ष्यति—**तत्त्वान्वेषिभिरित्यादि** । ग्राहित इत्येतावति वक्तव्य आसीदित्यनेन दुर्जनाः संपत्तिनिरवकाशा इति प्रतिपादितम् । अतएव वक्ष्यति—**तथेति च प्रतिपन्नं स्वामिनेति** । सतां साधूनामपि । सतां भवताम् । उदासीनो मध्यस्थः । अपराचीनापराङ्मुखी चेतोवृत्तिर्यस्याः । अवकेशी

स्वेच्छोपजातविषयोऽपि न याति वक्तुं
देहीति मार्गणशतैश्च ददाति दुःखम् ।
मोहात्समाक्षिपति जीवनमप्यकाण्डे
कष्टं मनोभव इवेश्वरदुर्विदग्धः ॥ ३ ॥

तथाप्यन्ये ते भूपतयः, अन्य एवायम् । न्यक्कृतनृगनलनिषधनहुषाम्बरीषदशरथदिलीपनाभागभरतभगीरथययातिरमृतमयः स्वामी । नास्याहंकारकालकूटविषदिग्धदुष्टा दृष्टयः, न गर्वगुरुगरगलग्रहगदगद्गदा गिरः, नातिस्मयोष्मापस्मारविस्मृतस्थैर्याणि स्थानकानि, नोद्दामदर्पदाहज्वरवेगविक्लवा विकाराः, नाभिमानमहासंनिपातनिर्मिताङ्गभङ्गानि गतानि, न मदार्दितवक्रीकृतौष्ठनिष्ठ्यूतनिष्ठुराक्षराणि जल्पितानि । तथा च । अस्य विमलेषु साधुषु रत्नबुद्धिः, न शिलाकलेषु । मुक्ताधवलेषु गुणेषु प्रसाधनधीः, नाभरणभारेषु । दानवत्सु कर्मसु साधनश्रद्धा, न करिकीटेषु । सर्वाग्रेसरे यशसि महाप्रीतिः, न जीवितजरत्तृणे । गृहीतकराखाशासु

निष्फलतरुः । स चादृष्टरविस्तरुमध्यगो न कस्यचित्प्रियः । स्वेच्छोपजाता विषया मण्डलानि यस्मात्तादृगपि देहि प्रयच्छेति वक्तुं न पार्यते । इतरत्र स्वेच्छया स्वसंकल्पेनोपजात उत्पन्नो विषयो गोचरो यस्य ; तथा चोच्यते—'काम जानामि ते मूलं संकल्पात्किल जायसे' इति । अथ च स्वेच्छाया उपजाता विषया यस्यायं देही च शरीरवानिति वक्तुं न याति । न शक्यत इति विरोधः । कामश्चानङ्गत्वाद्देही शरीरवानिति वक्तुं न युज्यत इत्यन्यार्थः । मार्गणा याचकाः, शराश्च मार्गणाः । जीव्यतेऽनेनेति जीवनम्, ग्रामादि जीवितं च । ईश्वरो राजा, हरश्च । दुर्विदग्धो दुरूढः, दुष्टत्वाद्विशेषेण दग्धश्च । अमृतेत्यादि साभिप्रायम् । यस्मादहंकारादि कालकूटादिना रूपयति, अतश्चाहंकारादीनामत्यन्ताभावप्रकाशनेच्छयामृतमयत्वमस्य दर्शयति । अमृतमयस्य च कालकूटादिभिर्न योगः । गरं विषम् । स्मयो गर्वः । स्थानकानि स्थितयः । अर्दितं वातव्याधिभेदः । तस्मिन्सति मुखं वक्रं भवति । तथाचोक्तम्—'वायुः प्रवृद्धस्तैस्तैश्च वातलैरूर्ध्वमाश्रितः । वक्रीकरोति वक्त्रमुक्तं हसितमीक्षितम् ॥' इति । निष्ठ्यूतानि निर्गतानि । विमलेष्वपापेषु, अन्यत्र सुच्छायेषु । पद्मरागादिष्विति वक्तव्ये शिलेत्यादिपदमादरार्थम् । एवमुत्तरत्रापि वाच्यम् । मुक्तवत्ताभिश्च धवलास्तेषु गुणेष्वौदार्यादिषु च, सूत्रेषु च । प्रसाधनं प्रकृष्टं साधनम्, अर्जनम्, भूषणं च । दानं धनत्यागः, मदश्च । साधनं संपादनम्, सैन्यं च । साध्यतेऽनेनेति कृत्वा । करो दण्डः, पाणिश्च । आशा दिशः, चेतः, वाञ्छा

प्रसाधनताभियोगः, न निजकलत्रचर्मपुत्रिकासु । गुणवति धनुषि सहायबुद्धिः, न पिण्डोपजीविनी सेवकजने । अपि च । अस्य मित्रोपकरणमात्मा, भृत्योपकरणं प्रभुत्वम्, पण्डितोपकरणं वैदग्ध्यम्, बान्धवोपकरणं लक्ष्मीः, कृपणोपकरणमैश्वर्यम्, द्विजोपकरणं सर्वस्वम्, सुकृतसंस्मरणोपकरणं हृदयम्, धर्मोपकरणमायुः, साहसोपकरणं शरीरम्, असिलतोपकरणं पृथिवी, विनोदोपकरणं राजकम्, प्रतापोपकरणं प्रतिपक्षः । नास्यालपपुण्यैरवाप्येत सर्वातिशायिसुखरसप्रसूतिः पादपल्लवच्छाया' इति । श्रुत्वा च तमेव चन्द्रसेनं समादिशत्—'कृतकशिपुं विश्रान्तसुखिनमेनं कारय' इति ।

अथ गते च तस्मिन्, पर्यस्ते च वासरे, संघट्टमानरक्तपङ्कजसंपुटपीयमान इव क्षयिणि क्षामतां व्रजति बालवायसास्यारुणेऽपराह्णातपे, शिथिलितनिजवाजिजवे जपापीडपाटलेऽस्ताचलशिखरस्खलिते खञ्जतीव कमलिनीकण्टकक्षतपादपल्लवे पतङ्गे, पुरः

च । प्रसादनं संपादनम्, दण्डश्च । गुणो ज्या, शौर्याद्याश्च गुणाः । उपक्रियन्तेऽनेनेत्युपकरणमुपयोगः । **आत्मेति** । नहि मित्राणि मित्रव्यतिरेकेण बान्धवादिव लक्ष्यादि किंचिदपेक्ष्यन्ते । **प्रभुत्वमिति** । तस्य प्रभुत्वं सेवकादीनां दानसंपादनादि । यथाह—'यथाकालं प्रवर्तन्ते पण्डिताः' इत्यादिवैदग्ध्यमात्रापेक्षया पण्डितानां क्षेपणादिवदर्थादनपेक्षितया हि तेषामौचित्यं न प्रतीयते । अनेन पण्डितसामान्यात्तदभिप्रायेण स्वस्य समुचितमेव हेवाकमभिव्यनक्ति । वैदग्ध्यापेक्षित्वं दर्शयतीति यावत् । बान्धवाः कुल्याः । लक्ष्मीश्छत्रचामरादिप्रतिपत्तिरूपा छत्रादिवत्तुल्या एव । लभन्तेऽन्येषामनर्हत्वात् । **कृपणेत्यादि** । कृपणानां पोषणमेव समुचितम् । तत्र चैश्वर्यमेव हेतुः । ऐश्वर्यमर्थवत्ता । न तु द्विजातिवदेते सर्वस्वमर्हन्ति । सर्वशब्देन दारा अप्युच्यन्ते । एवमादि तु द्विजा एव लभन्ते । तद्व्यतिरेकेणान्येषामनर्हत्वात् । एवं हृदयादि तत्तदभिप्रायेण विचारणीयम् । सुखमेवास्वाद्यतया रस एव । रसः सुखरसः । छाया कान्तिः । यद्वा छायावत्त्वमेषां सर्वस्य कस्यचिदाश्रयणीयत्वादुपचर्यते । अल्पेत्याद्यभिप्रायेण पादयोः कल्पवृक्षतुल्यत्वमभिव्यज्यते । पुण्यवशात्तदवाप्तेः । एतत्पक्षे छायातपप्रतिपक्षजातिः । 'भोजनाच्छादने सद्भिरुभे कशिपुरुच्यते' ।

वायसः काकः । जपा रविप्रियं पुष्पम् । आपीडः स्तबकः । क्रोडत्रासेत्यादिस्वरूपकथनं क्षतपादपल्लवत्वादुत्प्रेक्षणम् । **खञ्जतीवेति** । यश्च खञ्जति स शिखरप्राये विषमे पथि । ये पुनरस्ताचले शिखरस्खलनकारणकं खञ्जनमित्युत्प्रेक्षयन्ते तान्प्रति कमलिनीत्यादि निरर्थकम् । खञ्जतीव स्खलतीव । पुरः पूर्वस्यां

परापतति प्रेङ्खदन्धकारलेशलम्बालके शशिविरहशोकश्याम इव श्यामामुखे, कृतसंध्योपासनः शयनीयमगात् । अचिन्तयच्चैकाकी—'किं करोमि । अन्यथा संभावितोऽस्मि राज्ञा । निर्निमित्तबन्धुना च संदिष्टमेवं कृष्णेन । कष्टा च सेवा । विषमं च भृत्यत्वम् । अतिगम्भीरं महद्राजकुलम् । न च तत्र मे पूर्वजप्रवर्तिता प्रीतिः, न कुलक्रमागता गतिः, नोपकारस्मरणानुरोधः, न बालसेवास्नेहः, न गोत्रगौरवम्, न पूर्वदर्शनदाक्षिण्यम्, न प्रज्ञासंविभागोपप्रलोभनम्, न विद्यातिशयकुतूहलम्, नाकारसौन्दर्यादरः, न सेवाकाकुकौशलम्, न विद्वद्गोष्ठीबन्धवैदग्ध्यम्, न वित्तव्ययवशीकरणम्, न राजवल्लभपरिचयः । अवश्यं गन्तव्यम् । सर्वथा भगवान्पुरारातिर्भुवनगुरुर्गतस्य मे सर्वं सांप्रतमाचरिष्यति' इत्यवधार्य गमनाय मतिमकरोत् ।

अथान्यस्मिन्नहन्युत्थाय, प्रातरेव स्नात्वा, धृतधवलदुकूलवासाः, गृहीताक्षमालः, प्रास्थानिकानि सूक्तानि मन्त्रपदानि च बहुशः समावर्त्य, देवदेवस्य विरूपाक्षस्य क्षीरस्नपनपुरःसरां सुरभिकुसुमधूपगन्धध्वजबलिविलेपनप्रदीपकबहुलां विधाय पूजाम्, परमया भक्त्या प्रथमहुततरलतिलत्वग्विचटनचटुलमुखरशिखाशेखरं प्राज्याज्याहुतिप्रवर्धितदक्षिणार्चिषं भगवन्तमाशुशुक्षणिं हुत्वा, दत्वा द्युम्नं यथाविद्यमानं द्विजेभ्यः, प्रदक्षिणीकृत्य प्राङ्मुखीं नैचिकीम्, शुक्लाङ्गरागः, शुक्लमाल्यः, शुक्लवासाः, रोचनाचित्रदूर्वाग्रपल्लवमथितगिरिकर्णिकाकुसुमकृतकर्णपूरः, शिखासक्तसिद्धार्थकः, पितुः कनीयस्या स्वस्रा मात्रेव स्नेहार्द्रहृदयया श्वेतवाससा साक्षादिव

दिशि । श्यामा रात्रिः, योषिच्च । मुखमारम्भः, वदनं च । निर्निमित्तेत्यादयभिप्रायेण वक्ष्यति अवश्यं गन्तव्यं चेत्यादि । 'काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः' । इह च लक्षणया वक्रोक्तिः । सांप्रतं युक्तम् ।

अथेत्यादावन्यस्मिन्नहनि प्रीतिकूटान्निरगादिति संबन्धः । प्रस्थानं प्रयोजनं येषां तानि प्रास्थानिकानि सूक्तानि, वेदोक्ता मन्त्रविशेषाः । विरूपाक्षस्त्र्यक्षः । प्राज्यं भूरि । आज्यं घृतम् । द्युम्नं धनम् । यथाविद्यमानमित्यनेन निर्लोभतोक्ता । नैचिकीं वराङ्गीम्, होमधेनुं वा, शुक्लां वा । गिरिकर्णिकाश्वखुरी मङ्गल्यौषधिः । सिद्धार्थकानि सर्षपाः । स्वस्रा भगिन्या । महाश्वेता देवताविशेषः । रविस्थदेवते

भगवत्या महाश्वेतया मालत्याख्यया कृतसकलगमनमङ्गलः, दत्ताशीर्वादः, बान्धववृद्धाभिरभिनन्दितः, परिजनजरन्तीभिर्वन्दितचरणैरभ्यनुज्ञातः, गुरुभिरभिवादितैराघ्रातः शिरसि, कुलवृद्धैर्वर्धितगमनोत्साहः, शकुनैर्मौहूर्तिकमतेन कृतनक्षत्रदोहदः, शोभने मुहूर्ते हरितगोमयोपलिप्ताजिरस्थण्डिलस्थापितमसितेतरकुसुममालापरिक्षिप्तकण्ठं पिष्टपञ्चाङ्गुलपाण्डुरं मुखनिहितनवचूतपल्लवं पूर्णकलशमुदीक्षमाणः प्रणम्य कुलदेवताभ्यः कुसुमफलपाणिभिरप्रतिरथं जपद्भिर्निजद्विजैरनुगम्यमानः, प्रथमचलितदक्षिणचरणः, प्रीतिकूटान्निरगात्।

प्रथमेऽहनि घर्मकालकष्टं निरुदकं निष्पत्रपादपविषमं पथिकजननमस्क्रियमाणप्रवेशपादपोत्कीर्णकात्यायनीप्रतियातनं शुष्कमपि पल्लवितमिव तृषितश्वापदकुललम्बितलोलजिह्वालतासहस्रैः पुलकितमिवाच्छभल्लगोलाङ्गूललिह्यमानमधुगोलचलितसरघासंघातै रोमाञ्चितमिव दग्धस्थलीरूढस्थूलाभीरुकन्दलशतैः शनैश्चण्डिकाकाननमतिक्रम्य मल्लकूटनामानं ग्राममगात्। तत्र च हृदयनिर्विशेषेण भ्रात्रा सुहृदा च जगत्पतिनाम्ना संपादितसपर्यः सुखमवसत्। अथापरेद्युरुत्तीर्य भगवतीं भागीरथीं यष्टिग्रहकनाम्नि वनग्रामके निशामनयत्। अन्यस्मिन्दिवसे स्कन्धावारमुपमणितारमन्वजिरवति कृतसंनिवेशमाससाद। अतिष्ठच्च नातिदूरे राजभवनस्य।

त्यन्ये। **दत्तेत्यादि**। बान्धववृद्धाभिप्रायेण समुचित एवम्। **अभिनन्दित इति**। प्रतिपदं द्वयमूह्यम्। जरत्यो वृद्धाः। आघ्रातः शिरसि चुम्बितः। मौहूर्तिका गणकाः। नक्षत्रदोहदं प्रति नक्षत्रप्राशनम्, नक्षत्रविषयोऽभिलाषो वा। अजिरमङ्गनम्। स्थण्डिलं भूः। परिक्षिप्तो वेष्टितः। पिष्टपञ्चाङ्गुलमाजकोक्ताभिः पञ्चभिरङ्गुलीभिर्मङ्गल्याय दीयते। अप्रतिरथं प्रास्थानिकं मन्त्रम्। निजेत्यादिना स्वस्य दातृत्वमुक्तम्।

उत्कीर्णा निखाता। कात्यायनी दुर्गा। प्रतियातना प्रतिमा। काननत्वात्पल्लवितमिवेत्युत्प्रेक्षा। जिह्वैव लता। दीर्घत्वात्। गोलाङ्गूलः कृष्णमुखो वानरः। मधुगोलं माक्षिककरण्डः। सरघा मधुमक्षिकाः। अभीरुः शतावरी। कन्दलानि नवनालानि। भ्रात्रेति चन्द्रसेनेन। हृदयेत्याद्यभिप्रायेण सुखमित्युक्तम्। मणितारं पत्तनभेदम्। अन्वजिरवति नदीभेदनिकटे। संनिवेशो गृहादिरचना।

निर्वर्तितस्नानाशनव्यतिकरो विश्रान्तश्च मेखलकेन सह याममात्रावशेषे दिवसे भुक्तवति भूभुजि प्रख्यातानां क्षितिभुजां बहूञ्शिबिरसंनिवेशान्वीक्षमाणः शनैः शनैः पट्टबन्धार्थमुपस्थापितैश्च डिण्डिमाधिरोहणायाहृतैश्चाभिनवबद्धैश्च विक्षेपोपार्जितैश्च कौशलिकागतैश्च नागवीथीपालप्रेषितैश्च प्रथमदर्शनकुतूहलोपनीतैश्च दूतसंप्रेषणप्रेषितैश्च पल्लीपरिवृढढौकितैश्च स्वेच्छायुद्धक्रीडाकौतुकाकारितैश्च दीयमानैश्चाच्छिद्यमानैश्च मुच्यमानैश्च यामस्थापितैश्च सर्वद्वीपजिगीषया गिरिभिरिव सागरसेतुबन्धनार्थमेकीकृतैर्ध्वजपटपटुपटहशङ्खचामराङ्गरागरमणीयैः पुष्याभिषेकदिवसैरिव कल्पितैर्वारणेन्द्रैः श्यामायमानम्, अनवरतचलितखुरपुटप्रहतमृदङ्गैर्नर्तयद्भिरिव राजलक्ष्मीमुपहसद्भिरिव स्रुक्पुटप्रसृतफेनाट्टहासेन जवजडजङ्घां हरिणजातिमाकारयद्भिरिव संघट्टहेतोर्हर्षहेषितेनोच्चैःश्रवसमुत्पतद्भिरिव दिवसकररथतुरगरुषा पक्षायमाणमण्डनचामरमालैर्गगनतलं तुरङ्गैस्तरङ्गायमानम्, अन्यत्र प्रेषितैश्च प्रेष्यमाणैश्च प्रेषितप्रतीपनिवृत्तैश्च बहुयोजनगमनगणनसंख्याक्षरावलीभिरिव वराटिकावलीभिर्घटितमुखमण्डनकैस्तारकितैरिव संध्यातपच्छेदैररुणचामरिकारचितकर्णपूरैः सरक्तोत्पलैरिव रक्तशालिशालेयैरनवरतझणझणायमानचारुचामीकरघुरुघुरुकमालिकैर्जरत्करञ्जवनैरिव रणितशुष्कबीजकोशीशतैः श्रवणोपान्तप्रेङ्खत्पञ्चरागवर्णोर्णाचित्रसूत्रजूटजटाजालैः कपिकपोलकपिलैः क्रमेलककुलैः कपिलायमानम्

निर्वर्तितेत्यादौ राजद्वारमीदृशमगमदिति संबन्धः । निर्वर्तितेत्यादि राजदर्शनेऽकातरत्वमात्मनः प्रतिपादयति । वारणेन्द्रैः श्यामायमानमिति राजद्वारविशेषणम् । डिण्डिमः पटहः । विक्षेपः करः । नागवीथीहस्तिभूः । पल्ली शबरवसतिः । परिवृढः स्वामी । आकारितैराहूतैः । आच्छिद्यमानैरपहियमाणैः । यत्र दिने पुष्यनक्षत्रे राजा स्नाति तद्दिनं पुष्याभिषेकाख्यम् । श्यामायमानं कालत्वमापद्यमानम् । अथ च दिवसः श्यामायति रात्रिवदाचरतीति वक्रोक्तिः । अभिषेकदिनानि च ध्वजादिरम्याणि । अनवरतेत्यादौ तुरङ्गैस्तरङ्गायमानमिति संबन्धः । मृदोऽङ्गं मृदङ्गश्च मुरजः । सृक्किण्योष्ठपर्यन्तौ । अन्यत्रेत्यादौ क्रमेलककुलैः कपिलायमानमित्यन्वयः । वराटिकाः श्वेटिकाः । शालीनां भवनं क्षेत्रं शालेयम् । 'व्रीहिशाल्योर्ढक्' । बीजकोशी शिम्बिका । क्रमेलका उष्ट्राः । अन्यत्रेत्यादिनातपत्रखण्डैः श्वेतायमानमित्यन्वयः । सद्य इत्याद्यभिप्रायेण शर-

अन्यत्र शरज्जलधरैरिव सद्यःस्रुतपयःपटलधवलतनुभिः कल्पपादपैरिव मुक्ताफलजालकजायमानालोकलुप्तच्छायामण्डलैर्नारायणनाभिपुण्डरीकैरिवाश्लिष्टगरुडपक्षैः क्षीरोदोद्देशैरिव द्योतमानविकटविद्रुमदण्डैः शेषफणाफलकैरिवोपरिस्फुरत्स्फीतमाणिक्यखण्डैः श्वेतगङ्गापुलिनैरिव राजहंसोपसेवितैरभिभवद्भिरिव निदाघसमयमुपहसद्भिरिव विवस्वतः प्रतापमापिबद्भिरिवातपं चन्द्रलोकमयमिव जीवलोकं जनयद्भिः कुमुदमयमिव कालं कुर्वद्भिर्ज्योत्स्नामयमिव वासरं विरचयद्भिः फेनमयीमिव दिवं दर्शयद्भिरकालकौमुदीसहस्राणीव सृजद्भिरुपहसद्भिरिव शातक्रतवीं श्रियं श्वेतायमानैरातपत्रखण्डैः श्वेतायमानम्, क्षणदृष्टनष्टाष्टदिङ्मुखं च मुष्णद्भिरिव भुवनमाक्षेपोत्क्षेपदोलायितं दिनं गतागतानीव कारयद्भिरुत्सारयद्भिरिव कुनृपतिकलङ्ककालीं कालेयीं स्थितिं विकचविशदकाशवनपाण्डुरदिशं शरत्समयमिवोपपादयद्भिर्बिसतन्तुमयमिवान्तरिक्षमाविर्भावयद्भिः शशिकरशुचीनां चलतां चामराणां सहस्रैर्दोलायमानम्, अपि च हंसयूथायमानं करिकर्णशङ्खैः, कल्पलतावनाय-

---

ब्रहणम्। स्रुतं निर्गतम्। पयः क्षीरम्, जलं च। पटलवत्तेन च धवला तनुराकारो येषाम्। अन्यत्र धवलाश्च ते तनवः, क्षीणाश्च ते। पुण्डरीकग्रहणेनाकरसदृशत्वमप्युच्यते। गरुडपक्षा रत्नभेदाः, गरुडस्य चाङ्गरुहाः। **क्षीरोदेति**। शुक्लतया। राजहंसाः प्रख्यनृपाः, रक्तचञ्चुचरणा राजहंसाः। निदाघस्य तिरस्करणादभिभवद्भिरिवेत्युक्तम्—**उपहसद्भिरिवेति**। प्रतापस्योपहास एव समुचितो वैयर्थ्यात्। अथ च प्रतापपदेन भङ्ग्या विवस्वत आरोपितविजिगीषुव्यवहारत्वाच्छत्रुमनःसंतापकारि यश उक्तम्। आतपं प्रकाशम्। **आपिबद्भिरिति**। तस्य सर्वत एवातिदर्शनात्। **जीवलोकमिति**। यश्च जीवानां लोकस्तत्र कथं चन्द्रलोक इति विरोधः। **कुमुदमयमिवेति**। कुमुदमयत्वाच्छुक्लं भवति। न तु कालम्। कुमुदमयं च समयं कार्तिकादि। **ज्योत्स्नेति**। वासरे ज्योत्स्ना न संभवतीति विरोधः। एवं च दिवः फेनमयीत्वम्। जलदे हि फेनानामभावः। कौमुदी कुमुदिनी, कार्तिकी च ज्योत्स्ना। पूर्वं सामान्येनोक्ता इति। विशेषेण श्वेता इवाचरन्तः श्वेतायमानाः। तैस्तत्र तेषां स्वत एव श्वेतत्वाच्छ्वेतपदेन कथमुपमानतेत्युच्यते। श्वेतगुणा इवाचरन्तः श्वेतायमानाः। तेन यथा श्वेतगुणयोगादन्यत्किंचिच्छ्वेतते तद्वदेतद्योगात् राजद्वारमिति। श्वेताः स्फटिका इत्यन्ये। केचित्तु 'श्वेतमानैः' इति पठन्ति। क्षणेत्यादौ चामराणां सहस्रैर्दोलायमानमित्यन्वयः। कलेरियं कालेयी। सर्वत्राग्निकलिभ्यां ढक्। पद्मरागा इव बाला

मानं कदलिकाभिः, माणिक्यवृक्षकवनायमानं मायूरातपत्रैः, मन्दाकिनीप्रवाहायमानमंशुकैः, क्षीरोदायमानं क्षौमैः, कदलीवनायमानं मरकतमयूखैः, जन्यमानान्यदिवसमिव पद्मरागबालातपैः, उत्पद्यमानापराम्बरमिवेन्द्रनीलप्रभापटलैः, आरभ्यमाणापूर्वनिशमिव महानीलमयूखान्धकारैः, स्यन्दमानानेककालिन्दीसहस्रमिव गरुडमणिप्रभाप्रतानैः, अङ्गारकितमिव पुष्परागरश्मिभिः, कैश्चित्प्रवेशमलभमानैरधोमुखैश्चरणनखपतितवदनप्रतिबिम्बनिभेन लज्जया स्वाङ्गानीव विशद्भिः कैश्चिदङ्गुलीलिखितायाः क्षितेर्विकीर्यमाणकरनखकिरणकदम्बकव्याजेन सेवाचामराणीवार्पयद्भिः कैश्चिदुरःस्थलदोलायमानेन्द्रनीलतरलप्रभापट्टैः स्वामिप्रकोपप्रशमनाय कण्ठबद्धकृपाणपट्टैरिव कैश्चिदुच्छ्वाससौरभभ्राम्यद्भ्रमरपटलान्धकारितमुखैरपहृतलक्ष्मीशोकधृतलम्बश्मश्रुभिरिवान्यैः शेखरोड्डीयमानमधुपमण्डलैः प्रणामविडम्बनाभयपलायमानमौलिभिरिव निर्जितैरपि संमानितैरिवानन्यशरणैरन्तरान्तरा निष्पततां प्रविशतां चान्तरप्रतीहाराणामनुमार्गप्रधावितानेकार्थिजनसहस्राणामनुयायिनः पुरुषानश्रान्तैः पुनःपुनः पृच्छद्भिः 'भद्र, अद्य भविष्यति भुक्त्वा स्थाने दास्यति दर्शनं परमेश्वरः, निष्पतिष्यति वा बाह्यां कक्ष्याम्' इति दर्शनाशया दिवसं नयद्भिर्भुजनिर्जितैः शत्रुमहासामन्तैः समन्तादासेव्यमानम्, अन्यैश्च प्रतापानुरागागतैर्नानादेशजैर्महीपालैः प्रतिपालयद्भिर्नरपतिदर्शनकालमध्यास्यमानम्, एकान्तोपविष्टैश्च जैनैरार्हतैः पाशुपतैः पाराशरिभिर्वर्णिभिश्च सर्वदेशजन्मभिश्च जनपदैः सर्वाम्भोधिवेलावनवलयवासिभिश्च म्लेच्छजातिभिः सर्वदेशान्तरागतैश्च दूतमण्डलैरुपास्यमानम्, सर्वप्रजानिर्माणभूमिमिव

तपास्तैः । महानीला गरुडमणयः । पुष्परागाश्च मणिभेदाः । कैश्चिदित्यादौ शत्रुमहासामन्तैः समन्तादासेव्यमानमित्यन्वयः । **सेवेत्यादि** । त्वयेदानीं चामरग्रहणेन सेवनीय इति तेषां हि क्षितिः कलत्रमतस्तद्वारेण सेवनेच्छा । 'हारस्य यो मध्यमणिस्तरलः स प्रकीर्तितः' । चपलो वा शेखरं मुण्डमालिकम् । मौलयः केशाः । निर्जितैः पुरस्कृतन्यक्कृतैः, राजसेवाप्राप्तैः, संमानितैः पूजितैरिव । **अनुयायिन इति** । तेषां स्वयं सुलभत्वात् जैनैः शाक्यैः । आर्हतैर्नग्नक्षपणकैः । पाशुपतैः शैवभेदैः । पराशरेण प्रोक्तमधीयन्ते पाराशरिणो यतयस्तैः । वर्णिभिर्ब्रह्मचारिभिः । **सर्वप्रजेति** । अत्र हि स्थित्वा यदि प्रजापतयो न सृजेयुः,

प्रजापतीनां लोकत्रयसारोच्चयरचितं चतुर्थमिव लोकम्, महाभारतशतैरप्यकथनीयसमृद्धिसंभारम्, कृतयुगसहस्रैरिव कल्पितसंनिवेशम्, स्वर्गार्बुदैरिव विहितरामणीयकम्, राजलक्ष्मीकोटिभिरिव कृतपरिग्रहं राजद्वारमगमत् ।

अभवच्चास्य जातविस्मयस्य मनसि—'कथमिवेदमियत्प्रमाणं प्राणिजातं जनयतां प्रजासृजां नासीन्महाभूतानां वा परिक्षयः, परमाणूनां वा परिच्छेदः, कालस्य वान्तः, आयुषो वा व्युपरमः, आकृतीनां वा परिसमाप्तिः' इति । मेखलकस्तु दूरादेव द्वारपाललोकेन प्रत्यभिज्ञायमानः 'तिष्ठतु तावत्क्षणमात्रमत्रैव पुण्यभागी' इति तमभिधायाप्रतिहतः पुरः प्राविशत् ।

अथ स मुहूर्तादिव प्रांशुना, कर्णिकारगौरेण, वीध्रकंचुकच्छन्नवपुषा, समुन्मिषन्माणिक्यपदकबन्धबन्धुरशस्तबन्धकृशावलग्नेन, हिमशैलशिलाविशालवक्षसा, हरवृषककुदकूटविकटांसतटेन, उरसा चपलहृषीकहरिणकुलसंयमनपाशमिव हारं बिभ्रता, 'कथयतं यदि सोमवंशसंभवः सूर्यवंशसंभवो वा भूपतिरभूदेवंविधः' इति प्रष्टुमानीताभ्यां सोमसूर्याभ्यामिव श्रवणगताभ्यां मणिकुण्डलाभ्यां समुद्भासमानेन, बृहद्वदनलावण्यविसरवेणिकाक्षिप्यमाणैरधिकारगौरवादीयमानमार्गेणेव दिनकृतः किरणैः प्रसादलब्धया विकचपुण्डरीकमुण्डमालिकयेव दीर्घया दृष्ट्या दूरादेवानन्दयता, नैष्ठुर्याधिष्ठानेऽपि प्रतिष्ठितेन पदे प्रश्रयमिवावनम्रेण,

---

तत्कथं सर्वे भावाः कारणभूता इव तत्र लक्ष्येरन् । अर्बुदं दश कोटयः । कोटिर्लक्षशतम् । इह तु बहुसंख्योपलक्षणार्थावर्बुदकोटिशब्दौ ।

परिसमाप्तिरनारम्भः । **तिष्ठत्विति** । विद्यायुक्ते कदाचिदनादरशङ्केत्येतदर्थमाह—**पुण्यभागीति** ।

अथेत्यादावीदृशपुरुषेणानुगम्यमानो निर्गत्यावोचदिति संबन्धः । अन्तराले वस्त्वन्तरादिवर्णनाभावादथेत्यादिना समनन्तरमेव निर्गमनेन पुनरादर एव प्रतीयते । अत आह—**मुहूर्तादिवेति** । पुरुषानुगतत्वेन चादर एव पोष्यते । वीध्रं निर्मलम् । बन्धुरं शोभनम् । शस्तं सुवर्णपट्टिकाकटिसूत्रम् । तस्य बन्धेन निवेशनेन कृशमवलग्नं मध्यं यस्य तेन । हिमशैले हिमग्रहणं राज्ञो धवलत्वात् । हरग्रहणं जराशौक्ल्यप्रतिपादनाय पूर्ववत् । हृषीकाणीन्द्रियाणि । **आनीताभ्यामिति** । आनयने तस्य प्रभविष्णुता ध्वन्यते । यश्च स्रष्टुमानीयते स स्रवणं

मौलिना पाण्डुरमुष्णीषमुद्वहता, वामेन स्थूलमुक्ताफलच्छुरणदन्तुरत्सरुं करकिसलयेन कलयता कृपाणम्, इतरेणापनीततरलतां ताडितीमिव लतां शातकौम्भीं वेत्रयष्टिमुन्मृष्टां धारयता पुरुषेणानुगम्यमानो निर्गत्यावोचत्—'एष खलु महाप्रतीहाराणामनन्तरश्चक्षुष्यो देवस्य पारियात्रनामा दौवारिकः। समनुगृह्यात्वेनमनुरूपया प्रतिपत्त्या कल्याणाभिनिवेशी' इति। दौवारिकः समुपसृत्य कृतप्रणामो मधुरया गिरा सविनयमभाषत—'आगच्छत। प्रविशत दर्शनाय। कृतप्रसादो देवः' इति। बाणस्तु 'धन्योऽस्मि, यदेवमनुग्राह्यं मां देवो मन्यते' इत्युक्त्वा तेनोपदिश्यमानमार्गः प्राविशदभ्यन्तरम्।

अथ वनायुजैः, आरट्टजैः, काम्बोजैः, भारद्वाजैः, सिन्धुदेशजैः, पारसीकैश्च, शोणैश्च, श्यामैश्च, श्वेतैश्च, पिञ्जरैश्च, हरिद्भिश्च, तित्तिरिकल्माषैश्च, पञ्चभद्रैश्च, मल्लिकाक्षैश्च, कृत्तिकापिञ्जरैश्च, आयतनिर्मांसमुखैः, अनुत्कटकर्णकोशैः, सुवृत्तश्लक्ष्णसुघटितघण्टिकाबन्धैः, यूपानुपूर्वीवक्रायतोदग्रग्रीवैः, उपचयश्चयत्स्कन्ध-

---

गच्छति। वेणिका प्रवाहाः। **वामेनेति**। तदा तस्य व्यापारानुपपत्तेः। अपनीतेत्यादिनास्य नियमविधायित्वं पोष्यते। उन्मृष्टामुत्तंसिताम्। अनेन भास्वरतैव पोष्यते। अनन्तरः प्रधानम्। चक्षुष्यः प्रियः। आगच्छतेत्यादौ बहुत्वनिर्देशेनादर एवास्यापाद्यते।

अथेत्यादावेवंविधैस्तुरङ्गैरारचितां मन्दुरां विलोकयन्दूरादिभधिष्ण्यागारमपश्यदिति संबन्धः। वनायुजादीनि देशविशेषेणाश्वानां नामानि। शोणैरित्यादिवर्णविशेषवर्णनम्। 'शोणः पद्मारुणः स्मृतः'। पिञ्जरैरीषत्कपिलैः हरिच्छुकनिभो वर्णः। तित्तिरिः पक्षिभेदस्तद्वच्चित्रैः। 'सिताश्च यस्य वाजिनः शफाः समस्तकं मुखं स पञ्चभद्रनामको नृपस्य राज्यसौख्यदः'। शुक्लपर्यन्ते असिततारके नयने येषां ते मल्लिकाक्षाः। उक्तं च—'पृथुस्निग्धा समा चैव मल्लिकाकुसुमप्रभा। राजी यस्य तु पर्यन्ते परिक्षेप्ये तु लोचने॥ सह यो मल्लिकाक्षस्तु दृष्टिपर्यन्ततारकः॥'इति तारका कदम्बककलपानेकबिन्दुकल्माषिततत्वचः। कृत्तिकापिञ्जराः। यतः। **आयतेत्यादि**। तदुक्तम्—'मुखं तन्वायतनतं चतुरङ्गं समाहितम्। ऋजु चैवोपदिष्टं च परिपूर्णं च शस्यते॥'इति। कृष्णेनाप्युक्तम्—'उज्जा अतुङ्गअत्थं णिम्मं संवाहिराण अच्चअणम्' इति। अनुत्कटो ह्रस्वः। कोशो मध्यम्। शिरसो ग्रीवायाश्च यन्मध्यं च घण्टिकाबन्धः। यो निगाल इत्युच्यते तस्य सुवृत्तादि शस्यते। यदाह—'ग्रीवाशिरोऽन्तरश्लिष्टो दीर्घवृत्तः समाहितः।

संधिभिः, निर्भुग्नोरःस्थलैः, अस्थूलप्रगुणप्रसृतैर्लोहपीठकठिनखुरमण्डलैः, अतिजवव्रुटनभयादनिर्मिताग्राणीवोदराणि वृत्तानि धारयद्भिः, उद्यद्द्रोणीविभज्यमानपृथुजघनैः, जगतीदोलायमानबालपल्लवैः, कथमप्युभयतो निखातदृढभूरिपाशसंयमननियन्त्रितैः, आयतैरपि पश्चात्पाशबन्धप्रसारितैकाङ्घ्रिभिरायततरैरिवोपलक्ष्यमाणैः, बहुगुणसूत्रग्रथितग्रीवागण्डकैरामीललोचनैः, दूर्वारसश्यामलफेनलवशबलान्दशनगृहीतमुक्तान्फरफरितत्वचः कण्डूजुषः प्रतीकान्प्रचालयद्भिः, सालसवलितवालधिभिः, एकशफविश्रान्तिस्रस्तशिथिलितजघनार्धैः, निद्रया प्रध्यायद्भिश्च, स्खलितहुंकारमन्दमन्दशब्दायमानैश्च, ताडितखुरधरणीरणितमुखरशिखरखुरलिखितक्ष्मातलैर्घासमभिलषद्भिश्च, प्रकीर्यमाणयवसग्रासरसमत्सरोद्भूतक्षोभैश्च, प्रकुपितचण्डचण्डालहुंकारकातरतरतरलतारकैश्च, कुङ्कुमप्रमृष्टिपिञ्जराङ्गतया सततसंनिहितनीराजनानलरक्ष्यमाणैरिवोपरि-

नोद्वर्तो नार्धितो नातिदुर्नाहोऽतिविधानतः ॥ सुदिग्धोऽनुपदिग्धश्च निगालो गदितः शुभः ॥' इति । यूपो यज्ञचिह्नं । तस्येवानुपूर्वी यस्याः । तथा वक्रा आयता उदग्रा उद्धुरा ग्रीवा येषाम् । तदुक्तम्—'ग्रीवा भूलम्बिनी वृत्ता दीर्घा च सुसमाहिता । गले बद्धा विदौर्वृत्ता तथा शिरसि चोद्यता ॥ निगाले स्याच्च निर्मांसा वृद्धौ साकुञ्चिता भृशम् । श्लिष्टमांसाग्रबद्धा च तुरगस्य प्रशस्यते ॥' इति। **उपचयेत्यादि** । तदुक्तम्—'स्कन्धः सुपरिपूर्णः स्याद्व्यक्तमांसः पृथुत्रिकः । बहुमांसाङ्गसंश्लिष्टः स्थिरमांसश्च पूरितः ।' इति । निर्भुग्नं स्थूलत्वाद्बहिर्निःसृतम् । उक्तं च—'स्थूलास्थि महदच्छिद्रं पृथुलं यच्च निर्वलि । उर ईदृक्प्रशंसन्ति स्थूलक्रोडं महत्तरम् ॥' इति । निर्भुग्नमुत्पन्नद्रोणिकमिति केचित् । अस्थूलप्रगुणप्रस्थितैर्निर्मांसऋजुजङ्घैः । उक्तं च—'जङ्घे वृत्ते दीर्घे निर्मांसे पूजिते निगूढसिरे' इति । मण्डलशब्देन वृत्तत्वमुच्यते । तदुक्तम्—'खुरास्तुरङ्गे वृत्ताश्च ह्रस्वाश्च सुदृढा घनाः' इति । तथा शिलातलनिभैः खुरैरिति । **उदराणीति** । तदुक्तम्—'उदरं वृत्तमगुरु मृगस्योपचितं तथा । अच्छिद्रहस्ववृत्ताल्पसमकुक्षि च पूजितम् ॥' इति । द्रोणी शोभाविशेषः । यदाह—'पृष्ठोरःकटिपार्श्वस्थमांसोत्कर्षणनिर्मिता । द्रोणिकेति प्रशंसन्ति शोभा वाजिनि पञ्चमी ॥' इति । बाला एव पल्लवाः । **उभयत इति** । अत्युद्दामवेगवत्त्वादुभयत्र पाशबन्धः । गण्डको भूषणभेदः । फरफरिताः पुनः पुनरीषत्कम्पिताः । वालधिः पुच्छः । शफः समुदयुक्तः पादः । खुरधरणी खुराधःकाष्ठपट्टाच्छादिता भूः । चण्डालोऽश्वपालः । प्रमृष्टिः प्रमार्जनम् । वितानकं रक्तकम् । देवतात्र गोविन्दः । आरचितां भूषिताम् । हस्तवामशब्दो भाष्य-

विततवितानैः, पुरः पूजिताभिमतदैवतैः, भूपालवल्लभैस्तुरङ्गैरारचितां मन्दुरां विलोकयन्, कुतूहलाक्षिप्तहृदयः किंचिदन्तरमतिक्रान्तो हस्तवामेनात्युच्चतया निरवकाशमिवाकाशं कुर्वाणम्, महता कदलीवनेन परिवृतपर्यन्तं सर्वतो मधुकरमयीभिर्मदस्रुतिभिर्नदीभिरिवापतन्तीभिरापूर्यमाणम्, आशामुखविसर्पिणा बकुलवनानामिव विकसतामामोदेन लिम्पन्तं घ्राणेन्द्रियं दूरादव्यक्तमिभतृष्ण्यागारमपश्यत् । अपृच्छच्च—'अत्र देवः किं करोति' इति । असावकथयत्—'एष खलु देवस्यौपवाह्यो वाह्यं हृदयं जात्यन्तरित आत्मा बहिश्चराः प्राणा विक्रमक्रीडासुहृदर्पशात इति यथार्थनामा वारणपतिः । तस्यावस्थानमण्डपोऽयं महान्दृश्यते' इति । स तमवादीत्—'भद्र, श्रूयते दर्पशातः । यद्येवमदोषो वा पश्यामि तावद्वारणेन्द्रमेव । अतोऽर्हसि मामत्र प्रापयितुम् । अतिपरवानस्मि कुतूहलेन' इति । सोऽभाषत—'भवत्वेवम् । आगच्छतु भवान् । को दोषः । पश्यतु तावद्वारणेन्द्रम्' इति ।

गत्वा च तं प्रदेशं दूरादेव गम्भीरगलगर्जितोर्जितैर्वियति चातककदम्बकैर्भुवि च भवननीलकण्ठकुलैः कलकेकाकलकलमुखरमुखैः क्रियमाणकलकोलाहलम्, विकचकदम्बसंवादिमदसुरासौरभभरितभुवनम्, कायवन्तमिवाकालमेघकालम्, अविरलमधुवि-

---

कृता वामहस्तमार्ग इत्यर्थे । बकुलेत्यादिना प्राशस्त्यमेव पोषयति । तदुक्तम्—'मालतीमुक्तपुंनागबकुलोपमसौरभम् । दानं पिष्टाम्बुसदृशं मुञ्चच्छ्लेतं तु शीतलम् ॥' इति । श्लैष्मिका दानलक्षणम् । एवं च धर्मलक्षणे तु प्रकोपसमयेऽपि तथाविधमदवर्णनया श्लेषप्रकृतित्वं प्रकाशयति—'श्लेषप्रकृतिकं श्रेष्ठं भद्रजातिं तथैव च' इति च शास्त्रकृता दर्शितम् । धिष्ण्यं मण्डपम् । औपवाह्यः क्रीडाहस्ती । यस्मात्केचन संनाह्याः केचिद्भद्रजातीया उभयस्वभावा भवन्ति करिणः । अस्य च यद्यपि विक्रमक्रीडासुहृदित्यनेन दर्पशात इति यथार्थनामा वारणपतिरित्यनेन च सांनाह्यत्वमेवोक्तम् तथा ह्यौपवाह्या इति कथनेऽर्धद्वयेऽपि योग्यत्वाद्भद्रजातीयं चास्य निश्चीयते । जात्यन्तरितो द्वितीयां जातिं हस्तिरूपां प्राप्तः । **यद्येवमिति** । यदि सत्यं दर्पशातोऽयमदोषो वेति । वाशब्दश्चार्थे । यदि च न दोष इत्यर्थः । यतो रसदानादिभयेन केनचिद्रष्टुं न लभ्यते । कुतूहलेन परवान्कुतूहलायितः ।

गत्वेत्यादौ दूरादेवं दर्पशातमपश्यदिति संबन्धः । गर्जितं बृंहितम् । चातकाः स्तोककाः । नीलकण्ठा मयूराः । केका मयूररुतानि । **मेघकाल-**

न्दुपिङ्गलपद्मजालकितां सरसीमिवाभ्यवगाढां दशां चतुर्थीमुत्सृजन्तम्, अनवरतमवतंसशङ्खैरामन्द्रकर्णतालदुन्दुभिध्वनिभिः पञ्चमीप्रवेशमङ्गलारम्भमिव गायन्तम्, अविरतचलनचित्रत्रिपदीललितलास्यलयैर्दोलायमानदीर्घदेहाभोगतया मेदिनीविदलनभयेन भारमिव लघयन्तम्, दिग्भित्तितटेषु कायमिव कण्डूयमानम्, आह्वायोद्दस्तहस्ततया दिग्वारणानिवाह्वयमानम्, ब्रह्मस्तम्भमिव स्थूलनिशितदन्तेन करपत्रेण पाटयन्तम्, अमान्तं भुवनाभ्यन्तरे बहिरिव निर्गन्तुमीहमानम्, सर्वतः सरसकिसलयलतालासिभिर्लैशिकैश्चिरपरिचयोपचितैर्घनैरिव विक्षिप्तसशैवलबिसविसरशबलसलिलैः सरोभिरिव चाधोरणैराधीयमाननिदाघसमयसमुचितोपचारानन्दम्, अपि च प्रतिगजदानपवनादानदूरोत्क्षिप्तेनानेकसमरविजयगणनालेखाभिरिव वलिवलयराजिभिस्तनीयसीभिस्तरङ्गितोदरेणातिस्थवीयसा हस्तार्गलदण्डेनार्गलयन्तमिव सकलं सकुलशैलसमुद्रद्वीपकाननं ककुभां चक्रवालम्, एकं करान्तरार्पितेनोत्पलाशेन कदलीदण्डेनान्तर्गतशीकरसिच्यमानमूलम्, मुक्तपल्लवमिव परं लीलावलम्बिना मृणालजालकेन समररसोच्चरोमाञ्चकण्टकितमिव दन्तकाण्डं वहन्तम्, विसर्पन्त्या च दन्तकाण्डयुगलकस्य कान्त्या सरःक्रीडास्वादितानीव कुमुदवनानि बहुधा वमन्तम्,

---

मिति । मेघकालश्च चातककदम्बनीलकण्ठकुलकदम्बकसौरभादियुक्तः । अविरलाघना ये मधुबिन्दव इव मधुबिन्दवो माक्षिककणास्तद्वत्पिङ्गलानि पद्मजालकानि संजातानि यस्याम् । 'पद्मकं बिन्दुजालं स्याद्वात्रकं करिणामिति' । यथा—'पद्मस्वस्तिकसंस्थानो बिन्दुभिश्च कचैस्तथा । स्वङ्क्तिताङ्गस्तुषाराभः शावः शक्तिकरः करी ॥'इत्युक्तम् । अन्ये मधुबिन्दवो मकरन्दकणास्तैः पिङ्गलानीति व्याख्येयम् । महत्सरः सरसी । **अभ्यवगाढामिति** । परिणताम् । दशां कालावस्थाम् । **चतुर्थीमिति** । 'चतुर्थ्यामवगाढायां लेखाबिन्दुभिराचितः' इत्युक्तम् । शङ्खैः । शङ्खशब्दैरित्यर्थः । **कर्णेत्यादि** । कर्णौ च दुन्दुभिध्वनितौ । 'कर्णौ च करिणः कार्यकारिणौ सत्प्रशंसिनौ'इति । पञ्चमी दशा त्रिपदी । एकपदोत्क्षेपे पादत्रयावस्थितिः । लयो लीलाः । आह्वः सङ्ग्रामः । ब्रह्मस्तम्भो ब्रह्माण्डम् । करपत्रं ककचम् । स्थूलनिशितदन्तं भवति । तच्च भेदयति स्तम्भम् । अमान्तमवर्तमानम् । लैशिकैर्घासिकैः आधोरणैर्गजारोहैः । वलयाकारा वलिर्वलिवलयम् । अर्गलयन्तं सनाटकं कुर्वाणम् । कुमुदवनानीत्युत्प्रेक्षा । दन्तयोर्वर्णप्राशस्त्यमाह—'पयःकुमुदकु-

निजयशोराशिमिव दिशामर्पयन्तम्, कुकरिकीटपाटनदुर्ललितान्सिंहानिवोपहसन्तम्, कल्पद्रुमदुकूलमुखपट्टमिव चात्मनः कलयन्तम्, हस्तकाण्डदण्डोद्धरणलीलासु च लक्ष्यमाणेन रक्तांशुकसुकुमारतलेन तालुना कवलितानि रक्तपद्मवनानीव वर्षन्तम्, अभिनवकिसलयराशिमिवोद्विरन्तम्, कमलकवलपीतं मधुरसमिव स्वभावपिङ्गलेन वमन्तम्, चक्षुषा चूतचम्पकलवलीलवङ्गककोलवन्त्येलालताभिश्रितानि ससहकाराणि कर्पूरपूरपूरितानि पारिजातकवनानीवोपभुक्तानि पुरः करटाभ्यां बहलमदामोदव्याजेन विसृजन्तम्, अहर्निशं विभ्रमकृतहस्तस्थितिभिरर्धखण्डितपुण्ड्रेक्षुकाण्डकण्डूयनलिखितैरलिकुलवाचालितैर्दानपट्टकैर्विलभमानमिव सर्वकाननानि करिपतीनामविरलोदबिन्दुस्यन्दिना हिमशिलाशकलमयेन विभ्रमनक्षत्रमालागुणेन शिशिरीक्रियमाणम्, सकलवारणेन्द्राधिपत्यपट्टबन्धबन्धुरमिवोच्चैस्तरां शिरो दधानम्, मुहुर्मुहुः स्थगितापावृतदिङ्मुखाभ्यां कर्णतालतालवृन्ताभ्यां वीजयन्तमिव भर्तृभक्तया दन्तपर्यङ्किकास्थितां राजलक्ष्मीमायतवंशक्रमागतेन गजा-

---

न्दाभौ केतकी कुमुदद्युती । मृगाङ्ककिरणालोकौ कीर्तिकल्याणकारकौ ॥'इत्युक्तम् । **रक्तांशुकेति** । उक्तं च—'रक्तोष्ठतालुरसनम्' इति । **स्वभावपिङ्गलेनेति** । उक्तं च—'शशिसूर्यसमाभासे कलविङ्काक्षसंनिभे । प्रसन्नमधुपिङ्गे च स्थिरे चामीलने तथा ॥ अपरिस्राविणी चैव कुशाग्निनिभभास्वरे । नेत्रे शस्ते समे स्निग्धे दीर्घे चाविलपक्ष्मणी ॥'इति । चूतेत्यादिना प्रशस्यत्वमाह । यदाह—'उभयद्युतिरप्येष विवर्णो हर्षवर्जितः । यदि स्यादपगन्धश्च तदासौ न सतां मतः ॥' इति । करटाभ्यां गण्डाभ्याम् । अर्धेत्यादिनेक्षुकाण्डकस्य लेखनीसादृश्यमाह । लिखितैः कृतलेखैरप्यलिकुलेषु सत्सु वाचालितशब्दयोगो येषामित्यनेनालिकुलस्य लिप्यक्षररूपतां ध्वनयति। लिप्यक्षरेषु च सत्सु पाठ्यमानेषु वाचालता । दानपट्टकलिखितैः किंचिद्धि लभ्यते । अक्षरपाटिकैश्च तेषां हस्तस्थितिर्न क्रियते । तानि च वाच्यन्ते । यद्वा स्वहस्तेनाक्षरकरणं हस्तस्थितिः । हिमशिला वातवज्रीभूतं हिमम् । केचित्तु 'हिमानि हिमशकलानि चन्द्रकान्ताः'इत्याहुः । हिमस्य च तदा वर्णनानुचित्वात् । पर्वतेभ्यो हिमानयनं सुलभमेवेति पूर्वोक्तमेव श्रेष्ठम् । यतश्चन्द्रकान्तानां दिवा स्तुतिर्न भवतीति । नक्षत्रमाला हस्त्याभरणभेदः । **उच्चैस्तरामिति** । उच्चं हि शिरः करिणः शस्यते । यदुक्तम्—'समं महच्च पूर्णं च नातिस्तब्धोच्चमस्तकम् । नावाग्रं नातिपृथुलं वितानावग्रहं मृदु ॥' इति । दन्तावेव तदवस्थानसमुचितत्वात् । पर्यङ्किका च दन्तमयः पर्यङ्कः आस्त इति श्लेषः । आयतवंशः वक्रवंशः,

धिपत्यचिह्नेन चामरेणेव चलता वालधिना विराजमानम्, स्वच्छशिशिरशीकरच्छलेन दिग्विजयपीताः सरित इव पुनःपुनर्मुखेन मुञ्चन्तम्, क्षणमवधानदाननिस्पन्दीकृतसकलावयवानामन्यद्विरददिण्डिमाकर्णनाङ्गवलनानामन्तेन दीर्घशूत्कारैः परिभवदुःखमिवावेदयन्तम्, अलब्धयुद्धमिवात्मानमनुशोचन्तम्, आरोहाधिरूढिपरिभवेन लज्जमानमिवाङ्गुलीलिखितमहीतलं, मदं मुञ्चन्तम्, अवज्ञागृहीतमुक्तकवलकुपितारोहारटनानुरोधेन मदतन्द्रीनिमीलितनेत्रत्रिभागम्, कथं कथमपि मन्दमन्दमनादरादाददानम्, कवलानवजग्धतमालपल्लवस्रुतश्यामलरसेन प्रभूततया मदप्रवाहमिव मुखेनाप्युत्सृजन्तम्, चलन्तमिव दर्पेण, श्वसन्तमिव शौर्येण, मूर्च्छन्तमिव मदेन, त्रुट्यन्तमिव तारुण्येन, द्रवन्तमिव दानेन, वल्गन्तमिव बलेन, वाद्यन्तमिव मानेन, उद्यन्तमिवोत्साहेन, ताम्यन्तमिव तेजसा, लिम्पन्तमिव लावण्येन, सिच्यन्तमिव सौभाग्येन, स्निग्धं नखेषु, परुषं रोमविषये, गुरुं मुखे, सच्छिद्रं विनये, मृदुं शिरसि, दृढं परिचयेषु, ह्रस्वं स्कन्धबन्धे, दीर्घमायुषि, दरिद्रमुदरे, सततप्रवृत्तं दाने, बलभद्रं मदलीलासु, कुलकलत्रमायत्ततासु, जिनं क्षमासु, वह्निवर्षं क्रोधमोक्षेषु, गरुडं नागोद्धृतिषु, नारदं

शरवंशः, वालवंशश्चेति चत्वारो वंशाः । तेषु बालवंश आयत एव शास्त्रकृतामभिप्रेतः । तथाच—'यावत्पूरितपाशश्च वंशश्चापलताकृतिः।शुभो ज्ञेयो गजेन्द्राणामायतः कुरुते सुखम्॥' इति तैरुक्तम् । आयताद्वंशात्तत्क्रमेण गोपुच्छवदायत इति विग्रहः । समानार्हो हि वालधिः शोकं करोति । यदुक्तम्—'वक्रं स्थूलं च ह्रस्वं च पुच्छं कचविवर्जितम्। समानार्हं हि नागस्य भर्तुः शोककरं स्मृतम्॥'इति । वंशं पृष्ठनाभि, कुलं च । क्रम आनुपूर्वी, पारम्पर्यं च । वालधिः पुच्छम् । **लज्जमानमिति ।** यश्च लज्जते स भूमिं लिखति, दर्पं चोज्झति । अङ्गुली करिकराग्रावयवः, करशाखा च । तन्द्री आलस्यम्, गाढनिद्रा वा । चलन्तमित्यादि दर्पाधिकारणसमुचितक्रियाप्रतिपादनसाभिप्रायं व्याख्येयम् । **स्निग्धमिति ।** उक्तं च—'नखाः स्निग्धाः सिताः शस्ताः'इति । परुषं निष्कृपम् । यश्च स्निग्धः प्रीतिमान्स कथं परुषः प्रीतिशून्यो भवतीति विरोधः । एवं गुरुर्विस्तीर्णः, आचार्यश्च । **विनय इति ।** उक्तं च—'विनये मुनिभिस्तुल्याः क्रुद्धा नागाश्च राक्षसाः । निश्छिद्रस्याधिकत्वाच्च शस्त्रं नागा महीपतेः॥' इति । स्कन्धबन्धे ग्रीवामूले । दरिद्रः कृशः, दुर्गतश्च । दानं मदवारि, वितरणं च । बलभद्रो हलधरः । मदो दानम्, सुराकृतश्च । नागाः करिणः, सर्पाश्च । कलहो रणोऽपि । अविदितशत्रुसैन्ये पातोऽवस्कन्दः । मकरं

कलहकुतूहलेषु, शुष्काशनिपातमवस्कन्देषु, मकरं वाहिनीक्षोभेषु, आशीविषं दशनकर्मसु, वरुणं हस्तपाशाकृष्टिषु, यमवागुरामरातिसंवेष्टनेषु, कालं परिणतिषु, राहुं तीक्ष्णकरग्रहणेषु, लोहिताङ्गं वक्रचारेषु, अलातचक्रं मण्डलभ्रान्तिविज्ञानेषु, मनोरथसंपादकं चिन्तामणिपर्वतं विक्रमस्य, दन्तमुक्ताशैलस्तम्भनिवासप्रासादमभिमानस्य, घण्टाचामरमण्डनमनोहरमिच्छासंचरणविमानं मनस्विताया:, मदधारादुर्दिनान्धकारं गन्धोदकधारागृहं क्रोधस्य, सकाञ्चनप्रतिमं महानिकेतनमहंकारस्य, सगण्डशैलप्रस्रवणं क्रीडापर्वतमवलेपस्य, सदन्ततोरणं वज्रमन्दिरं दर्पस्य, उच्चकुम्भकूटाट्टालकविकटं संचारि गिरिदुर्गं राज्यस्य, कृतानेकबाणविवरसहस्रं लोहप्राकारं पृथिव्या:, शिलीमुखशतझांकारितं पारिजातपादपं भूनन्दनस्य, तथा च संगीतगृहं कर्णतालताण्डवानाम्, आपानमण्डपं मधुपमण्डलानाम्, अन्त:पुरं शृङ्गाराभरणानाम्, मदनोत्सवं मदलीलालास्यानाम्, अक्षुण्णप्रदोषं नक्षत्रमालामण्डलानाम्, अकालप्रावृट्कालं मदमहानदीपूरप्लवानाम्, अलीकशरत्समयं सप्रच्छद-

---

कूर्मम्। वाहिनी सेना, नदी च। दशनकर्म दन्तव्यापार:, दशनरूपा च क्रिया। हस्त एव पाशा:, प्रशस्तहस्तो हस्तपाश इति वा। हस्ते च पाश:। वागुरा जालम्। परिणतिषु दन्तविदारणकर्मसु। कालं यमम्। शुभाशुभादिकर्मविपाकेषु च कालमहरादिरूपम्। तीक्ष्णं कृत्वा करेण हस्तेन ग्रहणम्। रविश्च तीक्ष्णकर:। लोहिताङ्गोऽङ्गारक:। वक्रं कुटिलम्। पश्चाच्च मण्डलाकृत्या भ्रान्तेर्भ्रमणस्य विज्ञानानि कौशलातिशयगति:। गोमूत्रिकामण्डले त्रिविधा हि गति:। तत्रालातचक्रमुल्मुकचक्रं भ्रमणं करोति। **मनोरथसंपादकमिति**। शेषे षष्ठीसमास:। 'कर्मण्यण्' इति वाणिकृते स्वार्थे क:। दन्तौ मुक्ताशैलस्य श्वेतपाषाणस्य स्तम्भाविव यस्य। अन्यत्र दन्तस्य मुक्ताशैलानां च स्तम्भा यत्र। प्रतिमा दन्तकोश:, देवताकृतिश्च। महानिकेतनं साधुदेवगृहम्। गण्डावेव शैलौ तत्र प्रस्रवणं दाननिर्यास:। सह तेन वर्तते निर्झरश्च 'महतो मुक्तपाषाणान्गण्डशैलान्प्रचक्षते'। संचारी जङ्गम:। यदाह कौटिल्य:—'हस्तिनो हि जङ्गमं दुर्गम्' इति। कृतान्यनेकानि बाणैर्विवरसहस्राणि यस्य तम्। प्राकारेषु बाणानुत्स्रष्टुं विवरसहस्राणि क्रियन्ते, य इन्द्रकोशा इति चाणक्यादिषु प्रसिद्धा:। भूनन्दनो राजा। 'देवोद्यानं च नन्दनम्'। कर्णतालानां ताण्डवानीव ताण्डवानि। अन्यत्र लाभप्रधानानि ताण्ड-

वनपरिमलानाम्, अपूर्वहिमागमं शीकरनीहाराणाम्, मिथ्याजलधरं गर्जिताडम्बराणां दर्पशातमपश्यत् ।

आसीच्चास्य चेतसि—'नूनमस्य निर्माणे गिरयो ग्राहिताः परमाणुताम् । कुतोऽन्यथा गौरवमिदम् । आश्चर्यमेतत् । विन्ध्यस्य दन्तावादिवराहस्य करः' इति विस्मयमानमेनं दौवारिकोऽब्रवीत्—'पश्य ।

मिथ्यैवालिखितां मनोरथशतैर्निःशेषनष्टां श्रियं
चिन्तासाधनकल्पनाकुलधियां भूयो वने विद्विषाम् ।
आयातः कथमप्ययं स्मृतिपथं शून्योभवच्चेतसां
नागेन्द्रः सहते न मानसगतानाशागजेन्द्रानपि ॥ ४ ॥

तदेहि । पुनरप्येनं द्रक्ष्यसि । पश्य तावद्देवम्' इत्यभिधीयमानश्च तेन मदजलपङ्किलकपोलपट्टपतितां मत्तामिव मदपरिमलेन मुकुलितां कथमपि तस्माद्दृष्टिमाकृष्य तेनैव दौवारिकेणोपदिश्यमानवर्त्मा समतिक्रम्य भूपालसहस्रसंकुलानि त्रीणि कक्ष्यान्तराणि चतुर्थे भुक्तास्थानमण्डपस्य पुरस्तादजिरे स्थितम्, दूरादूर्ध्वस्थितेन प्रांशुना कर्णिकारगौरेण व्यायामव्यायतवपुषा शस्त्रिणा मौलेन शरीरपरिचारकलोकेन पङ्क्तिस्थितेन कार्तस्वरस्तम्भमण्डलेनेव परि-

---

वानि । मधुपा भ्रमराः, विटाश्च । शृङ्गारः सिन्दूरादिदानम्, रसभेदश्च । अक्षुण्णः परिपूर्णः, अभ्रादिनावृतः, अपूर्वो वा ।

ग्राहिताः प्रापिताः । **मिथ्यैवेति** । तस्या निःशेषनष्टत्वात्पुनरभावप्रसङ्गान्निःशेषेत्याद्यभिप्रायेणाह—**मनोरथशतैरिति** । तस्यां व्यापाररहितत्वाच्छून्यमनस्कत्वादेवाह—**सहत इत्यादि** । मानसं मनः, सरोभेदोऽपि । आशा दिशः, अभिलाषोऽपि । 'देवमिति'इत्यादौ चक्रवर्तिनं हर्षमद्राक्षीदिति संबन्धः । मदजलेन पङ्किले कपोलपट्टे पतिताम् । **मत्तामिवेति** । मत्तश्च पतति, मुकुलितदृष्टिश्च भवति, गतिवैकल्यादन्येन कृष्यते । भोजनं भोक्तव्यम् । भुक्ते सत्यास्थानं लोकदर्शनं तदर्थं मण्डपस्तस्य । ऊर्ध्वस्थितेत्यादि साधारणम् । प्रांशुनोन्नतेन, अन्यत्र प्रकृष्टा अंशवो यस्य तेन । कर्णिकारमारग्वधपुष्पम् । व्यायामः श्रमः । व्यायतं विभक्तावयवम्, विशेषेण दीर्घं च । शस्त्रिणा सायुधेन, स्तम्भा अपि शस्त्रेण बध्यन्ते मौलभृतकश्रेणिमित्रामित्राटविकभेदेन षट्प्रकाराः सहाया भवन्ति । अन्यत्र मूले बुध्ने भवं मौलम् । बुध्नप्रतिष्ठमित्यर्थः । पङ्क्तिस्थितेनेति साधारणम् । कार्तस्वरं

वृतम्, आसन्नोपविष्टविशिष्टेष्टलोकम्, हरिचन्दनरसप्रक्षालिते तुषारशीकरशीतलतले दन्तपाण्डुरपादे शशिमय इव मुक्ताशैलशिलापट्टशयने समुपविष्टम्, शयनीयपर्यन्तविन्यस्ते समर्पितसकलविग्रहभारम्, भुजे दिङ्मुखविसर्पिणि देहप्रभाविताने विततमणिमयूखे घर्मसमयसुभगे सरसीव मृदुमृणालजालजटिलजले सराजकं रममाणम्, तेजसः परमाणुभिरिव केवलैर्निर्मितम्, अनिच्छन्तं बलादारोपयितुमिव सिंहासनम्, सर्वावयवेषु सर्वलक्षणैर्गृहीतम्, गृहीतब्रह्मचर्यमालिङ्गितं राजलक्ष्म्या, प्रतिपन्नासिधाराधारणव्रतमविसंवादिनं राजर्षिम्, विषमराजमार्गविनिहितपदस्खलनभियेव सुलग्नं धर्मे, सकलभूपालपरित्यक्तेन भीतेनेव लब्धवाचा सर्वात्मना सत्येन सेव्यमानम्, आसन्नवारविलासिनीप्रतियातनाभिश्चरणनखपातिनीभिर्दिग्भिरिव दशभिः प्रणम्यमानम्, दीर्घैर्दिगन्तपातिभिर्दृष्टिपातैर्लोकपालानां कृताकृतमिव प्रत्यवेक्षमाणम्, मणिपादपी-

सुवर्णम्, यस्योद्वृष्यमाणस्य सतः कुङ्कुमस्येव रागो जायते । सौगन्ध्यं च तद्धरिचन्दनम् । शशिमय इति वक्ष्यमाणाभिप्रायेण तुषारेत्यादिना शीतलममुष्य दर्शयति। दन्ते तद्वच्च पाण्डुरे पादे । रत्नमयोऽपि पादाः । मुक्तेत्यादिना शुक्लतयापि शशिमय इवेत्येतदेव पोषयति । विग्रहः कायः, रणश्च । **धर्मेत्यादि** । मणीनां स्वभावत एव शीतलात्तदीया मयूखा अपि ह्लादयन्ति । यो हि बलवानारोप्यते स सर्वाङ्गेषु गृह्यते । **गृहीतब्रह्मचर्यमिति** । स्वदारसंतुष्ट ऋतुकालगामी । 'गृहस्थोजितव्यापारो ब्रह्मचार्येव'इति श्रुतेःयात्वेवमनुश्रूयते।'यावन्मया न सकला जिता भूमिस्तावन्मे ब्रह्मचर्यम्' इति श्रीहर्षः प्रतिज्ञातवान् । द्वादशभिश्च वर्षैर्जित्वा तां महिषीमब्रवीत्—'प्रतिज्ञा मे निर्व्यूढा' इति । ततो रोषात् 'अहमपि द्वादशवर्षं ब्रह्मचर्यं चरामि' इति सा प्रतिज्ञामकरोत् । इति ब्रह्मचर्येणाज्ञाकालोऽतिवाहितः । यश्च गृहीतब्रह्मचर्यः स कथं योषितालिङ्ग्यत इति विरोधः । असिधारा खड्गधारा, व्रतविशेषश्च । यत्र स्त्रीपुंसावकपटौ ब्रह्मचर्येण तिष्ठतः । यश्च प्रतिपन्नेषु विश्वासितेषु खड्गधारां पातयति स कस्मान्न विसंवदते । नान्यथा भवति । कथं च राजर्षिरसावुच्यत इति विरोधः । यश्च राजर्षिरुत्तममुनिर्गृहीतासिधारो ब्रह्मचारी च, स कयाचिदालिङ्ग्येत । विषमोऽशक्यानुष्ठानो नतोन्नतरूपः । मार्गो व्यवहारः, पन्थाश्च । विषमे पथि च स्खलति येन क्वचित्सुलग्नेन भूयते । **लब्धवाचेति** । सत्यस्य वाग्देवाश्रयणीयश्च । सर्वैस्त्यक्तः सन्भीतः संस्त्वां त्यजामीति वाचं लब्ध्वान्यं सेवते । वारविलासिनी शरीरोपचारचतुरा मुख्यललनाप्रतिबिम्बम् । **दशभिरिति** । नखानां दिशां च दशसंख्याकत्वात् ।

ठपृष्ठप्रतिष्ठितकरेणोपरिगमनाभ्यनुज्ञां मृग्यमाणमिव दिवसकरेण, भूषणप्रभासमुत्सारणबद्धपर्यन्तमण्डलेन प्रदक्षिणीक्रियमाणमिव दिवसेन, अप्रणमद्भिर्गिरिभिरपि दूयमानं शौर्योष्मणा, फेनायमानमिव चन्दनधवलं लावण्यजलधिमुद्वहन्तम्, एकराज्योर्जितेन निजप्रतिबिम्बान्यपि नृपचक्रचूडामणिधृतान्यसहमानमिव दर्पदुःखासिकया चामरानिलनिभेन बहुधेव श्वसन्तीं राजलक्ष्मीं दधानम्, सकलमिव चतुःसमुद्रलावण्यमादायोत्थितया श्रिया समुपश्लिष्टम्, आभरणप्रभाजालजायमानानीन्द्रधनुःसहस्राणीन्द्रप्राभृतप्रहितानि विलभमानमिव राज्ञां संभाषणेषु परित्यक्तमपि मधु वर्षन्तम्, काव्यकथास्वपीतममृतमुद्वमन्तम्, विस्रम्भभाषितेष्वनाकृष्टमपि हृदयं दर्शयन्तम्, प्रसादेषु निश्चलामपि श्रियं स्थाने स्थाने स्थापयन्तम्, वीरगोष्ठीषु पुलकितेन कपोलस्थलेनानुरागसंदेशमिवोपांशु रणश्रियः शृण्वन्तम्, अतिक्रान्तसुभटकलहालापेषु स्नेहवृष्टिमिव दृष्टिमिष्टे कृपाणे पातयन्तम्, परिहासस्मितेषु गुरुप्रतापभीतस्य राजकस्य स्वच्छमाशयमिव दशनांशुभिः कथयन्तम्, सकललोकहृदयस्थितमपि न्याये तिष्ठन्तम्, अगोचरे गुणानामभूमौ सौभाग्यानामविषये वरप्रदानानामशक्य आशिषाममार्गे मनोरथानामतिदूरे दैवस्यादिश्युपमानानामसाध्ये धर्मस्यादृष्टपूर्वे लक्ष्म्या महत्त्वे स्थितम्, अरुणपादपल्लवेन सुगतमन्थरोरुणा वज्रायुधनि-

---

मणिपादेति । मणिसंबन्धप्रतिष्ठानमेव पोषयति । करो हस्तोऽपि । **फेनायमानमिति** । जलं संतापेन सफेनं भवति । **असहमानमिवेति** । कथं सामान्येन समान इति । **सकलमित्यादि** । सकलपदेन, चतुःशब्देन च शौरेरस्य विशेषमाह । यतो लवणलस्य तत्राद्यापि शिष्यमाणत्वात् । अलं लावण्यमादाय । एकस्माच्च समुद्रादुत्थाय लक्ष्म्याः शौरिः समुपश्लिष्टः । लावण्यं लवणता, सौन्दर्यं च । प्राभृतं ढौकनिकम् । मधु मद्यम्, अमृतं च विस्रम्भ आश्वासः । उपांश्वप्रकटम् । अतिक्रान्ते कलहे रणे शस्त्राणां स्नेहो दीयते । रुधिरादिसलिलनिवारणाय । स्वच्छं निर्मलम् । सुप्रसादमाशयं भावं प्रकृष्टतापभीतस्य च स्वच्छो निर्मल आशयो जलाधारो दृश्यते । अत्र प्रतापेत्यादिप्रकरणसाहचर्यात्स्वच्छतान्यथानुपपत्त्या च । जलशब्दं विना जलाशय एव प्रतीयते । न्याये तिष्ठन्तम् । न्यायमुल्लङ्घन्तमित्यर्थः । यः सर्वेषां हृदयस्थितः स एकस्मिन्नेव तिष्ठतीति विरोधः । अरुणो लोहितः, अनूरुश्च । शोभनं गमनं ययोस्तौ मन्थरावूरू यस्य । बुद्धश्च

ष्टुरप्रकोष्ठपृष्ठेन वृषस्कन्धेन भास्वद्बिम्बाधरेण प्रसन्नावलोकितेन चन्द्रमुखेन कृष्णकेशेन वपुषा सर्वदेवतावतारमिवैकत्र दर्शयन्तम्, अपि च मांसलमयूखमालामलिनितमहीतले महति महार्हे माणिक्यमालामण्डितमेखले महानीलमये पादपीठे कलिकालशिरसीव सलीलं विन्यस्तवामचरणम्, आक्रान्तकालियफणाचक्रवालं बालमिव पुण्डरीकाक्षम्, क्षौमपाण्डुरेण चरणनखदीधितिप्रतानेन प्रसरता महीं महादेवीपट्टबन्धेनेव महिमानमारोपयन्तम्, अप्रणतलोकपालकोपेनेवातिलोहितौ सकलनृपतिमौलिमालास्वतिपीतं पद्मरागरत्नातपमिव वमन्तौ सर्वतेजस्विमण्डलास्तमयसंध्यामिव धारयन्तावशेषराजकशेखरकुसुममधुरसस्रोतांसीव स्रवन्तौ समस्तसामन्तसीमन्तोत्तंसस्रक्सौरभभ्रान्तैर्भ्रमरमण्डलैरमित्रोत्तमाङ्गैरिव मुहूर्तमप्यविरहितौ संवाहनतत्परायाः श्रियो विकचरक्तपङ्कजवनवासभवनानीव कल्पयन्तौ जलजशङ्खमीनमकरसनाथतलतया कथितचतुरम्भोधिभोगचिह्नाविव चरणौ दधानम्, दिङ्नागदन्तमुसलाभ्यामिव विकटमकरमुखप्रतिबन्धबन्धुराभ्यामुद्वेललावण्यपयोनिधिप्रवाहाभ्यामिव फेनाहितशोभाभ्यां चन्दनद्रुमाभ्यामिव भोगिमण्डलणिरोरत्नरश्मिरज्यमानमूलाभ्यां हृदयारोपितभूभारधारणमाणिक्यस्तम्भाभ्यामुरुदण्डाभ्यां विराजमानम्, अमृतफेनपिण्डपाण्डुना मेखलामणिमयूखखचितेन नितम्बबिम्बव्यासङ्गिना विमलपयोधौतेन नेत्रसूत्रनिवेशशोभिनाधरवाससा वासुकीनिर्मोकेणेव

सुगतः । वज्राख्यमायुधं तद्वन्निष्ठुरं कठोरं प्रकोष्ठस्य पृष्ठं यस्य तेन । इन्द्रश्चास्य वज्रमायुधम् । 'प्रकोष्ठमन्तरं विद्यादरत्निमणिबन्धयोः' । वृषो दान्तः, धर्मश्च । भास्वद्भास्वरम्, रविश्च भास्वान् । बिम्बं फलभेदः, मण्डलं च । अवलोकितं वीक्षितम्, बुद्धिभेदश्चावलोकितः । कृष्णः कालः, हरिश्च कृष्णः । **कलिकालेति** । कलिकालस्य मलिनत्वादेवमुत्प्रेक्षा । वामपादेन पराभवनीयत्वमेव पोष्यते । कालियो नागभेदः पुण्डरीकाक्षमिति राज्ञो विशेषणम् । तेजस्विनो वीराः, आदित्याश्च । जलजेत्यादीनि महाराजविशेषणानि लक्षणानि । एवमादि च संभवति । मकरमुखं जानुसंधिः, मकरमुखचिह्नितान्तकपोलश्च । उद्वेलतया लावण्यस्य समुच्छलद्रूपत्वमाह । फेनो रससंतानः, डिण्डीरश्च । भोगिनो नृपाः, सर्पाश्च । फेनवत्तैश्च पाण्डु । मेखला रशना, पर्वतमध्यभूमिश्च । पयो जलम्, क्षीरं च । नेत्रसूत्रं पट्टसूत्रम्, मन्थनरज्जुश्च । अधनेन छातेन, अनध्रेण च । ताराः सूत्रवि-

मन्दरं द्योतमानम्, अघनेन सतारागणेनोपरिकृतेन द्वितीयाम्बरेण भुवनाभोगमिव भासमानम्, इभपतिदशनमुसलसहस्रोल्लेखकठिनमसृणेनापर्याप्ताम्बरप्रथिम्ना विविधवाहिनीसंक्षोभकलकलसंमर्दसहिष्णुना कैलासमिव महता स्फटिकतटेनोरुणोरःकवाटेन राजमानम्, श्रीसरस्वत्योरुरोवदनोपभोगविभागसूत्रेणेव पातितेन शेषेणेव च तद्भुजस्तम्भविन्यस्तसमस्तभूभारलब्धविश्रान्तिसुखप्रसुप्तेन हारदण्डेन परिवलितकंधरम्, जीवितावधिगृहीतसर्वस्वमहादानदीक्षाचीरेणेव हारमुक्ताफलानां किरणनिकरेण प्रावृतवक्षःस्थलम्, अजजिगीषया बालैर्भुजैरिवापरैः प्ररोहद्भिर्बाहूपधानशायिन्याः श्रियाः कर्णोत्पलमधुरसधारसंतानैरिव गलद्भिर्भुजजन्मनः प्रतापस्य निर्गमनमार्गैरिवाविर्भवद्भिररुणैः केयूररत्नकिरणदण्डैरुभयतः प्रसारितमणिमयपक्षवितानमिव माणिक्यमहीधरम्, सकललोकालोकमार्गार्गलेन चतुरुदधिपरिक्षेपखातशिलाप्राकारेण सर्वराजहंसबन्धवज्रपञ्जरेण भुवनलक्ष्मीप्रवेशमङ्गलमहामणितोरणेनातिदीर्घदोर्दण्डयुगलेन दिशां दिक्पालानां च युगपदायतिमपहरन्तम्, सोदर्यलक्ष्मीचुम्बनलोभेन कौस्तुभमणेरिव मुखावयवतां गतस्याधरस्य गलता रागेण पारिजातपल्लवरसेनेव सिञ्चन्तम्, दिङ्मुखान्यन्तरान्तरा सुहृत्परिहासस्मितैः प्रकीर्यमाणविमलदशनशिखाप्रतानैः प्रकृतिमूढाया राजश्रियाः प्रज्ञालोकमिव दर्शयन्तम्, मुखजनितेन्दुसंदेहागतानि कुमुदिनीवनानीव प्रेषयन्तम्, स्फुटधवलदशनपङ्क्तिकृतकुमुदवनशङ्काप्रविष्टां शरज्योत्स्नामिव विसर्जयन्तम्, मदिरामृतपारिजातगन्धगर्भेण भरितसकलककुभा मुखामोदेनामृतमथनदिवसमिव सृजन्तम्, विकचमुखकमलकर्णिका-

---

न्दवः, नक्षत्राणि च अम्बरं वासः, नभश्च । इभपतीत्यादि साधारणम् । अपर्याप्तमम्बरं वासो यस्य तादृक्प्रथिमा यस्य, अम्बरं च खम् । वाहिनी सेना, नदी च । अन्यपर्वतसाधारण्येऽपि छायावत्त्वादुन्नतत्वाच्च कैलासमिवेत्युक्तम् । हारेत्यादिना उरुत्वं काठिन्यमाह । परिवलिता । 'परिवेष्टित–' इति पाठे व्याप्तेत्यर्थः । अजो हरिः । भुजेत्यादिना सेनादिकृतं नयादिकृतं च प्रतापं व्यवच्छिनत्ति । माणिक्यमुत्कृष्टो मणिः । चतुर्णामुदधीनां संबन्धी परिक्षेप एव खातं परिखा यस्य स तादृग्दार्ढ्याच्छिलाप्राकार इव तेन । परिखां कृत्वान्तरे प्राकारो दीयते इति स्थितिः । राजहंसा राजोत्तमाः, हंसभेदाश्च । आयतिर्दैर्घ्यम्, प्रता-

कोशेनानवरतमापीयमानश्वाससौरभमिवाधोमुखेन नासावंशेन च-
क्षुषः क्षीरस्निग्धस्य धवलिम्ना दिङ्मुखान्यपूर्ववदनचन्द्रोदयोद्वेल-
क्षीरोदप्लावितानीव कुर्वाणम्, विमलकपोलफलकप्रतिबिम्बितां चा-
मरग्राहिणीं विग्रहिणीमिव मुखनिवासिनीं सरस्वतीं दधानम्,
अरुणेन चूडामणिशोचिषा सरस्वतीर्ष्याकुपितलक्ष्मीप्रसादनलग्नेन
चरणालक्तकेनेव लोहितायतललाटतटम्, आपाटलांशुतन्त्रीसंतान-
वलयिनीं कुण्डलमणिकुटिलकोटिबालवीणामनवरतचलितचरणानां
वादयतामुपवीणयतामिव स्वरव्याकरणविवेकविशारदम्, श्रवणा-
वतंसमधुकरकुलानां कलकणितमाकर्णयन्तम्, उत्फुल्लमालतीमयेन
राजलक्ष्म्याः कचग्रहलीलालग्नेन नखज्योत्स्नावलयेनेव मुखशशिप-
रिवेशमण्डलेन मुण्डमालागुणेन परिकलितकेशान्तम्, शिखण्डा-
भरणभुवा मुक्ताफलालोकेन मरकतमणिकिरणकलापेन चान्योन्य-
संवलनवृजिनेन प्रयागप्रवाहवेणिकावारिणेवागत्य स्वयमभिषिच्य-
मानम्, श्रमजलविलीनबहलकृष्णागुरुपङ्कतिलककलङ्ककल्पितेन
कालिम्ना प्रार्थनाचाटुचतुरचरणपतनशतश्यामिकाकिणेनेव नीला-
यमानललाटलेखाभिः क्षुभितमानसोद्भूतैरुत्कलिकाकलापैरिव हा-
रैरुल्लसद्भिरवष्टभ्यमानाभिर्विलासवल्गनचटुलैर्भ्रूलताकल्पैरीर्ष्यया
श्रियमिव तर्जयन्तीभिरायामिभिः श्वसितैरविरलपरिमलैर्मलयमा-
रुतमयैः पाशैरिवाकर्षन्तीभिर्विकटबकुलावलीवराटकवेष्टितमुखैर्बृ-

---

पश्च । कर्णिका कोशः, चक्रं च । आपीयमानं श्वाससौरभं यस्य तम् । **अधो-मुखेनेति** । अनेन सुलक्ष्यत्वं सौरभस्य तथापीयमानानुमितिं दर्शयति । अंशुरेव तन्त्रीसंतानः । स एव वलयाकारत्वाद्वलयं विद्यते यस्यास्ताम् । कुण्डलमणिकुटिलकोटिमेव बालवीणां सप्ततन्त्रीकां विपञ्चीं वादयताम् । अनवरतेत्यादिना व्यापारसादृश्येनोक्तम् । **वद(वादय)तामिति** । वीणयोपगायतामुपवीणयतामिति गानस्य प्राधान्यं प्रतिपादयति । स्वरव्याकरणं विशालादिकमित्यादिना गानं दर्शयति । परिवेशः परिधिः । वृजिनेन शकलेन, कलुषेण वा । प्रयागो गङ्गायमुनासंगमः । तत्प्रवाहस्य वेणिकारूपेण वारिणेव । श्रमजलेत्यादौ वारविलासिनीभिः सर्वतो विलुप्यमानमसौभाग्यमिवेति संबन्धः । प्रार्थनाचाट्वित्यादौ प्रार्थनादीनि सर्वाणि श्रीहर्षविषयाणि ज्ञेयानि । मानसं सरः, चेतश्च । उत्कलिका रुहरुहिकाः, वीचयश्च । अविरलेत्यादिना धारणम् । आकर्षणं वशीकरणम्, समीपप्रापणं च । विकटेत्यादिनोद्दीपनभावमेव पोषयति । वराटको रज्जुः । **बृहद्भिरिति** । बृहत्त्वेन हृद्यत्वमेषामाह । बृहत्त्वादेव च वक्ष्यति—**अशेष-**

हद्भिः स्तनकलशैः स्वदारसंतोषरसमिवाशेषमुद्धरन्तीभिः कुचोत्कम्पिकाविकारप्रेङ्खितानां हारतरलमणीनां रश्मिभिराकृष्य हृदयमिव हठात्प्रवेशयन्तीभिः प्रभामुचामाभरणमणीनां मयूखैः प्रसारितैर्बहुभिरिव बाहुभिरालिङ्गन्तीभिर्जृम्भानुबन्धबन्धुरवदनारविन्दावरणीकृतैरुत्तानैः करकिसलयैः सरभसप्रधावितानि मानसानीव निरुन्धतीभिर्मदनान्धमधुकरकुलकीर्यमाणकर्णकुसुमरजःकणकूणितकोणानि कुसुमशरशरनिकरप्रहारमूर्च्छामुकुलितानीव लोचनानि चतुरं संचारयन्तीभिरन्योन्यमत्सरादाविर्भवद्भ्रुरभ्रुकुटिविभ्रमक्षिप्तैः कटाक्षैः कर्णेन्दीवराणीव ताडयन्तीभिरनिमेषदर्शनसुखरसराशिं मन्थरितपक्ष्मणा चक्षुषा पीतमिव कोमलकपोलपालीप्रतिविम्बितं वहन्तीभिरभिलाषलीलानिर्मिमित्तस्मितैश्चन्द्रोदयानिव मदनसाहायकाय संपादयन्तीभिरङ्गभङ्गवलनान्योन्यघटितोत्तानकरवेणिकाभिः स्फुटनमुखराङ्गुलीकाण्डकुण्डलीक्रियमाणनखदीधितिनिवहनिभेनार्किंचित्करकामकार्मुकाणीव रुषा भञ्जतीभिर्वारविलासिनीभिर्विलुप्यमानसौभाग्यमिव सर्वतः, स्पर्शस्विन्नवेपमानकरकिसलयगलितचरणारविन्दां चरणग्राहिणीं विहस्य कोणेन लीलालसं शिरसि ताडयन्तम्, अनवरतकरकलितकोणतया चात्मनः प्रियां वीणामिव श्रियमपि शिक्षयन्तम्, निःस्नेह इति धनैरनाश्रयणीय इति दोषैर्निग्रहरुचिरितीन्द्रियैर्दुरुपसर्प इति कलिना नीरस इति व्यसनैर्भीरुरित्ययशसा दुर्ग्रहचित्तवृत्तिरिति चित्तभुवा स्त्रीपर इति सरस्वत्या षण्ढ इति परकलत्रैः काष्ठामुनिरिति यतिभिर्धूर्त इति वेश्याभिर्नेय इति सुहृद्भिः कर्मकर इति

मिति। **स्तनकलशैरिति**। स्तनैः किल रज्जुवेष्टितमुखे रसो जलमुद्रियते रसोऽभिलाषः, जलं च। बन्धुरं हृद्यम्। कूणितः संकोचितः। मदनादिशब्दे विद्यमानेऽपि मदनान्धेत्यभिप्रायेण कुसुमशरग्रहणम्। अत्र पक्षे कर्णपदं लक्ष्यते। अनिमेषदर्शनसुखरसराशिमिव श्रीहर्षम्। **प्रतिबिम्बितमिति**। अथ च रसो जलादिः। विमले मणिभाजनादावन्तर्वर्त्यपि प्रतिबिम्बितो लक्ष्यते। करवेणिका परस्परानुबन्धस्थितकरद्वयाङ्गुलिविन्यासः। विलुप्यमानसौभाग्यादिना ताः सुभगा इत्यर्थः। कोणो वीणादिवादनभाण्डम्। **प्रियामिति**। वीणायाः श्रियाश्च विशेषणम्। निःस्नेह इत्यादावेतैरेकमप्यनेकधा गृह्यमाणमिति संबन्धः। षण्ढः प्रजननाक्षमः। काष्ठा पराधारा तत्प्रधानो मुनिः काष्ठामुनिरतिशयवांस्तपस्वी।

विप्रैः सुसहाय इति शत्रुयोधैरेकमप्यनेकधा गृह्यमाणम्, शन्तनोर्महावाहिनीपतिम्, भीष्माज्जितकाशिनम्, द्रोणाच्चापलालसम्, गुरुपुत्रादमोघमार्गणम्, कर्णान्मित्रप्रियम्, युधिष्ठिराद्बहुक्षमम्, भीमादनेकनागायुतबलम्, धनंजयान्महाभारतरणयोग्यम्, कारणमिव कृतयुगस्य, बीजमिव विबुधसर्गस्य, उत्पत्तिद्वीपमिव दर्पस्य, एकागारमिव करुणायाः, प्रातिवेशिकमिव पुरुषोत्तमस्य, खनिपर्वतमिव पराक्रमस्य, सर्वविद्यासंगीतगृहमिव सरस्वत्याः, द्वितीयामृतमथनदिवसमिव लक्ष्मीसमुत्थानस्य, बलदर्शनमिव वैदग्ध्यस्य, एकस्थानमिव स्थितीनाम्, सर्वस्वकथनमिव कान्तेः, अपवर्गमिव रूपपरमाणुसर्गस्य, सकलदुश्चरितप्रायश्चित्तमिव राज्यस्य, सर्वबलसंदोहावस्कन्दमिव कन्दर्पस्य, उपायमिव पुरंदरदर्शनस्य, आवर्तनमिव धर्मस्य, कन्यान्तःपुरमिव कलानाम्, परमप्रमाणमिव सौ-

---

नेयः परवशः। शन्तनुर्नाम राजा भीष्मस्य पिता वाहिन्या गङ्गायाः पतिः। अयं तु तस्मादपि महतीनां वाहिनीनां सेनानां पतिः शन्तनुरिति। 'पञ्चमी विभक्ते' इति पञ्चमी। भीष्मो जितकाशी जितेन्द्रियः। यतस्त्वयि त्वत्पुत्रे वा सत्यस्मद्दौहित्रस्य कुतो राज्यमिति यदा हि दाशाधिपतिना स्वसुता मत्स्योदरोद्भूता मात्स्यावती नामास्मै पित्रर्थमर्थयते न दत्ता, तदैतेन प्रतिज्ञातम्—'नाहं राज्यं विवाहं वा करिष्यामि' इति। अत एव ब्रह्मचार्येवाभूत्। राजा च ततोऽपि जितकाशितमः, जितकाशी वा जितेन जयेन काशते शोभते यः। तथा हि भीष्मेण रामो जितः। सर्वराजमहितं च काशिराजं च जित्वा भ्रात्रर्थमम्बादिकन्यात्रयमनैषीत्। राजा तु ततोऽपि जितकाशितमः। द्रोणश्चापाचार्यः। स चापे धनुषि लालसः। चपलं न करोतीत्यर्थः। यद्वा चः समुच्चये। अपगता लालसा यस्य सोऽपलालसः। निरभिलाष इत्यर्थः। गुरुपुत्रोऽश्वत्थामा तस्य सफलशरता। तथा शस्त्रोपसंहारोऽक्षमयाचितोऽपि कस्यचिदेकस्य मारणमन्तरेण न तदुपसंजहार। तत उत्तराया उदरस्थे परीक्षिति पाटिते तस्मिंस्तदुपसंहृतवान्। अन्यत्रामोघा मार्गणा याचका यस्येति। मित्रः सूर्यः, सुहृच्च मित्रम्। क्षमा क्षान्तिः, भूश्च। अनेकानि बहूनि, अनन्यसदृशानि च। एकशब्दस्य च साधारणार्थे तृच्। बलं सामर्थ्यम्, सैन्यं च। धनंजयोऽर्जुनः। महाभारतानां कुरूणां यो रणः सङ्ग्रामः। अन्यत्र महतो भारस्य कार्यधुरायास्तरणं निर्वाहणम्। प्रातिवेशिकं प्रतिबिम्बम्। खनिराकरः। अपवर्गः समाप्तिः। संदोहः समूहः। अवभृथो यज्ञान्तः। गम्भीरं प्रसन्नं चेति परस्परापेक्षं बोद्धव्यम्। तथा च सति गम्भीरत्वे प्रसन्नत्वं ऋजुत्वं चेन्न स्यात्ततो जिह्मप्रकृतित्वं प्रसज्येत। एवं त्रासेत्यादौ

भाग्यस्य, राजसर्गसमाप्त्यवभृथस्नानदिवसमिव सर्वप्रजापतीनाम्, गम्भीरं च, प्रसन्नं च, त्रासजननं च, रमणीयं च, कौतुकजननं च, पुण्यं च, चक्रवर्तिनं हर्षमद्राक्षीत् ।

दृष्ट्वा चानुगृहीत इव निगृहीत इव साभिलाष इव तृप्त इव रोमाञ्चमुचा मुखेन मुञ्चन्नानन्दबाष्पवारिबिन्दून्दूरादेव विस्मयस्मेरः समचिन्तयत्—'सोऽयं सुजन्मा, सुगृहीतनामा, तेजसां राशिः, चतुरुदधिकेदारकुटुम्बी,भोक्ता ब्रह्मस्तम्भफलस्य, सकलादिराजचरितजयज्येष्ठमल्लो देवः परमेश्वरो हर्षः । एतेन च खलु राजन्वती पृथ्वी । नास्य हरेरिव वृषविरोधीनि बालचरितानि, न पशुपतेरिव दक्षोद्वेगकारीण्यैश्वर्यविलसितानि, न शतक्रतोरिव गोत्रविनाशपिशुनाः प्रवादाः, न यमस्येवातिवल्लभानि दण्डग्रहणानि, न वरुणस्येव निस्त्रिंशग्राहसहस्ररक्षिता रत्नालयाः, न धनदस्येव निष्फलाः सन्निधिलाभाः, न जिनस्येवार्थवादशून्यानि दर्शनानि, न चन्द्रमस इव बहुलदोषोपहताः श्रियः । चित्रमिदमत्यमरं राज-

---

बोद्धव्यम् । तथा च कालिदासः 'भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम् । अधृष्यश्चाधिगम्यश्च यादोरत्नैरिवार्णवः ॥' इति दिलीपं प्रति वर्णितवान् । कौतुकजननपुण्यत्वादपि संभाव्यते । अत आह—**पुण्यमिति** । गम्भीरं च प्रसन्नं चेत्यादौ सर्वत्र विरोध उद्भाव्यः । गम्भीरं सतमिस्रं प्रसन्नं निर्मलं न भवतीति ।

अनुगृहीत इवेत्यादि । एवंविधमहीपतिप्रसादवशात् । **निगृहीत इवेति** । संकोचवशात् । **साभिलाष इवेति** । तस्य दर्शनीयत्वात् । **तृप्त इवेति** । तथैव तस्य कृतार्थत्वात् । विरोधो ह्यत्र सुबोधः । केदारं क्षेत्रम् । ब्रह्मस्तम्भं जगत् । फलं रत्नादि । यच्च स्तम्भस्य फलं धान्यादि तद्भोक्ता कर्षको भवति । राजन्वती प्रशस्तराजयुता । वृषो धर्मः, अरिष्टासुरो दान्तरूपश्च । **बालेति** । बाला हि विवेकहीनत्वाद्धर्मविरुद्धमाचरन्ति । अस्य तु तस्यामपि दशायां धर्मविरोधाभावः । दक्षः कुशलः, प्रजापतिभेदश्च । महेश्वरपक्ष ऐश्वर्यशब्दो मुख्यवृत्तिः, इतरत्र गौणः । गोत्रं कुलम्, कुलपर्वता गोत्राः । **अतिवल्लभानीति** । अतिशब्देन युक्तदण्डत्वमाह । दण्डः करः, यमायुधं च । निस्त्रिंशग्राहाः खड्गहस्ताः, तत्र जलचरभेदाश्च । रत्नालया भाण्डागाराणि, समुद्राश्च । निष्फला ऐश्वर्यादिफलप्राप्तिशून्याः, दानादिविनाकृताश्च । सन्निधिः सन्निधानम् । एतस्य दर्शनं सर्वस्य फलदायि भवतीत्यर्थः । अन्यत्र संनिधयः शोभनानि निधनान्यस्य । दर्शनानि जिनस्येवार्थवादशून्यानि । अर्थो धनं तस्य वादः, अनेनेदं लब्धमिति, तेन शून्यानि । सर्वे तद्दर्शिनोऽर्थेन युज्यन्ते । जिनस्य पुनरर्थवा-

त्वम् । अपि चास्य त्यागस्यार्थिनः, प्रज्ञायाः शास्त्राणि, कवित्वस्य वाचः, सत्त्वस्य साहसस्थानानि, उत्साहस्य व्यापाराः, कीर्तेर्दिमुखानि, अनुरागस्य लोकहृदयानि, गुणगणस्य संख्या, कौशलस्य कला, न पर्याप्तो विषयः । अस्मिंश्च राजनि यतीनां योगपट्टकाः, पुस्तकर्मणां पार्थिवविग्रहाः, षट्पदानां दानग्रहणकलहाः, वृत्तानां पादच्छेदाः, अष्टापदानां चतुरङ्गकल्पना, पन्नगानां द्विजगुरुद्वेषाः, वाक्यविदामधिकरणविचाराः, इति समुपसृत्य चोपवीती स्वस्तिशब्दमकरोत् ।

अथोत्तरे नातिदूरे राजधिष्ण्यस्य गजपरिचारको मधुरमपरवक्त्रमुच्चैरगायत्—

'करिकलभ विमुञ्च लोलतां चर विनयव्रतमानताननः ।
मृगपतिनखकोटिभङ्गुरो गुरुरुपरि क्षमते न तेऽङ्कुशः' ॥ ५ ॥

राजा तु तच्छ्रुत्वा दृष्ट्वा च तं गिरिगुहागतसिंहबृंहितगम्भीरेण स्वरेण पूरयन्निव नभोभागमपृच्छत्—'एष स बाणः' इति । 'यथाज्ञापयति देवः । सोऽयम्' इति विज्ञापितो दौवारिकेण । 'न ता-

---

दशून्यानि महायानयोगाचारमाध्यमिकदर्शनानि । बहुलाः प्रभूता दोषा रागाद्याः । बहुलदोषाश्च कृष्णपक्षरात्रयः । श्रियः समृद्धयः, शोभाश्च । पर्याप्तः परिपूर्णः । योगपट्टका यतीनामुपकरणं पर्यङ्कबन्धनार्थम् । ते यतीनां चतुर्थाश्रमिणामेव । न पुनर्योगेन युक्ताः पट्टकाः कूटप्रधानानि लेख्यपत्राणि केषांचित् । एवमन्यत्रापि । पुस्तकर्म लेप्यम् । पार्थिवविग्रहा मृण्मयशरीराणि, राजभिः सह वैराणि च । दानग्रहं मदजलम्, दानमृणव्यवहारश्च । वृत्तानां गुरुलघुनियमात्मकानां समाश्च समविषमानां पादच्छेदा भागविरामाः, चरणकर्तनानि च । अष्टपदानां चतुरङ्गफलकानाम् । 'चत्वार्यङ्गानि सेनाया हस्त्यश्वरथपत्तयः' । तेषां कल्पना रचना । चतुर्णामङ्गानां पाणिपादस्य च छेदः । द्विजगुरुर्गरुडोऽपि, वाक्यविदां मीमांसकानामधिकरणविश्रान्तिस्थानानि । राज्ञां च धर्मनिर्णयस्थानानि । अधिकबलो वारणः सङ्ग्राम इति केचित् । उपवीती दक्षिणावीती करः । उक्तं च—'उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः' इति ।

गजपरिचारक इति । अन्यगजपरिचारकस्य स्वजातिसमुचितं वस्तु राज्ञः प्रकृतस्मारकं जातम् । तत्र करिणां स्वभावत एव रागित्वादस्यापि रागवत्त्वाद्भुजंगतास्मृतिः संजातेति । भङ्गुरो वक्रः । मृगपतिनखकोटिवद्वक्र इति सृष्टा व्याख्या । गुरुर्भारः, शासिता च । उपरि पृष्ठदेशे, प्रभुभावे च अङ्कुश इवाङ्कुश इत्यपि । अत आह—**तच्छ्रुत्वेति** । बृंहितं गर्जितम् । अंशव एवांशुकाः ।

वदेनमकृतप्रसादः पश्यामि' इति तिर्यङ्नीलधवलांशुकशारां तिरस्करिणीमिव भ्रमयन्नपाङ्गनीयमानतरलतारकस्यायामिनीं चक्षुषः प्रभां परिवृत्य प्रेष्ठस्य पृष्ठतो निषण्णस्य मालवराजसूनोरकथयत्—'महानयं भुजङ्गः' इति । तूष्णींभावेन त्वगमितनरेन्द्रवचसि तस्मिन्मूके च राजलोके मुहूर्तमिव तूष्णीं स्थित्वा बाणो व्यज्ञापयत्—'देव, अविज्ञाततत्त्व इव, अश्रद्दधान इव, नेय इव, अविदितलोकवृत्तान्त इव च कस्मादेवमाज्ञापयसि । स्वैरिणो विचित्राश्च लोकस्य स्वभावाः प्रवादाश्च । महद्भिस्तु यथार्थदर्शिभिर्भवितव्यम् । नार्हसि मामन्यथा संभावयितुमविशिष्टमिव । ब्राह्मणोऽस्मि जातः सोमपायिनां वंशे वात्स्यायनानाम् । यथाकालमुपनयनादयः कृताः संस्काराः । सम्यक्पठितः साङ्गो वेदः । श्रुतानि यथाशक्ति शास्त्राणि । दारपरिग्रहादभ्यगारिकोऽस्मि । कामे भुजङ्गता । लोकद्वयाविरोधिभिस्तु चापलैः शैशवमशून्यमासीत् । अवानपलापोऽस्मि । अनेनैव च गृहीतविप्रतीसारमिव मे हृदयम् । इदानीं तु सुगत इव शान्तमनसि मनाविव कर्तरि वर्णाश्रमव्यवस्थानां समवर्तिनीव च साक्षाद्दण्डभृति देवे शासति सप्ताम्बुराशिरशनामशेषद्वीपमालिनीं महीं क इवाविशङ्कः सर्वव्यसनबन्धोरविनयस्य मनसाप्यभिनयं कल्पयिष्यति । असतां तावन्मानुष्यकोपेताः । त्वत्प्रभावादलयोऽपि भीता इव मधु पिबन्ति । रथाङ्गनामानोऽपि लज्जन्त इवाभ्यनुवृत्तिव्यसनैः प्रियाणाम् । कपयोऽपि चकिता इव चपलायन्ते । शरारवोऽपि सानुक्रोशा इव श्वापदगणाः पिशितानि

अंशुकं च वस्त्रम् । तिरस्कारिणी जवनिका । प्रेष्ठस्यातिप्रियस्य । नेयः परवशः । स्वैरिणः स्वतन्त्राः । सोमपायिनां सोमपानाम् । 'शिक्षा कल्पो व्याकरणं ज्योतिषं निरुक्तं छन्दो विधिः' इति षडङ्गानि वेदस्य । अभ्यागारिको गृहस्थः, सम्यग्वृत्तिस्थितो वा । कामे भुजंगतेति कामभुजंगता शृङ्गारित्वम् । कामे मदने भुजंगता ज्ञेया, न मादृशेषु । नहि मे काचिद्भुजं बाहुं गता प्राप्तेत्यर्थः । लोकद्वयेत्यादिना त्रिवर्गस्यानुपघातं दर्शयति । शास्त्रविरोधप्रसङ्गात् । शतायुर्वै पुरुषः कालमन्योन्यानुबद्धं परस्परस्यानुपघातेन त्रिवर्गं सेवत इत्यत एवाह—**शैशवमिति । अशून्यमिति** । अनेन तदेकासक्तत्वं परिहरति । अनपलापो निरपह्नवः । विप्रतीसारः पश्चात्तापः सुगतो बुद्धः । समवर्ती यमः । मनुष्यस्य भावो मानुष्यकम् । रथाङ्गनामानश्चक्रवाकाः चपलायन्ते चपलत्वमाचरन्ति । शरारवो

भुञ्जते । सर्वथा कालेन मां ज्ञास्यति स्वामी स्वयमेव । अनपाचीनचित्तवृत्तिग्राहिण्यो हि भवन्ति प्रज्ञावतां प्रकृतयः' इत्यभिधाय तूष्णीमभूत् ।

भूपतिरपि 'एवमस्माभिः श्रुतम्' इत्यभिधाय तूष्णीमेवाभवत् । संभाषणासनदानादिना तु प्रसादेन नैनमन्वग्रहीत् । केवलममृतवृष्टिभिः स्नपयन्निव स्नेहगर्भेण दृष्टिपातमात्रेणान्तर्गतां प्रीतिमकथयत् । अस्ताभिलाषिणि च लम्बमाने सवितरि विसर्जितराजलोकोऽभ्यन्तरं प्राविशत् । बाणोऽपि निर्गत्य धौतारकूटकोमलातपत्विषि निर्वाति वासरे, अस्ताचलकूटकिरीटे निचुलमञ्जरीभांसि तेजांसि मुञ्चति वियन्मुचि मरीचिमालिनि, अतिरोमन्थमन्थरकुरङ्गकुटुम्बकाध्यास्यमानभ्रदिष्टगोष्ठीनपृष्ठास्वरण्यस्थलीषु, शोकाकुलकोककामिनीकूजितकरुणासु तरङ्गिणीतटीषु, वासविटपोपविष्टवाचाटचटकचक्रवालेष्वालवालावर्जितसेकजलकुटेषु निष्कुटेषु, दिवसविहृतिप्रत्यागतं प्रस्नुतस्तनं स्तनंधेय धयति धेनुवर्गमुद्गतक्षीरं क्षुधिततर्णकव्राते, क्रमेण चास्तधराधरधातुधुनीपूरप्लावित इव लोहितायमानमहसि मज्जति संध्यासिन्धुपानपात्रे पातङ्गे मण्डले, कमण्डलुजलशुचिशयचरणेषु चैत्यप्रणतिपरेषु पाराशरिषु, यज्ञपात्रपवित्रपाणौ प्रकीर्णबर्हिष्युत्तेजसि जातवेदसि, हवींषि वषट्कुर्वति यायजूकजने निद्राविद्राणद्रोणकुलकलिलकुलायेषु कापेयविकलकपिकुलेष्वारामतरुषु, निर्जिगमिषति जरत्तरुकोटरकुटीकुटुम्बिनि कौशिककुले, मु-

---

हिंसाः । श्वापदगणाः प्राणिसमूहाः । पिशितं मांसम् । अनपाचीनाऽमृष्टा । अविपरीतेत्यर्थः । निर्दोषा वा ।

बाणोपीऽत्यादौ बाणोऽप्यस्मिन्सति निवासस्थानमगादिति संबन्धः । 'रीतिः स्त्रियामारकूटम्' इत्यमरः । निर्वाति शाम्यति । निचुलो वेतसवृक्षः । भुक्तोद्गीर्णाहारचर्वणं रोमन्थः । भ्रदिष्टं मृदुतमम् । गोष्ठीपूर्वं गोष्ठीनम् । 'गोष्ठात्खञ्भूतपूर्वे' । उक्तं च—'गोष्ठं गोस्थानकं तत्तु गोष्ठीनं भूतपूर्वकम्' इति । कोकाश्चक्रवाकाः । तरङ्गिणी नदी । आलवालमावापः । कुटा घटाः । निष्कुटाः स्वगृहारामाः । स्तनंधयस्तर्णकश्च वत्सः । धुनी नदी । सिन्धुः समुद्रः । शयः करः । चैत्यमायतनम् । पाराशरिषु भिक्षुषु । बर्हीषि कुशाः । वषडिति दानक्रियासु मोचनमन्त्रः । वषट्कुर्वति । जुह्वतीत्यर्थः । यायजूकोऽत्यर्थं यजनशीलः । विद्राणोऽलसः द्रोणः काकः । कलिला आकुलाः । 'कुलायो नीडमस्त्रियाम्' । कापेयं चाप-

निकरसहस्रप्रकीर्णसंध्यावन्दनोदबिन्दुनिकर इव दन्तुरयति तारापथस्थलीं स्थवीयसि तारकानिकुरम्बे, अम्बराश्रयिणि शर्वरीशबरीशिखण्डे, खण्डपरशुकण्ठकाले कवलयति बाले ज्योतिःशेषं सांध्यमन्धकारावतारे, तिमिरतर्जननिर्गतासु दहनप्रविष्टदिनकरकरशाखास्विव स्फुरन्तीषु दीपलेखासु, अररसंपुटसंक्रीडनकथितावृत्तिष्विव गोपुरेषु, शयनोपजोषजुषि जरतीकथितकथे शिशयिषमाणे शिशुजने, जरन्महिषमषीमलीमसतमसि जनितपुण्यजनप्रजागरे विजृम्भमाणे भीषणतमे तमीमुखे, मुखरितविततज्यधनुषि वर्षति शरनिकरमनवरतमशेषसंसारशेमुषीमुषि मकरध्वजे, रताकल्पारम्भशोभिनि शम्भलीभाषितभाजि भजति भूषां भुजिष्याजने, सैरन्ध्रीबध्यमानरशनाजालजल्पाकजघनासु जनीषु, वशिकविशिखाविहारिणीष्वनन्यजानुप्लवासु प्रचलितास्वभिसारिकासु, विरलीभवति वरटानां वेशन्तशायिनीनां मञ्जुनि मञ्जीरशिञ्जितजडे जल्पिते, निद्राविद्राणद्राघीयसि द्रावयतीव च विरहिहृदयानि सारसरसिते, भाविवासरबीजाङ्कुरनिकर इव च विकीर्यमाणे जगति प्रदीपप्रकारे निवासस्थानमगात्। अकरोच्च चेतस्यतिदक्षिणः खलु देवो हर्षः—'यदेवमनेकबालचरितचापलोचितकौलीनकोपितोऽपि मनसा स्निह्यत्येव मयि। यद्यहमक्षिगतः स्याम्, न मे दर्शनेन प्रसादं कुर्यात्। इच्छति तु मां गुणवन्तम्। उपदिशन्ति हि विनयमनुरूपप्रतिपत्त्युपपादनेन वाचा विनापि भर्तव्यानां स्वामिनः। अपि च धिङ्मां स्वदोषान्धमानसमनादरपीडितमेवमतिगुणवति राजन्यन्यथा चान्यथा च चिन्तयन्तम्। सर्वथा करोमि तथा, यथा यथावस्थितं जानाति मामयं कालेन' इत्येवमवधार्य चापरद्युर्निष्क्रम्य कटकात्सुहृदां बा-

---

लम्। कौशिका उलूकाः। स्थवीयसि स्थूलतरे। शिखण्डो जूटकः। खण्डपरशुः शिवः। करा एव शाखास्तदाकारत्वादङ्गुलयश्च करशाखाः। अररः कपाटः। संक्रीडनं शब्दः। आवृत्तिः स्थगनम्। 'गोपुरं स्यात्पुरद्वारं द्वारमात्रेऽपि गोपुरम्'। उपजोषः सुखम्, तूष्णींभावो वा। जरती वृद्धा। शिशयिषमाणे सुषुप्सति। 'यक्षाः स्युः पुण्यजनाः'। तमी रात्रिः। शेमुषी बुद्धिः। आकल्पो वेशः। शम्भली कुट्टनी। भुजिष्या दासी। सैरन्ध्री प्रसाधनोपचारज्ञा। जनी। वशिका शून्या। विशिखा रथ्या। अनन्यजः कामः। अनुप्लवः सहायः। 'कान्तार्थिनी

न्धवानां च भवनेषु तावदतिष्ठत्, यावदस्य स्वयमेव गृहीतस्वभावः पृथिवीपतिः प्रसादवानभूत्। अविशच्च पुनरपि नरपतिभवनम्। स्वल्पैरेव चाहोभिः परमप्रीतेन प्रसादजन्मनो मानस्य प्रेम्णो विस्रम्भस्य द्रविणस्य नर्मणः प्रभावस्य च परां कोटिमानीयत नरेन्द्रेणेति।

इति श्रीबाणभट्टकृते हर्षचरिते राजदर्शनं नाम
द्वितीय उच्छ्वासः।

तु या याति संकेतं साभिसारिका'। 'हंसस्य योषिद्वरटा'। वेशन्तः पल्वलम्। कासारमल्पसरः। मञ्जीरं नूपुरम्। दक्षिणोऽनुकूलः। कौलीनं जनापवादः। अक्षिगतो द्वेष्यः। विस्रम्भस्याश्वासस्य। द्रविणस्य धनस्य। नर्मणः परिहारस्य॥

इति श्रीशंकरकविविरचिते हर्षचरितसंकेते द्वितीय उच्छ्वासः समाप्तः॥

तृतीय उच्छ्वासः ।

निजवर्षाहितस्नेहा बहुभक्तजनान्विताः ।
सुकाला इव जायन्ते प्रजापुण्येन भूभुजः ॥ १ ॥
साधूनामुपकर्तुं लक्ष्मीं द्रष्टुं विहायसा गन्तुम् ।
न कुतूहलि कस्य मनश्चरितं च महात्मनां श्रोतुम् ॥ २ ॥

अथ कदाचिद्विरलितवलाहके, चातकातङ्ककारिणि, कणत्कादम्बे, दर्दुरद्विषि, मयूरमदमुषि, हंसपथिकसार्थसर्वातिथौ, धौतासिनिभनभसि, भास्वरभास्वति, शुचिशशिनि, तरुणतारागणे, गलत्सुनासीरशरासने, सीदत्सौदामनीदाम्नि, दामोदरनिद्राद्रुहि, द्रुतवैदूर्यवर्णार्णसि, घूर्णमानमिहिकालघुमेघमोघमघवति, निमीलन्नीपे, निष्कुसुमकुटजे, निर्मुकुलकन्दले, कोमलकमले, मधुस्यन्दीन्दीवरे, कह्लाराह्लादिनि, शेफालिकाशीतलीकृतनिशे, यूथिकामोदिनि, मोदमानकुमुदावदातदशदिशि, सप्तच्छदधूलिधूसरितसमीरे, स्तबकितबन्धुरबन्धूकावध्यमानाकाण्डसंध्ये, नीराजितवा-

---

निजेति । निज आत्मीयः । वर्षो लोकः, वृष्टिश्च । वर्षं वर्षमपि निजं समुचितकालप्राप्तम् । स्नेहः प्रीतिः, आर्द्रता च । भक्ताः अनुरक्ताः, ओदनाश्च । भक्तं भक्तरूपाणां भृभृतां सुकालानां च प्रजापुण्यं हेतुः । अनेन महानुभावपुण्यभूतिवर्णना सूचिता ॥ १ ॥

साधूनामित्यादिनापि भैरवाचार्योपकारकरणम्, स्वयं लक्ष्मीदर्शनम्, विहायसा गमनं भैरवाचार्यस्य, महात्मचरितश्रवणकुतूहलं च निजभ्रात्रादीनां सूचितम् ॥ २ ॥

अथेत्यादावेवंविधे शरत्समयारम्भे बन्धून्द्रष्टुं बाणो ब्राह्मणाधिवासमगादिति संबन्धः । विरलिताः, न पुनरेकान्ततोपगताः । बलाहका मेघाः । चातकाः स्तोककाख्याः पक्षिणः । कादम्बाः कृष्णहंसाः । दर्दुरा मण्डूकाः । हंसा एव पथिकसार्थाः, तेषां निर्मलजलदानादिना स्यात्सर्वातिथित्वम् । शुचिर्निर्मलः । सुनासीर इन्द्रः । सौदामनी विद्युत् । दामोदरो हरिः । अस्य निद्रां द्रोग्धि यस्तस्मिन् । तदा किल हरिर्विबुध्यत इति वार्ता । अर्णो जलम् । घूर्णमाना भ्रमन्ती या मिहिका नीहारस्तद्वल्लघवस्तुच्छा ये मेघास्तैर्मोघो निष्फलो मघवानिन्द्रो यत्र तस्मिन् । वर्षाभावादिन्द्रस्य मोघत्वम् । इन्द्रादेशेन हि मेघा वर्षन्ति । मेघवद्गर्जितमित्यन्ये । नीपाः कुटजाः । कन्दलाश्च वृक्षभेदाः । कह्लाराणि सौगन्धिकापरनामानि श्वेतोत्पलानि । जलकुसुमपत्रिकेत्यन्ये । शेफालिका पुष्पभेदः । रात्रावेव विकसति । यूथिका हरिणिका । मोदमानानि विकसन्ति । सप्तच्छदाः

जिनि, उद्दामदन्तिनि, दर्पक्षीबौक्षके, क्षीयमाणपङ्कचक्रवाले, वालपुलिनपल्लवितसिन्धुरोधसि, परिणामाश्यानश्यामाके, जनितप्रियङ्गुमञ्जरीरजसि, कठोरितत्रपुसत्वचि, कुसुमस्मेरशरे, शरत्समयारम्भे राज्ञः समीपाद्वाणो बन्धून्द्रष्टुं पुनरपि तं ब्राह्मणाधिवासमगात् ।

समुपलब्धभूपालसंमानातिशयपरितुष्टास्तस्य ज्ञातयः श्लाघमाना निर्ययुः । क्रमेण च कांश्चिदभिवादयमानः कैश्चिदभिवाद्यमानः, कैश्चिच्छिरसि चुम्ब्यमानः, कांश्चिन्मूर्ध्नि समाजिघ्रन्, कैश्चिदालिङ्ग्यमानः, कांश्चिदालिङ्गन्, अन्यैराशिषानुगृह्यमाणः, परानुगृह्णन्, बहुबन्धुमध्यवर्ती परं मुमुदे । संभ्रान्तपरिजनोपनीतं चासनमासीनेषु गुरुषु भेजे । भजमानश्चार्चादिसत्कारं नितरां ननन्द । प्रीयमाणेन च मनसा सर्वांस्तान्पर्यपृच्छत्—'कश्चिदेतावतो दिवसान्सुखिनो यूयम् । अप्रत्यूहा वा सम्यक्करणपरितोषितद्विजचक्रा क्रातवी क्रियते क्रिया । यथावदविकलमन्त्रभाञ्जि भुञ्जते हवींषि हुतभुजः । यथाकालमधीयते वा बटवः । प्रतिदिनमविच्छिन्नो वा वेदाभ्यासः । कच्चित्स एव चिरंतनो यज्ञविद्याकर्मण्यभियोगः, तान्येव व्याकरणे परस्परस्पर्धानुबन्धावन्ध्यदिवसदर्शितादराणि व्याख्यानमण्डलानि, सैव वा पुरातनी परित्यक्तान्यकर्तव्या प्रमाणगोष्ठी, स एव वा मन्दीकृतेतरशास्त्ररसो मीमांसायामतिरसः । कच्चित्त एव वाभिनवसुभाषितसुधावर्षिणः काव्यालापाः' इति ।

अथ ते तमूचुः—'तात, संतोषजुषां सततसंनिहितविद्याविनो-

सप्तपर्णाख्या वृक्षभेदाः । बन्धुरा हृद्याः । बन्धूका बन्धुजीवाख्या वृक्षभेदाः । नीराजिताः कृतशान्तिविधानाः । क्षीबाणीवौक्षकानि दान्तसमूहा यत्र तस्मिन् । चक्रवालं समूहः । वालं तत्क्षणसुतजालम् । सिन्धवो नद्यः । श्यामाको नीवारः । प्रियङ्गुर्व्रीहिभेदः । त्रपुसं लाङ्गकम् ।

संभ्रान्तः सत्वरः । सत्कारं पूजाम् । कच्चिदितीष्टप्रश्ने । प्रत्यूहो विघ्नः । सम्यक्करणं यथाशास्त्रं संपादनम् । क्रतूनां यज्ञानामियं क्रातवी । **अधीयत इति ।** वेदपाठो बालानामेवोचितः । प्रमाणं तर्कविद्या । मीमांसा ब्रह्मनिदर्शनम् । अत एवाह—**अतिरस इति ।**

तात इति पूजावचनम् । वैतानः क्रातवः । कौसीद्यमालस्यम् । निष्प्रयत्नतेत्यर्थः ।

दानां वैतानवह्निमात्रसहायानां कियन्मात्रं नः कृत्यं सुखितया सकलभुवनभुजि भुजङ्गराजदेहदीर्घे रक्षति क्षितिं क्षितिभुजो भुजे । सर्वथा सुखिन एव वयम्, विशेषेण तु त्वयि विमुक्तकौसीद्ये परमेश्वरपार्श्ववर्तिनि वेत्रासनमधितिष्ठति । सर्वे च यथाशक्ति यथाविभवं यथाकालं च संपाद्यन्ते विप्रजनोचिताः क्रियाकलापाः' इत्येवमादिभिरालापैः स्कन्धावारवार्ताभिश्च शैशवातिक्रान्तक्रीडानुस्मरणैः पूर्वजकथाभिश्च विनोदितमनास्तैः सह सुचिरमतिष्ठत् । उत्थाय च मध्यंदिने यथाक्रियमाणाः स्थितीरकरोत् । भुक्तवन्तं च तं सर्वे ज्ञातयः पर्यवारयन् ।

अत्रान्तरे दुगूलपट्टप्रभवे शिखण्ड्यपाङ्गपाण्डुनी पौण्ड्रे वाससी वसानः स्नानावसानसमये बन्दितया तीर्थमृदा गोरोचनया च रचिततिलकः, तैलामलकमसृणितमौलिः, अनुच्चचूडाचुम्बिना निबिडेन कुसुमापीडकेन समुद्भासमानः, असकृदुपयुक्ताम्बूलविमलाधरकान्तिः, एकशलाकाञ्जनजनितलोचनरुचिरचिरभुक्तः, विनीतमार्यं च वेषं दधानः, पुस्तकवाचकः सुदृष्टिराजगाम । नातिदूरवर्तिन्यां चासन्द्यां निषसाद । स्थित्वा च मुहूर्तमिव तत्कालापनीतसूत्रवेष्टनमपि नखकिरणैर्मृदुमृणालसूत्रैरिव वेष्टितं पुस्तकं पुरोनिहितशरशलाकायन्त्रके निधाय, पृष्ठतः सनीडसंनिविष्टाभ्यां मधुकरपारावताभ्यां दत्ते स्थानके प्राभातिकप्रपाठकच्छेदचिह्नीकृतमन्तरपत्रमुत्क्षिप्य, गृहीत्वा च कतिपयपत्रलघ्वीं कपाटिकाम्, क्षालयन्निव मषीमलिनान्यक्षराणि दन्तकान्तिभिः, अर्चयन्निव सित-

---

अत्रेत्यादौ सुदृष्टिः पुस्तकवाचक आजगामेति संबन्धः । **दुगूलेति** । एकस्माद्दुगूलपट्टाद्दीर्घाच्छिन्ना गृहीते, शिखण्ड्यपाङ्गपाण्डुत्वेन कार्कश्यमपि दर्शितम् । पौण्ड्रे पुण्ड्रदेशजे । गोरोचना रक्षाद्रव्यभेदः । मौलयः केशाः । **अनुच्चेति** । अदीर्घतया कुसुमापीडकस्य श्रोत्रियत्वं विनीतत्वं चास्य दर्शितम् । निबिडेन संहतपुष्पेण । रुचिरं नैर्मल्यम् । भोजनं भुक्तमचिरं भुक्तं यस्य सः । अनेन तस्यानवलिप्तत्वमुक्तम् । आसन्द्यां वेत्रपीठिकायाम् । स्थित्वेत्यादौ पुराणं पपाठेति संबन्धः । सनीडे समीपे । प्रपाठको वाचकः, प्रपठनं वा । तस्य तत्र वा छेदः । इयन्मात्रं वाचितं नान्यदिति तेन चिह्नीकृतं लक्षीकृतम् । गमयन्ति रागस्वरूपमिति गमकाः ।

कुसुममुक्तिभिर्ग्रन्थम्, मुखसंनिहितसरस्वतीनूपुरवैरिव गमकैर्मधुरैराक्षिपन्मनांसि श्रोतृणां गीत्या पवमानप्रोक्तं पुराणं पपाठ ।

तस्मिंश्च तथा श्रुतिसुभगगीतिगर्भं पठति सुदृष्टौ नातिदूरवर्ती बन्दी सूचीबाणस्तारमधुरेण गीतिध्वनिमनुवर्तमानः स्वरेणेदमार्यायुगलमपठत्—

'तदपि मुनिगीतमतिपृथु तदपि जगद्व्यापि पावनं तदपि ।
हर्षचरितादभिन्नं प्रतिभाति हि मे पुराणमिदम् ॥ ३ ॥
वंशानुगमविवादि स्फुटकरणं भरतमार्गभजनगुरु ।
श्रीकण्ठविनिर्यातं गीतमिदं हर्षराज्यमिव ।'

तच्छ्रुत्वा बाणस्य चत्वारः पितामहमुखपद्मा इव वेदाभ्यासपवित्रितमूर्तयः, उपाया इव सामप्रयोगललितमुखाः, गणपतिः, अधिपतिः, तारापतिः, श्यामल इति पितृव्यपुत्रा भ्रातरः, प्रसन्नवृत्तयः, गृहीतवाक्याः, कृतगुरुपदन्यासाः, न्यायवादिनः, सुकृतसंग्रहाभ्यास-

---

असाधारणानि स्वराणां निमीलनानि यानि लक्ष्येष्वान्तरमार्ग इति प्रसिद्धास्तैर्गमकैः स्वरयतिविशेषैः । पवमानो वायुः ।

बन्दी स्तुतिपाठकः । पृथुरादिनृपोऽपि । पवमानं वायुप्रोक्तमपि । गीतपक्षे—वंशेन वेणुनानुगमो ययोस्तौ विवादिनौ स्वरौ विश्रुत्यन्तरौ गान्धारनिषादौ स्वरौ यत्र तत् । करणमपदः । सताल आविद्धः स्वरसंनिवेश उच्चारणस्थानं वा । भारतं भरतमुनिकृतो ग्रन्थः । श्रीकण्ठः श्रीयुक्तः कण्ठः । वैस्वर्यादिदोषाभावात् । यद्वा श्रीकण्ठो हर एव । सर्वविद्यानां तत एवोत्पत्तेः । हर्षराज्यमपीदृशमेव । तथा च वंशं कुलमनुगच्छत्यनुसरति यत्तद्वंशानुगम् । तथाविद्यमाना विवादिनो यत्र तदविवादि सौराज्यं । न केचित्तत्र विवदन्ते । करणमधिकरणं यत्र विद्यापरीक्षा धर्मनिर्णयो वा क्रियते, व्यापारो वा । भरतो नाम पूर्वं राजाभूत् । श्रीकण्ठो देशभेदः । गीतमपि हर्षस्य प्रमोदस्य राज्यमिव । तस्य विजृम्भमाणत्वात् । तच्छ्रुत्वेत्यादौ बाणस्य चत्वारो भ्रातरः परस्परस्य मुखानि व्यलोकयन्निति संबन्धः । तच्छ्रुत्वेत्यादिनास्य प्रकरणस्य प्रकृतानुगुणत्वं दर्शितम् । तेषां च ते प्रस्तावविदित्वम् । मुखपद्मा अपि चत्वारः सामवेदभेदाः । सान्त्वं च सुखमारम्भोऽपि । प्रसन्ना शुद्धा, सुबोद्धा च । वृत्तिर्वर्तनम्, सूत्रविवरणं च । गृहीतमादृतम्, ज्ञानार्थं च । वाक्यं विवरणम्, वार्तिकं च । यत्कारणात्कात्यायनो वार्तिककार उच्यते । कृतो गुरूणां संबन्धिनि पदे स्थाने न्यासः स्थितिर्यैषां ते । सर्वेणोपदेष्टृपदे स्थापितास्त इत्यर्थः । यद्वा कृतो गुरुणि पदे न्यासो यैः । महति पदे स्थिता इत्यर्थः । अन्यत्र कृतोऽभ्यस्तो गुरुपदे दुर्बोधशब्दे न्यासो वृत्तिर्विवरणं यैः । न्यायो युक्तम्,

गुरवः लब्धसाधुशब्दाः, लोक इव व्याकरणेऽपि सकलपुराणराजर्षिचरिताभिज्ञाः, महाभारतभावितात्मानः, विदितसकलेतिहासाः, महाविद्वांसः, महाकवयः, महापुरुषवृत्तान्तकुतूहलिनः, सुभाषितश्रवणरसरसायनाः, वितृष्णाः, वयसि वचसि यशसि तपसि सदसि महसि वपुषि यजुषि च प्रथमाः, पूर्वमेव कृतसंगराः, विवक्षवः, स्मितसुधाधवलितकपोलोदराः, परस्परस्य मुखानि व्यलोकयन् ।

अथ तेषां कनीयान्कमलदलदीर्घलोचनः श्यामलो नाम बाणस्य प्रेयान्प्राणानामपि वशयिता दत्तसंज्ञस्तैः सप्रणयं दशनज्योत्स्नाक्षालितककुभा मुखेन्दुना बभाषे—'तात बाण, द्विजानां राजा गुरुदारग्रहणमकार्षीत् । पुरूरवा ब्राह्मणधनतृष्णया दयितेनायुषा व्ययुज्यत । नहुषः परकलत्राभिलाषी महाभुजङ्ग आसीत् ।

उपपत्त्यनुपपत्तिविचारश्च । सुकृतं पुण्यम्, सुष्ठु विहितं च । संग्रहः संचयः । व्याकरणं व्याडिकृतो ग्रन्थश्च । गुरवो महान्तः, उपाध्यायाश्च । साधुशब्दः साधुवादः, साधवोऽमी इत्येवंरूपो वा । साधवः संस्कृताः, शब्दाश्च । पाण्डित्यप्रकटनेनानेन द्रष्टुमिष्टस्य वस्तुन उत्कृष्टतोच्यते । सकलेत्यादिविशेषणत्रयेण द्विजराजादिवृत्तान्तेऽभिज्ञतोच्यते । **महापुरुषेत्यादि** । हर्षचरिते शुश्रूषाया हेतुः । **सुभाषितेत्यादि** । स्वकाव्यप्रशंसासूचनपरम् । सदसि सभायाम् । संगरं संकेतः ।

कनीयानिति । अनेन प्रियवचनत्वमस्य दर्शितम् । ब्रूहीति दत्तसंज्ञः । तात बाणेत्यादिना पूर्वराजदोषोद्भावनद्वारेण हर्षस्य गरीयस्तां ख्यापयति । अत्र क्वचिच्छब्दद्वारेण क्वचिदार्थद्वारेण यथायोग्यं दोष उद्भाव्यः । चन्द्रादिशब्दाभिधानेन राजत्वप्रतीतिर्न स्यादिति द्विजानां राजेत्युक्तम् । गुरुर्बृहस्पतिः, पित्राद्याश्च गुरवः । अत्र कथा—पुरा पूर्णचन्द्रमुदितं वीक्ष्य कामयमानां गुरुपत्नीं ताराख्यामभिगच्छत् । तदसहमानेन च बृहस्पतिना यदेन्द्राद्याः प्रोत्साहितास्तदानयनाय, तदा चन्द्रेण शुक्रः शरणमाश्रितः । ततः शुक्रप्रेरितैर्दैत्यैः सह तेषामन्योन्यं दिव्यं वर्षसहस्रं युद्धमासीत् । तारापि नारदबोधिता सगर्भा सती पुनर्गुरुमेवाभिगतेति । दयितेनायुषा प्रियेण जीवितेन पुत्रेणायुर्नाम्ना । कथा चात्र—पुरूरवाः पूर्वां दिशं जेतुं गच्छन्केनाप्याहृतप्रभूतधनेन विप्रेण यज्ञे निमन्त्रितो लोभाक्षिप्तस्तद्धनं जिहीर्षुस्तच्छापान्नष्टः । तस्मिन्मृते स विप्रो नृपं विना प्रजा निवर्तत इति ज्ञात्वा तदायुषा राजर्षिमायुर्नामानमजीजनदिति । भुजङ्गो विटोऽपि । पुरा वृत्रं हत्वा ब्रह्महत्यया शक्रः पलाय्य मृणालच्छिद्रान्तरे यदातिष्ठत्तदा नहुषो यज्वा शूरश्च देवैरिन्द्रत्वं नीतो दर्पाच्छचीं प्रार्थयमानो बृहस्पत्युपदेशात्तयोक्तो यथा—'यानेनापूर्वेणागच्छ' इति । ततो ब्रह्मर्षीन्वाहनीकृत्य व्रजन्कामवशात्त्वरमाणः पादेनाताड्य 'सर्प

ययातिराहितब्राह्मणीपाणिग्रहणः पपात । सुद्युम्नः स्त्रीमय एवाभवत् । सोमकस्य प्रख्याता जन्तुवधनिर्घृणता । मांधाता मार्गणव्यसनेन सपुत्रपौत्रो रसातलमगात् । पुरुकुत्सः कुत्सितं कर्म तपस्यन्नपि मेकलकन्यकायामकरोत् । कुवलयाश्वो भुजङ्गलोकपरिग्रहादश्वतरकन्यामपि न परिजहार । पृथुः प्रथमपुरुषकः परिभूतवान्पृथिवीम् । नृगस्य कृकलासभावे वर्णसंकरः समदृश्यत ।

सर्प' इति चोदयन्नगस्त्येन 'सर्पो भव' इति शप्तः सर्पोऽभवत् । पपातेति नरकगामी बभूव, स्वाचारभ्रष्टत्वात्पतितश्चाभूत् । वृषपर्वणोऽसुरराजस्य दुहित्रा शर्मिष्ठया कलह्यायमाना 'अस्मद्भृत्यसुता वराकी भूत्वा स्पर्धते' इत्युक्त्वा कूपान्तः पातितां शुक्रसुतां देवयानीं ज्ञात्वा ययातिर्वनविहारी पाणिं गृहीत्वोज्जहार । गते ययातौ परिभवोद्विग्ना वन एवावसत । अथ नारदाद्यथावृत्तं ज्ञात्वा वृषपर्वा शुक्रस्य प्रार्थनामकरोत् । संदिष्टा च—'कुमारी शतपरिचारवतीयं शर्मिष्ठा यदा मे दास्यं करोति तदागच्छामि' इति । शुक्रशापभीतेन वृषपर्वणा संपादितमनोरथा देवयानी पुनरपि दासीभूतया शर्मिष्ठया सह वने क्रीडन्ती ययातिमायान्तं दृष्ट्वा बभाषे—'क्काद्य मां त्यक्त्वा पाणिग्राहो महानुभावो गतोऽभूत्' इति । ततो ययातिर्ब्राह्मणीत्वादनङ्गीकुर्वंस्तत्पित्रा शोकविधुरेण शुक्रेण 'पापं मास्तु, क्रियतामयं विधिः' इति बुद्ध्वा तां स्वीचक्रे । कालेन चासौ पपातेति । सुद्युम्नो राजा, शोभनं द्युम्नं बलमस्येति च । स्त्रीमयो महिलाकृतिः, कान्तानुरक्तश्च । योऽत्र तोयमुपयोक्ष्यति स स्त्रीत्वमापत्स्यत इति भगवता भवान्याभ्यर्थितेन भवेन शप्तः सन्सरसः पीत्वा तोयं सुद्युम्नो मृगयाविहारी स्त्रीमयोऽभूदिति । जन्तुर्नाम सोमकस्य राज्ञः पुत्रः, जन्तवः प्राणिनश्च । सोमकस्य राज्ञो जन्तुर्नामैकः पुत्रोऽभूत् । स चैकपुत्रत्वादपुत्रत्वं वरमिति जानन्बुद्धिमः पुरोधसाभ्यधायि—'बहून्पुत्रांश्चेदिच्छसि तदस्य सुतस्य वपया होमः क्रियताम् । ततो यावत्यो धूममाजिघ्रन्ति ताः पुत्रैर्युज्यन्ते' इति । स चापि घृणामपहाय तथा कारितवानिति । मार्गणं याञ्चा, शराश्च मार्गणाः । मार्गणेषु व्यसनं युद्धं व्यसनम् । रसातलमगमदधस्ताज्जगाम । विनष्ट इत्यर्थः । रसातलं पातालं च । मांधाता च भुवं जित्वा स्वर्गं जेतुं गतः । शक्रेणोक्तम्—'पातालं जित्वागतस्य तव दास्यं यास्यामि' । स च तद्वचनादविचार्यैव रसातलं गतस्तत्र हरप्रसादासादितत्रिशूलेन लवणनाम्ना दानवेन ससुतसैन्योऽन्तमनीयत इति । मेकलकन्यका नर्मदा । पुरुकुत्सः पुरा तपश्चरन्नर्मदायां स्नानं कुर्वन्कामप्यङ्गनामालोक्य कामाविष्टो नीतिमुत्ससर्जेति । भुजङ्गा विटा अपि । अश्वतरकन्यां वडवामपि । कुवलयाश्वो राजा मृगयाक्रीडाप्रसङ्गेन घर्मार्तुरो मज्जनरभसेन सरसीमवतीर्णो रसातलं प्राप्तोऽश्वतराभिधां नागकन्यामूढवानिति । प्रथम आद्यः, प्रधानश्च । कुत्सितः पुरुषः पुरुषकः । पृथुरादिनृपो भूधराक्रान्तां सर्वां गां विलोक्य

सौदासेन नरक्षिता पर्याकुलीकृता क्षितिः । नलमवशाक्षहृदयं कलिरभिभूतवान् । संवरणो मित्रदुहितरि विक्लवतामगात् । दशरथ इष्टरामोन्मादेन मृत्युमवाप । कार्तवीर्यो गोब्राह्मणातिपीडनेन निधनमयासीत् । मरुत्त इष्टबहुसुवर्णकोऽपि देवद्विजबहुमतो न

चापकोट्या भुवः पर्यन्तेषु चिक्षेप । धरणकारणभूतभूभृत्परिभवाद्भवो विभवः । अत एवास्य कापुरुषत्वम् । विष्णुपुराणे तु—आकृष्टकार्मुकेन पृथुना 'देहि मे भर्तव्यभरणोपायम्' इत्यनुबध्यमाना भूर्भुवनानि बभ्राम । ततः शरणमलब्ध्वा सास्य सर्वाः सस्यसंपदोऽजनयदिति वर्णितम् । एतस्मात्परिभूताभूदिति । कृकलासः प्राणिभेदः । तद्भावेऽपि तस्यां दशायामपि किं पुना राज्यस्येति निन्द्यत्वम् । वर्णः शुक्लादिः, ब्राह्मणादिश्च । नृगो राजा दानप्रस्तावे कस्यचिद्विप्रस्य संबन्धिनीं गामविज्ञायैव द्विजाय ददौ । कदाचिच्च तस्या गोः स्वामी तां गां परिज्ञाय तं ययाचे । न च तस्माद्गां लेभे । ततस्तौ द्वावपि राजद्वारं राजविज्ञापनाय गतौ । ग्राम्यभोगासक्तराजदर्शनमलभमानौ च क्रोधात् 'कृकलासो भव' इति राज्ञः शापं दत्त्वा कस्मैचिद्गां वितीर्य यथागतं प्रतिजग्मतुरिति । नरान्क्षणोतीति नरक्षिता, न पालिता च । सौदासो नाम राजा मृगयाखिन्नः पथि गच्छन्कदाचिन्मुनिं शक्रनामानं मार्गमध्ये स्थितम् 'अपसर्प' इत्यवदत् । 'पन्था देयो ब्राह्मणाय' इति वचनान्न्यायमनुवर्तमानो यावन्न चलितस्तावद्राज्ञा कशयाभिहतः । अथ रोषावेशात् 'गच्छ मनुष्यभक्ष्यो राक्षसो भव' इति तं शशाप । वशमायत्तमक्षहृदयमक्षज्ञानम्, अक्षाणीन्द्रियाणि हृदयं च । तच्च नलो राजा द्यूतव्यसनी तत्स्वरूपानभिज्ञश्च कलिनाभिभूत इति प्रसिद्धम् । मित्रो रविः, सुहृच्च मित्रम् । तपती नाम मित्रस्य रवेर्दुहिताभूत् । तस्यां संवरणो नाम राजा व्यसनी बभूव । रामो दशरथसुतः, रामा स्त्री च । दशरथो मृगयासक्तो घटपूरणरवं श्रुत्वा बृंहितशङ्कया शब्दपातिना शरेण मुनिपुत्रं व्यापादयत् । तेन च बोधितान्वयः पित्रोः समीपं तं निनाय । तद्वचनाच्छल्यमुद्धरति नृपे शिशुर्मृतः । अथ च 'सदारेण वृद्धतापसेन पुत्रादहमिव त्वमपि प्राप्स्यस्यन्तम्' इति शप्तो रामवियोगात्प्राणांस्तत्याजेति । गोनिमित्तं ब्राह्मणस्य जमदग्नेरतिपीडनम् । निधनमयासीत् । जामदग्न्येन हृत इत्यर्थः । कार्तवीर्यो गवां कोटेरप्यधिकतरां धेनुमपहरज्जमदग्निं व्यापादितवान् । अथ च तत्सुतेन रामेण क्रोधात्परशुच्छिन्नबाहुसहस्रोऽसौ सर्वक्षत्रियैः सह मृत्युं लेभे । इष्टः कृतः, अभिमतश्च । देवद्विजो बृहस्पतिः, अन्यत्र देवाश्च द्विजाश्चेति द्वन्द्वः । मरुत्तो नाम राजा बहुसुवर्णाख्येन क्रतुनापि यक्ष्यमाणो देवपुरोधसम् 'मां याजय' इति याचमानस्तेन 'मनुष्योऽयमेव दृष्टः' इति । स चोपहसति धिषणे नारदेनोक्तो यथा—'गच्छ । अस्यैव भ्राता संवर्तको नाम ग्रहगृहीतच्छद्मना वाराणस्यां स्थितः । तं प्रार्थयस्व' इत्युक्त्वा च नारदोऽग्निं विवेश । स च नारदोक्तचिह्नैस्तं भगवत्प्रमाणं कृत्वा निर्यान्तं

बभूव । शंतनुरतिव्यसनादेकाकी वियुक्तो वाहिन्या विपिने विललाप । पाण्डुर्वनमध्यगतो मत्स्य इव मदनरसाविष्टः, प्राणान्मुमोच । युधिष्ठिरो गुरुभयविषण्णहृदयः समरशिरसि सत्यमुत्सृष्टवान् । इत्थं नास्ति राजत्वमपकलङ्कमृते देवदेवादमुतः सर्वद्वीपभुजो हर्षात् । अस्य हि बहून्याश्चर्याणि श्रूयन्ते । तथा हि—अत्र बलजिता निश्चलीकृताश्चलन्तः कृतपक्षाः क्षितिभृतः । अत्र प्रजापतिना शेषभोगिमण्डलस्योपरि क्षमा कृता । अत्र पुरुषोत्त-

---

परिज्ञाय बहुशो गालीर्ददतमप्यनुद्विजमानो याजनाय प्रार्थयामास । संवर्तकेन कथितं च—'नेदं तवोक्तम् । यावत्तं वक्ष्यामि । देवेभ्यश्च श्रुत्वा यज्ञभागो न दातव्यः' इति । राजा यथोक्तमनुतिष्ठंस्तेन याजितो देवद्विजस्य नाभिमतोऽभवदिति । अतिव्यसनादत्यन्तसङ्गात् । वाहिनी नदी, सेना च । महाभिषः पुरा ब्रह्मसदसि गङ्गायाश्चामरग्राहिण्याश्चलितवाससोऽङ्गदर्शनहृतहृदयः शृङ्गारपदानि वदन्ब्रह्मणा शप्तः । पतित्वा क्षत्रियगृहे शन्तनुर्नामाभूत् । गङ्गापि 'मत्कृतेऽयमिमां दशां प्राप्तः' इति मत्वा सखेदमवतरन्ती धेनुहरणकुपितवसिष्ठशापसंपन्नमनुष्यलोकावतरणदुःखितैर्वसुभिर्विदितवृत्तान्तैरभ्यधायि—'तत्र नृपे चेत्तव प्रीतिः, तद्वयं खल्वेवोत्पत्स्यामहे । जातमात्राश्च वयं त्वया खजले क्षेप्तव्याः' इति । सा तु तथेत्यङ्गीकृत्य वने विहरन्तं प्रार्थयमानं शन्तनुमवोचत् । 'यदहं करोमि तत्र त्वया निर्बन्धो न विधेयः । न चाहं त्वया जन्म प्रष्टव्या' इति । तथेति तेनाङ्गीकृतवता बहुतरं कालमरंस्त । अथ यः कश्चित्सूनुरुदपादि सर्वंस्तया खजले क्षिप्तः । एवं सप्तस्वतीतेषु गङ्गामासेव्य निःसंतानोऽयं मा भूदिति मन्वानैः सप्तभिरेव वसुभिः कृतात्मसंनिधिर्भीष्मो जातः । ततस्तमपि जले क्षिपन्ती शन्तनुना निषिद्धा । 'सापराधो भवान्' इत्युक्त्वा सा प्रतिजगाम । ततस्तद्वियोगविधुरधीर्बहु विललापेति व्यसननिमित्तकः सेनया वियोगेन च विलापो विजिगीषोरनुचित एव । वनं तोयम्, विपिनं च । मदनः कामः फलविशेषश्च मदनम् । पाण्डुर्वने मृगरूपया ब्राह्मण्या सह सुरतकर्मसक्तं मृगरूपं कर्दमाख्यं मुनिं शरेण जघान । तेन च म्रियमाणेन 'स्त्रीसंभोगस्थो मरिष्यसि' इति शप्तो माद्र्या सह स्मरार्तः क्रीडन्विपन्न इति । गुरोर्द्रोणाचार्यस्य भयेन गुरुणा, महता च त्रासेन । युधिष्ठिरो बलानि दग्धुमुद्यतं द्रोणाचार्यं रणमूर्ध्नि 'अश्वत्थामा हतः' इत्युक्त्वा पुत्रशोकाकुलमस्त्रेणासून्त्याजयदिति । **इत्थमिति** । इत्थं कृतयुगादारभ्य कलिप्रारम्भपर्यन्तं राज्ञां नास्त्यपकलङ्कं राजत्वमिति । बलजित्प्रजापतिमुखाः शब्दा राज्ञि यथार्था वेदितव्याः । बलं सैन्यम्, बलाख्यश्चासुरः । निश्चलीकृता इति सहायाभावाच्छत्रुषु यानं न विदधिर इति । अन्यत्र स्थावरत्वं लम्बिताः । पक्षाः सहायाः, पतत्राणि च । क्षितिभृतो राजानः, गिरयश्च । प्रजापतिना राज्ञा,

मेन सिन्धुराजं प्रमथ्य लक्ष्मीरात्मीकृता । अत्र बलिना मोचितभूभृद्वेष्टनो मुक्तो महानागः । अत्र देवेनाभिषिक्तः कुमारः । अत्र स्वामिनैकप्रहारपातितारातिना प्रख्यापिता शक्तिः । अत्र नरसिंहेन स्वहस्तविशसितारातिना प्रकटीकृतो विक्रमः । अत्र परमेश्वरेण तुषारशैलभुवो दुर्गाया गृहीतः करः । अत्र लोकनाथेन दिशां मुखेषु परिकल्पिता लोकपालाः सकलभुवनकोशश्चाढ्यजन्मनां विभक्त इति । एवमादयः प्रथमकृतयुगस्येव दृश्यन्ते महासमारम्भाः । अतोऽस्य सुगृहीतनाम्नः पुण्यराशेः पूर्वपुरुषवंशानुक्रमेणादितः प्रभृति चरितमिच्छामः श्रोतुम् । सुमहान्कालो नः शुश्रूषमाणानाम् । अयस्कान्तमणय इव लोहानि नीरसनिष्ठुराणि क्षुल्लकानामप्याकर्षन्ति मनांसि महतां गुणाः, किमुत स्वभावसरसमृदूनीतरेषाम् । कस्य न द्वितीयमहाभारते भवेदस्य चरिते कुतूहलम् । आचष्टां भवान् । भवतु भार्गवोऽयं वंशः

ब्रह्मणा च । शेषस्यावशिष्टस्य भोगिमण्डलस्य राजसमूहस्योपरि विषये क्षान्तिः कृता । अन्यत्र शेषाख्यस्य भोगिनो नागस्य मण्डलमाभोगस्तत्पृष्ठे भूमिर्निहिता । पुरुषोत्तमो नरोत्कृष्टो राजा, हरिश्च । सिन्धुराजो सिन्धुदेशाधिपतिः, क्षीरोदधिश्च । लक्ष्मीश्छत्रचामरादिरूपा, देवताकृतिश्च । बलिना बलवता, असुरेश्वरेण च । भूभृद्राजा श्रीकुमाराख्यः । श्रीकुमारो नाम राजा किल दर्पशातेनापजातमदेन हस्तिना वेष्टितः । ततः श्रीहर्षेणाकृष्य खड्गं तस्मान्मोचितोऽसौ दन्ती च रोषाद्वने परित्यक्त इति वार्ता । भूभृच्च पर्वतो मन्दराख्यः । महानागो दर्पशातः, वासुकिश्च । मोचितभूभृद्वेष्टनोऽमृतमन्थनार्थे । मन्थनार्थे कुमारः कुमारगुप्ताख्यः कुमारो वा यो दर्पशातान्मोचितः । कुमारो गुहः, पुत्रश्च कुमारः । स्वामी प्रभुः, कुमारश्च । अरातयः शत्रवः, तारकश्चासुराधिपतिः । शक्तिः सामर्थ्यम्, आयुधभेदश्च नरसिंहः उत्तमनरः, नृसिंहरूपो हरिश्च । **स्वहस्तेनेति** । न तु साधनबलेन । अन्यत्र तु चक्रादिनिजायुधेन परमेश्वरेण सार्वभौमेन । न तु मण्डलमात्रस्य भोक्ता हरेण । दुर्गाया दुर्गमायाः, गौर्याश्च । करो दण्डः, पाणिश्च । लोकनाथो राजा, हरिः, बुद्धश्च । दिशां मुखेषु सीमासु । लोकनाथाः (लोकपालाः) सीमापतयः, इन्द्राद्या दिक्पालाश्च । कोशो गजम्, मध्यम्, ग्रन्थभेदश्च । अभ्यजन्मानो द्विजाः, आदिनृपाः, श्रमणाश्च । **एवमादय इति** । न त्वेतावन्त एव । **प्रथमकृतयुगस्येवेति** । पर्वतपक्षशातनादयो वृत्तान्ता अभवन् । **मणय इवेति** । मणिशब्देनोपमेयानां गुणानां रत्नत्वमुक्तम् । लोहान्यपि नीरसनिष्ठु-

शुचिनानेन राजर्षिचरितश्रवणेन सुतरां शुचितरः' इत्येवमभिधाय तूष्णीमभूत् ।

बाणस्तु विहस्याब्रवीत्—'आर्य, न युक्तयनुरूपमभिहितम् । अघटमानमनोरथमिव भवतां कुतूहलमवकल्पयामि । शक्याशक्यपरिसंख्यानशून्याः प्रायेण स्वार्थतृषः । परगुणानुरागिणी प्रियजनकथाश्रवणरसरभसमोहिता च मन्ये महतामपि मतिरपहरति प्रविवेकम् । पश्यत्वार्यः क्व परमाणुपरिमाणं बटुहृदयम्, क्व समस्तब्रह्मस्तम्भव्यापि देवस्य चरितम् । क्व परिमितवर्णवृत्तयः कतिपये शब्दाः, क्व संख्यातिगास्तद्गुणाः । सर्वज्ञस्याप्ययमविषयः, वाचस्पतेरप्यगोचरः, सरस्वत्या अप्यतिभारः, किमुतास्मद्विधस्य । कः खलु पुरुषायुषशतेनापि शक्नुयादविकलमस्य चरितं वर्णयितुम् । एकदेशे तु यदि कुतूहलं वः, सज्जा वयम् । इयमधिगतकतिपयाक्षरलवलघीयसी जिह्वा कोपयोगं गमिष्यति । भवन्तः श्रोतारः । वर्ण्यते हर्षचरितम् । किमन्यत् । अद्य तु परिणतप्रायो दिवसः । पश्चाल्लम्बमानकपिलकिरणजटाभारभास्वरो भगवान्भार्गवो राम इव समन्तपञ्चकरुधिरमहाह्रदे निमज्जति संध्यारागपटले पूषा । श्वो निवेदयितास्मि' इति । सर्वे च ते 'तथा' इति प्रत्यपद्यन्त । नातिचिरादुत्थाय संध्यामुपासितुं शोणमयासीत् ।

अथ मधुमदपल्लवितमालवीकपोलकोमलातपे मुकुलितेऽह्नि कमलिनीमीलनादिव लोहिततमे तमोलिहि रवौ लम्बमाने, रविरथ-

---

राणि । क्षुल्लकाः खलाः । बाला इत्यन्ये । आचष्टामाख्यातु । भार्गव इति भृगुगोत्रत्वम् ।

अवकल्पयामि निश्चिनोमि । शक्तमिदमित्येवंरूपेण परिसंख्यानेन गणनया स्वार्थतृषो गृध्नवः शून्याः । शक्याशक्यविवेकं गृध्नवो न जानन्तीत्यर्थः । बटुर्द्विजशिशुः । ब्रह्मस्तम्भं जगत् । पुरुषायुषेत्यादिना योग्येऽपि मयि वर्णयितरि वर्णनीयस्य भूयस्त्वम्, अल्पीयस्त्वाच्चायुषः सामस्त्येन वर्णनं न घटत इति प्रतिपादितम् । अत एवाह—**एकदेश इति** । संज्ञा (सज्जा) वर्णनाभिमुखा इति भवन्त इति । न तु यादृशतादृशाः । हर्षचरितमिति । न तु यदेव किंचित् । समन्तपञ्चकं कुरुक्षेत्रम् । तथेत्येवमस्त्विति । प्रत्यपद्यन्ताङ्गीकृतवन्तः ।

अथेत्यादावस्मिन्नस्मिन्निति बाणस्तथैव गोष्ठ्या तस्थाविति संबन्धः । कपोलकोमलो गण्डसदृशः । मुकुलिते प्राप्तसंकोचे । कुटीरं जरद्गृहम् । पटलं छाद-

तुरगमार्गानुसारेण यममहिष इव धावति नभसि तमसि, क्रमेण च गृहतापसकुटीरकपटलावलम्बिषु रक्तातपच्छेदैः सह संहृतेषु वल्कलेषु, कलिकल्मषमुषि पुष्णति गगनमग्निहोत्रधामधूमे, सनियमे यजमानजने मौनव्रतिनि, विहारवेलाविलोले पर्यटति पत्नीजने, विकीर्यमाणहरितश्यामाकशालिपूलिकासु दुग्धासु होमकपिलासु हूयमाने वैतानतनूनपाति, पूतविष्टरोपविष्टे कृष्णाजिनजटिले जटिनि, जपति बटुजने, ब्रह्मासनाध्यासिनि ध्यायति योगिगणे, तालध्वनिधावमानानन्तान्तेवासिनि अलसवृद्धश्रोत्रियानुमतेन गलद्ग्रन्थदण्डकोद्गारिणि संध्यां समवधारयति वठरविटबटुसमाजे, समुन्मज्जति च ज्योतिषि तारकाख्ये खे प्राप्ते प्रदोषारम्भे भवनमागत्योपविष्टः स्निग्धैर्बन्धुभिश्च सार्धं तयैव गोष्ठ्या तस्थौ । नीतप्रथमयामश्च गणपतेर्भवने परिकल्पितं शयनीयमसेवत । इतरेषां तु सर्वेषां निमीलितदृशामप्यनुपजातनिद्राणां कमलवनानामिव सूर्योदयं प्रतिपालयतां कुतूहलेन कथमपि सा क्षपा क्षयमगच्छत् ।

अथ यामिन्यास्तुर्ये यामे प्रतिबुद्धः स एव बन्दी श्लोकद्वयमगायत्—

'पश्चादङ्घ्रिं प्रसार्य त्रिकनतिविततं द्राघयित्वाङ्गमुच्चै-
रासज्याभुग्नकण्ठो मुखमुरसि सटा धूलिधूम्रा विधूय ।
घासग्रासाभिलाषादनवरतचलत्प्रोथतुन्दस्तुरङ्गो
मन्दं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेण ॥५॥
कुर्वन्नाभुग्नपृष्ठो मुखनिकटकटिः कंधरामातिरश्चीं

नम् । विहारो वह्निसंधुक्षणमग्निहोत्रार्थम् । पूलिको वरण्डः, परिमाणभेदः । तनूनपाद्वह्निः । विष्टरमासनम् । तालध्वनिरङ्गुलिजः शब्दः । अन्तेवासिनः शिष्याः । श्रोत्रियो वेदोपाध्यायः । तदनुमतेन संध्यां स संधारयति । वदनव्यग्रत्वाद्गलतो विस्मरतो ग्रन्थदण्डका ऋग्गणा उद्गिरति यस्तस्मिन् । वठरा मूर्खाः । विटा भुजङ्गप्रायाः । बटवो बालाश्च । गृहश्रोत्रियैर्बालाः संध्यावन्दनाय प्रवर्त्यन्ते निर्विवेकत्वात् ।

तुर्यश्चतुर्थः । त्रिकं पृष्ठकटीसंधिः । द्राघयित्वा दीर्घतरीकृत्वा । आभुग्नो नमितः कण्ठो यस्य तत् । मुखमुरस्यासज्यं कृत्वा । धूम्रा धूसराः । प्रतानस्योपरि प्रोथः प्रतानमुत्तरोष्ठमध्यम् । 'वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्' ।

लोलेनाहन्यमानं तुहिनकणमुचा चञ्चता केसरेण ।
निद्राकण्डूकषायं कषति निविडितश्रोत्रशुक्तिस्तुरङ्ग-
स्त्वङ्गत्पक्ष्माग्रलग्नप्रतनुबुसकणं कोणमक्ष्णः खुरेण ॥ ६ ॥

बाणस्तु तच्छ्रुत्वा समुत्सृज्य निद्रामुत्थाय प्रक्षाल्य वदनमुपास्य भगवतीं संध्यामुदिते भगवति सवितरि गृहीतताम्बूलस्तत्रैवातिष्ठत् । अत्रान्तरे सर्वेऽस्य ज्ञातयः समाजग्मुः, परिवार्य चासांचक्रुः । असावपि पूर्वोद्घातेन विदिताभिप्रायस्तेषां पुरो हर्षचरितं कथयितुमारेभे—

श्रूयताम्—अस्ति पुण्यकृतामधिवासो वासवावास इव वसुधामवतीर्णः सततमसंकीर्णवर्णव्यवहारस्थितिः कृतयुगव्यवस्थः, स्थलकमलबहलतया पोत्रोन्मूल्यमानमृणालैरुद्गीतमेदिनीसारगुणैरिव कृतमधुकरकोलाहलैर्हलैरुलिख्यमानक्षेत्रः, क्षीरोदपयःपायिपयोदसिक्ताभिरिव पुण्ड्रेक्षुवाटसंततिभिर्निरन्तरः, प्रतिदिशमपूर्वपर्वतकैरिव खलधानधामभिर्विभज्यमानैः सस्यकूटैः संकटसीमान्तः, समन्तादुद्घातघटीसिच्यमानैर्जीरकजूटैर्जटिलितभूमिः, उर्वरावरीयोभिः शालीयैरलंकृतः, पाकविशरारुराजमाषनिकरकिर्मीरितैश्च स्फुटितमुद्गफलकोशीकपिशितैर्गोधूमधामभिः स्थलीपृष्ठैरधिष्ठितः, महिषपृष्ठप्रतिष्ठितगायद्गोपालपालितैश्च कीटपटललम्पटचटकानुसृतैरवटुघटितघण्टाघटीरटितरमणीयैरटद्भिरटवीं हरवृषभपीतमामयाशङ्कया बहुविभक्तं क्षीरोदमिव क्षीरं क्षरद्भिर्बाष्प-

---

तुहिनमवश्यायः । केसराणि ललाटतटस्थाः केशाः, अश्वकृकाटिकालम्बनः केशपाशो वा । कषायमापिङ्गलम् । लङ्गदुच्चम् । कोणं प्रान्तम् । उद्घातः कथाप्रस्तावः ।

अस्तीत्यादौ श्रीकण्ठनामा जनपदोऽस्तीति संबन्धः । पुण्यकृतो देवा अपि । अधिवासो वसतिः । वासवावासः स्वर्गः । पोत्रं हलमुखम् । सारा उत्कृष्टाः । अतिमाधुर्यात्क्षीरोदेत्याद्युत्प्रेक्षा । निरन्तरो निर्विवरः । तदेव कल्पितत्वादपूर्वत्वम् । खलधानधामभिः खलपालैः । उद्घातोऽरघट्टः । जीरकोऽजाजी । जूटः समूहः । उर्वरा सर्वसस्याढ्या भूः । वरीयोभिरुरुतरैः । शालीयैः शालिक्षेत्रैः । युगपत्पाकसंभवाद्विशरारुत्वम् । किर्मीरैः शबलैः । कोशी शिम्बिका । गोधनस्य क्षतपृष्ठत्वात्कीटसंभवः । अवटुग्रीवा । घण्टैव घटी । आमयोऽजीर्णम् । हरवृषभेण पीतं संतमजीर्णं संभावनया बहुधा विभक्तम् । बाष्पच्छेद्येति सौकुमार्यकथनपरम् ।

च्छेद्यतृणतृप्तैर्गोधनैर्धवलितविपिनः, विविधमखहोमधूमान्धशतमन्युमुक्तैर्लोचनैरिव सहस्रसंख्यैः कृष्णशारैः शारीकृतोद्देशः, धवलधूलीमुचां केतकीवनानां रजोभिः पाण्डुरीकृतैः प्रमथोद्धूलनधूसरैः शिवपुरस्येव प्रवेशैः प्रदेशैरुपशोभितः, शाककन्दलश्यामलितग्रामोपकण्ठकाश्यपीपृष्ठः, पदे पदे करभपालीभिः पीलुपल्लवप्रस्फोटितैः करपुटपीडितमातुलुङ्गीदलरसोपलिप्तैः स्वेच्छाविचितकुङ्कुमकेसरकृतपुष्पप्रकरैः प्रत्यग्रफलरसपानसुखसुप्तपथिकैर्वनदेवतादीयमानामृतरसप्रपागृहैरिव द्राक्षामण्डपैः स्फुरत्फलानां च बीजलग्नशुकचञ्चुरागाणामिव समारूढकपिकुलकपोलसंदिह्यमानकुसुमानां दाडिमीनां वनैर्विलोभनीयोपनिर्गमः, वनपालपीयमाननारिकेलरसासवैश्च पथिकलोकलुप्यमानपिण्डखर्जूरैर्गोलाङ्गूललिह्यमानमधुरामोदपिण्डीरसैश्चकोरचञ्चुजर्जरितारुकैरुपवनैरभिरामः, तुङ्गार्जुनपालीपरिवृतैश्च गोकुलावतारकलुषितकूलकीलालैरध्वगशतशरण्यैररण्यधराबन्धैरवन्ध्यवनरन्ध्रः, करभीयकुमारकपाल्यमानैरौष्ट्रकैरौरभ्रकैश्च कृतसंबाधः, दिशि दिशि रविरथतुरगविलोभनायैव विलोठनमृदितकुङ्कुमस्थलीरससमालब्धानामुत्प्रोथपुटैरुन्मुखैरुदरशायिकिशोरकजवजननाय प्रभञ्जनमिव चापिबन्तीनां वातहरिणीनामिव स्वच्छन्दचारिणीनां वडवानां वृन्दैर्विचरद्भिराचितः, अनवरतक्रतुधूमान्धकारप्रवृत्तैर्हंसयूथैरिव वाणैर्धवलितभुवनः, संगीतगतमुरजरवमत्तैर्मयूरैरिव विभवैर्मुखरितजीवलोकः, शशिकरावदातवृत्तैर्मुक्ताफलैरिव गुणिभिः प्रसाधितः, पथिकशतविलुप्यमानस्फीतफलैर्महातरुभिरिव सर्वातिथिभिरभि-

---

विपिनं गहनम् । मुक्तैः पतितैः । लोचनान्यपि कृष्णशाराणि सहस्रसंख्यानि च । कृष्णशारा मृगभेदाश्च । प्रमथा गणाः । प्रवेशैर्मार्गैः । काश्यपी भूः । करभपालीभिः । इत्थंभूतलक्षणे तृतीया । करभो बालोष्ट्रः । पीलुर्वृक्षभेदः । प्रस्फोटितैर्नीराजनीकृतैः । प्रपा पानीयशालिका । उपनिर्गमनानि निर्गमनमार्गाः । उद्यानानीति केचित् । अर्जुनाः ककुभवृक्षाः । कीलालं तोयम् । धराबन्धास्तटाकानि । करभेभ्यो हिताः करभीयाः । औष्ट्रकैरुष्ट्रसमूहैः । कृतसंबाध आवृतः । किशोरका वत्साः । प्रभञ्जनं वातम् । वडवा अश्वाः । धूमान्धकारप्रवृत्तैर्वाणैर्वर्धितभुवन इति विरोधच्छाया । हंसानामप्यन्धकारप्रवृत्तत्वं तमसि प्रचारात् । प्रवृत्तैराविर्भूतैः । हंसपक्षे—पलायितैः । वृत्तं चरितम्, परिवर्तुलं च । गुणिभिः शौर्यादिगुणयुक्तैः,

गमनीयः, मृगमदपरिमलवाहिमृगरोमाच्छादितैर्हिमवत्पादैरिव महत्तरैः स्थिरीकृतः, प्रोद्दण्डसहस्रपत्रोपविष्टद्विजोत्तमैर्नारायणनाभिमण्डलैरिव तोयाशयैर्मण्डितः, मथितपयःप्रवाहप्रक्षालितक्षितिभिः क्षीरोदमथनारम्भैरिव महाघोषैः पूरिताशः श्रीकण्ठो नाम जनपदः ।

यत्र त्रेताग्निधूमाश्रुपातजक्षालिता इवाक्षीयन्त कुदृष्टयः । पच्यमानचयनेष्टकादहनदग्धानीव नादृश्यन्त दुरितानि । छिद्यमानयूपदारुपरशुपाटित इव व्यदीर्यताधर्मः । मखशिखिधूमजलधरधाराधौत इव ननाश वर्णसंकरः । दीयमानानेकगोसहस्रशृङ्गखण्ड्यमान इवापलायत कलिः । सुरालयशिलाघट्टनटङ्कनिकरनिकृत्ता इव व्यदीर्यन्त विपदः । महादानविधानकलकलाभिद्रुता इव प्राद्रवन्नुपद्रवाः । दीप्यमानसत्रमहानससहस्रसंतापिता इव व्यलीयन्त व्याधयः । वृषविवाहप्रहतपुण्यपटहपटुरवत्रासिता इव नोपासर्पन्नपमृत्यवः । संततब्रह्मघोषबधिरीकृता इवापजग्मुरीतयः । धर्माधिकारपरिभूतमिव न प्राभवद्दुर्दैवम् ।

ससूत्रैश्च । फलमैश्वर्यमपि । अभिगमनीयः सेव्यः । मृगमदः कस्तूरिका । मृगरोमशब्देन तत्कृतवस्त्रमुच्यते । यस्य राङ्कवमिति संज्ञा । यथा च—'राङ्कवं मृगरोमजम्' । अन्यत्र मृगाणां रोमाणि । पादाः प्रत्यन्तपर्वताः । महत्तरैर्वृद्धैः विपुलैश्च । सहस्रपत्राणि पद्मानि । द्विजोत्तमाः पक्षिश्रेष्ठाः, ब्राह्मणाश्च द्विजोत्तमाः । मथितं तक्रम्, विलोडितं च । पयः क्षीरम् । उभयत्रापि मथनमन्थात्क्षीरोदस्य । घोषो गोष्ठः, शब्दश्च । आशा आशंसा, दिशश्च ।

'दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः । अग्नित्रमयमिदं त्रेता' इत्यमरसिंहः। अनेकार्थवर्गेऽपि—'त्रेताग्नित्रितये युगे' । त्रेताग्निरूपोऽग्निरित्यग्निप्रकर्षार्थं त्रेतापदम् । अन्यथा तादृशस्याग्नेर्ग्रहणं प्रसज्येत । कुत्सानि लोकायतादीनां वेदविरुद्धानि दर्शनादीनि । कुत्सिताश्च दृष्टयः कुदृष्टयः । यत्र त्रेताग्नयो हूयन्ते तत्र क्षालिता आविर्भावादृष्टिर्निर्मला भवति । चयनं चित्याविशिष्टाग्निस्थानम् । घनधाराधौतो ह्यवश्यं संकीर्णवर्णो नीलादिर्नश्यति । वर्णाश्च विप्राद्याः । टङ्कः पाषाणदारणः । सत्रं सदादानम् । महानसं पाकस्थानम् । वृषविवाहो नीलवृषोत्सर्गः । यत्र चतसृभिर्गोभिः सह दान्तोऽरण्ये स्वैरविहाराय परित्यज्यते । ब्रह्मघोषो वेदध्वनिः । 'अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः । अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः ॥' इति ।

तत्र चैवंविधे नानारामाभिरामकुसुमगन्धपरिमलसुभगो यौवनारम्भ इव भुवनस्य, कुङ्कुममलनपिञ्जरितबहुमहिषीसहस्रशोभितोऽन्तःपुरनिवेश इव धर्मस्य, मरुदुद्धूयमानचमरीबालव्यजनधवलितप्रान्त एकदेश इव सुरराज्यस्य, ज्वलन्मखशिखिसहस्रदीप्यमानदशदिगन्तः शिबिरसंनिवेश इव कृतयुगस्य; पद्मासनस्थितब्रह्मर्षिध्यानाधीयमानसकलाकुशलप्रशमः प्रथमोऽवतार इव ब्रह्मलोकस्य, कलकलमुखरमहावाहिनीशतसंकुलो विपक्ष इवोत्तरकुरूणाम्, ईश्वरमार्गणसंतापानभिज्ञसकलजनो विजिगीषुरिव त्रिपुरस्य, सुधारससिक्तधवलगृहपङ्क्तिपाण्डुरः प्रतिनिधिरिव चन्द्रलोकस्य, मधुमत्तमत्तकाशिनीभूषणभवभरितभुवनो नामाभिहार इव कुबेरनगरस्य, स्थाण्वीश्वराख्यो जनपदविशेषः।

यस्तपोवनमिति मुनिभिः, कामायतनमिति वेश्याभिः, संगीतशालेति लासकैः; यमनगरमिति शत्रुभिः, चिन्तामणिभूमिरित्यर्थिभिः, वीरक्षेत्रमिति शस्त्रोपजीविभिः, गुरुकुलमिति विद्यार्थिभिः, गन्धर्वनगरमिति गायनैः, विश्वकर्ममन्दिरमिति विज्ञानिभिः, लाभभूमिरिति वैदेहकैः, द्यूतस्थानमिति बन्दिभिः, साधुसमागम इति सद्भिः, वज्रपञ्जरमिति शरणागतैः, विटगोष्ठीति विदग्धैः, सुकृतपरिणाम इति पथिकैः, असुरविवरमिति वातिकैः, शाक्या-

---

तत्र चेत्यादौ स्थाण्वीश्वराख्यो जनपदविशेष इति संबन्धः। आरामा उपवनानि, रामाश्च भार्याः। गन्धस्य परिमलस्याभोगोऽनुभवः, संस्कारः। मलनं निवर्तनम्, समालम्भनं च। महिषी मुख्या जायापि। मरुतो वाताः, देवाश्च। शिबिरसंनिवेशः कटकबन्धः। कृतं प्रतिसमाहितं युगं द्वयं स्वपक्षपरपक्षरूपं येन स राजोच्यते। कृतं युगं वाद्यो युगभेदः। पद्मासनमासनभेदः, पद्ममेवासनं च। ब्रह्मर्षय उत्तमद्विजाः। ब्रह्मा चासावृषिश्च। यद्वा पद्मासनस्थितो ब्रह्मा च ऋषयश्चेति द्वन्द्वः। वाहिन्यो नद्यः, सेना च। विपक्षो बलम्। मेरुसमीपवासिनो जना उत्तरकुरवः। ईश्वरमार्गणो राजदण्डसाधनयाच्चा, हरशरश्चेश्वरमार्गणः। **संतापानभिज्ञेति**। ईश्वरशरेण हि सस्त्रीकं त्रिपुरं दग्धम्। योधजनास्ते हि युद्धे देवैर्हता इत्याहुः। जेतात्र विजिगीषुः। 'मुधा मक्कोलामृतयोः'। मत्तकाशिनी मुख्या स्त्री, यक्षिणी च। नामाभिहारः पर्यायान्तरम्।

लासकैर्नटैः। वैदेहकैर्वणिग्भिः। द्यूतस्थानमिति साधुभागो दीयते तत्र। बन्दिभ्योऽभिवाञ्छितसंपत्तेः सुकृतपरिणामता। वातिकैर्विवरव्यसनिभिराचार्यैः। शाक्यो बौद्धः। चारणैः कुशीलवैः। वसुधारा धनप्रवाहः।

श्रम इति शमिभिः, अप्सरःपुरमिति कामिभिः, महोत्सवसमाज इति चारणैः, वसुधारेति विप्रैरगृह्यत ।

यत्र च मातङ्गगामिन्यः शीलवत्यश्च, गौर्यो विभवरताश्च, श्यामाः पद्मरागिण्यश्च, धवलद्विजशुचिवदना मदिरामोदिश्वसनाश्च, चन्द्रकान्तवपुषः शिरीषकोमलाङ्ग्यश्च, अभुजङ्गम्याः कञ्चुकिन्यश्च, पृथुकलत्रश्रियो दरिद्रमध्यकलिताश्च, लावण्यवत्यो मधुरभाषिण्यश्च, अप्रमत्ताः प्रसन्नोज्ज्वलरागाश्च, अकौतुकाः प्रौढाश्च प्रमदाः ।

यत्र च प्रमदानां चक्षुरेव सहजं मुण्डमालामण्डनं भारः कुवलयदलदामानि । अलकप्रतिबिम्बान्येव कपोलतलगतान्यक्लिष्टाः श्रवणावतंसाः पुनरुक्तानि तमालकिसलयानि । प्रियकथा एव सुभगाः कर्णालंकाराः । आडम्बरः कुण्डलादिः । कपोला एव सततमालोककारका विभवो निशासु मणिप्रदीपाः । निःश्वासाकृष्टमधुकरकुलान्येव रमणीयं मुखावरणं कुलस्त्रीजनाचारो जालिका । वाण्येव मधुरा वीणा वाह्यविज्ञानं तन्त्रीताडनम् । हासा एवाति-

---

मातङ्गेत्यादयो विरोधाः । मातङ्गो हस्ती, चण्डालश्च । याः प्रमदाश्चण्डालानपि गच्छन्ति ताः कथं शीलवत्य इति विरोधः सर्वत्र ज्ञेयः । गौर्यो गौराङ्ग्यः । विभव ऐश्वर्ये रक्ताः । यत्र विगतो भवस्तत्र कथं गौरी रतेति । विगतं भवे रतं यस्या वा । श्यामाः श्यामलाङ्ग्यः । पद्मरागिण्यो लोहितमणिभूषणाः । श्यामा रात्रयः कथं पद्मरागिण्यः । रात्रौ पद्मानां संकोचात् । द्विजैर्दन्तैः । शुचिवदना मदिरावन्मदिरया वा । आमोदी श्वसनो मुखमारुतो यासां धवलद्विजवच्छुद्धब्राह्मणवच्छुचि वदनं ताः कथं मदिरामोदिश्वसनाः । चन्द्रवत्कान्तं वपुर्यासाम् । शिरीषपुष्पवत्सुकुमाराङ्ग्यश्चन्द्रकान्तस्य वपुर्यासां ताः कथं शिरीषकोमलाङ्ग्यः । भुजङ्गा विटाः । कञ्चुकं स्त्रीणां वासः, वारवाणाख्यः । याश्च कञ्चुकिन्यः सर्पिण्यस्ताः कथं भुजङ्गैर्न गम्याः । कलत्रं जघनम् । दरिद्रं क्षामं मध्यमुदरं यासाम् । कलत्रस्य परिवारस्य पृथ्वीः श्रीस्ताः । कथं दरिद्राणां निर्धनानां मध्ये कलिताः संख्याता भवन्ति । लावण्यं सौन्दर्यम् । मधुरं हृद्यम् । लावण्यरसवतीनां मधुरभाषितं विभाव्यते । अप्रमत्ताः प्रमादशून्याः । प्रसन्नो मनोहरः । उज्ज्वलो मनोहारी । प्रसन्ना च सुरा तयोज्ज्वलो मुखरागो यासां ताः । कथमप्रमत्ता अक्षीबा अकौतुका अकरकङ्कणाः । विवाहितानां हि करकङ्कणोऽवबध्यते । 'रुद्राक्षदर्पसिद्धार्थशिखिपक्षोरगलत्वचः । कङ्कणौषधयश्चेति कौतुकाख्याः प्रकीर्तिताः ॥'

मुण्डमालारूपं मण्डनं मुण्डमालामण्डनम् । सहजमकृत्रिमम् । अनेककुवलयदलदामाभ्यासोत्कर्षः, न तु कुवलयदलदामसंभवेऽपि प्रतिनिधिरूपतापादनम् ।

शयसुरभयः पटवासा निरर्थकाः कर्पूरपांसवः । अधरकान्तिविसर एवोज्ज्वलतरोऽङ्गरागो निर्गुणो लावण्यकलङ्कः कुङ्कुमपङ्कः । बाहव एव कोमलतमाः परिहासप्रहारवेत्रलता निष्प्रयोजनानि मृणालानि । यौवनोष्मस्वेदबिन्दव एव विदग्धाः कुचालंकृतयो हारास्तु भाराः । श्रोण्य एव विशालस्फाटिकशिलातलचतुरस्रा रागिणां विश्रमकारणमनिमित्तं भवनमणिवेदिकाः । कमललोभनिलीनान्यलिकुलान्येव मुखराणि पदाभरणकानि निष्फलानीन्द्रनीलनूपुराणि । नूपुररवाहूता भवनकलहंसा एव समुचिताः संचरणसहाया ऐश्वर्यप्रपञ्चाः परिजनाः ।

तत्र च साक्षात्सहस्राक्ष इव सर्ववर्णधरं धनुर्दधानः, मेरुमय इव कल्याणप्रकृतित्वे, मन्दरमय इव लक्ष्मीसमाकर्षणे, जलनिधिमय इव मर्यादायाम्, आकाशमय इव शब्दप्रादुर्भावे, शशिमय इव कलासंग्रहे, वेदमय इवाकृत्रिमालापत्वे, धरणिमय इव लोकधृतिकरणे, पवनमय इव सर्वपार्थिवरजोविकारहरणे, गुरुर्वचसि, पृथुरुरसि, विशालो मनसि, जनकस्तपसि, सुयात्रस्तेजसि सुमन्त्रो रहसि, बुधः सदसि, अर्जुनो यशसि, भीष्मो धनुषि, निषधो व-

भार इत्यनेनैष एवार्थः प्रकटितः । एवमक्लिष्टा इत्यादौ बोद्धव्यम् । आडम्बरः स्फुटः । जालिका शिरोवस्त्रभेदः । चतुरस्रा रम्याः । विश्रमकारणमिति गुरुत्वात् ।

तत्र चेत्यादौ तत्र पुष्पभूतिर्नाम राजासीदिति संबन्धः । वर्णा विप्राद्याः, शुक्लाद्याश्च । कल्याणं श्रेयः, सुवर्णं च । मन्दरेण श्रीराकृष्टामृतमन्थने, पुष्पभूतिना भैरवाचार्यवेतालसाधने । मर्यादाचारः, सीमा च । शब्दो यशोऽपि । प्रादुर्भावः प्रकाशता । कला गीताद्या, लेखाश्च । अकृत्रिमः सत्ययुक्तः, अपौरुषेयश्च । धृतिर्धैर्यम्, धारणं च । पार्थिवो राजा, पृथिवीसंबन्धी च । रजोविकारा रागाद्याः रेणुकार्याणि । गुर्वित्यादिना वक्रोक्त्याङ्गानां गुर्वादिमयत्वं सूचयति । गुरुरुपदेष्टा, गुरुर्महान् । गभीरशब्दत्वाद्बृहस्पतिश्च । पृथुर्विपुलः, आदिराजश्च कश्चित् । विशालो विस्तीर्णः, विशालाद्याश्च नृपा अभवन् । अथ विशालो नाम बोधिसत्त्वः स एव शान्तः शान्तमना इत्यपि प्रतीतिरस्ति । जनको जनयिता, जनक इव तपस्वी च । **सुयात्र इति** । शोभना यात्रा यस्य सोऽपि । कर्तव्यावधारणं मन्त्रः स शोभनो यस्येति च । बुधः पण्डितः, ग्रहश्च । अर्जुनः शुक्लोऽपि । भीष्मो भयानकः, गाङ्गेयश्च । निषधो धर्षणीयः, कठिनो वा, नलस्य

पुषि, शत्रुघ्नः समरे, शूरः शूरसेनाक्रमणे, दक्षः प्रजाकर्मणि, सर्वादिराजतेजःपुञ्जनिर्मित इव राजा पुष्पभूतिरिति नाम्ना बभूव।

पृथुना गौरियं कृतेति यः स्पर्धमान इव महीं महिषीं चकार। निसर्गस्वैरिणी स्वरुच्यनुरोधिनी च भवति हि महतां मतिः। यतस्तस्य केनचिदनुपदिष्टा सहजैव शैशवादारभ्यान्यदेवताविमुखी भगवति, भक्तिसुलभे, भुवनभृति, भूतभावने, भवच्छिदि, भवे भूयसि भक्तिरभूत्। अकृतवृषभध्वजपूजाविधिर्न स्वप्नेप्याहारमकरोत्। अजम्, अजरम्, अमरगुरुम्, असुरपुररिपुम्, अपरिमितगणपतिम्, अचलदुहितृपतिम्, अखिलभुवनकृतचरणनतिम्, पशुपतिं प्रपन्नोऽन्यदेवताशून्यममन्यत त्रैलोक्यम्। भर्तृचित्तानुवर्तिन्यश्चानुजीविनां प्रकृतयः। तथा हि। गृहे गृहे भगवानपूज्यत खण्डपरशुः। ववुरस्य होमालवालविलीयमानबहलगुग्गुलुगन्धगर्भाः स्रपनक्षीरशीकरक्षोदक्षारिणो बिल्वपल्लवदामदलोद्वाहिनः पुण्यविषयेषु वायवः। शिवसपर्यासमुचितैरुपायनैः प्राभृतैश्च पौराः पादोपजीविनः सचिवा भुजबलनिर्जिताश्च करदीकृता महासामन्तास्तं सिषेविरे। तथा हि। कैलासकूटधवलैः कनकपत्रलतालंकृतविषाणकोटिभिर्महाप्रमाणैः संध्याबलिवृषैः सौवर्णैश्च स्रपनकलशैरर्घभाजनैश्च धूपपात्रैश्च पुष्पपट्टैश्च मणियष्टिप्रदीपैश्च ब्रह्मसूत्रैश्च महार्हमाणिक्यखण्डखचितैश्च मुखकोषैः परितोषमस्य मनसि चक्रुः। अन्तःपुराण्यपि स्वयमारब्धबालेयतण्डुलकण्डनानि देवगृहोपलेपनलोहिततरकरकिसलयानि कुसुमग्रथनव्यग्रसमस्तपरिजनानि तस्याभिलषितमन्ववर्तन्त। तथा च। परममाहेश्वरः स भूपालो लोकतः

च पिता, गिरिभेदो वा। शूरो विक्रान्तः, यदूनां राजा च। दक्षश्चतुरः, प्रजापतिश्च।

महिषीं महादेवीमपि। निसर्गः स्वभावः। स्वैरिणी स्ववशा। खण्डपरशुः शिवः। ववुरवहन्। होमालवालमग्निकुण्डम्। सपर्या पूजा। उपायनं ढौकनिका स्वयमानीयते। प्राभृतं कौशलिका सखिभिः प्रहीयते। करदीकृता दण्डदाः कृताः। कूटं शृङ्गम्। यत्र वस्त्रेषु पुष्पाणि सूत्रैः क्रियन्ते स पुष्पपट्टः। ज्वलन्मणिशिखरा स्वर्णयष्टिर्यष्टिप्रदीपा। ब्रह्मसूत्रैर्यज्ञोपवीतैः। मुखयुक्ताः कोषा मुखकोषाः। ये लिङ्गोपरि दीयन्ते। बलये हिता बालेयाः। 'छदिरुपधिबलेर्ढञ्'। ग्रथनशब्दश्चिन्त्यः। ग्रन्थनमिति भाव्यम्। अभिलषितमन्ववर्तन्तेत्यनेन चित्तानुवृत्तिः

शुश्राव भुवि भगवन्तमपरमिव साक्षाद्दक्षमखमथनं दाक्षिणात्यं बहुविधविद्याप्रभावप्रख्यातैर्गुणैः शिष्यैरिवानेकसहस्रसंख्यैर्व्याप्तमर्त्यलोकं भैरवाचार्यनामानं महाशैवम् । उपनयन्ति हि हृदयमदृष्टमपि जनं शीलसंवादाः । यतः स राजा श्रवणसमकालमेव तस्मिन्भैरवाचार्ये भगवति द्वितीय इव कपर्दिनि दूरगतेऽपि गरीयसीं बबन्ध भक्तिम् । आचकाङ्क्ष च मनोरथैरप्यस्य सर्वथा दर्शनम् ।

अथ कदाचित्पर्यस्तेऽस्ताचलचुम्बिनि वासरेऽन्तःपुरवर्तिनं राजानमुपसृत्य प्रतीहारी विज्ञापितवती—'देव, द्वारि परिव्राडास्ते कथयति च भैरवाचार्यवचनादेवमनुप्राप्तोऽस्मि' इति । राजा तु तच्छ्रुत्वा सादरम्—'कासौ । आनयात्रैव । प्रवेशयैनम्' इति चाब्रवीत् । तथा चाकरोत्प्रतीहारी । नचिराच्च प्रविशन्तं प्रांशुमाजानुभुजम्, भैक्षक्षाममपि स्थूलास्थिभिरवयवैः पीवरमिवोपलक्ष्यमाणम्, पृथूत्तमाङ्गमुत्तुङ्गबलिमङ्गस्थपुटललाटम्, निर्मांसगण्डकूपकम्, मधुबिन्दुपिङ्गलपरिमण्डलाक्षम्, ईषदावक्रघोणम्, अतिप्रलम्बैककर्णपाशम्, अलाबुबीजविकटोन्नतदन्तपङ्क्तिम्, तुरगानूकश्मश्रुधरलेखम्, लम्बचिबुकाययततरलपनम्, अंसावलम्बिना काषायेण योगपट्टकेन विरचितवैकक्षकम्, हृदयमध्यनिबद्धग्रन्थिना च रागेणेव खण्डशः कृतेन धातुरसारुणेन कर्पटेन कृतोत्तरासङ्गम् । पुनरुक्तबालप्रग्रहवेष्टननिश्चलमूलेन बद्धमुत्परिशोधनवंशत्वक्तितउना कौपीनसनाथशिखरेण खर्जूरपुटसमुद्गकगर्भीकृतभिक्षाकपालकेन दारकफलकत्रयत्रिकोणत्रियष्टिनिविष्टकमण्डलुना बहिरुपपा-

---

शुद्धान्तानां वर्णिता । **भुवीति** । भूस्थत्वेऽप्यसुलभत्वदर्शनमस्योक्तम् । शीलसंवादाश्चारित्रसादृश्यानि । कपर्दिनि शिवे ।

नचिराच्चेत्यादौ मस्करिणमद्राक्षीदिति संबन्धः । प्रांशुं दीर्घम् । जानुरुपर्व । उक्तं च—'जङ्घा तु प्रसृता जानूरुपर्वाष्ठीवदस्त्रियाम्' । पीवरं स्थूलम् । स्थपुटं निम्नोन्नतम् । ललाटमलिकं गोधिः । गण्डकूपोऽक्ष्णोरधोदेशः । घोणा नासिका । अलाबुस्तुम्बी । उक्तं च—'तुम्ब्यलाबू उभे समे' । तुरगानामधस्तादोष्ठोऽनूकः । 'अधोऽधरस्य चिबुकम्' । लपनं मुखम् । उत्तरासङ्गमुपरिप्रावरणम् । पुनरुक्तं पौनःपुन्येन कृतम् । प्रग्रहो रज्जुः । तितउश्चालनी परिपवनशब्दवाच्यः । कौपीनं गुह्यदेश उपचारात्, तदाच्छादनं च । खर्जूराख्यस्य वृक्षस्य च संबन्धिभिः पुटैः श्लिष्टैः, पत्रैश्च । समुद्गकः कपालभङ्गः । भिक्षायै क्रियते दारवे

दितपादुकावस्थानेन स्थूलदशासूत्रनियन्त्रितपुस्तिकापूलिकेन वामकरधृतेन योगभारकेणाध्यासितस्कन्धम्, इतरकरगृहीतवेत्रासनं मस्करिणमद्राक्षीत्। क्षितिपतिरप्युपगतमुचितेन चैनमादरेणान्वग्रहीत्। आसीनं च पप्रच्छ—'क भैरवाचार्यः' इति। सादरनरपतिवचनमुदितमनास्तु परिव्राट् तमुपनगरं सरस्वतीतटवनावलम्बिनि शून्यायतने स्थितमाचचक्षे। भूयश्चाबभाषे—'अर्चयति हि महाभागं भगवानाशीर्वचसा' इत्युक्त्वा चोपनिन्ये योगभारकादाकृष्य भैरवाचार्यप्रहितानि रत्नवन्ति बहलालोकलिप्तान्तःपुराणि पञ्च राजतानि पुण्डरीकाणि।

नरपतिस्तु प्रियजनप्रणयभङ्गकातरो दाक्षिण्यमनुरुध्यमानो ग्रहणलाघवं च लङ्घयितुमसमर्थो दोलायमानेन मनसा स्थित्वा कथं कथमप्यतिसौजन्यनिघ्नस्तानि जग्राह। जगाद च—'सर्वफलप्रसवहेतुः शिवभक्तिरियं नो मनोरथदुर्लभानि फलति फलानि। येनैवमस्मासु प्रीयते भगवान्भुवनगुरुर्भैरवाचार्यः। श्वो द्रष्टास्मि भगवन्तम्' इत्युक्त्वा च मस्करिणं व्यसर्जयत्। अनया च वार्तया परां मुदमवाप।

अपरेद्युश्च प्रातरेवोत्थाय वाजिनमधिरुह्य समुच्छ्रितश्वेतातपत्रः समुद्धूयमानधवलचामरयुगलः कतिपयैरेव राजपुत्रैः परिवृतो भैरवाचार्यं सवितारमिव शशी द्रष्टुं प्रतस्थे। गत्वा च किंचिदन्तरं तदीयमेवाभिमुखमापतन्तमन्यतमं शिष्यमद्राक्षीत्। अप्राक्षीच्च—'क भगवानास्ते' इति। सोऽकथयत्—'अस्य जीर्णमातृगृहस्योत्तरेण बिल्ववाटिकामध्यास्ते' इति। गत्वा च तं प्रदेशमवततार। प्रविवेश च बिल्ववाटिकाम्।

अथ महतः कार्पटिकवृन्दस्य मध्ये प्रातरेव स्नातम्, दत्ताष्ट-

काष्ठसंबन्धिनि फलकत्रये त्रयः कोणास्तेषु यास्तिस्रो यष्टयस्तासु निविष्टः कमण्डलुर्यत्र तेन। योगभारकेण मात्राभारिकया। मस्करिणं परिव्राजकम्। राजतानि रौप्याणि।

लङ्घयितुमुत्सोढुम्। निघ्नः स्ववशः।

अन्यतममपरम्। उत्तरेणोत्तरस्यां दिशि।

अथेत्यादौ भैरवाचार्य ददर्शेति संबन्धः। कार्पटिका व्रतिनः। अष्टपुष्पिका

पुष्पिकम्, अनुष्ठिताग्निकार्यम्, कृतभस्मरेखापरिहारपरिकरे हरितगोमयोपलिप्तक्षितितलविततेव्याघ्रचर्मण्युपविष्टम्, कृष्णकम्बलप्रावरणनिभेनासुरविवरप्रवेशाशङ्कया पातालान्धकारावासमिवाभ्यस्यन्तम्, उन्मिषता विद्युत्कपिलेनात्मतेजसा महामांसविक्रयक्रीतेन मनःशिलापङ्केनेव शिष्यलोकं लिम्पन्तम्, जटीकृतैकदेशलम्बमानरुद्राक्षशङ्खगुटिकेनोर्ध्वबद्धेन शिखापाशेन बध्नन्तमिव विद्यावलेपदुर्विदग्धानुपरिसंचरतः सिद्धान्धवलकतिपयशिरोरुहेण वयसा पञ्चपञ्चाशतं वर्षाण्यतिक्रामन्तम्, खालित्यक्षीयमाणशङ्खलोमलेखम्, लोमशकर्णशष्कुलीप्रदेशं पृथुललाटतटम्, तिरश्चया भस्मललाटिकया बहुशः शिरोधृतदग्धगुग्गुलुसंतापस्फुटितकपालास्थिपाण्डुरराजिशङ्कामिव जनयन्तम्, सहजललाटवलिभङ्गसंकोचितकूर्चभागां बभ्रूभासं भ्रूसंगत्या निरन्तरामायामिनीमेकामिव भ्रूलेखां बिभ्राणम्, ईषत्काचकाचरकनीनिकेन रक्तापाङ्गनिर्गतांशुप्रतानेन मध्यधवलभासेन्द्रायुधेनेवातिदीर्घेण लोचनयुगलेन परितो महामण्डलमिवानेकवर्णरागमालिखन्तम्, सितपीतलोहितपताकावलीशबलम्, शिवबलिमिव दिक्षु विक्षिपन्तम्, तार्क्ष्यतुण्डकोटिकुब्जाग्रघोणम्, दूरविदीर्णसृक्कसंक्षिप्तकपोलम्, किंचिदन्तुरतया सदाहृदयसंनिहितहरमौलिचन्द्रातपेनेव निर्गच्छता दन्तालोकेन धवलयन्तं दिशां जालकम्, जिह्वाग्रस्थितसर्वशैवसंहितातिभारेणेव मनाक्प्रलम्बितोष्ठम्, प्रलम्बश्रवणपालीप्रेङ्खिताभ्यां स्फटिककुण्डलाभ्यां शुक्रबृहस्पतिभ्यामिव सुरासुरविजयविद्यासिद्धिश्रद्धयानुबध्यमानम्, बद्धविविधौषधिमन्त्रसूत्रपङ्क्तिना सलोहवलयनैकप्रकोष्ठेन शङ्खखण्डं पूष्णो दन्तमिव भगवता भवेन भग्नं भक्त्या भूष-

---

प्रागुक्ता। परिहारोऽत्र मर्यादा शङ्के ललाटास्थि । उक्तं च—'शङ्खो निधौ ललाटास्थ्नि' । गुटिका खण्डिका । उपरीत्याद्यभिप्रायेणोक्तम्—**ऊर्ध्ववद(बद्धे)नेति** । प्रशस्ता शिखा शिखापाशः । अवलेपोऽहंकृतिः । खालित्यं खल्वाटता । शङ्खो ललाटास्थि । शष्कुली कुहरम् । 'कूर्चमस्त्री भ्रुवोर्मध्यम्' । काचरा पीतवर्णा । तुण्डं मुखम् । कोटिः प्रान्तः, चञ्चवग्रम्। 'प्रान्तावोष्ठस्य सृक्किणी' । 'प्रकोष्ठमन्तरं विद्यादरत्निमणिबन्धयोः' । पूष्णो रविभेदस्य पुरा दक्षयज्ञगतस्य हरं निन्दतः 'मय्यनागते किमर्थमागतोऽसि' इति मुष्टिप्रहारेण हरेण दन्ता भग्नाः ।

णीकृतं कलयन्तम्, अखिलरसकूपोद्‌श्चनघटीयन्त्रमालामिव रुद्राक्षमालां दक्षिणेन पाणिना भ्रमयन्तम्, उरसि दोलायमानेनापिङ्गलाग्रेण कूर्चकलापेन संमार्जयन्तमिवान्तर्गतं निजरजोनिकरम्, अतिनिबिडनीललोममण्डलविचितं च ध्यानलब्धेन ज्योतिषा दग्धमिव हृदयदेशं दधानम्, ईषत्प्रशिथिलवलिवलयबध्यमानतुन्दम्, उपचीयमानस्फिङ्मांसपिण्डकम्, पाण्डुरपवित्रक्षौमावृतकौपीनम्, सावष्टम्भपर्यङ्कबन्धमण्डलितेनामृतफेनश्वेतरुचा योगपट्टकेन वासुकिनेवाप्रतिहतानेकमन्त्रप्रभावाविर्भूतेन प्रदक्षिणीक्रियमाणम्, अरुणतामरससुकुमारतलस्य पादयुगलस्य निर्मलैर्नखमयूखजालकैर्जर्जरयन्तमिव महानिधानोद्धरणरसेन रसातलम्, तोयक्षालितशुचिना धौतपादुकायुगलेन हंसमिथुनेनेव भागीरथीतीर्थयात्रापरिचयागतेनामुच्यमानचरणान्तिकम्, शिखरनिखातकुब्जकालायसकण्टकेन वैणवेन विशाखिकादण्डेन सर्वविद्यासिद्धिविघ्नविनायकापनयनाङ्कुशेनेव सततपार्श्ववर्तिना विराजमानम्, अबहुभाषिणं मन्दहासिनं सर्वोपकारिणं कुमारब्रह्मचारिणम्, अतितपस्विनं महामनस्विनं कृशक्रोधम्, अकृशानुरोधम्, महानगरमिवादीनप्रकृतिशोभितम्, मेरुमिव कल्पतरुपल्लवराशिसुकुमारच्छायम्, कैलासमिव पशुपतिचरणरजःपवित्रितशिरसम्, शिवलोकमिव माहेश्वरगणानुयातम्, जलनिधिमिवानेकनदनदीसहस्रप्रक्षालितशरीरम्, जाह्नवीप्रवाहमिव बहुपुण्यतीर्थस्थानशुचिम्, धाम धर्मस्य, तीर्थं तथ्यस्य, कोशं कुशलस्य, पत्तनं पूततायाः, शाला शीलस्य, क्षेत्रं क्षमायाः, शालेयं शा-

---

तत्करस्पर्शेन पावनत्वात्तत्र भक्तिः। अखिलस्य रसस्य कूपादुदञ्चनाय घटीयन्त्रमालापि भ्रम्यते। दोलायमानत्वेन संमार्जनसंभावना। कलापग्रहणं मार्जनीसादृश्यार्थम्। रजो रागः, रेणुश्च। विचितं व्याप्तम्। तुन्दमुदरम्। स्फिजावुभ इति प्रसिद्धे। 'स्त्रियां स्फिजौ कटीप्रोथौ' इत्यमरः। फेनवत्तश्च श्वेता। **वासुकिनेवेति**। न सामान्येनेति प्रभावपरिशोधकम्। जर्जरयन्तं खण्डशः कुर्वाणम्। **तोयेत्यादि**। हंसमिथुनस्यापि विशेषणम्। शिखरेत्यादिनाङ्कुशसादृश्यं विशाखिकादण्डस्योक्तम्। निखात उत्कीर्णः। कालायसं शस्त्रभेदः। विशाखिका खनित्रिका। विघ्न इव विनायको गजाननः। प्रकृतिः स्वभावः, मायादिका च। राशिवत्तेन च सुकुमाराः। गणाः समूहाः, प्रमथाश्च। नदनदीत्येकशेषो युक्तः। सहस्रेषु तैः प्रक्षालितशि(शरी)राः। तीर्थेषु यत्स्थानं

लीनतायाः, स्थानं स्थितेः, आधारं धृतेः, आकरं करुणायाः, निकेतनं कौतुकस्य, आरामं रामणीयकस्य, प्रासादं प्रसादस्य, आगारं गौरवस्य, समाजं सौजन्यस्य, संभवं सद्भावस्य, कालं कलेः, भगवन्तं साक्षादिव विरूपाक्षं भैरवाचार्यं ददर्श ।

भैरवाचार्यस्तु दूरादेव राजानं दृष्ट्वा शशिनमिव जलनिधिश्चचाल । प्रथमतरोत्थितशिष्यलोकश्चोत्थाय प्रत्युज्जगाम समर्पितश्रीफलोपायनश्च । जह्नुकर्णसमुद्गीर्यमाणगङ्गाप्रवाहह्रादगम्भीरया गिरा स्वस्तिशब्दमकरोत् ।

नरपतिरपि प्रीतिविस्तार्यमाणधवलिम्ना चक्षुषा प्रत्यर्पयन्निव बहुतराणि पुण्डरीकवनानि ललाटपट्टपर्यस्तेन चोदंशुना शिखामणिना महेश्वरप्रसादमिव तृतीयनयनोद्भेदेन प्रकाशयन्नावर्जितकर्णपल्लवपलायमानमधुकरः शिवसेवासमुन्मूलिताशेषपापलवमुच्यमान इव दूरावनतः प्रणाममभिनवं चकार । आचार्योऽपि—'आगच्छ । अत्रोपविश' इति शार्दूलचर्मात्मीयमदर्शयत् । उपदर्शितप्रश्रयस्तु राजामत्तहंसकलगद्गदस्वरसुभगां मधुरसमयीं महानदीमिव प्रवर्तयन्वाचं व्याजहार—'भगवन्, नार्हसि मामन्यनृपस्खलितैः खलीकर्तुम् । अशेषराजकोपेक्षिताया हतलक्ष्म्याः खल्वयं शीलापराधो द्रविणदौरात्म्यं वा यदेवमाचरति मयि गुरुः । अभूमिरयमुपचाराणाम् । अलमतियत्रणया । दूरस्थितोऽपि मनोरथशिष्योऽयं जनो भवताम् । माननीयं च गुरुवन्नोल्लङ्घनमर्हति गुरोरासनम् । आसतां च भवन्त एवात्र' इति व्याहृत्य परिजनोपनीते वाससि निषसाद । भैरवाचार्योऽपि प्रीत्यानतिक्रमणीयं नृपवचनमनुवर्तमानः पूर्ववत्तदेव व्याघ्राजिनमभजत ।

आसीने च सराजके परिजने शिष्यजने च समुचितमर्घ्या-

वसनं तेन शुचिम् । तीर्थस्नानैः कनखलाद्यवस्थितिभिश्च शुचिः । शालीनता विनीतत्वम् । निकेतनं गृहम् । तत्र हि सर्वस्य कौतुकं जायते ।

शश्यपि राजा, तं च दूरादेव दृष्ट्वा जलनिधिश्चलति । गाम्भीर्याच्च जलनिधिरेवेत्युक्तम् । बिल्वं श्रीफलम् । गङ्गेत्यादिना पवित्रत्वमाह ।

धवलिम्नेत्यनेन पुण्डरीकानां धवलत्वमाह । प्राभृतपुण्डरीकानां राजतत्वात् । आवर्जितं नमितं खरवच्च तेन सुभगात् । शार्दूलो व्याघ्रः ।

दिकं चक्रे । क्रमेण च नृपमाधुर्यहृतान्तःकरणः शशिकरनिकर-विमला दशनदीधितीः स्फुरन्तीः शिवभक्तीरिव साक्षाद्दर्शयन्नुवाच—'तात, अतिनम्रतैव ते कथयति गुणानां गौरवम् । सकलसंपत्पात्रमसि । विभवानुरूपास्तु प्रतिपत्तयः । जन्मनः प्रभृत्यदत्तदृष्टिरस्मि स्वापतेयेषु । यतः सकलदोषकलापानलेन्धनैर्धनैरविक्रीतं क्वचिच्छरीरकमस्ति । भैक्षरक्षिताः सन्ति प्राणाः । दुर्गृहीतानि कतिचिद्विद्यन्ते विद्याक्षराणि । भगवच्छिवभट्टारकपादसेवया समुपार्जिता कियत्यपि संनिहिता पुण्यकणिका । स्वीक्रियतां यदत्रोपयोगार्हम् । प्रतनुगुणग्राह्याणि कुसुमानीव हि भवन्ति सतां मनांसि । अपि च । विद्वत्संमताः श्रूयमाणा अपि साधवः शब्दा इव सुधीरेऽपि हि मनसि यशांसि कुर्वन्ति । विवरं विशतः कुतूहलस्य फेनधवलैः स्रोतोभिरिवापह्रियमाणो गुणगणैरानीतोऽस्मि कल्याणिना' इति ।

राजा तु तं प्रत्यवादीत्—'भगवन्, अनुरक्तेष्वपि शरीरादिषु साधूनां स्वामिन एव प्रणयिनः । युष्मद्दर्शनादुपार्जितमेव चापरिमितं कुशलजातम् । अनेनैवागमनेन स्पृहणीयं पदमारोपितोऽस्मि गुरुणा ।' इति विविधाभिश्च कथाभिश्चिरं स्थित्वा गृहमगात् ।

अन्यस्मिन्दिवसे भैरवाचार्योऽपि राजानं द्रष्टुं ययौ । तस्मै च राजा सान्तःपुरं सपरिजनं सकोषमात्मानं निवेदितवान् । स च विहस्योवाच—'तात, क्व विभवः, क्व च वयं वनवर्धिताः ।

अन्तःकरणं मनः । गौरवमुत्कर्षः, भारवत्त्वं च । **अदत्तदृष्टिरिति** । न तु मया धनान्यलभ्यानि । स्वापतेयेषु धनेषु । संरक्षिता इति यदि कदाचित्क्वचिदुपयोगं यास्यन्तीति । अनेन प्राणादिदानमेवोचितमित्युक्तम् । सकलसंपत्पात्रस्येयतः कियती वसुसंपत्तिर्भविष्यतीत्याशङ्क्याह—**प्रतन्वित्यादि** । गुणा उत्कर्षाः, तन्तवश्च । **कुसुमानीवेति** । कुसुमसादृश्येन मनसः सौकुमार्यमप्युक्तम् । साधवः शिष्टाः, शब्दा इव साधवः । संस्कृता विद्वत्संमताश्च । फेनवत्तैश्च धवलैर्गुणगणैः स्रोतोभिश्च ।

स्वामिन एव प्रणयिन इति । अनुक्तान्यपि शरीरादीनि प्रणयिनां स्वायत्तानीत्यर्थः ।

धनोष्मणा म्लायत्यलं लतेव मनस्विता । खद्योतानामिवास्माकमियमपरोपतापिनी राजते तेजस्विता । भवादृशा एव भाजनं भूतेः' इति स्थित्वा च कंचित्कालं जगाम ।

परिव्राट् तेनैव क्रमेण पञ्च पञ्च राजतानि पुण्डरीकाण्युपायनीचकार । एकदा तु श्वेतकर्पटावृतं किमप्यादाय प्राविशत् । उपविश्य च पूर्ववत्स्थित्वा मुहूर्तमब्रवीत्—'महाभाग, भवन्तमाह भगवान्यथास्मच्छिष्यः पातालस्वामिनामा ब्राह्मणः । तेन ब्रह्मराक्षसहस्तादपहृतो महासिरट्टहासनामा । सोऽयं भवद्भुजयोग्यो गृह्यताम्' इत्यभिधायापहृतकर्पटावच्छादनात्परिवारादाचकर्ष शरद्भगनमिव पिण्डतां नीतम्, कालिन्दीप्रवाहमिव स्तम्भितजलम्, नन्दकजिगीषया कृष्णकोपितं कालियमिव कृपाणतां गतम्, लोकविनाशाय प्रकाशितधारासारम्, प्रलयकालमेघखण्डमिव नभस्तलात्पतितम्, दृश्यमानविकटदन्तमण्डलं हासमिव हिंसायाः, हरिबाहुदण्डमिव कृतदृढमुष्टिग्रहम्, सकलभुवनजीवितापहरणक्षमेण कालकूटेनेव निर्मितम्, कृतान्तकोपानलतप्तेनेवायसा घटितम्, अतितीक्ष्णतया पवनस्पर्शेनापि रुषेव क्वणन्तम्, मणिसभाकुट्टिमपतत्प्रतिबिम्बच्छद्मनात्मानमपि द्विधेव पाटयन्तम्, अरिशिरश्छेदलग्नैः कचैरिव किरणैः करालितधारम्, मुहुर्मुहुस्तडिदुन्मेषतरलैः प्रभाचक्रच्छुरितैर्जर्जरितातपम्, खण्डशश्छिन्नदन्तमिव दिवसम्, कटाक्षमिव कालराज्ञेः, कर्णोत्पलमिव कालस्य, ओंकारमिव क्रौर्यस्य, अलंकारमहंकारस्य, कुलमित्रं कोपस्य, देहं दर्पस्य,

---

खद्योताः कीटमणयः ।

महाभागेति प्रस्तुतानुगुणमामन्त्रणम् । परिवारादाचकर्ष कृपाणमिति संबन्धः पिण्डं शस्त्रम् । उक्तं च—'लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी' इति; स्तम्भितं धृतं रक्षितमन्तर्जलं यस्य तम् । किल कृपाणस्य वा पानीयं यत्नेन क्रियते । नन्दको विष्णुखड्गः । कालियो नागभेदः । धाराणामासारः, धारारूपश्चासारः। दन्तमण्डलं दन्तचक्रवालम्, दशनसमूहश्च । मुष्टिःत्सरुः, असुरभेदश्च । **अतितीक्ष्णतयेति** । तैक्ष्ण्यं तानवाद्भवति । तनु च परस्परस्पर्शेन क्वणति । तथा चातितीक्ष्णोऽतिदण्डप्रकृती रोषेण हुंकरोति । कचैः केशैः । करालिता व्याप्ताः ।

सुसहायं साहसस्य, अपत्यं मृत्योः, आगमनमार्गं लक्ष्म्याः, निर्गमनमार्गं कीर्तेः, कृपाणम् ।

अवनिपतिस्तु तं गृहीत्वा करेणायुधप्रीत्या प्रतिमानिभेनालिङ्गन्निव सुचिरं ददर्श । संदिदेश च—'वक्तव्यो भगवान्परद्रव्यग्रहणावज्ञादुर्विदग्धमपि हि मे मनो युष्मद्विषये न शक्नोति वचनव्यतिक्रमव्यभिचारमाचरितुम्' इति । परिव्राट् तु गृहीते तस्मिन्परितुष्टः 'स्वस्ति भवते । साधयामः' इत्युक्त्वा निरयासीत् । नृपश्च प्रकृत्या वीररसानुरागी तेन कृपाणेनामन्यत करतलवर्तिनीं मेदिनीम् ।

अथ व्रजत्सु दिवसेष्वेकदा भैरवाचार्यो राजानमुपह्वरे सोपग्रहमवादीत्—'तात, स्वार्थालसाः परोपकारदक्षाश्च प्रकृतयो भवन्ति भव्यानाम् । भवादृशां चार्थिदर्शनं महोत्सवः प्रणयनमाराधनमर्थग्रहणमुपकारः । भूमिरसि सर्वलोकमनोरथानाम् । येनाभिधीयसे । श्रूयताम् । भगवतो महाकालहृदयनाम्नो महामन्त्रस्य कृष्णस्रगम्बरानुलेपेनाकल्पेन कल्पकथितेन महाश्मशाने जपकोट्या कृतपूर्वसेवोऽस्मि । तस्य वेतालसाधनावसाना सिद्धिः । असहायैश्च सा दुरवापा । त्वं चालमस्मै कर्मणे । त्वयि च गृहीतभरे भविष्यन्त्यपरे सहायास्त्रयः । एकः स एवास्माकं टीटिभनामा बालमित्रं मस्करी यो भवन्तमुपतिष्ठते । द्वितीयः स पातालस्वामी । अपरो मच्छिष्य एव कर्णतालनामा द्राविडः । यदि साधु मन्यसे ततो नीयतामयं दिङ्नागहस्तदीर्घो गृहीताट्टहासो निशामेकामेकदिङ्मुखार्गलतां बाहुः ।' इति कृतवचसि च तस्मिन्नन्धकारं प्रविष्ट इव दृष्टप्रकाशः प्राप्तोपकारावकाशः प्रमुदितेनान्तरात्मना नरेन्द्रः समभाषत—'भगवन्, परमनुगृहीतोऽस्म्यनेन शिष्यजनसामान्येन निदेशेन कृतपरिग्रहमिवात्मानमवैमि' इति । ननन्द च तेन

साधयामः स्वकर्मसिद्धिं विदध्मः । मङ्गलत्वाद्गच्छाम इति नोक्तम् ।

उपह्वरे प्रच्छन्ने । सोपग्रहं साभ्यर्थनम् । प्रणयनं याचनम् । **मनोरथानामिति** । रथाश्च भूमौ वहन्ति । आकल्पेन वेशेन । इतिकर्तव्यताकलापोपदेशको ग्रन्थः कल्पः । अलं पर्याप्तः । उपतिष्ठत इति संगतिकरणे तङ् । परिग्रहणं स्वीकारः ।

नरेन्द्रव्याहृतेन भैरवाचार्यः । चकार च संकेतम्—'अस्यामेवागामिन्यामसितपक्षचतुर्दशीक्षपायामियत्यां वेलायाममुष्मिन्महाश्मशानसमीपभाजि शून्यायतने शस्त्रद्वितीयेनायुष्मता द्रष्टव्या वयम्' इति ।

अथातिक्रान्तेष्वहःसु प्राप्तायां च तस्यामेव कृष्णचतुर्दश्यां शैवेन विधिना दीक्षितः क्षितिपो नियमवानभूत् । कृताधिवासं च संपादितगन्धधूपमाल्यादिपूजं खड्गमट्टहासमकरोत् । ततः परिणते दिवसे केनापि कर्मसाधनाय कृतरुधिरबलिविधानास्विव लोहितायमानासु दिक्षु, रुधिरबलिलम्पटासु च वेतालजिह्वास्विव लम्बमानासु च रविदीधितिषु, नरेन्द्रानुरागेण गृहीतापरदिशि स्वयमिव दिक्पालतां चिकीर्षति सवितरि, यातुधानीष्विव वर्धमानासु तरुच्छायासु, पातालवासिषु विन्नाय दानवेष्विवोत्तिष्ठत्सु तमोमण्डलेषु, नभसि पुञ्जीभवति, रौद्रं कर्म दिदृक्षमाण इव नक्षत्रगणे, विगाढायां शर्वर्याम्, सुप्रजननिःशब्दस्तिमिते निशीथे, राजा सान्तःपुरं परिजनं वञ्चयित्वा वामकरस्फुरत्सरुर्दक्षिणकरेणोत्खातं खड्गमट्टहासमादाय विसर्पता च खड्गप्रभापटलेन नीलांशुकपटेनेव दर्शनभयादवगुण्ठितनिखिलगात्रयष्टिरनादिष्टयाप्यनुगम्यमानो राजलक्ष्म्या पृष्ठतः परिमललग्नमधुकरवेणिव्याजेन केशेष्विव कर्मसिद्धिमाकर्षन्नेकाकी नगरान्निरगात् । अगाच्च तमुद्देशम् ।

अथ प्रत्युज्जग्मुस्ते त्रयो द्रौणिकृपकृतवर्माण इव सौप्तिके संनद्धाः स्नाताः स्रग्विणो गृहीतविकटवेषाः, कुसुमशेखरसंचारिभिः क्रियमाणमन्त्रशिखाबन्धा इव गुञ्जद्भिः षट्चरणैरुष्णीषपट्टकांल्ललाटमध्यघटितविकटस्वस्तिकाग्रन्थीन्महामुद्राबन्धानिव धारयन्तः, मूर्धभिरेकश्रवणविवरविततविमलदन्तपत्रप्रभालोकलेपधवलितकपो-

---

दीक्षितः कृतनियमः । अधिवासो नियमदिवसादाद्येऽहनि । यथाशास्त्रं विधिना मन्त्रन्यासादिः । पर्वपूजेति यावत् । तत इत्यादौ ततोऽस्मिन्सति । राजा नगरान्निरगादिति संबन्धः । यातुधानीषु राक्षसीषु । **पुञ्जीभवन्तीति** । कृष्णरात्र्यां नक्षत्रगतपुञ्जीभावो लक्ष्यते । दिदृक्षवोऽपीतस्ततः पुञ्जीभवन्ति । विगाढायां घनायाम् । निशीथेऽर्धरात्रे । नीलेत्यादि सहोपमेयम् ।

सुप्तेषु भवं सौप्तिकम् । धृष्टद्युम्नाधिष्ठिताक्षौहिणीविनाशाय दुर्योधनप्रेरितदिवार्जुनाधिष्ठितानां न किंचिदेषां शक्यमिति रात्रावेवस्कन्दमयच्छन्निति वार्ता ।

लैर्मुखैरापिबन्त इव निशाचरापचयचिकीर्षया शार्वरमन्धकारमितरकर्णावलम्बिनां रत्नकुण्डलानामच्छाच्छया रुचा गोरोचनयेव मन्त्रपरिजप्तया समालब्धाः, स्वप्रतिबिम्बगर्भान्कर्मसिद्धये दत्तपुरुषोपहारानिवोल्लासयन्तः, निशितान्निस्त्रिंशान्निस्त्रिंशांशुसंतानसीमन्ततिमिरामात्मीयात्मीयदिग्भागसंरक्षणाय त्रिधेव त्रियामां पाटयन्तः, सार्धचन्द्रैः कलधौतबुद्बुदावलितरलतारागणैर्निशाया इव परुषासिधारानिकृत्तैः खण्डैर्गृहीतैश्चर्मफलकैरेकाण्डशर्वरीमपरां घटयन्तः, काञ्चनशृङ्खलाकलापनियमितनिबिडनिष्प्रवाणयः, बद्धासिधेनवः, टीटिभकर्णतालपातालस्वामिनो निवेदितवन्तश्चात्मानम् ।

अवनिपतिस्तु—'कोऽत्र कः, इति त्रीनपृच्छत् । आचचक्षिरे च स्वं स्वं नाम त्रयोऽपि ते । तैरेव चानुगम्यमानो जगाम तां बलिदीपालोकजर्जरितगुग्गुलुधूपधूमगृह्यमाणदिग्भावतया विक्षिप्यमाणरक्षासर्षपार्धदग्धान्धकारपलायमाननिशामिव समुपकल्पितसर्वोपकरणां निःशब्दां च गम्भीरां च भीषणां च साधनभूमिम् ।

तस्यां च कुमुदधूलिधवलेन भस्मना लिखितस्य महतो मण्डलस्य मध्ये स्थितं दीप्ततरतेजःप्रसरम्, पृथुपरिवेषपरिक्षिप्तमिव शरत्सवितारम्, मथ्यमानक्षीरोदावर्तवर्तिनमिव मन्दरम्, रक्तचन्दनानुलेपिनो रक्तस्रगम्बराभरणस्योत्तानशयस्य शवस्योरस्युपविश्य जातजातवेदसि मुखकुहरे प्रारब्धाग्निकार्यम्, कृष्णोष्णीषम्, कृ-

---

संनद्धः सकवचः । उक्तं च—'संनद्धो वर्मितः सज्जो दंशितो व्यूढकङ्कटः' । अपचयो हानिः । गोरोचनयेवेति सहोपमेयम् । उल्लासयन्तश्चालयन्तः । **सार्धचन्द्रैरिति** । निशायां खड्गेषु चन्द्रखण्डस्य संभाव्यमानत्वादेवमुक्तम् । न तु वस्तुवृत्तेन । कृष्णचतुर्दशीक्षपायां चन्द्रः संभवतीति । कलधौतं हेम रौप्यं वा । बुद्बुदावलिर्विन्दुपङ्क्तिः । चर्मफलकैः स्फटकैः । एकस्या वर्तमानत्वादाह—**अपरामिति** । निष्प्रवाणि नवं वस्त्रम् । उक्तं च—'अनाहतं निष्प्रवाणि तत्त्रकं च नवाम्बरे' । असिधेनुः कृपाणम् ।

कोऽत्र क इति वाक्यैकदेशोऽयम् । अत्र कः कः स्थित इत्यर्थः । बलीत्यादिनार्धदग्धत्वसंभावनम् । अर्धदग्धस्य पलायनमुचितम् । न च बहुदग्धस्य । पलायंश्च दिग्भागान्गृह्णाति । सर्षपो गौरसिद्धार्थः ।

तस्यां चेत्यादौ भैरवाचार्यमपश्यदिति संबन्धः । पृथुपरिवेषेत्यादिना भीषणीयत्वमुक्तम् । परिवेषः परिधिः । परिक्षिप्तं परिवलितम् । शरदि सविता दीप्त-

ष्णाङ्गरागम्, कृष्णप्रतिसरम्, कृष्णवाससम्, कृष्णतिलाहुतिनिभेन विद्याधरत्वतृष्णया मानुषनिर्माणकारणकालुष्यपरमाणूनिव क्षयमुपनयन्तम्, आहुतिदानपर्यस्ताभिः प्रेतमुखस्पर्शदूषितम्, प्रक्षालयन्तमिवाशुशुक्षणिं करनखदीधितिभिर्धूमालोहितेन चक्षुषा क्षतजाहुतिमिव हुतभुजि पातयन्तम्, ईषद्विवृताधरपुटप्रकटितसितदशनशिखरेण दृश्यमानमूर्तमन्त्राक्षरपङ्क्तिनेव मुखेन किमपि जपन्तम्, होमश्रमस्वेदसलिलप्रतिबिम्बिताभिरासन्नदीपिकाभिर्दह्यन्तमिव सिद्धये सर्वावयवान्, अंसावलम्बिना बहुगुणेन विद्याराजेनेव ब्रह्मसूत्रेण परिगृहीतं भैरवाचार्यमपश्यत् । उपसृत्य चाकरोन्नमस्कारम् । अभिनन्दितश्च तेन स्वव्यापारमन्वतिष्ठत् ।

अत्रान्तरे पातालस्वामी शातक्रतवीमाशामङ्गीचकार । कर्णतालः कौबेरीम् । परिव्राट् प्राचेतसीम् । राजा तु त्रैशङ्कवेन ज्योतिषाङ्कितां ककुभमलंकृतवान् ।

एवं चावस्थितेषु दिक्पालेषु दिक्पालभुजपञ्जरप्रविष्टे विस्रब्धं कर्म साधयति भैरवं भैरवाचार्येऽतिचिरं कृतकोलाहलेषु निष्फलप्रयत्नेषु प्रत्यूहकारिषु शान्तेषु कौणपेषु गलत्यर्धरात्रसमये मण्डलस्य नातिदवीयस्युत्तरेणाकस्मात्प्रलयमहावराहदंष्ट्राविवरमिव दर्शयन्ती क्षितिरदीर्यत । सहसैव च तस्माद्विवरादाशावारणोत्क्षिप्त इवालानलोह-

---

तरतेजःप्रसरो भवतीति शरद्ग्रहणम् । जात उत्पन्नः, न तूत्क्षिप्तः । प्रतिसरो हस्तसूत्रम् । दिक्षु काण्डसूत्रप्रतिबन्ध इति । अन्या तिलानां कृष्णत्वात्परमाणूनामपि कालुष्यकथनम् । **क्षतजेति** । प्रस्तावनानुगुण्येन रक्ताहुतिः संभाव्यते । जपवशादीषदित्याद्युक्तम् । ईषद्विवृतत्वादेव शिखरग्रहणम् । प्रतिबिम्बादानोपपादनार्थमासन्नपदम् । गुणास्तन्तवः, गुणनं गुणः । पौनःपुन्यमावर्तनं च । उत्कर्षा वा गुणाः । विद्याराजो मन्त्रविशेषः ।

शातक्रतवीं पूर्वाम् । अङ्गीचकारेत्यनेन सर्वेषां स्वरुचिपरिगृहीतत्वमुक्तम् । कौबेरीमुत्तराम् । प्राचेतसीं पश्चिमाम् । त्रिशङ्कुरिक्ष्वाकुवंश्यः शापाच्चण्डालतां प्राप्तो यज्ञेन स्वर्गमारुरुक्षुरर्धपथे देवैर्निवारितो दक्षिणस्यां दिश्युदेति । तेन त्रैशङ्कवेन ज्योतिषाङ्कितां ककुभं दिशं दक्षिणाम् । दक्षिणस्यामित्युक्तेऽनिष्टप्रतीतिरिति त्रैशङ्कवेनेत्युक्तम् ।

विस्रब्धमिति । एतदर्थमेव राजादीनां परिग्रहः । प्रत्यूहो विघ्नः । कौणपेषु राक्षसेषु । सहसेत्यादौ कुवलयश्यामलः पुरुष उज्जगामेति संबन्धः । **लोह-**

स्तम्भः, महावराहपीवरस्कन्धपीठो नरकासुर इव भुवो गर्भादुद्भूतः, बलिदानव इव भित्त्वोत्थितः पातालम्, इन्द्रनीलप्रासाद इवोपरिज्वलितरत्नप्रदीपः, स्निग्धनीलघननिबिडकुटिलकुन्तलकान्तमौलिरुन्मीलन्मालतीमुण्डमालः, गद्गदतया स्वरस्य स्वभावपाटलतया च चक्षुषः क्षीब इव यौवनमदेन वल्गद्गलदामकः, करसंपुटमृदितया मृदा दिङ्नागकुम्भाभावंसकूटौ पुनः पुनः पङ्कयन्सान्द्रचन्दनकर्दमदत्तैरव्यवस्थास्थासकैरतिसितजलधरशकलशारित इव शारदाकाशैकदेशः, केतकीगर्भपत्रपाण्डुरस्य चण्डातकस्योपरि क्षामतरीकृतकुक्षिः, कक्ष्याबन्धं विधाय विलासविक्षिप्तेन धवलव्यायामफालीपटान्तेन धरणितलगेन धार्यमाण इव पृष्ठतः शेषेण स्थिरस्थूलोच्चदण्डः, भूमिभङ्गभयेनेव मन्थराणि स्थापयन्पदानि निर्भरगर्वगुरु कथमपि शैलमिव गात्रमुद्वहन्दर्पेण मुहुर्मुहुरुरसि द्विगुणिते दोष्णि वामे तिर्यगुत्क्षिप्ते च दक्षिणे जङ्घाकाण्डे कुण्डलिते चण्डस्फोटनटांकारैः कर्मविघ्ननिर्घातानिव पातयन्नेकेन्द्रियविकलमिव जीवलोकं कुर्वन्कुवलयश्यामलः पुरुष उज्जगाम। जगाद च विहस्य नरसिंहनादनिर्वोपघोरया भारत्या—'भो विद्याधरीश्रद्धाकामुक, किमयं विद्यावलेपः सहायमदो वा यदस्मै जनायाविधाय बलिं बालिश इव सिद्धिमभिलषसि। का ते दुर्बुद्धिरियम्। एतावता कालेन क्षेत्राधिपतिरस्य मन्नाम्नैव लब्धव्यपदेशस्य देशस्य नागतस्ते श्रोत्रोपकण्ठं श्रीकण्ठनामा नागोऽहम्। अनिच्छति मयि का शक्तिर्ग्रहगणस्यापि गन्तुं गगने। भूनाथोऽप्ययमनाथस्तपस्वी यस्त्वादृशैः शैवापसदैरुपकरणीक्रियते। सहस्वेदानीं सहामुना दुर्नरेन्द्रेण दुर्नयस्य

स्तम्भ इति। लोहशब्देन सारता कृष्णता चोक्ता। गर्भान्मध्यात्, उदराच्च। घना निबिडाः। निबिडकुटिला अतिकुञ्चिताः। कुन्तलाः केशाः। मौलिश्चूडा, किरीटं च। उक्तं च—'चूडा किरीटं केशाश्च संहता मौलयस्त्रयः'। स्थासकैश्चन्द्रकैः। फाली कक्ष्याबन्धः। शेषेणेति। शेषो धवलः, धरणितलगतश्च। पटान्तेनापि विशेषेणावतिष्ठते। आस्फोटनं बाह्वादिशब्दाः। एकेन्द्रियम्। अर्थाच्छ्रोत्रम्। निर्घोषो दिक्षु व्याप्तिः। अत्र विद्याधरीत्यादि हेपणार्थमामन्त्रणम्। श्रद्धाग्रहणं फलाभावप्रतिपादनाय। अस्मायित्यादि सर्वगर्भेयमुक्तिः। बालिशो मूर्खः। अभिलषसीति फलाभावसूचनपदम्। अपसदोऽधमः। दुर्नरेन्द्रेण

फलम्' इत्यभिधाय च निष्ठुरैः प्रकोष्ठप्रहारैस्त्रीनपि टीटिभप्रभृतीनभिमुखं प्रधावितान्सशरीरावरणकृपाणानपातयत्।

अथापूर्वाधिक्षेपश्रवणादशस्त्रव्रणैरप्यमर्षस्वेदच्छलेनानेकसमरपीतमसिधाराजलमिव वमद्भिरवयवैरपि रोमाञ्चनिभेन मुक्तशरशतशल्यनिकरभरलघुमिवात्मानं रणाय कुर्वद्भिरट्टहासेनापि प्रतिबिम्बिततारागणेन स्पष्टदृष्टधवलदन्तमालमवज्ञया हसतेव कथ्यमानसत्त्वावष्टम्भः परिकरबन्धविभ्रमभ्रमितकरनखकिरणचक्रवालेन व्यपगमनाशङ्कया नागदमनमन्त्रमण्डलबन्धेनेव रुन्धन्दश दिशो नरनाथः सावज्ञमवादीत्—'अरे काकोदर काक, मयि स्थिते राजहंसे न जिह्रेषि बलिं याचितुम्। अमीभिः किं वा परुषभाषितैः। भुजे वीर्यं निवसति, न वाचि। प्रतिपद्यस्व शस्त्रम्। अयं न भवसि। अगृहीतहेतिष्वशिक्षितो मे भुजः प्रहर्तुम्' इति। नागस्तु—'अनादृततरमेहि। किं शस्त्रेण। भुजाभ्यामेव भनज्मि भवतो दर्पम्' इत्यभिधायास्फोटयामास। नरपतिरपि निरायुधमायुधेन युधि लज्जमानो जेतुमुत्सृज्य सचर्मफलकमट्टहासमसिमधोरुकस्योपरि बबन्ध बाहुयुद्धाय कक्ष्याम्। युयुधाते च निर्दयास्फोटनस्फुटितभुजरुधिरशीकरसिच्यमानौ शिलास्तम्भैरिव पतद्भिर्बाहुदण्डैः शब्दमयमिव कुर्वाणौ भुवनं तौ। न चिराच्च पातयामास भूतले भुजंगं भूपतिः। जग्राह च केशेषु। उच्चखान च शिरश्छेत्तुमट्टहासम्। अपश्यच्च वैकक्षकमालान्तरेणास्य यज्ञोपवीतम्। उपसंहृतशस्त्रव्यापारश्चावादीत्—'दुर्विनीत, अस्ति ते दुर्नयनिर्वाहबीजमिदम्। यतो विश्रब्धमेवाचरसि चापलानि' इत्युक्त्वोत्ससर्ज तम्। अनन्तरं च सहसैवातिबहलां ज्योत्स्नां ददर्श। शरदि विक-

---

कुराज्ञा। दुर्नरेन्द्रो मन्त्रतन्त्रानभिज्ञः। **सशरीरेत्यादि**। न तु नरेन्द्रवदशस्त्रान्।

अथेत्यादौ नरनाथः सावज्ञमवादीदिति संबन्धः। **कथ्यमानेत्यादि**। अशस्त्रव्रणैश्चावयवैश्चैवाट्टहासेन च। मण्डलं गारुडशास्त्रप्रसिद्धमैन्द्रादिकम्। काकोदरः सर्पः। काकेति निन्दायाम्। काकस्य च बलियाचनमुक्तम्। राजहंसो नृपवरः, हंसभेदश्च। हेतिरायुधम्। आस्फोटयामास बाहौ करघातमकार्षीत्। असिमिति प्रशंसार्थः सामान्यपदप्रयोग इति रुद्रटः। वैकक्षमालान्तरितत्वेन पूर्वमदर्शनं यज्ञोपवीतस्याह।

सतां कमलवनानामिव च घ्राणावलेपिनमामोदमजिघ्रत्। झटिति च नूपुरशब्दमशृणोत्। व्यापारायमास च शब्दानुसारेण दृष्टिम्।

अथ करतलस्थितस्याट्टहासस्य मध्ये तडितमिव नीलजलधरोदरे स्फुरन्तीं प्रभया पिबन्तीमिव त्रियामाम्, तामरसहस्ताम्, कोमलाङ्गुलिरागराजिजालकानि च चरणलग्नानि वेलाबालविद्रुमलतावनानीवाकर्षन्तीम्, करपङ्कजसंकोचाशङ्कया शशाङ्कमण्डलमिव खण्डशः कृतं निर्मलचरणनखनिवहनिभेन बिभ्रतीम्, गुल्फावलम्बिनूपुरपुटतया स्थितनिबिडकटकावलिबन्धनादिव परिभ्रश्यागताम्। बहुविधकुसुमशकुनिशतशोभितात्पवनचलिततनुतरङ्गादतिस्वच्छादंशुकादुदधिसलिलादिवोत्तरन्तीम्, उदधिजन्मप्रेम्णा त्रिवलिच्छलेन त्रिपथगयेव परिष्वक्तमध्याम्, अत्युन्नतस्तनमण्डलाम्, दृश्यमानदिङ्नागकुम्भामिव ककुभम्, मदलग्नैरावतकरशीकरनिकरमिव शरत्तारागणतारं हारमुरसा दधानाम्, धवलचामरैरिव च मन्दमन्दनिःश्वासदोलायितैर्हारकिरणैरुपवीज्यमानाम्, स्वभावलोहितेन मदान्धगन्धेभकुम्भास्फालनसंक्रान्तसिन्दूरेणेव करद्वयेन द्योतमानाम्, हरशिखण्डेन्दुद्वितीयखण्डेनेव कुण्डलीकृतेन ज्योत्स्नामुचा दन्तपत्रेण विभ्राजमानाम्, कौस्तुभगर्भस्तिस्तबकेनेव च श्रवणलग्नेनाशोककिसलयेनालंकृताम्, महता मातङ्गमदमयेन तिलकेनादृश्यच्छत्रच्छायामण्डलेनेवाविरहितललाटाम्, आपादतलादासीमन्ताच्च चन्द्रातपधवलेन चन्दनेनादिराजयशसेव धवलीकृताम्, धरणितलचुम्बिनीभिः कण्ठकुसुममालाभिः सरिद्भिरिव सागराधिष्ठात्रीभिरधिष्ठिताम्, मृणालकोमलैरवयवैः कमलसंभवत्वमनक्षरमाचक्षाणां स्त्रियमपश्यत्। असंभ्रान्तश्च पप्रच्छ—'भद्रे, कासि। किमर्थं वा दर्शनपथमागतासि' इति। सा तु स्त्रीजनविरुद्धेनावष्टम्भेनाभिभवन्तीवाभाषत तम्—'वीर, विद्धि मां

अथेत्यादावट्टहासस्य मध्ये स्फुरन्तीं स्त्रियमपश्यदिति संबन्धः। तामरसं पद्मम्। **बहुविधेति**। प्रकृते कुसुमानि शकुनयश्च सूत्रमयानि। तरङ्गा मुष्टिदानक्षता भङ्ग्यः, वीचयश्च। अतिस्वच्छत्वमंशुकस्योदधिसलिलेन। **उत्तरन्तीमिति**। अंशुकाच्छादितयोदन्वत्या उत्तरणमिवांशुकाल्लक्ष्यत इति। वर्ण्याभिप्रायेण त्रिपथगेति नाम। मदे दाने लग्नः सक्तः। समद इत्यर्थः। श्रीर्हस्तिपृष्ठेन

नारायणोरःस्थलीलीलाविहारहरिणीम्, पृथुभरतभगीरथादिराजवंशपताकाम्, सुभटभुजजयस्तम्भविलासशालभञ्जिकाम्, रणरुधिरतरङ्गिणीतरङ्गक्रीडादोहद्दुर्ललितराजहंसीम्, सितनृपच्छत्रषण्डशिखण्डिनीम्, अतिनिशितशस्त्रधारावनभ्रमणविभ्रमसिंहीम्, असिधाराजलकमलिनीं श्रियम्। अपहृतास्मि तवामुना शौर्यरसेन। याचस्व। ददामि ते वरमभिलषितम्' इति।

वीराणां त्वपुनरुक्ताः परोपकाराः। यतो राजा तां प्रणम्य स्वार्थविमुखो भैरवाचार्यस्य सिद्धिं ययाचे। लक्ष्मीस्तु देवी प्रीततरहृदया विस्तीर्यमाणेन चक्षुषा क्षीरोदेनेवोपरि पर्यस्तेनाभिषिञ्चन्ती भूपालम् 'एवमस्तु' इत्यब्रवीत्। अवादीच्च पुनः—'अनेन सत्त्वोत्कर्षेण भगवच्छिवभट्टारकभक्त्या चासाधारणया भवान्भुवि सूर्याचन्द्रमसोस्तृतीय इवाविच्छिन्नस्य प्रतिदिनमुपचीयमानवृद्धेः शुचिसुभगसत्यत्यागधैर्यशौण्डपुरुषप्रकाण्डप्रायस्य महतो राजवंशस्य कर्ता भविष्यति। यस्मिन्नुत्पत्स्यते सर्वद्वीपानां भोक्ता हरिश्चन्द्र इव हर्षनामा चक्रवर्ती त्रिभुवनविजिगीषुर्द्वितीयो मांधातेव यस्यायं करः स्वयमेव कमलमपहाय ग्रहीष्यति चामरम्' इति वचसोऽन्ते तिरोबभूव।

भूमिपालस्तु तदाकर्ण्य हृदयेनातिमात्रमप्रीयत। भैरवाचार्योऽपि तस्या देव्यास्तेन वचसा कर्मणा च सम्यगुपपादितेन सद्य एव कुन्तली किरीटी कुण्डली हारी केयूरी मेखली मुद्गरी खड्गी च भूत्वावाप विद्याधरत्वम्। प्रोवाच च—'राजन्, अदूरव्यापिनः फल्गुचेतसामलसानां मनोरथाः। सतां तु भुवि विस्तार-

---

यातीति मदान्धेत्याद्युक्तम्। हस्तिवाहित्वाल्लक्ष्म्या एवमुक्तम्। धरणितलचुम्बिनीभिर्मालाभिः, सरिद्भिश्च। **हरिणीमिति**। हरिणी किल स्थाल्या लीलया विहरति। वंशोऽन्वयेऽथ वंशे वेणौ पताकोत्क्षिप्यते। सुभटेत्यादि विशेषणेन वीरानुरागित्वमस्या दर्शितम्। स्तम्भे च शालभञ्जिकोत्कीर्णपुत्रिका क्रियते। षण्डो वनम्, तत्र शिखण्डिनी मयूरी।

अपुनरुक्ता भूयो भूयः क्रियमाणापि चेत्यर्थः। परोपकारकरणपरत्वेन प्रीतत्वम्। **अभिषिञ्चन्तीति**। अभिषेको राज्ञ उचितः। शौण्डः प्रसक्तः। प्रकाण्डशब्दः प्रशंसावाची। द्वितीयः स्पर्धावान्।

वत्यः स्वभावेनैवोपकृतयः । स्वप्नेऽप्यसंभावितां दातुमिमां दक्षिणां क्षमः कोऽन्यो भवन्तमपहाय । संपत्कणिकामपि प्राप्य तुलेव लघुप्रकृतिरुन्नतिमायाति । त्वदीयैर्गुणैरुपकरणीकृतस्य त्वत्त एव च लब्धात्मलाभस्य निर्लज्जतेयमस्य मूढहृदयस्य । तदिच्छामि येन केनचित्कार्यलवोपपादनोपयोगेन स्मरयितुमात्मानम्' इति । प्रत्युपकारदुष्प्रवेशास्तु भवन्ति धीराणां हृदयावष्टम्भाः । यतस्तं राजा 'भवत्सिद्ध्यैव परिसमाप्तकृत्योऽस्मि । साधयतु मान्यो यथासमीहितं स्थानम्' इति प्रत्याचचक्षे ।

तथोक्तश्च भूभुजा जिगमिषुः सुदृढं समालिङ्ग्य टीटिभादीन्कुवलयवनेनेवावश्यायशीकरस्राविणा सास्रेण चक्षुषा वीक्षमाणः क्षितिपतिं पुनरुवाच—'तात, ब्रवीमि यामीति न स्नेहसदृशम् । त्वदीयाः प्राणा इति पुनरुक्तम् । गृह्यतामिदं शरीरकमिति व्यतिरेकेणार्थकरणम् । तिलशः क्रीता वयमिति नोपकारानुरूपम् । बान्धवोऽसीति दूरीकरणमिव । त्वयि स्थितं हृदयमित्यप्रत्यक्षम् । त्वद्विरहकारिणी कारणेयं न सिद्धिरित्यश्रद्धेयम् । निष्कारणस्तवोपकार इत्यनुवादः । स्मर्तव्या वयमित्याज्ञा । सर्वथा कृतघ्नालापेष्वसज्जनकथासु च चेतसि कर्तव्योऽयं स्वार्थनिष्ठुरो जनः' इत्यभिधाय वेगच्छिन्नहारोच्छलितमुक्ताफलनिकरताडिततारागणं गगनतलमुत्पपात । ययौ च सीमन्तितग्रहग्रामः सिद्ध्युचितं धाम । श्रीकण्ठोऽपि—'राजन्, पराक्रमक्रीतः कर्तव्येषु नियोगेनानुग्राह्यो ग्राहितविनयोऽयं जनः' इत्यभिधाय राजानुमोदितस्तदेव भूयो भूविवरं विवेश ।

कुण्डलं कर्णवेष्टनम् । हारो मुक्ताहारः । केयूरमङ्गदम् दोर्भूषा । फल्गवसारम् । प्रत्याचचक्षे पर्यहार्षीत् ।

यामीत्यादिवक्रोक्त्या चेतःस्थितं सर्वं व्याहरति । **न स्नेहसदृशमिति ।** स्नेहानुरूपनिषेधेन स्नेह इव सुतरामाविष्कृत एव । उक्तं हि—'प्रतिषेध इवेष्टस्य यद्विशेषाभिधित्सया । आक्षेप इति तं सन्तः शंसन्ति कवयः सदा ॥' **इति एवं त्वदीयाः प्राणा इत्यादौ ।** व्यतिरेकः पृथग्भागः । आवां किलैक एवार्थः । **तिलशः इति ।** यावान्किलायमुपकारो बहुगुणस्तावन्तो नावयवास्तिलशो विभागेनास्माकम् । कारणा यातना । सीमन्ततो द्विधाकृतः । ग्रामः समूहः ।

नरपतिस्तु क्षीणभूयिष्ठायां क्षपायां प्रवातुमारब्धे, प्रबुध्यमानकमलिनीनिःश्वाससुरभौ, वनदेवताकुचांशुकापहरणपरिहासस्वेदिनीव सावश्यायशीकरे, परिमलाकृष्टमधुकृति कुमुदनिद्रावाहिनि, निशापरिणतिजडे, तुषारलेशिनि वनानिले, विरहविधुरचक्रवाकचक्रनिःश्वसितसंतापितायामिवापरजलनिधिमवतरन्त्यां त्रियामायां साक्षादागतलक्ष्मीविलोकनकुतूहलिनीष्विव समुन्मीलन्तीषु नलिनीषून्निद्रपक्षिणि, क्षरति कुसुमविसरमिव तुहिनकणनिकरं मृदुपवनलासितलते कानने, कमललक्ष्मीप्रबोधमङ्गलशङ्खेष्विव रसत्स्वन्तर्बद्धध्वनन्मधुकरेषु मुकुलायमानेषु कुमुदेषूज्जिहानरविरथवाजिविसृष्टैः प्रोथपवनैः प्रोत्सार्यमाणास्विव वारुण्यां ककुभि, पुञ्जीभवन्तीषु श्यामालताकलिकासु तारकासु, मन्दरशिखराश्रयिणि मन्दानिललुलितकल्पलतावनकुसुमधूलिविच्छुरित इव धूसरीभवति सप्तर्षिमण्डले, सुरवारणाङ्कुश इव च्युते गलति तारामये मृगे क्षीनपि टीटिभादीन्गृहीत्वा नागयुद्धव्यतिकरमलीमसानि शुचिनि वनवापीपयसि प्रक्षाल्याङ्गानि नगरं विवेश । अन्यस्मिन्नहनि तेषामात्मशरीरानन्तरस्नानभोजनाच्छादनादिना प्रीतिमकरोत् ।

कतिपयदिवसापगमे च परिव्राट् भूभुजा वार्यमाणोऽपि वनं ययौ । पातालस्वामिकर्णतालौ तु शौर्यानुरक्तौ तमेव सिषेवाते । संपादितमनोरथातिरिक्तविधवौ च सुभटमण्डलमध्ये निष्कृष्टमण्डलाग्रौ समरमुखेषु प्रथममुपयुज्यमानौ कथान्तरेषु चान्तरा-

---

वनेत्यादावस्मिन्नस्मिन्सति नरपतिर्नगरं विवेशेति संबन्धः । क्षीणभूयिष्ठायां बहुतरं क्षीणायाम् । तुषारस्य शीतलेशाः सन्ति । तत्र तस्मिन्नीषच्छीतले । **संतापितायामिवेति** । संतापितश्च शीतलं स्थानमवतरति । कुसुमविसरमिवेति समोपमा । लासिता नर्तिताः । उज्जिहान उद्गच्छन् । श्यामा रात्रिः, सैव लता व्रततिः । प्रियङ्गुलतिका मकरिका । तारामयो मृगशीर्षस्त्रितारोङ्कुशाकारः । **आत्मशरीरानन्तरं स्नानेति** । आत्मशरीरमनन्तरं यस्य तादृशेन स्नानभोजनाच्छादनादिना । तेषु कृत्वा पश्चादात्मनः करोतीत्यर्थः ।

न्तरा समादिष्टौ विचित्राणि भैरवाचार्यचरितानि शैशववृत्तान्तांश्च कथयन्तौ तेनैव सार्धं जरामाजग्मतुरिति ।

इति श्रीबाणभट्टकृते हर्षचरिते राजदर्शनं नाम
तृतीय उच्छ्वासः ।

शौर्यानुरक्ताविति न भोगलोलुभौ । अतिरिक्तोऽधिकः । मण्डलाग्रः खड्गः । अन्तरान्तरा मध्येमध्ये । कथयन्ताविति स्थिरप्रीतिसिद्धये ॥

इति श्रीशंकरकविरचिते हर्षचरितसंकेते तृतीय उच्छ्वासः ।

चतुर्थ उच्छ्वासः ।

योगं स्वप्नेऽपि नेच्छन्ति कुर्वते न करग्रहम् ।
महान्तो नाममात्रेण भवन्ति पतयो भुवः ॥ १ ॥
सकलमहीभृत्कम्पकृदुत्पद्यत एक एव नृपवंशे ।
विपुलेऽपि पृथुप्रतिमो दन्त इव गणाधिपस्य मुखे ॥ २ ॥

अथ तस्मात्पुष्पभूतेर्द्विजवरस्येच्छागृहीतकोपो नाभिपद्म इव पुण्डरीकेक्षणात्, लक्ष्मीपुरःसरो रत्नसंचय इव रत्नाकरात्, गुरुबुधकविकलावत्तेजस्विभूनन्दनप्रायो ग्रहगण इवोदयस्थानात्, महाभारवाहनयोग्यः सागर इव सगरप्रभावात्, दुर्जयबलसनाथो हरिवंश इव शूरान्निर्जगाम राजवंशः । यस्मादविनष्टधर्मधवलाः प्रजासर्गा इव कृतमुखात्, प्रतापाक्रान्तभुवनाः किरणा इव तेजोनिधेः, विग्रहव्यायतदिङ्मुखा गिरय इव भूभृत्प्रभवात्, धरणीधार-

योगमित्यादिना प्रसिद्धात्प्रत्युद्गतवैलक्षण्यमुच्यते । भूपतीनां योगो युक्तिः । गूढप्रत्याहाररसादनादिच्छामेत्यर्थः, संबन्धश्च । करग्रहो दण्डग्रहणम्, विवाहश्च । **नाममात्रेणेति** । नामैव तेषां श्रुत्वा भुवनं कम्पत इत्यर्थः । अर्थशून्येन सकलेनेत्यादिना भाविनी हर्षोत्पत्तिः सूचिता ॥ १ ॥

महीभृद्भिरपि कम्पो वेपथुः, चलनं च । पृथुरादिराजः, विस्तीर्णश्च । प्रतिमा सादृश्यम्, दन्तकोशश्च । **दन्त इवेति** । दन्तोऽप्येको गणाधिपस्य मुखे, समूहाधिपत्यप्रदाने च ॥ २ ॥

अथेत्यादौ राजवंशो निर्जगामेति संबन्धः । द्विजवरा विप्रोत्तमाः । ब्रह्मा च द्विजोत्तमः । कोषो गर्भः, कर्णिका च । पुण्डरीकेक्षणः कमललोचनः, विष्णुश्च । लक्ष्मीः पुरःसरा यस्य लक्ष्मीपुरःसरः । 'जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते' । मणयश्च रत्नानि । गुरव उपदेष्टारः । बुधाः पण्डिताः । कवयः काव्यकृतः । कलावन्तो गीतादिज्ञाः । तेजस्विनः शूराः । भूनन्दनाः राजानः । इतरत्र गुरुर्बृहस्पतिः । उदयः प्रभावोऽपि । महाभारो भूपालनरूपो विजयरूपो वा । तस्य निर्वहने योग्यः । सगरवत्प्रभावो यस्य तस्माद्राज्ञः, सगराणां च यः प्रभावस्तस्मात् । 'प्रभवात्' इति पाठे सगरवत्प्रकृष्टो भव उत्पत्तिर्यस्य तस्मात्, अन्यत्र सगरस्य यः प्रभवस्तस्मादिति व्याख्या । दुर्जयो दुरभिभवः । बलं प्राणाः, सैन्यं वा तेन युक्तः । ततः कर्मधारयः । अन्यत्र दुर्जयोऽजितो विष्णुः, बलो हलधरः, ताभ्यां सनाथः । शूराद्विक्रान्तात्, शूरश्च यदूनां राजा तस्मात् । अविनष्टेन पूर्णेन । धवलाः शुक्लाः । अविनष्टधर्मान्धवांल्लान्तीति वा कृतमुखात्संस्कृतात्,कृतयुगादेश्च । प्रताप आतपः,

णक्षमा दिग्गजा इव ब्रह्मकरात्, उदधीन्पातुमुद्यता जलधरा इव घनागमात्, इच्छाफलदायिनः कल्पतरव इव नन्दनात्, सर्वभूताश्रया विश्वरूपप्रकारा इव श्रीधरादजायन्त राजानः।

तेषु चैवमुत्पद्यमानेषु क्रमेणोदपादि हूणहरिणकेसरी सिन्धुराजज्वरो गुर्जरप्रजागरो गान्धाराधिपगन्धद्विपकूटपाकलो लाटपाटवपाटच्चरो मालवलक्ष्मीलतापरशुः प्रतापशील इति प्रथितापरनामा प्रभाकरवर्धनो नाम राजाधिराजः। यो राज्याङ्गसङ्गीन्यभिषिच्यमान एव मलानीव मुमोच धनानि। यः परकीयेनापि कातरबलभेन रणमुखे तृणेनेव धृतेनालज्जत जीवितेन। यः करधृतधौतासिप्रतिबिम्बितेनात्मनाप्यदूयत समितिषु सहायेन रिपूणां पुरः प्रधनेषु धनुषापि नमता। यो मानी मानसेनाखिद्यत। यश्चान्तर्गतापरिमितरिपुशल्यशङ्कुकीलितामिव निश्चलामुवाह राजलक्ष्मीम्। यश्च सर्वासु दिक्षु समीकृततटावटविटपाटवीतरुतृणगुल्मवल्मीकगिरिगहनैर्दण्डयात्रापथैः पृथुभिर्भृत्योपयोगाय व्यभजतेव वसुधां बहुधा। यं चालब्धयुद्धदोहदमात्मीयोऽपि सकलरिपुसमुत्सारकः परकीय इव ततापप्रतापः। यस्य च वह्निमयो हृदये-

---

रिपुभयजननी वार्ता च। विग्रहो विरोधः, देहश्च। भूभृतां राज्ञाम्, भूभृत्प्रभवो ब्रह्मा च। धारणं पालनम्, उद्वहनं च। ब्रह्म करोतीति ब्रह्मकरस्तस्मात्। सामानि गायतो ब्रह्मणः करात्करिण उत्पन्ना इति वार्ता। पातुं रक्षितुम्, ग्रासीकर्तुं च। घन आगम उपदेशो यस्य, घनागमश्च वर्षाकालः। नन्दयतीति नन्दनः, देवोद्यानं च। सर्वेषां भूतानां प्राणिनामाश्रया आश्रयणीयाः, सर्वस्य वा भूतस्याश्रयाः, सर्वेषां वा भूताः पारमार्थिका अत एवाश्रयणीयाः। श्रीधरो हरिरपि।

हूणादयो जनपदभेदाः। प्रजागरो निद्राक्षयः। 'स्वेदं मूत्रं पुरीषं च मज्जां चैव मतङ्गजाः। यस्याघ्राय विमाद्यन्ति तं विद्याद्गन्धहस्तिनम्॥ कूटपाकलो हस्तिज्वरः। यतो हूणाद्युन्मूलकोऽत एव प्रथितापरनामा राजा। राज्याङ्गान्यमात्याद्याः। अभिषिच्यमानो राज्ये प्रतिष्ठाप्यमानो यस्यामितः सिच्यते सोऽङ्गसङ्गीनि मलानि मुञ्चति। **कातरेति।** तृणं कातरैर्मुखे ध्रियते। तृणेनेति सहोपमा। मुखे तृणधारणमनौचित्यमेव पोषयति। धौतपदेन बिम्बस्वीकारसामर्थ्यमुक्तम्। समिदिन्धनं सङ्ग्रामश्च। निश्चलामनपायिनीं समीकृतास्तटावटा यैर्विटपाटवीयुक्तैस्तरुभिस्तथा तृणादिभिश्च गहनैः। विटपाः शाखाः। अटवी समूहः। गुल्मा जालकानि। वल्मीकः पिपीलककृतो मृत्कूटः। दण्डश्चतुरङ्गबलम्। तस्य यात्रापथैर्गमनमार्गैः। सीमास्थानीयै-

षु जलमयो लोचनपुटेषु मारुतमयो निःश्वसितेषु क्षमामयोऽङ्गेषु आकाशमयः शून्यतायां पञ्चमहाभूतमयो मूर्त इवादृश्यत निहतप्रतिसामन्तान्तःपुरेषु प्रतापः । यस्य चासन्नेषु भृत्यरत्नेषु प्रतिबिम्बितेव तुल्यरूपा समलक्ष्यत लक्ष्मीः । तथा च यस्य प्रतापाग्निना भूतिः शौर्योष्मणा सिद्धिरसिधाराजलेन वंशवृद्धिः शस्त्रव्रणमुखैः पुरुषकारोक्तिर्धनुर्गुणकिणेन करगृहीतिरभवत् । यश्च वैरमुपायनं विग्रहमनुग्रहं समरागमं महोत्सवं शत्रुं निधिदर्शनमरिबाहुल्यमभ्युदयमाहवाह्वानं वरप्रदानमवस्कन्दपातं दिष्टवृद्धिं शस्त्रप्रहारपतनं वसुधारासममन्यत । यस्मिंश्च राजनि निरन्तरैर्यूपनिकरैरङ्कुरितमिव कृतयुगेन, दिङ्मुखविसर्पिभिरध्वरधूमैः पलायितमिव कलिना, ससुधैः सुरालयैरवतीर्णमिव स्वर्गेण, सुरालयशिखरोद्धूयमानैर्धवलध्वजैः पल्लवितमिव धर्मेण, बहिरुपरचितविकटसभासत्रप्रपाप्राग्वंशमण्डपैः प्रसूतमिव ग्रामैः, काञ्चनमयसर्वोपकरणैर्विभवैर्विशीर्णमिव मेरुणा, द्विजदीयमानैरर्थकलशैः फलितमिव भाग्यसंपदा ।

तस्य च जन्मान्तरेऽपि सति पार्वतीव शंकरस्य, गृहीतपरहृदया लक्ष्मीरिव लोकगुरोः, स्फुरत्तरलतारका रोहिणीव कलावतः, सर्वजनजननी बुद्धिरिव प्रजापतेः, महाभूभृत्कुलोद्गता गङ्गेव वा-

---

र्व्यभजत खण्डशो व्यलभत । भूशय्यादिवशेन पांसुभृतत्वात्काठिन्याच्च क्षमामयः शून्यतायां निश्चेष्टत्वे। **आसन्नेष्विति** । आसन्नानि प्रतिबिम्बं गृह्णन्ति । भूतिः संपत्, भस्म च । ऊष्मा चान्नदाहिका शक्तिः।सिद्धिः पाकोऽपि।वंशो वेणुरपि । व्रणानां मुखान्यग्राणि । गुणान्येव वा मुखान्याननानि। मुखैः किलोक्तिर्भवति । करगृहीतिर्दण्डग्रहणम् । किणश्च व्यायामहस्त एव भवति । अज्ञातः शत्रुष्वभिगमोऽवस्कन्दः। दिष्टवृद्धिरानन्दवर्धनम् । धूमेनोत्प्रेक्षा कार्ष्ण्यात् । सुधा मक्कोलम्,अमृतं च। सभा सदः । उक्तं च–'समज्या परिषद्गोष्ठीसभासमितिसंसदः । आस्थानी क्लीबमास्थानं स्त्रीनपुंसकयोः सदः॥' सत्रं सदादानम् । 'सत्रमाच्छादने यज्ञे सदादाने वनेऽपि च'इत्युक्तम् । प्रपा यत्र तोयदानम् । प्राग्वंशः पत्नीशाला । उक्तं च–'प्राग्वंशः प्राग्घविर्गेहात्'इति । बहिरुपपादिता विकटाः सभासत्रप्रपाप्राग्वंशरूपा यैस्तैः ।

तस्येत्यादौ तस्य च महादेवी यशोवती नामाभूद्यास्य वक्षसि ललासेति संबन्धः । सती साध्वी,शोभना वा । जन्मान्तरे श्यामाया संज्ञैषा । शंकरस्येत्यादीनि महामुनिशब्दान्तानि राज्ञि योज्यानि । गृहीतमावर्तितम्।परहृदयं चेतः, वक्षश्च । लो-

हिनीनायकस्य, मानसानुवर्तनचतुरा हंसीव राजहंसस्य, सकललोकार्चितचरणा त्रयीव धर्मस्य, दिवानिशममुक्तपार्श्वस्थितिररुन्धतीव महामुनेः, हंसमयीव गतिषु, परपुष्टमयीवालापेषु, चक्रवाकमयीव पतिप्रेम्णि, प्रावृण्मयीव पयोधरोन्नतौ, मदिरामयीव विलासेषु, निधिमयीवार्थसंचयेषु, वसुधारामयीव प्रसादेषु, कमलमयीव कोषसंग्रहेषु, कुसुममयीव फलदानेषु संध्यामयीव वन्द्यत्वे, चन्द्रमयीव निरूष्मत्वे, दर्पणमयीव प्रतिप्राणिग्रहणेषु, सामुद्रमयीव परचित्तज्ञानेषु परमात्ममयीव व्याप्तिषु, स्मृतिमयीव पुण्यवृत्तिषु, मधुमयीव संभाषणेषु, अमृतमयीव तृष्यत्सु, वृष्टिमयीव भृत्येषु, निर्वृतिमयीव सखीषु, वेतसमयीव गुरुषु, गोत्रवृद्धिरिव विलासानाम्, प्रायश्चित्तशुद्धिरिव स्त्रीत्वस्य, आज्ञासिद्धिरिव मकरध्वजस्य, व्युत्थानबुद्धिरिव रूपस्य, दिष्टवृद्धिरिव रतेः, मनोरथसिद्धिरिव रामणीयकस्य, दैवसंपत्तिरिव लावण्यस्य, वंशोत्पत्तिरिवानुरागस्य, वरप्राप्तिरिव कान्तेः, सर्गसमाप्तिरिव सौन्दर्यस्य, आयतिरिव यौवनस्य, अनभ्रवृष्टिरिव वैदग्ध्यस्य, अयशःप्रमृष्टिरिव लक्ष्म्याः, यशःपुष्टिरिव चारित्रस्य, हृदयतुष्टिरिव धर्मस्य, सौभाग्यपरमाणुसृष्टिरिव प्रजापतेः, शमस्यापि शान्तिरिव, विनयस्यापि विनीतिरिव, आभिजात्यस्याप्यभिजातिरिव, संयमस्यापि संयतिरिव, धैर्यस्यापि धृतिरिव, विभ्रमस्यापि विभ्रान्तिरिव, यशो-

---

कगुरोर्हरेश्च । तारका कनीनिका, नक्षत्राणि च तारकाः । जननी मात्रा,जन्यतेऽनयेति जननी च । भूभृद्विरिरपि । कुलं समूहोऽपि । वाहिनी सेना,नदी च । मानसं चेतः, सरश्च । चरणौ पादौ, कडादिशाखाश्च चरणाः।धर्मोऽस्ति यस्य स धर्मः । अर्शआदित्वादच् । यद्वा साक्षादेव धर्मः । महामुनी राजर्षिः, वसिष्ठश्च । प्रावृट् वर्षा । पयोधरौ स्तनौ, मेघाश्च । पयोधराः वसुधरा धनवृष्टिः कोषो गजः कर्णिका च । ऊष्मा गर्वः, औष्ण्यं च । प्राणिनि प्राणिनि प्रतिप्राणि सर्वजन्तुविषये ग्रहणेष्वावर्जनेषु,प्रतिबिम्बोत्पादनेषु च।सामुद्रं समुद्रकृतं शास्त्रम्।येनान्यस्वभावो ज्ञायते । परमात्मनि व्याप्तिः सर्वगतत्वमनुष्ठेयकार्यम्, ज्ञानं चान्यत्र।अमृतं सुधा, तोयं च । वेतसमयीवेति नम्रत्वात् । **प्रायश्चित्तशुद्धिरिति** । स्त्रीत्वं तयोर्ज्ज्वलितं पवित्रितं वेत्यर्थः । व्युत्थानं समाधेश्चालनम् । आयतिः प्रतापः । **अनभ्रवृष्टिरिवेति** । यथा ह्यनभ्रवृष्टिराश्चर्यहेतुस्तथा वैदग्ध्यं तस्यामाश्चर्यम् । **शमस्यापीति** । शमे हि कश्चाशान्तो भवति । शमं संप्राप्य लब्धात्मलाभो जा-

वती नाम महादेवी प्राणानां प्रणयस्य विस्रम्भस्य धर्मस्य सुखस्य च भूमिरभूत् । यास्य वक्षसि नरकजितो लक्ष्मीरिव ललास ।

निसर्गत एव च स नृपतिरादित्यभक्तो बभूव । प्रतिदिनमुदये दिनकृतः स्नातः सितदुकूलधारी धवलकर्पटप्रावृतशिराः प्राङ्मुखः क्षितौ जानुभ्यां स्थित्वा कुङ्कुमपङ्कानुलिप्ते मण्डलके पवित्रपद्मरागपात्रीनिहितेन स्वहृदयेनेव सूर्यानुरक्तेन रक्तकमलषण्डेनार्चां ददौ । अजपच्च जप्यं सुचरितः प्रत्युषसि मध्यंदिने दिनान्ते चापत्यहेतोः प्राध्वं प्रयतेन मनसा जञ्जपूको मन्त्रमादित्यहृदयम् ।

भक्तजनानुरोधविधेयानि तु भवन्ति देवतानां मनांसि । यतः । स राजा कदाचिद्ग्रीष्मसमये यदृच्छया सितकरकरसितसुधाधवलस्य हर्म्यस्य पृष्ठे सुष्वाप । पार्श्वे चास्य द्वितीयशयने देवी यशोवती शिश्ये । परिणतप्रायायां तु श्यामायाम्, आसन्नप्रभातवेलाविलुप्यमानलावण्ये, लिलम्बिषमाणे सीदत्तेजसि तारकेश्वरे, करायस्पृष्टकुमुदिनीप्रमोदजन्मनि शशधरस्वेद इव गलत्यतिशीतलेऽवश्यायपयसि, मधुमदमत्तप्रसुप्तसीमन्तिनीनिःश्वासाहतेषु संक्रान्तमदेष्विव घूर्णमानेष्वन्तःपुरप्रदीपेषु राजनि च विमलनखप्रतिबिम्बिताभिः संवाह्यमानचरण इव तारकाभिर्विस्रब्धप्रसारितैर्दिगङ्गनानामिवार्पितैरङ्गैर्मधुसुगन्धिभिः स्वहस्तकमलतालवृन्तवातैरिव श्वसितैर्मुखश्रिया वीज्यमाने विमलकपोलस्थलस्थितेन सितकुसुमशेखरेणेव रतिकेलिकचग्रहलम्बितेन प्रतिमाशशिबिम्बेन विराजिते स्वपति देवी यशोवती सहसैव 'आर्यपुत्र, परित्रायस्व परित्रायस्व' इति भाषमाणा भूषणरवेण व्याहरन्तीव परिजनमुत्कम्पमानाङ्गयष्टिरुदतिष्ठत् ।

यते । इत्येवमुत्तरत्रापि व्याख्याक्रमः । आभिजात्यस्य कुलोचितत्वस्य । नरको नामासुरः, यातनास्थानानि च नरकाः ।

स्वहृदयेनेवेति । स्वहृदयमपि सूर्यानुरक्तम् । प्राध्वं प्रह्वः । जञ्जपूकशब्दो जपासक्ततां लक्षयति ।

द्वितीयेत्यादिनास्य सदाचारनिष्ठोक्ता । उक्तं हि—'नाश्नीयाद्भार्यया सार्कं न च सुप्यात्तया समम्' इति । परिणतेत्यादावस्मिन्सति देवी यशोवत्युदतिष्ठदिति संबन्धः । तारकेश्वरे । करा रश्मयः, हस्तश्च करः । सीमन्तिनी ललना । संवाह्यमानानुपद्यमाना । अङ्गैरितीत्थंभूतलक्षणे तृतीया । मधु मद्यम् । तद्वत् । मधु मकरन्दः तालवृन्तमुत्क्षेपकः । सितग्रहणेन चन्द्रसादृश्यमाह ।

अथ तेन सर्वस्यामपि पृथिव्यामश्रुतपूर्वेण किमुत देवीमुखे परित्रायस्वेति ध्वनिना दग्ध इव श्रवणयोरेकपद एव निद्रां तत्याज राजा। शिरोभागाच्च कोपकम्पमानदक्षिणकराकृष्टेन कर्णोत्पलेनेव निर्गच्छताच्छधारेण धौतासिना सीमन्तयन्निव निशामन्तरालव्यवधायकमाकाशमिवोत्तरीयांशुकं विक्षिपन्वामकरपल्लवेन करविक्षेपवेगगलितेन हृदयेनेव भयनिमित्तान्वेषिणा भ्रमता दिक्षु कनकवलयेन विराजमानः, सत्वरावतारितवामचरणाक्रान्तिकम्पितप्रासादः, पुरःपतितेनासिधारागोचरगतेन शशिमयूखखण्डेनेव खण्डितेन हारेण राजमानः, लक्ष्मीचुम्बनलग्नताम्बूलरसरञ्जिताभ्यामिव निद्रया कोपेन चातिलोहिताभ्यां लोचनाभ्यां पाटलयन्पर्यन्तानाशानाम्, बद्धान्धकारया त्रिपताकया भ्रुकुट्या पुनरिव त्रियामां परिवर्तयन् 'देवि, न भेतव्यं न भेतव्यं' इत्यभिदधानो वेगेनोत्पपात। सर्वासु च दिक्षु विक्षिप्तचक्षुर्यदा नाद्राक्षीत्किंचिदपि तदा पप्रच्छ तां भयकारणम्।

अथ गृहदेवतास्विव प्रधावितासु यामकिनीषु, प्रबुद्धे च समीपशायिनि परिजने, शान्ते च हृदयोत्कम्पकारिणी साध्वसे सा समभाषत—'आर्यपुत्र, जानामि स्वप्ने भगवतः सवितुर्मण्डलान्निर्गत्य द्वौ कुमारकौ, तेजोमयौ, बालातपेनेव पूरयन्तौ दिग्भागान्, वैद्युतमिव जीवलोकं कुर्वाणौ, मुकुटिनौ, कुण्डलिनौ, अङ्गदिनौ, कवचिनौ, गृहीतशस्त्रौ, इन्द्रगोपकरुचा रुधिरेण स्नातौ उन्मुखेनोत्तमाङ्गघटमानाञ्जलिना जगता निखिलेन प्रणम्यमानौ, कन्यया-कया च चन्द्रमूर्त्येव सुषुम्णरश्मिनिर्गतयानुगम्यमानौ, क्षितितलमवतीर्णौ। तौ च मे विलपन्त्याः शस्त्रेणोदरं विदार्य प्रवेष्टुमारब्धौ। प्रतिबुद्धास्मि चार्यपुत्रं विक्रोशयन्ती वेपमानहृदया' इति।

एतस्मिन्नेव च कालक्रमे राजलक्ष्म्याः प्रथमालापः प्रथयन्निव स्वप्नफलमुपतोरणं रराण प्रभातशङ्खः। भाविनीं भूतिमिवाभिद-

---

एकपदे तत्क्षणम्। शिरोभागाच्चेत्यादौ राजा वेगेनोत्पपातेति संबन्धः। सीमन्तयन्द्विधाकुर्वन्। त्रिपताकया त्रिरेखया

यामकिनीषु जागरिकासु। मुकुटिनौ मौलियुक्तौ। अङ्गदिनौ सकेयूरौ। इन्द्रगोपकः खद्योतः। सुषुम्णाख्योऽमृतमयो रविरश्मिः।

धाना दध्वनुरमन्दं दुन्दुभयः। चकाण कोणाहतानन्दादिव प्रत्यूषनान्दी। जयजयेति प्रबोधमङ्गलपाठकानामुच्चैर्वाचोऽशृण्वन्त। पुरुषश्च वल्लभतुरङ्गमन्दुरामन्दिरे मन्दमन्दं सुप्तोत्थितः सप्तीनां कृतमधुरहेषारवाणां पुरश्चोतत्तुषारसलिलशीकरं किरन्मरकतहरितं यवसं वक्त्रापरवक्त्रे पपाठ—

'निधिस्तरुविकारेण सन्मणिः स्फुरता धाम्ना।
शुभागमो निमित्तेन स्पष्टमाख्यायते लोके॥ ३॥
अरुण इव पुरःसरो रविं पवन इवातिजवो जलागमम्।
शुभमशुभमथापि वा नृणां कथयति पूर्वनिदर्शनोदयः'॥ ४॥

नरपतिस्तु तच्छ्रुत्वा प्रीयमाणेनान्तःकरणेन तामवादीत्—'देवि, मुदोऽवसरे विषीदसि। समृद्धास्ते गुरुजनाशिषः। पूर्णा नो मनोरथाः। परिगृहीतासि कुलदेवताभिः। प्रसन्नस्ते भगवानंशुमाली नचिरेणैवातिगुणवदपत्यत्रयलाभेनानन्दयिष्यति भवतीम्' इति। अवतीर्य च यथाक्रियमाणाः क्रियाश्चकार। यशोवत्यपि तुतोष तेन पत्युर्भाषितेन।

ततः समतिक्रान्ते कस्मिंश्चित्कालांशे देव्यां च यशोवत्यां देवो राज्यवर्धनः प्रथममेव संबभूव गर्भे। गर्भस्थितस्यैव च यस्य यशसेव पाण्डुतामादत्त जननी। गुणगौरवक्रान्तेव गात्रमुद्वोढुं न शशाक। कान्तिविसरामृतरसतृप्तेवाहारं प्रति पराङ्मुखीबभूव। शनैः शनैरुपचीयमानगर्भभरालसा च गुरुभिर्वारितापि वन्दनाय कथमपि सखीभिर्हस्तावलम्बेनानीयत। विश्राम्यन्ती सालभञ्जिकेव समीपगतस्तम्भभित्तिष्वलक्ष्यत। कमललोभनिलीनैरलिभिरिव वृतावुद्धर्तुं नाशकच्चरणौ। मृणाललोभेन च चरणनखमयूखलग्नैर्भवनहंसैरिव संचार्यमाणा मन्दमन्दं बभ्राम। मणिभित्तिपातिनीषु प्रतिमास्वपि हस्तावलम्बनलोभेन प्रसारयामास करकमलम्, किमुत सखीषु। माणिक्यस्तम्भदीधितीरप्यालम्बितुमाचकाङ्क्ष, किं पुनर्भवनलताः। समादेष्टुमप्यसमर्थासीद्गृहकार्याणि, कैव कथा क-

---

कोणो वादनभाण्डम्। नान्दी भेरी। वल्लभेत्यादिना पुरुषस्य नैकव्यमाह। सप्तयोऽश्वाः। यवसं घासम्। 'नान्द्याः प्रायोऽम्बुधेर्वक्त्रम्' इति वक्त्रलक्षणम्। अपरवक्त्रं प्रसिद्धम्। **तत्रविकारेणेति**। यत्राधोनिधिस्तत्र परिणाहोदूताधोमुखशाखामूलादिभा-

र्तुम्। आस्तां नूपुरभारखेदितं चरणयुगलं मनसापि नोदसहत सौधमारोढुम्। अङ्गान्यपि नाशक्नोद्धारयितुं दूरे भूषणानि। चिन्तयित्वापि क्रीडापर्वताधिरोहणमुत्कम्पितस्तनी तस्तान। प्रत्युत्थानेषूभयजानुशिखरविनिहितकरकिसलयापि गर्वादिव गर्भेणाधार्यत। दिवसं चाधोमुखी स्तनपृष्ठसंक्रान्तेनापत्यदर्शनौत्सुक्यादन्तःप्रविष्टेनेव मुखकमलेनैवं प्रीयमाणा ददर्श गर्भम्। उदरे तनयेन हृदये च भर्त्रा तिष्ठता द्विगुणितामिव लक्ष्मीमुवाह। सख्युत्सङ्गमुक्तशरीरा च शरीरपरिचारिकाणामङ्केषु सपत्नीनां तु शिरःसु पादौ चकार। अवतीर्णे च दशमे मासि सर्वोर्वीभृत्पक्षपाताय वज्रपरमाणुभिरिव निर्मितम्, त्रिभुवनभारधारणसमर्थं शेषफणामण्डलोपकरणैरिव कल्पितम्, सकलभूभृत्कम्पकारिणं दिग्गजावयवैरिव विहितमसूत देवं राज्यवर्धनम्। यस्मिञ्जाते जातप्रमोदा नृत्यमग्य इवाजायन्त प्रजाः। पूरितासंख्यशङ्खशब्दमुखरं प्रहतपटहशतपटुरवं गम्भीरभेरीनिनादनिर्भरभरितभुवनं प्रमोदोन्मत्तमर्त्यलोकमनोहरं मासमेकं दिवसमिव महोत्सवमकरोन्नरपतिः।

अथान्यस्मिन्नतिक्रान्ते कस्मिंश्चित्काले कन्दलिनि कुड्मलितकदम्बतरौ तोक्मतृणस्तम्बे स्तम्भिततामरसे विकसितचातकचेतसि मूकमानसौकसि नभसि देव्या देवक्या इव चक्रपाणिर्यशोवत्या हृदये गर्भे च सममेव संबभूव हर्षः। शनैः शनैश्चास्याः सर्वप्रजापुण्यैरिव परिगृहीता भूयोऽप्यापाण्डुतामङ्गयष्टिर्जगाम। गर्भारम्भेण श्यामायमानचारुचूचुकचूलिकौ चक्रवर्तिनः पातुं मुद्रितावि पयोधरकलशौ बभार। स्तन्यार्थमाननिहिता दुग्धनदीव दीर्घस्निग्धधवला माधुर्यमधत्त दृष्टिः। सकलमङ्गलगणाधिष्ठितगा-

---

जो वृक्षा भवन्ति। निदर्शनं निमित्तम्।समृद्धाः परिपूर्णाः।परिगृहीता अङ्गीकृता।

उर्वीभृतो राजानः पर्वताश्च। पक्षाः समूहाः, पतत्राणि च। पातः पतनम्, शातनं च।

कन्दलानी लताभेदः। नीरंतोयम्। मानसौकसो हंसाः। नभसि श्रावणे।यशोवत्या देव्याः। चक्रपाणिः कृष्णःरेखाकारं च चक्रं पाणौ यस्य। देवक्या अपि यशोवत्याः। प्रमोदो हर्षः। **पुण्यैरिवेति**। पुण्यानां स्वभावशुद्धित्वात्। स्तनयोर्भवं स्तन्यं क्षीरम्। अपाश्रयः पर्यङ्कः। उन्माथः खेदः। चन्द्रशाला धवलगृहस्यो-

त्रगरिम्णेव गतिरमन्दायत । मन्दंमन्दं संचरन्त्या निर्मलकुट्टिमनिमग्नप्रतिविम्बनिभेन गृहीतपादपल्लवा पूर्वसेवामिवारेभे पृथिव्यस्याः । दिवसमधिशयानायाः शयनीयमपाश्रयपत्रभङ्गपुत्रिकाप्रतिमा विमलकपोलोदरगता प्रसवसमयं प्रतिपालयन्ती लक्ष्मीरिवालक्ष्यत । क्षपासु सौधशिखराग्रगताया गर्भोन्माथमुक्तांशुके स्तनमण्डले संक्रान्तमुडुपतिमण्डलमुपरि गर्भस्य श्वेतातपत्रमिव केनापि धार्यमाणमदृश्यत । सुप्तया वासभवने चित्रभित्तिचामरग्राहिण्योऽपि चामराणि चालयांचक्रुः । स्वप्नेषु करविधृतकमलिनीपलाशपुटसलिलैश्चतुर्भिरपि दिक्करिभिरक्रियतामभिषेकः । प्रतिबुध्यमानायाश्च चन्द्रशालिकासालभञ्जिकापरिजनो जयशब्दमसकृदजनयत् । परिजनाह्वानेष्वादिशेत्यशरीरा वाचो निश्चेरुः । क्रीडायामपि नासहताज्ञाभङ्गम् । अपि च चतुर्णामपि महार्णवानामेकीकृतेनाम्भसा स्नातुं वाञ्छा बभूव । वेलालतागृहोदरपुलिनपरिसरेषु पर्यटितुं हृदयमभिललाष । आत्ययिकेष्वपि कार्येषु सविभ्रमं भ्रूलता चचाल । संनिहितेष्वपि मणिदर्पणेषु मुखमुत्खाते खड्गपट्टे वीक्षितुं व्यसनमासीत् । उत्सारितवीणाः स्त्रीजनविरुद्धा धनुर्ध्वनयः श्रुतावसुखायन्त । पञ्जरकेसरिषु चक्षुररमत । गुरुप्रणामेष्वपि स्तम्भितमिव शिरः कथमपि ननाम । सख्यश्चास्याः प्रमोदविस्फारितैर्लोचनपुटैरासन्नप्रसवमहोत्सवधियेव धवलयन्तो भवनं विकचकुमुदकमलकुवलयपलाशवृष्टिमयं रक्षाबलिविधिमिवानवरतं विदधाना दिक्षु क्षणमपि न मुमुचुः पार्श्वम् । आत्मोचितस्थाननिषण्णाश्च महान्तो विविधौषधिधरा भिषजो भूधरा इव भुवो धृतिं चक्रुः । पयोनिधीनां हृदयानीव लक्ष्म्या सहागतानि श्रीवासूत्रग्रन्थिषु प्रशस्तरत्नान्यबध्यन्त ।

परि प्रासादिकायामन्तर्धारणीत्युच्यते।गर्भस्थजनचित्तवृत्त्यनुसारेण गर्भिण्या अपि चित्तवृत्तिर्भवति । यतो वार्ता श्रूयते । ततश्चतुर्णामित्युक्तम् । परिसरः पर्यन्तः । आत्ययिकेष्ववश्यकर्तव्येषु । महान्तः प्रभाविताः, उच्छ्रिताश्च । विविधा ओषधीर्धारयन्ति ये ते विविधा ओषधयो यासु ताः धरा भूमयो येषां ते च । धृतिर्धैर्यम्, धारणं च । **लक्ष्म्या सहेति** । लक्ष्मीर्हि पयोधिसुता । प्रशस्तरत्नानीति कर्मधारयः, अन्यत्र बहुव्रीहिः ।

ततश्च प्राप्ते ज्येष्ठामूलीये मासि बहुलासु बहुलपक्षद्वादश्यां व्यतीते प्रदोषसमये समारुरुक्षति क्षपायौवने सहसैवान्तःपुरे समुदपादि कोलाहलः स्त्रीजनस्य । निर्गत्य च ससंभ्रमं यशोवत्याः स्वयमेव हृदयनिर्विशेषा धात्र्याः सुता सुयात्रेति नाम्ना राज्ञः पादयोर्निपत्य 'देव, दिष्ट्या वर्धसे द्वितीयसुतजन्मना' इति व्याहरन्ती पूर्णपात्रं जहार ।

अस्मिन्नेव च काले राज्ञः परमसंमतः शतशः संवादितातीन्द्रियादेशो दर्शितप्रभावः संकलिती ज्योतिषी सर्वासां ग्रहसंहितानां पारदृश्वा सकलगणकमध्ये महितो हितश्च त्रिकालज्ञानभाग्भोजकस्तारको नाम गणकः समुपसृत्य विज्ञापितवान्—'देव, श्रूयताम् । मांधाता किलैवंविधे व्यतीपातादिसर्वदोषाभिषङ्गरहितेऽहनि सर्वेषूच्चस्थानस्थितेष्वेवं ग्रहेष्वीदृशि लग्ने भेजे जन्म । अर्वाक्ततोऽस्मिन्नन्तराले पुनरेवंविधे योगे चक्रवर्तिजनने नाजनि जगति कश्चिदपरः । सप्तानां चक्रवर्तिनामग्रणीश्चक्रवर्तिचिह्नानां महारत्नानां च भाजनं सप्तानां सागराणां पालयिता सप्ततन्तूनां सर्वेषां प्रवर्तयिता सप्तसप्तिसमः सुतोऽयं देवस्य जातः' इति ।

अत्रान्तरे स्वयमेवानाध्माता अपि तारमधुरं शङ्खा विरेसुः ।

ज्येष्ठामूलीयो मासो ज्यैष्ठः । बहुलासु कृत्तिकासु । बहुलपक्षः कृष्णपक्षः । पूर्णपात्रं यथापरिहृतवस्त्रादि । उक्तं च—'आनन्ददोहि सौहार्दादेत्य वस्त्रादिकं बलात् । अजानतो हरत्येव पूर्णपात्रं तु तत्स्मृतम् ॥' इति ।

संवादितः प्रत्यक्षीकृतः । अतीन्द्रियादेशो भाविकथनम् । संकलिती गणनाज्ञः । पारदृश्वा पर्यन्तदर्शी । भोजको रविमर्चयित्वा पूजका हि भूयसा गणका भवन्ति । येमगा इति प्रसिद्धाः । भागवता इत्यन्ये । व्योम्नि चन्द्रार्कौ राशिषट्के यदैकमार्गस्थितौ भवतः स व्यतीपातः । उक्तं च लाटाचार्येण—'गगने हिमकरसूर्यौ युगपत्स्यातां यदैकमार्गस्थौ । भगणार्धेऽर्कश्च यदा शशी स भवेद्व्यतीपातः ॥' इति । अभिषङ्गः संबन्धः । अर्वाक्पश्चात् । **चक्रवर्तिनामिति** । भरतार्जुनमांधातृभगीरथयुधिष्ठिराः । सगरो नहुषश्चैव सप्तैते चक्रवर्तिनः ॥ कूर्मोर्णो जालहस्तित्वं पद्मादि जालचरणलमित्यादि चक्रवर्तिचिह्नानि । 'मण्यश्वकरिचक्राणि वरा स्त्री परिनायकः । षडेतानि तु रत्नानि कीर्तितानि मनीषिभिः ॥' परिनायकः सेनापतिः । गृहनायको गजाध्यक्षः । सप्ततंतूनां यज्ञानाम् । सप्तसप्तिः सूर्यः ।

अनाध्माता मुखानिलेनापूरिताः । दुन्दुभिरानकः । तूर्याणि वादित्राणि घोषण

अताडितोऽपि क्षुभितजलनिधिजलध्वनिधीरं जुगुञ्जाभिषेकदुन्दुभिः । अनाहतान्यपि मङ्गलतूर्याणि रेणुः । सर्वभुवनाभयघोषणापटह इव दिगन्तरेषु बभ्राम तूर्यप्रतिशब्दः । विधुतकेसरसटाश्च साटोपगृहीतहरितदूर्वापल्लवकवलप्रशस्तैर्मुखपुटैः समहेषन्त हृष्टा वाजिनः । सलीलमुत्क्षिप्तैर्हस्तपल्लवैर्नृत्यन्त इव श्रवणसुभगं जगर्जुर्गजाः । ववौ चाचिराच्चक्रायुधमुत्सृजन्त्या लक्ष्म्या निःश्वास इव सुरामोदसुरभिर्दिव्यानिलः । यज्वनां मन्दिरेषु प्रदक्षिणशिखाकलापकथितकल्याणागमाः प्रजज्वलुरनिन्धना वैतानवह्नयः । भुवस्तलात्तपनीयशृङ्खलाबन्धबन्धुरकलशीकोशाः समुदगुर्महानिधयः । प्रहतमङ्गलतूर्यप्रतिशब्दनिभेन दिक्षु दिक्पालैरपि प्रमोदादक्रियतेव दिष्टवृद्धिकलकलः । तत्क्षण एव च शुक्लवाससो ब्रह्ममुखाः कृतयुगप्रजापतय इव प्रजावृद्धये समुपतस्थिरे द्विजातयः । साक्षाद्धर्म इव शान्त्युदकफलहस्तस्तस्थौ पुरः पुरोधाः । पुरातन्यः स्थितय इवादृश्यन्तागता बान्धववृद्धाः । प्रलम्बश्मश्रुजालजटिलाननानि बहलमलपङ्ककलङ्ककालकायानि नश्यतः कलिकालस्य बान्धवकुलानीवाकुलान्यधावन्त मुक्तानि बन्धनवृन्दानि । तत्कालापक्रान्तस्याधर्मस्य शिबिरश्रेणय इवालक्ष्यन्त लोकविलुण्ठिता विपणिवीथ्यः । विलसदुन्मुखवामनकबधिरवृन्दवेष्टिताः साक्षाज्जातमातृदेवता इव बहुबालकव्याकुला ननृतुर्वृद्धधात्र्यः । प्रावर्तत च विगतराजकुलस्थितिरधःकृतप्रतीहाराकृतिरपनीतवेत्रिवेत्रो निर्दोषान्तःपुरप्रवेशः समस्वामिपरिजनो निर्विशेषबालवृद्धः समानशिष्टाशिष्टजनो दुर्ज्ञेयमत्तामत्तप्रविभागस्तुल्यकुलयुवतिवेश्याविलासः प्रनृत्तसकलकटकलोकः पुत्रजन्मोत्सवो महान् ।

अपरेद्युरारभ्य सर्वाभ्यो दिग्भ्यः स्त्रीराज्यानीवावर्जितानि, असुरविवराणीवापावृतानि, नारायणावरोधानीव प्रचलितानि, अ-

---

श्रावणा । ग्रीवारोमवल्लयस्त एव सटाः।कवलं ग्रासः।यज्वनां यज्ञयाजिनाम् ।वितानेयज्ञे भवा वैतानाः । तपनीयं सुवर्णम् । बन्धुरो ह्यः । कोश आवरणम् । ब्रह्ममुखा वेदवदना अपि । पुरोधाः पुरोहितः । विपणिवीथ्यो वणिक्पथपङ्क्तयः । जातमातृदेवता मार्जारानना । बहुपुत्रपरिवारा सूतिकागृहे स्थाप्यते । अवरोधोऽन्तःपुरम् ।

अपरेद्युरित्यादाविदमिदं बिभ्राणेन परिजनेनानुगम्यमानानि सामन्तान्तःपुरसहस्राण्यदृश्यन्तेति संबन्धः । स्त्रीराज्यानीति बहुललम् । असुरविवराणीवेत्यु-

प्सरसामिव महीमवतीर्णानि कुलानि, परिजनेन पृथुकरण्डपरिगृहीताः स्नानीयचूर्णावकीर्णकुसुमाः सुमनःस्रजः, स्फटिकशिलाशकलशुक्तिकर्पूरखण्डपूरिताः पाली:, कुङ्कुमाधिवासभाञ्जि भाजनानि च मणिमयानि, सहकारतैलतिम्यत्तनुखदिरकेसरजालजटिलानि चन्दनधवलपूगफलफालीदन्तुरदन्तशफरुकाणि, गुञ्जन्मधुकरकुलपीयमानपारिजातपरिमलानि पाटलानि पोटलकानि च, सिन्दूरपात्राणि च पिष्टातकपात्राणि च वाललताल्म्बमानविटकवीटकांश्च ताम्बूलवृक्षान्बिभ्राणेनानुगम्यमानानि चरणनिकुट्टनरणितमणिनूपुरमुखरितदिङ्मुखानि नृत्यन्ति राजकुलमागच्छन्ति समन्तात्सामन्तान्तःपुरसहस्राण्यदृश्यन्त ।

शनैः शनैर्व्यजृम्भत च कचिन्नृत्तानुचितचिरंतनशालीनकुलपुत्रकलोकलास्यप्रथितपार्थिवानुरागः कचिदन्तःस्मितक्षितिपालापेक्षितक्षीबक्षुद्रदासीसमाकृष्यमाणराजवल्लभः कचिन्मत्तकटककुट्टनीकण्ठलग्नवृद्धार्यसामन्तनृत्तनिर्भरहसितनरपतिः कचित्क्षितिपाक्षिसंज्ञादिष्टदुष्टदासेरकगीतसूच्यमानसचिवचौर्यरतप्रपञ्चः कचिन्मदोत्कटकुटहारिकापरिष्वज्यमानजरत्प्रव्रजितजनितजनहासः कचिदन्योन्यनिर्भरस्पर्धोद्धुरचेटकपेटकारब्धावाच्यवचनयुद्धः कचिन्नृपावलाबलात्कारनर्त्यमाननृत्यानभिज्ञान्तःपुरपालभावितभुजिष्यः, सपर्वत इव कुसुमराशिभिः, सधारागृह इव सीधुप्रपाभिः, सनन्दनवन इव पारिजातकामोदैः, सनीहार इव कर्पूररेणुभिः, साट्टहास इव पटहरवैः, सामृतमथन इव कलकलैः, सावर्त इव रासकमण्डलैः, सरोमाञ्च इव भूषणमणिकिरणैः, सपट्टबन्ध इव चन्द-

---

ज्ज्वलत्वात् । नारायणेत्यादिगौरववत्त्वाद्बहुलत्वाच्च । स्नानीयं स्नानहितम् । खदिरकेसरं खदिरसारम् । फाली खाता । शफरुकाणि समुद्गाः । पारिजातं सुगन्धिद्रव्यचूर्णम् । 'पिष्टातः पटवासकः' इत्यमरसिंहः । स च मङ्गलार्थः । विटकवीटकं पञ्चाशत्ताम्बूलपत्रैः क्रियते ।

शनैः शनैरित्यादौ व्यजृम्भतोत्सवामोद इति संबन्धः । शालीनमधृष्टता । दास्या अपत्यं दासेरकः । 'क्षुद्राभ्यो वा' इत्यारक् । सचिवो मन्त्री । रतं सुरतम् । कुटहारिका कुम्भदासी । गायकनर्तकभुजिष्याजनरचितः समूहश्चेटकः । अवाच्यवचना गाल्यः । भाविताः कथं नृत्यन्तीत्यवलोकिताः । भुजिष्या दास्यः । रासकमण्डलैरित्यत्रभ्रान्त-

नललाटिकाभिः, सप्रसव इव प्रतिशब्दकैः, सप्ररोह इव प्रसाद-दानैरुत्सवामोदः ।

स्कन्धावलम्बमानकेसरमालाः काम्बोजवाजिन इवास्कन्दन्त-स्तरलतारका हरिणा इवोड्डीयमानाः सगरसुता इव खनित्रैर्निर्द-यैश्चरणाभिघातैर्दारयन्तो भुवमनेकसहस्रसंख्याश्चिक्रीडुर्युवानः । कथमपि तालावचरचारणचरणक्षोभं चक्षमे क्षमा । क्षितिपालकु-मारकाणां खेलतामन्योन्यस्फालैराभरणेषु मुक्ताफलानि फेलुः । सिन्दूररेणुना पुनरुत्पन्नहिरण्यगर्भगर्भशोणितशोणाशमिव ब्रह्मा-ण्डकपालमभवत् । पटवासपांशुपटलेन प्रकटितमन्दाकिनीसैकतस-हस्रमिव शुशुभे नभस्तलम् । विप्रकीर्यमाणपिष्टातकपरागपिञ्जरि-तातपा भुवनक्षोभविशीर्णपितामहकमलकिञ्जल्करजोराजिरञ्जिता इव रेजुर्दिवसाः । संघट्टविघटितहारपतितमुक्ताफलपटलेषु चस्खा-ल लोकः ।

स्थानस्थानेषु च मन्दमन्दमास्फाल्यमानालिङ्ग्यकेन शिञ्जान-मञ्जुवेणुना झणझणायमानझल्लरीकेण ताड्यमानतन्त्रीपटहिकेन वा-द्यमानानुत्तानालाबुवीणेन कलकांस्यकोशीकणितकाहलेन समका-लदीयमानानुत्तालतानकेनातोद्यवाद्येनानुगम्यमानाः, पदे पदे झ-णझणितभूषणरयैरपि सहृदयैरिवानुवर्तमानताललयाः, कोकिला इव मदकलकाकलीकोमलालापिन्यो विटानां कर्णामृतान्यश्नी-

---

नृत्तवृन्दैः । ललाटेऽलंकारो ललाटिका । 'कर्णललाटात्कनलंकारे' । प्ररोहोऽङ्कुरः ।

केसराणि बकुलानि, ग्रीवारोमवल्लयश्च । काम्बोजा वाह्निकदेशजाः । आस्कन्दन्त आक्रमन्तः । तालैरवचरन्ति तालावचराः । तालावचरमुक्तं भ्रमणम् । स्फुटितालि-काशतैर्युक्तं चारणजनस्य कैश्चिद्भ्रमणम् । तत्कांस्यतालिकयाराडाशिष्टापच्चकुलमारि-वकाः । दक्षिणापथे तालावा इति प्रसिद्धाः । खेलतां क्रीडताम् । फेलुर्बिभिदुः । शोणाशं लोहितदिक्कम् ।

स्थानस्थानेष्वित्यादावेवंविधेनातोद्येनानुगम्यमानाः पण्यविलासिन्यः प्रानृत्यन्नि-ति संबन्धः । आलिङ्ग्यको मुरजभेदः। तन्त्री पटहिका, पटहभेदः । न उत्ताला अनु-त्ताला अनुद्भटशब्दाः । कांस्यकोशी शय्या । काहलेन व्याप्तेन। काहलं कांस्यद्वयाभि-घातः । **आतोद्यमिति** । उक्तं च—'ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् । वं-शादिकं तु सुषिरं कांस्यतालादिकं घनम् । चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम्॥' इति। लयशब्देन ताल एव माननिधानं यतीनामवच्छेदेन विधिं निवर्तयमानोद्रुतम-ध्यविलम्बिताख्यमानवर्तनविधौ । स एव तालस्तु छेदमलङ्घमानः स्यात् । व्यपदेशो

लरासकपदानि गायन्त्यः, समुण्डमालिकाः, सकर्णपल्लवाः, सचन्दनतिलकाः, समुच्छ्रिताभिर्वलयावलीवाचालाभिर्बाहुलतिकाभिः सवितारमिवालिङ्गयन्त्यः, कुङ्कुमप्रमृष्टिरुचिरकायाः काश्मीरकिशोर्य इव वल्गन्त्यः, नितम्बबिम्बलम्बिविकटकुरण्टकशेखराः प्रदीप्ता इव रागाग्निना, सिन्दूरच्छटाच्छुरितमुखमुद्राः शासनपट्टपङ्क्तय इवाप्रतिहतशासनस्य कंदर्पस्य, मुष्टिप्रकीर्यमाणकर्पूरपटवासपांसुला मनोरथसंचरणरथ्या इव यावनस्योद्दामकुसुमदामताडिततरुणजनाः प्रतीहार्य इव तरुणमहोत्सवस्य, प्रचलत्पत्रकुण्डला लसन्त्यो लता इव मदनचन्दनद्रुमस्य, ललितपदहंसकरवमुखराः समुल्लसन्त्यो वीचय इव शृङ्गाररसस्य, वाच्यावाच्यविवेकशून्या बालक्रीडा इव सौभाग्यस्य, घनपटहरवोत्कण्टकितगात्रयष्टयः केतक्य इव कुसुमधूलिमुद्गिरन्त्यः, कमलिन्य इव दिवसमुत्फुल्लाननाः, कुमुदिन्य इव रात्रावनुपजातनिद्राः, आविष्टा इव नरेन्द्रवृन्दपरिवृताः, प्रीतय इव हृदयमपहरन्त्यः, गीतय इव रागमुद्दीपयन्त्यः, पुष्टय इवानन्दमुत्पादयन्त्यः, मदमपि मदयन्त्य इव, रागमपि रञ्जयन्त्य इव, आनन्दमपि आनन्दयन्त्य इव, नृत्यमपि नर्तयमाना इव, उत्सवमप्युत्सुकयन्त्य इव, कटाक्षितेषु पिबन्त्य इवापाङ्गशुक्तिभिः, तर्जनेषु संयमयन्त्य इव नखमयूखपाशैः, कोपाभिनयेषु ताडयन्त्य इव भ्रूलतादिभागैः, प्रणयसंभाषणेषु वर्षन्त्य इव

लय इति ख्यात इति। मदेन कलो हृष्टः। काकली कलसूक्ष्ममधुरगीतध्वनिः। अश्लीलानि ग्राम्याणि। कुङ्कुमेन परिमृष्टिः परिमार्जनमुद्वर्तनादि। अन्यत्र कुङ्कुमप्रमृष्टिः कुङ्कुमस्थलीषु लोठनात्। कुरण्टका आम्लातकानि। तेषां रक्तत्वमाह—**प्रदीप्ता इति**। मुखमुद्रा वक्त्रटङ्कः। शासनपट्टानां मुखेऽग्रे या मुद्रा दीयन्ते ता अपि ससिन्दूराः। **मनोरथेत्यादि**।रथाश्च रथ्यासु संचरन्ति। तद्वशात्पांसुला अपि भवन्ति। **उद्दामेति**। प्रतीहार्यश्चता अप्येवंविधा भवन्ति। प्रचलन्ति नृत्तवशाद्दोलायमानानि पत्राणि विशेषकानि तथा कुण्डलानि यासाम्। अन्यत्र पत्राणि पल्लवाः। कुण्डलानि समूहाः। ललितेषु पदेषु हंसका नूपुराः।'पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम्'। 'हंसकः पादकटकः' इति। यद्वा ललितानि पदानि यासां ताश्च ता हंसकरवमुखराश्च। ललितपदाश्च ते हंसा एव हंसकाश्चेति वा। बालक्रीडाश्च विवेकशून्यः। घनो निरन्तरम्, मेघश्च। केतक्योऽपि सकेतकरजस्काः। निद्रा स्वापः, संकोचश्च। आविष्टा भूतादिगृहीताः। नरेन्द्रो राजा, मन्त्री च। रागो-

सर्वरसान्, चतुरचङ्क्रमणेषु विकिरन्त्य इव विकारान्, पण्यविलासिन्यः प्रानृत्यन् ।

अन्यत्र वेत्रिवेत्रवित्रासितजनदत्तान्तरालाः, म्रियमाणधवलातपत्रवना वनदेवता इव कल्पतरुतलविचारिण्यः, काश्चित्स्कन्धोभयपालीलम्बमानलम्बोत्तरीयलग्ना लीलादोलाधिरूढा इव प्रेङ्खन्त्यः, काश्चित्कनककेयूरकोटिपाट्यमानपट्टांशुकोत्तरङ्गास्तरङ्गिण्य इव तरच्चक्रवाकसीमन्त्यमानस्रोतसः, काश्चिदुद्धूयमानधवलचामरसटालग्नत्रिकण्टकवलितविकटकटाक्षाः, सरस्य इव हंसाकृष्यमाणनीलोत्पलवनाः, काश्चिच्चलच्चरणच्युतालक्तकारुणस्वेदशीकरसिच्यमानभवनहंसाः, संध्यारागरज्यमानेन्दुबिम्बा इव कौमुदीरजन्यः, काश्चित्कण्ठनिहितकाञ्चनकाञ्चीगुणाञ्चितकञ्चुकिविकाराकुञ्चितभ्रुवः, कामवागुरा इव प्रसारितबाहुपाशा राजमहिष्यः प्रारब्धनृत्या विलेसुः ।

सर्वतश्च नृत्यतः स्त्रैणस्य गलद्भिः पदालक्तकैररुणिता रागमयीव शुशोण क्षौणी । समुल्लसद्भिः स्तनमण्डलैर्मङ्गलकलशमय इव बभूव महोत्सवः । भुजलताविक्षेपैर्मृणालवलयमय इव रराज जीवलोकः । समुल्लसद्भिर्विलासस्मितैस्तडिन्मय इवाक्रियत कालः । चञ्चलानां चक्षुषामंशुभिः कृष्णशारमया इवासन्वासराः । समुल्लसद्भिः शिरीषकुसुमस्तबककर्णपूरैः शुकपिच्छमय इव हरितच्छायोऽभूदातपः । विस्रंसमानैर्धम्मिल्लतमालपल्लवैः कज्जलमयमिवालक्ष्यतान्तरिक्षम् । उत्क्षिप्तैर्हस्तकिशलयैः कमलिनीमय्य इव बभासिरे

ऽभिष्वङ्गः, हिङ्गुलकादिश्च । मदमपि मदयन्त्य इत्यादि । मदेन हि सर्वो मत्तो भवति, मदस्तु ता आश्रित्य मत्तः । एवमुत्तरत्र ।

अन्यत्रेत्यादौ राजमहिष्यो विलेसुरिति संबन्धः । म्रियमाणधवलातपत्रवना इत्यादौ वाक्यार्थोपमा विचार्या । पाली पङ्क्तिः । **कनककेयूरेणेति** । कनकग्रहणेन चक्रवाकसादृश्यमाह । तरङ्ग उत्तरीयम् । सीमन्त्यमानानि द्विधाक्रियमाणानि । त्रिकण्टकः कर्णाभरणभेदः । 'त्रिकण्टकस्तु त्र्यश्रः स्यात्त्रिभी रत्नैश्च भूषणम्' । कौमुदी कार्तिकज्योत्स्ना । तद्युक्ता रजन्यो रात्रयः । आकुञ्चित आकृष्टः । विलेसुश्चिक्रीडुः ।

स्त्रीणां समूहः स्त्रैणं तस्य । शुशोण शोणोऽभूत् । कालो होरादिलक्षणः, कालश्च कृष्णः । कथं तडिन्मयो रक्तवर्ण इति विरोधच्छाया । धम्मिल्लाः संयताः केशाः । बभासिरेऽशोभन्त । माणिक्यमुत्कृष्टं रत्नम् । किङ्किण्यः सूक्ष्मघण्टाः । शिशिञ्जिरे

सृष्टयः । माणिक्येन्द्रायुधानामर्चिषा चाषपत्रमया इव चकाशिरे रविमरीचयः । रणतामाभरणगणानां प्रतिशब्दकैः किङ्किणीमय्य इव शिशिञ्जिरे दिशः । जरत्योऽप्युन्मादिन्य इव रमण्यो रेणुः । वर्षीयांसोऽपि ग्रहगृहीता इव नापत्रेपिरे । विद्वांसोऽपि मत्ता इवात्मानं विसस्मरुः । निनर्तिषया मुनीनामपि मनांसि विपुस्फुलुः । सर्वस्वं च ददौ नरपतिः । दिशि दिशि कुबेरकोषा इवालुप्यन्त लोकेन द्रविणराशयः ।

एवं च वृत्ते तस्मिन्महोत्सवे शनैः शनैः पुनरप्यतिक्रामति काले, देवे चोत्तमाङ्गनिहितरक्षासर्षपे, समुन्मिषत्प्रतापाग्निस्फुलिङ्ग इव गोरोचनापिञ्जरितवपुषि, समभिव्यज्यमानसहजक्षात्रतेजसीव हाटकबद्धविकटव्याघ्रनखपङ्क्तिमण्डितग्रीवके, हृदयोद्भिद्यमानदर्पाङ्कुर इव प्रथमाव्यक्तजल्पितेन सत्यस्य शनैरोंकारमिव कुर्वाणे, मुग्धस्मितैः सुमुमैरिव मधुकरकुलानि बन्धुहृदयान्याकर्षति, जननीपयोधरकलशपयःशीकरसेकादिव जायमानैर्विलासहसिताङ्कुरैर्दशनकैरलंक्रियमाणमुखकमलके, चारित्र इवान्तःपुरस्त्रीकदम्बकेन पाल्यमाने, मन्त्र इव सचिवमण्डलेन रक्ष्यमाणे, वृत्त इव कुलपुत्रकलोकेनामुच्यमाने, यशसीवात्मवंशेन संवर्ध्यमाने, मृगपतिपोत इव रक्षिपुरुषशस्त्रपञ्जरमध्यगते, धात्रीकराङ्गुलिलग्ने पञ्चषाणि पदानि प्रयच्छति हर्षे, षष्ठं वर्षमवतरति च राज्यवर्धने देवी यशोवती गर्भेणाधत्त नारायणमूर्तिरिव वसुधां देवीं राज्यश्रियम् ।

पूर्णेषु च प्रसवदिवसेषु दीर्घरक्तनालनेत्रामुत्पलिनीमिव सरसी, हंसमधुरस्वरां शरदमिव प्रावृट्, कुसुमसुकुमारावयवां वनराजिमिव मधुश्रीः, महाकनकावदातां वसुधारामिव द्यौः, प्रभा-

---

सशब्दा अभवन् । रेणुः स्तनितवत्यः । वर्षीयांसो वृद्धतराः । अपत्रेपिरे लज्जामभजन्त । पुस्फुलुश्चेरुः ।

एवं चेत्यादौ देवी यशोवती राज्यश्रियमधत्तेति संबन्धः । हाटकं सुवर्णम् । ओंकारम् । ओमिति यावत् । पयोधरौ स्तनौ, पयोधराश्च मेघाः । पयः क्षीरम्, जलं च । पञ्च वा षड् वा पञ्चषाणि ।

पूर्णेष्वित्यादौ देवी दुहितरं प्रसूतवतीति संबन्धः । रक्तनाले रक्ते एव नेत्रे यस्याः, रक्तानि नालानि नेत्राणि मूलानि च यस्याः । हंसवत्तैश्च मधुरः । अवयवा अङ्गानि, विभागाश्च । माधवो वसन्तः।महाकनकं तिलसुवर्णम् । वसुधारा धन-

वर्षिणीं रत्नजातिमिव वेला, सकलजननयनानन्दकारिणीं चन्द्रलेखामिव प्रतिपत्, सहस्रनेत्रदर्शनयोग्यां जयन्तीमिव शची, सर्वभूभृद्भ्यर्थितां गौरीमिव मेना, प्रसूतवती दुहितरम् । यया द्वयोः सुतयोरुपरि स्तनयोरिवैकावलीलतया नितरामराजत ।

अस्मिन्नेव तु काले देव्या यशोवत्या भ्राता सुतमष्टवर्षदेशीयमुद्धूयमानकुटिलकाकपक्षकशिखण्डं खण्डपरशुहुंकाराग्निधूमलेखानुबुद्धमूर्धानं मकरध्वजमिव पुनर्जातम्, एकेनेन्द्रनीलकुण्डलांशुश्यामलितेन शरीरार्धेनेतरेण च त्रिकण्टकमुक्ताफलालोकधवलितेन संपृक्तावतारमिव हरिहरयोर्दर्शयन्तम्, पीनप्रकोष्ठप्रतिष्ठितपुष्पलोहवलयं परशुरामिमिव क्षत्रक्षपणक्षीणपरशुपाशचिह्नितं बालतां गतम्, कण्ठसूत्रग्रथितभङ्गुरप्रवालाङ्कुरं हिरण्यकशिपुमिवोरःकाठिन्यखण्डितनरसिंहनखरखण्डम्, गृहीतजन्मान्तरं शैशवेऽपि सावष्टम्भं बीजमिव वीर्यद्रुमस्य भण्डिनामानमनुचरं कुमारयोरर्पितवान् ।

अवनिपतेस्तु तस्योपरि पुत्रयोस्तृतीयस्य नेत्रयोरिवेश्वरस्य तुल्यं दर्शनमासीत् । राजपुत्रावपि सकलजीवलोकहृदयानन्ददायिनौ तेन प्रकृतिदक्षिणेन मधुमाधवाविव मलयमारुतेनोपेतौ नितरां रेजतुः । क्रमेण चापरेणेव भ्रात्रा प्रजानन्देन सह वर्धमानौ यौवनमवतेरतुः स्थिरोरुस्तम्भौ च पृथुप्रकोष्ठौ दीर्घभुजार्ग-

---

वृष्टिःइयं च महाभ्युदयसूचनाय दिवा पतति।वेला जलविकृतिः । इन्द्रोऽपि सहस्रनेत्रः । जयन्तः शक्रपुत्रः । भूभृतो राजानः, पर्वताश्च। मेना हिमवन्महिला । यया-दौ यया दुहित्रा।द्वयोःसुतयोरुपरि जातया यशोवती नितरामराजतेति संबन्धः ।

अस्मिन्नित्यादौ देव्या यशोवत्या भ्राता स्वतनयं भण्डिनामानं कुमारयोरनुचरमर्पितवानिति संबन्धः । काकपक्षकश्चूडा एव शिखण्डः पिच्छम् । पुष्पलोहं मणिभेदः । मृताग्निहोत्रं रथचक्रमिति केचित् । रणहतवीरकाय शातनवशात्परशोः पाशावशेषता भङ्गुरः कुटिलः । **बीजमिवेति** । शैशवाद्बीजावस्थोत्प्रेक्षते । न तु द्रुमावस्था ।

अवनीत्यादावनिपतेस्तु तस्योपरि पुत्रयोस्तुल्यं दर्शनमालोकनमिति संबन्धः । अन्यत्र दर्शनं दृष्टिः । तृतीयस्येति च । ईश्वरस्येति साधारणम् । सकलेत्यादि साधारणम् । दक्षिणोऽनुकूलः, दाक्षिणात्यश्च । मधुमाधवौ चैत्रवैशाखौ । ऊरुस्तम्भाविव उरवः महान्तश्च स्तम्भाः । 'प्रकोष्ठमन्तरं विद्यादरत्निमणिबन्धयोः' ।

लौ विकटोरःकवाटौ प्रांशुसालाभिरामौ महानगरसंनिवेशाविव सर्वलोकाश्रयक्षमौ बभूवतुः ।

अथ चन्द्रसूर्याविव स्फुरज्ज्योत्स्नायशःप्रतापाक्रान्तभुवनावभिरामदुर्निरीक्ष्यौ, अग्निमारुताविव समभिव्यक्ततेजोबलावेकीभूतौ, शिलाकठिनकायबन्धौ हिमवद्विन्ध्याविवाचलौ, महावृषाविव कृतयुगयोग्यौ, अरुणगरुडाविव हरिवाहनविभक्तशरीरौ, इन्द्रोपेन्द्राविव नागेन्द्रगतौ, कर्णार्जुनाविव कुण्डलकिरीटधरौ, पूर्वापरदिग्भागाविव सर्वतेजस्विनामुदयास्तमयसंपादनसमर्थौ, अमान्ताविवातिमानेनासन्नवेलार्गलनिरोधसंकटे कुकुटीरके तेजःपराङ्मुखीं छायामपि जुगुप्समानौ, स्वात्मप्रतिबिम्बेनापि पादनखलग्नेन लज्जमानौ, शिरोरुहाणामपि भङ्गेन दुःखमवतिष्ठमानौ, चूडामणिसंक्रान्तेनापि द्वितीयेनातपत्रेणापत्रपमाणौ, भगवति षण्मुखेऽपि स्वामिशब्देनासुखायमानश्रवणौ, दर्पणदृष्टेनापि प्रतिपुरुषेण दूयमाननयनौ, संध्याञ्जलिघटनेष्वपि शूलायमानोत्तमाङ्गौ, जलधरधृतेनापि धनुषा दोदूयमानहृदयौ, आलेख्यक्षितिपतिभिरप्यप्रणमद्भिः संतप्यमानचरणौ, परिमितमण्डलसंतुष्टं तेजः सवितुरप्यबहुमन्य-

---

स्थानविशेषो वा । कवाटो द्वारपट्टः । सालो वृक्षभेदः, प्राकारश्च । सर्वलोकेत्यादि साधारणम् ।

अथेत्यादौ तौ सर्वस्यामेव पृथिव्यां प्रकाशतां जग्मतुरिति संबन्धः । स्फुरज्ज्योत्स्नाजालं यद्यशस्तथा प्रतापस्ताभ्याम्, अन्यत्र ज्योत्स्नायश इव भुवनाक्रमणसमर्थत्वम् । प्रताप आयतिः, आतपश्च । तेजस्तैक्ष्ण्यम्, प्रकाशश्च । बलं सामर्थ्यम् । उभयत्राप्येकीभूतावन्योन्यानुवर्तिनौ, मिलितौ च । शिलावत्ताभिश्च कठिनः । अचलावकम्पौ, गिरी चाचलौ । कृतयुगमाद्ययुगभेदः, मूर्धन्यकाष्ठं च । योग्यावुचितौ योग्या च शिक्षा । यद्वा कृतयुगे तत्र शकटादौ समर्थौ । हरयोऽश्वाः, सूर्यविष्णू च हरी । उक्तं च—'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहाखुवाजिषु । शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु ॥' इति । विभक्तं स्कन्धमध्यादिविभागेन स्थितम्, परिकल्पितं च । नाग ऐरावणः, शेषश्च । नागेन्द्रवद्गतं ययोः, नागेन्द्रे वा गतावारूढौ । तेजस्विनो वीराः, आदित्याश्च । उदयो वृद्धिः, आविर्भावश्च । अस्तमयो नाशः, तिरोधानं च । अमान्तावतिमानौ । वेला जलनिधिः, जलमर्यादा । कुर्भूमिरेव कुटीरकं जरद्गृहम् । भङ्गः कुञ्चितत्वम्, युद्धे पलायनं च । अपत्रपमाणौ लज्जन्तौ । स्वामी कुमारः, प्रभुश्च । **प्रतिपुरुषेणेति** । स्पर्धायां प्रतिशब्दः । दोदूयमानं संतप्यमानम् । मण्डलं बिम्बम्, विषयश्च । तेजः प्रकाशः, तैक्ष्ण्यं च ।

मानौ, भूभृदपहृतलक्ष्मीकं सागरमप्युपहसन्तौ, बलवन्तमकृतविग्रहं मारुतमपि निन्दन्तौ, हिमवतोऽपि चमरीबालव्यजनवीजितेन दह्यमानौ, जलधीनामपि शङ्खैः खिद्यमानौ, चतुःसमुद्राधिपतिमपरं प्रचेतसमप्यसहमानौ, अनपहृतच्छत्रानपि विच्छायानवनिपालान्कुर्वाणौ, साधुष्वप्यसेवितप्रसन्नौ, मुखेन मधु क्षरन्तौ, दुष्टराजवंशानूष्मणा दूरस्थितानपि म्लानिमानयन्तौ, अनुदिवसं शस्त्राभ्यासश्यामिकाकलङ्कितमशेषराजकप्रतापाग्निनिर्वपणमलिनमिव करतलमुद्वहन्तौ, योग्याकालेषु धीरैर्धनुर्ध्वनिभिरभ्यर्णोपभोगाद्दिग्वधूभिरिवालपन्तौ राज्यवर्धन इति हर्ष इति सर्वस्यामेव पृथिव्यामाविर्भूतशब्दप्रादुर्भावौ, स्वल्पीयसैव कालेन द्वीपान्तरेष्वपि प्रकाशतां जग्मतुः।

एकदा च तावाहूय भुक्तवानभ्यन्तरगतः पिता सस्नेहमवादीत्—'वत्सौ, प्रथमं राज्याङ्गं, दुर्लभाः सद्भृत्याः। प्रायेण परमाणव इव समवायेष्वनुगुणीभूय द्रव्यं कुर्वन्ति पार्थिवं क्षुद्राः। क्रीडारसेन नर्तयन्तो मयूरतां नयन्ति बालिशाः। दर्पणमिवानुप्रविश्यात्मीयां प्रकृतिं संक्रामयन्ति पल्लविकाः। स्वप्ना इव मिथ्यादृ-

---

भूभृदत्र प्रकरणान्मन्दरः, राजानश्च भूभृतः। लक्ष्मीः समृद्धिरपि। विग्रहं वैरम्, देहश्च। अनपहृतेत्यादि वर्ण्यमानवयोऽवस्थाभिप्रायेणोक्तम्। छाया कान्तिः आतपप्रतिपक्षजातिश्च। सति छत्रे विच्छायत्वं न भवतीति विरोधः। **साधुष्विति**। साधूनां सेवाव्यतिरेकेण प्रसादायोग्यत्वम्। प्रसन्नौ प्रसादवन्तौ, सुरा अपि प्रसन्ना। मधु माधुर्यम्, मद्यं च। असेवितप्रसन्नश्च कथं मुखेन मधु क्षरतीति विरोधः। ऊष्मा स्मयः, तापश्च। ऊष्मणा च दाहशक्त्या। वंशा वेणवः। निकटस्थो म्लानीक्रियते। न तु दूरस्थ इति विरोधः। निर्वपणं शमनम्। योग्या अभ्यासः। अभ्यर्णः प्रत्यासन्नः शब्दः। प्रादुर्भावः ख्यातिः।

प्रथमं प्रधानभूतम्। **प्रायेणेति**। क्षुद्राः प्रायेण समवायेषु मन्त्रेष्वनुगुणीभूय यथा क्षुद्रा अल्पपरिमाणाः परमाणवः पार्थिवं पृथिव्यादिजातीयं घटादिद्रव्यं कुर्वन्ति। कथं समवायेष्वनुगुणीभूयायुतसिद्धानामाधाराधेयभूतानामिह प्रत्ययहेतुः। संयोगः समवायः। यथा तन्तुषु पट इति। कार्यस्य द्रव्यस्यावयविन आरम्भं प्रतियोगीभावोऽनुगुणत्वम्। मयूरो धूर्तजनयोग्यो हासो वा, शिखण्डी च। बालिशा धूर्ताः, कुमाराश्च। बालका हि क्रीडारसेन मयूरं नर्तयन्ते। अनुप्रविश्य चित्तरञ्जनां कृत्वा, आसाद्य च। प्रकृतिं स्वभावम्, शरीरं च। पल्लविका विटाः, किसलयानि च। मिथ्यादर्शनैरसदागमैः, अलीकवस्तुप्रकाशनैश्च।

र्शनैरसद्बुद्धिं जनयन्ति विप्रलम्भकाः । गीतनृत्यहसितैरुन्मत्तता-मावहन्त्युपेक्षिता विकारा इव वातिकाः । चातका इव तृष्णावन्तो न शक्यन्ते ग्रहीतुमकुलीनाः । मानसे मीनमिव स्फुरन्तमेवाभि-प्रायं गृह्णन्ति जालिकाः । यमपट्टिका इवाम्बरे चित्रमालिखन्त्यु-द्गीतकाः । शल्यं हृदये निक्षिपन्त्यतिमार्गणाः । यतः सर्वैर्दोषा-भिषङ्गैरसंगतौ बहुधोपधाभिः परीक्षितौ शुची विनीतौ विक्रान्ता-वभिरूपौ मालवराजपुत्रौ भ्रातरौ भुजाविव मे शरीरादव्यति-रिक्तौ कुमारगुप्तमाधवगुप्तावस्माभिर्भवतोरनुचरत्वार्थमिमौ निर्दि-ष्टौ । अनयोरुपरि भवद्भ्यामपि नान्यपरिजनसमवृत्तिभ्यां भवि-तव्यम्, इत्युक्त्वा तयोराह्वानाय प्रतीहारमादिदेश ।

नचिराद्वारदेशनिहितलोचनौ राज्यवर्धनहर्षौ प्रतीहारेण सह प्रविशन्तम्, अग्रतो ज्येष्ठमष्टादशवर्षवयसं नात्युच्चं नातिखर्वमति-गुरुभिः पदन्यासैरनेकनरपतिसंचरणचलां निश्चलीकुर्वाणमिवो-र्वीमनवरताभ्यस्तलङ्घनघनोपचयकठिनमांसमेदुरादूरुद्वयान्निष्पतते-वानुल्बणजानुग्रन्थिप्रसूतेन तनुतरजङ्घाकाण्डयुगलेन भासमानम्, उल्लिखितपार्श्वप्रकाशितकृशिम्ना मन्दरमिव सुरासुररभसभ्रमि-

---

असतीमशोभनां बुद्धिम्, असत्यविद्यमाने च बुद्धिः । विप्रलम्भकाः प्रतारकाः । वातिका धूर्ताः, वातोत्थिताश्च । तृष्णा धनगर्धा पिपासा च । ग्रहीतुमावर्जितुम्, अवष्टब्धुं च । अकुलीना अकुलोद्भूताः । कौ भूमौ न लिलीनाश्चाकाशचारित्वम् । मानसे चित्ते, सरोभेदे च । स्फुरन्तमुत्पद्यमानम् । अनुत्पन्नाभिभवमिति यावत् । सति कार्ये हि सर्व एवाभिप्रायं लक्षयति । एतेऽत्र प्रागेव । अन्यत्र च चलन्तम् । जालिकाः कौसूतिकाः, कैवर्ताश्च । यमपट्टिका गृहीतपटलिखितसपरिवारयमराजाः । अम्बर आकाशे, वस्त्रे चाम्बरे । **चित्रमालिखन्तीति** । असंभाव्यमाना-नर्थानारभन्त इति यावत् । अन्यत्र चित्रमालेख्यम् । उद्गीतकादुच्चरित्वादुच्चैर्गी-तं येषां ते च । शल्यमिव शल्यं पीडां, फलिकां च । अतिमार्गणा अतिक्रम्य ये संश्रयन्ते, अन्यथा महाभागिनोऽस्य वक्तुरनुचितेयमुक्तिः स्यात् । तेनानुरूपसं-भवमविच्छिन्नं च मार्गमतिमार्गणम्, मार्गणाः शराश्च । हृदये शल्यं फलिका-मर्पयन्ति । अभिषङ्गः संपर्कः । उपधा भृत्यस्य धर्मादिविषयः परीक्षणोपायः । उक्तं च—'उपेत्याधीयते यस्मादुपधेति ततः स्मृता । उपाय उपधा ज्ञेया तया भृत्यान्परीक्षयेत् ॥' इति । विक्रान्तौ शूरौ । अभिरूपौ सुन्दरौ ।

नचिरादित्यादौ राज्यवर्धनहर्षौ प्रतीहारेण सह प्रविशन्तमग्रतो ज्येष्ठं कुमार-गुप्तं पृष्ठतश्च तस्य कनीयांसं नीतिमत्त्वं प्रकाशितम् । खर्वं वामनम् । मेदुरात्पु-ष्टात् । अनुल्बणोऽनुद्धतः । उल्लिखितमिवोल्लिखितं तनूकृतम् । रुरुर्मृगभेदस्तस्येयं

तवासुकिकषणक्षीणेन मध्येन लक्ष्यमाणम्, अतिविस्तीर्णेनोरसा स्वामिसंभावनानामपरिमितानामवकाशमिव प्रयच्छन्तम्, प्रलम्बमानस्य भुजयुगलस्य निभृतललितैर्विक्षेपैरतिदुस्तरं तरन्तमिव यौवनोदधिम्, वामकरकटकमाणिक्यमरीचिमञ्जरीजालिन्या समुद्भिद्यमानप्रतापानलशिखापल्लवयेव चापकिणलेखयाङ्कितपीवरप्रकोष्ठम्, आलोहिनीमुच्चांसतटावलम्बिनीमस्त्रग्रहणव्रतविधृतां रौरवीमिव त्वचं कर्णाभरणमणेः प्रभां बिभ्राणम्, उत्कोटिकेयूरपत्रभङ्गपुत्रिकाप्रतिबिम्बगर्भकपोलं मुखं चन्द्रमसमिव हृदयस्थितरोहिणीकमुद्वहन्तम्, अचपलस्तिमिततारकेणाधोमुखेन चक्षुषा शिक्षयन्तमिव लक्ष्मीलाभोत्तानितमुखानि पङ्कजवनानि विनयम्, स्वाम्यनुरागमिवाम्लातकमुत्तंसीकृतं शिरसा धारयन्तम्, निर्दयया कङ्कणभङ्गभीतसकलकार्मुकार्पितामिव नम्रतां प्रकाशयन्तम्, शैशव एव निर्जितैरिन्द्रियैररिभिरिव संयतैः शोभमानम्, प्रणयिनीमिव विश्वासभूमिं कुलपुत्रतामनुवर्तमानम्, तेजस्विनमपि शीलेनाह्लादकेन सवितारमिव शशिनान्तर्गतेन विराजमानम्, अचलानामपि कायकार्कश्येन गन्धनमिवाचरन्तम्, दर्शनक्रीतमानन्दहस्ते विक्रीणानमिव जनं सौभाग्येन कुमारगुप्तम्, पृष्ठतस्तस्य कनीयांसमतिप्रांशुतया गौरतया च मनःशिलाशैलमिव संचरन्तम्, अनुल्बणमालतीकुसुमशेखरनिभेन निर्जिगमिषता गुरुणा शिरसि चुम्बितमिव यशसा परस्परविरुद्धयोर्विनययौवनयोश्चिरात्प्रथमसंगमचिह्नमिव भ्रूसंगतकेन कथयन्तम्, अतिधीरतया हृदयनिहितां स्वामिभक्तिमिव निश्चलां दृष्टिं धारयन्तम्, अच्छाच्छचन्दनरसानुलेपशीतलं संनिहितहारोपधानं वक्षःस्थ-

---

रौरवी ताम्। अम्लातकं पुष्पभेदम्, करण्टकापुष्पभेदं वा। उत्तंसीकृतं शेखरतां नीतम्। शीलेनाप्यन्तर्गतेन। एतेन चास्या दाम्भिकत्वमुक्तम्। गन्धनं मर्दनम्, उद्वाहनं वा। दृष्टमेव जनं वश्यमेव सर्वं करोतीति दर्शनक्रीतता। क्रीतमार्जितम्। पुनश्चानन्दोत्पादनद्वारेणानन्दवन्तं तच्छरणं करोतीति। तत्र विक्रियोत्प्रेक्षा—यत्तु वस्तु केनचिदर्थेन क्रीतं तदप्यन्यस्य विक्रीयत इत्युक्तम्। **विक्रीणानमिति**। गौरतयेतीत्थंभूतलक्षणे तृतीया। शेखरस्यानुल्बणत्वं विनयं वक्ति। गुरुणा भूयिष्ठेन। चुम्बितमधिष्ठितम्। गुरुणा च पित्रा निर्गच्छता पुनः शिरसि चुम्ब्यते। भ्रूसंगतकं विनयम्, उपधानं गण्डकम्। विशालं प्रशस्तम्। विशाले

लमनन्तसामन्तसंक्रान्तिश्रान्तायाः श्रियो विशालं शशिमणिशिलापट्टशयनमिव बिभ्राणम्, चक्षुः कुरङ्गकैर्घोणावंशं वराहैः स्कन्धपीठं महिषैः प्रकोष्ठबन्धं व्याघ्रैः पराक्रमं केसरिभिर्गमनं मतङ्गजैर्मृगयाक्षपितशेषैर्भीतैरुत्कोचमिव दत्तं दर्शयन्तं माधवगुप्तं ददृशतुः ।

प्रविश्य च दूरादेव चतुर्भिरङ्गैरुत्तमाङ्गेन च गां स्पृशन्तौ नमश्चक्रतुः । स्निग्धनरेन्द्रदृष्टिनिर्दिष्टामुचितां भूमिं भेजाते । मुहूर्तं च स्थित्वा भूपतिरादिदेश तौ—'अद्यप्रभृति भवद्भ्यां कुमारावनुवर्तनीयौ' इति । 'यथाज्ञापयति देवः' इति मेदिनीदोलायमानमौलिभ्यामुत्थाय राज्यवर्धनहर्षौ प्रणेमतुः । तौ च पितरम् । ततश्चारभ्य क्षणमपि निमेषोन्मेषाविव चक्षुर्गोचरादनपयान्तावुच्छ्वासनिःश्वासाविव नक्तंदिवमभिमुखस्थितौ भुजाविव सततपार्श्ववर्तिनौ कुमारयोस्तौ बभूवतुः ।

अथ राज्यश्रीरपि नृत्यगीतादिषु विदग्धासु सखीषु सकलासु कलासु च प्रतिदिवसमुपचीयमानपरिचया शनैः शनैरवर्धत । परिमितैरेव दिवसैर्यौवनमारुरोह । निपेतुरेकस्यां तस्यां शरा इव लक्ष्यभुवि भूभुजां सर्वेषां दृष्टयः । दूतप्रेषणादिभिश्च तां ययाचिरे राजानः ।

कदाचित्तु राजान्तःपुरप्रासादस्थितो बाह्यकक्ष्यावस्थितेन पुरुषेण स्वप्रस्तावागतां गीयमानामार्यामशृणोत्—

'उद्वेगमहावर्ते पातयति पयोधरोन्नमनकाले ।
सरिदिव तटमनुवर्षं विवर्धमाना सुता पितरम् ॥ ५ ॥'

तां च श्रुत्वा पार्श्वस्थितां महादेवीमुत्सारितपरिजनो जगाद—

'देवि, तरुणीभूता वत्सा राज्यश्रीः । एतदीया गुणवत्तेव क्षणमपि हृदयान्नापयाति मे चिन्ता । यौवनारम्भ एव च कन्यकानामिन्धनीभवन्ति पितरः संतापानलस्य । हृदयमन्धकारयति मे दिवसमिव पयोधरोन्नतिरस्याः । केनापि कृता धर्म्या नाभि-

---

चाङ्गानि प्रसार्यन्ते । शीतलत्वाच्चाङ्गनिर्वृतिः । घोणा नासिका एव स्पष्टत्वाद्वंशस्तम् । **उत्कोचमिवेति** । दण्डमित्यर्थः ।

चतुर्भिरङ्गैरिति । जानुभ्यां हस्ताभ्यां चोत्तमाङ्गेन भूमिम् । तौ च । **पि-**

मता मे स्थितिरियं यदङ्गसंभूतान्यङ्गलालितान्यपरित्याज्यान्यपत्यकान्यकाण्ड एवागत्यासंस्तुतैर्नीयन्ते । एतानि तानि खल्वङ्गनस्थानानि संसारस्य । सेयं सर्वाभिभाविनी शोकाग्नेर्दाहशक्तिर्यदपत्यत्वे समाने जातायां दुहितरि दूयन्ते सन्तः । एतदर्थं जन्मकाल एव कन्यकाभ्यः प्रयच्छन्ति सलिलमश्रुभिः साधवः । एतद्भयादकृतदारपरिग्रहाः परिहृतगृहवसतयः शून्यान्यरण्यान्यधिशेरते मुनयः । को हि नाम सहते विरहमपत्यानाम् । यथा यथा समापतन्ति दूता वराणां वराकी लज्जमानेव चिन्ता तथा तथा नितरां प्रविशति मे हृदयम् । किं क्रियते । तथापि गृहगतैरनुगन्तव्या एव लोकवृत्तयः । प्रायेण च सत्स्वप्यन्येषु वरगुणेष्वभिजनमेवानुरुध्यन्ते धीमन्तः । धरणीधराणां च मूर्ध्नि स्थितो माहेश्वरः पादन्यास इव सकलभुवननमस्कृतो मौखरी वंशः तत्रापि तिलकभूतस्यावन्तिवर्मणः सूनुरग्रजो ग्रहवर्मा नाम ग्रहपतिरिव गां गतः पितुरन्यूनो गुणैरेनां प्रार्थयते । यदि भवत्या अपि मतिरनुमन्यते ततस्तस्मै दातुमिच्छामि' इत्युक्तवति भर्तरि दुहितृस्नेहकातरतरहृदया साश्रुलोचना महादेवी प्रत्युवाच—'आर्यपुत्र, संवर्धनमात्रोपयोगिन्यो धात्रीनिर्विशेषा भवन्ति खलु मातरः कन्यकानाम् । दाने तु प्रमाणमासां पितरः । केवलं कृपाकृतविशेषः सुदूरेण तनयस्नेहादतिरिच्यते दुहितृस्नेहः । यथा यावज्जीवमावयोरार्तिता प्रतिपद्यते तथार्यपुत्र एव जानाति' इति ।

राजा तु जातनिश्चयो दुहितृदानं प्रति समाहूय सुतावपि विदितार्थावकार्षीत् । शोभने च दिवसे ग्रहवर्मणा कन्यां प्रार्थयितुं प्रेषितस्य पूर्वागतस्यैव प्रधानदूतपुरुषस्य करे सर्वराजकुलस-

---

तरमिति । तौ च राज्यवर्धनहर्षौ लब्धानुचरावभिवन्दनाय पितरं प्रणेमतुरित्यर्थः ।

विदग्धासु प्रवीणासु, ग्राम्यासु च ।

उद्वेगो मानसी पीडा तस्यावर्तनमावर्तो जलभ्रमणम् । तत्र पयोधरशब्दः स्तनमेघयोः । अनुवर्ष वर्षे, प्रावृषि च । असंस्तुतैरपरिचितैः । दौःशील्यं चिह्नम् । वराकी तपस्विनी । अभिजनं कुलम् । सकलेत्यादि साधारणम् ।

आर्तिता मनःपीडात्वम् ।

जातमुदीत्यादावेवं राजकुलमासीदिति संबन्धः । ग्रामीणा ग्राम्याः । राजादौ-

मक्षं दुहितृदानजलमपातयत् । जातमुदि कृतार्थे गते च तस्मिन्नासन्नेषु च विवाहदिवसेषूद्दामदीयमानताम्बूलपटवासकुसुमप्रसाधितसर्वलोकम्, सकलदेशादिश्यमानशिल्पिसार्थागमनम्, अवनिपालपुरुषगृहीतसमग्रग्रामीणानीयमानोपकरणसंभारम्, राजदौवारिकोपनीयमानानेकनृपोपायनम्, उपनिमन्त्रितागतबन्धुवर्गसंवर्गणव्यग्रराजवल्लभम्, लब्धमधुमदप्रचण्डचर्मकारकरपुटोल्लालितकोणपटुविघट्टनरणन्मङ्गलपटहम्, पिष्टपच्चाङ्गुलमण्ड्यमानोलूखलमुसलशिलाद्युपकरणम्, अशेषाशामुखाविर्भूतचारणपरम्परापूर्यमाणप्रकोष्ठप्रतिष्ठाप्यमानेन्द्राणीदैवतम्, सितकुसुमविलेपनवसनसत्कृतैः सूत्रधारैरादीयमानविवाहवेदीसूत्रपातम्, उत्कूर्चककरैश्च सुधाकर्परस्कन्धैरधिरोहिणीसमारूढैर्धवैर्धवलीक्रियमाणप्रासादप्रतोलीप्राकारशिखरम्, क्षुण्णक्षाल्यमानकुसुम्भकसंभाराम्भःप्लवपूररज्यमानजनपादपल्लवम्, निरूप्यमाणयौतकयोग्यमातङ्गतुरङ्गतरङ्गिताङ्गनम्, गणनाभियुक्तगणकगणगृह्यमाणलग्नगुणम्, गन्धोदकवाहिमकरमुखप्रणालीपूर्यमाणक्रीडावापीसमूहम्, हेमकारचक्रप्रक्रान्तहाटकघटनटाङ्कारवाचालितालिन्दकम्, उत्थापिताभिनवभित्तिपात्यमानबहलवालुकाकण्ठकालेपाकुलालेपकलोकम्, चतुरचित्रकरचक्रवाललिख्यमानमङ्गल्यालेख्यम्, लेप्यकारकदम्बकक्रियमाणमृण्मयमीनकूर्ममकरनारिकेलकदलीपूगवृक्षकम्, क्षितिपालैश्च स्वयमावद्धकक्ष्यैः स्वाम्यर्पितकर्मशोभासंपादनाकुलैः सिन्दूरकुट्टिमभूमीश्च मसृणयद्भिर्विनिहितसरसातर्पणहस्तान्विन्यस्तालक्तकपाटलांश्च चूताशोकपल्लवलाञ्छितशिखरानुद्वाहवितर्दिकास्तम्भानुत्तम्भयद्भिः प्रारब्धविविधव्यापारम्, आसूर्योदयाच्च प्रविष्टाभिः सतीभिः सुभगाभिः सुरूपाभिः सुवेशा-

---

वारिका दूताः । संवर्गणमावर्तनम् । पिष्टमातर्पणम् । चारणाः कुशीलवाः । प्रकोष्ठं बहिर्द्वारम् । सूत्रधारैः स्थपतिभिः । अधिरोहिणी निःश्रेणिः । धवैः पुरुषैः । क्षुण्णश्चूर्णितः । कुसुम्भकं पद्मकम् । प्लवः पूरः । यौतकं सुदायः । प्रणालं वाप्यादिपूरणार्थं मकरमुखं कुर्वन्ति । लग्नो मेषादिः । अलिन्दो बहिर्द्वारकोष्ठः । कण्ठकाः कणाः । आबद्धकक्ष्यैः कृतोद्योगैः । मसृणयद्भिश्चिक्कणीकुर्वद्भिः । आतर्पणं पिष्टम् । उत्तम्भयद्भिरूर्ध्वीकुर्वद्भिः । गोत्रं नाम । दिग्धा उपलिप्ताः । शीतलमपङ्कम् । शाराजिरं शारवम् । अभिन्नपुटो वंशादिमयश्चतुष्कोणः पाटलाकृतिर्जाल-

भिरविधवाभिः सिन्दूररजोराजिराजितललाटाभिर्वधूवरगोत्रग्रहणगर्भाणि श्रुतिसुभगानि मङ्गलानि गायन्तीभिर्बहुविधवर्णकादिग्धाङ्गुलीभिर्ग्रीवासूत्राणि च चित्रयन्तीभिश्चित्रपत्रलतालेख्यकुशलाभिः कलशांश्च धवलिताञ्शीतलशाराशिरश्रेणीश्च मण्डयन्तीभिरभिन्नपुटकर्पासतूलपल्लवांश्च वैवाहिककङ्कणोर्णासूत्रसंनाहांश्च रञ्जयन्तीभिर्बलाशनाघृतघनीकृतकुङ्कुमकल्कमिश्रितांश्चाङ्गरागांल्लावण्यविशेषकृन्ति च मुखालेपनानि कल्पयन्तीभिः कक्कोलमिश्राः सजातीफलाः स्फुरत्स्फीतस्फाटिककर्पूरशकलखचितान्तराला लवङ्गमाला रचयन्तीभिः समन्तात्सामन्तसीमन्तिनीभिर्व्याप्तम्, बहुविधभक्तिनिर्माणनिपुणपुराणपौरपुरंध्रिबध्यमानैर्बद्धैश्चाचारचतुरान्तःपुरजरतीजनितपूजाराजमानरजकरज्यमानै रक्तैश्चोभयपटान्तलग्नपरिजनप्रेङ्खोलितैश्छायासु शोष्यमाणैः शुष्कैश्च कुटिलक्रमरूपक्रियमाणपल्लवपरभागरैपरैरारब्धकुङ्कुमपङ्कस्थासकच्छुरणैरपरैरुद्धुजभुजिष्यभज्यमानभङ्गुरोत्तरीयैः क्षौमैश्च बादरैश्च दुकूलैश्च लालातन्तुजैश्चांशुकैश्च नेत्रैश्च निर्मोकनिर्भैरकठोररम्भागर्भकोमलैर्निःश्वासहार्यैः स्पर्शानुमेयैर्वासोभिः सर्वतः स्फुरद्भिरिन्द्रायुधसहस्रैरिव संछादितम्, उज्ज्वलनिचोलकावगुण्ठ्यमानहंसकुलैश्च शयनीयैस्तारामुक्ताफलोपचीयमानैश्च कञ्चुकैरनेकोपयोगपाट्यमानैश्चापरिमितैः पट्टपटीसहस्रैरभिनवरागकोमलदुकूलराजमानैश्च पटवितानैः स्तवरकनिवहनिरन्तरच्छाद्यमानसमस्तपटलैश्च मण्डपैरुच्चित्रनेत्रपटवेष्ट्यमानैश्च स्तम्भैरुज्वलं रमणीयं चौत्सुक्यदं च मङ्गल्यं चासीद्राजकुलम् ।

देवी तु यशोवती विवाहोत्सवपर्याकुलहृदया हृदयेन भर्तरि, कुतूहलेन जामातरि, स्नेहेन दुहितरि, उपचारेण निमन्त्रितस्त्रीषु, आदेशेन परिजने, शरीरेण संचरणे, चक्षुषा कृताकृतप्रत्यवेक्षणेषु,

---

कैः क्रियते । तच्छिद्रान्तरपूरणाय कर्पासतूलपल्लवा रज्यन्ते । कङ्कणः प्रतिसरः । बलाशना पुष्पाख्यौषधिः तत्पक्वं घृतं रक्षार्थं क्रियते । स्फाटिककर्पूराख्यः कर्पूरभेदः भक्तिर्विच्छित्तिः । कुटिलः क्रमो येषां तैः । भुजिष्यैश्चेटैः । भज्यमानत्वं मुष्टिदानम् । क्षौमैः क्षुमाविकारैः । बादरैः कार्पासैः । लालातन्तुजैः कौशेयैः । नेत्रैः पट्टैः (?) । निचोलकैर्वस्तुरूपकविशेषैः । स्तवरकं वस्त्रभेदः । वितानकं करकम् । पटलं छादनम् । उज्ज्वलं भ्राजिष्णु ।

आनन्देन महोत्सवे, एकापि बहुधा विभक्तेवाभवत् । भूपतिरप्युपर्युपरि विसर्जितोष्ट्रवामीजनितजामातृजोषः सत्यप्याज्ञासंपादनदक्षे मुखेक्षणपरे परिजने समं पुत्राभ्यां दुहितृस्नेहविक्लवः सर्वं स्वयमकरोत् ।

एवं च तस्मिन्नविधवामय इव भवति राजकुले, मङ्गलमय इव जायमाने जीवलोके, चारणमयेष्विव लक्ष्यमाणेषु दिङ्मुखेषु, पटहमय इव कृतेऽन्तरिक्षे, भूषणमय इव भ्रमति परिजने, बान्धवमय इव दृश्यमाने सर्गे, निर्वृत्तिमय इवोपलक्ष्यमाणे काले, लक्ष्मीमय इव विजृम्भमाणे महोत्सवे, निधान इव सुखस्य फल इव जन्मनः परिणाम इव पुण्यस्य यौवन इव विभूतेर्यौवराज्य इव प्रीतेः सिद्धिकाल इव मनोरथस्य वर्तमाने, गण्यमान इव जनाङ्गुलीभिः, आलोक्यमान इव मार्गध्वजैः, प्रत्युद्गम्यमान इव मङ्गल्यवाद्यप्रतिशब्दकैः, आहूयमान इव मौहूर्तिकैः, आकृष्यमाण इव मनोरथैः, परिष्वज्यमान इव वधूसखीहृदयैराजगाम विवाहदिवसः । प्रातरेव प्रतीहारैः, समुत्सारितनिखिलानिबद्धलोकं विविक्तमक्रियत राजकुलम् ।

अथ प्रतीहारः प्रविश्य नृपसमीपम् 'देव, जामातुरन्तिकात्ताम्बूलदायकः पारिजातकनामा संप्राप्तः' इत्यभिधाय स्वाकारं युवानमदर्शयत् । राजा तु तं दूरादेव जामातृबहुमानादर्शितादरः 'बालक, कच्चित्कुशली ग्रहवर्मा' इति पप्रच्छ । असौ तु समाकर्णितनराधिपध्वनिर्धावमानः कतिचित्पदान्युपसृत्य प्रसार्य च बाहू सेवाचतुरश्रिरं वसुंधरायां निधाय मूर्धानमुत्थाय 'देव, कुशली यथाज्ञापयस्यर्चयति च देवं नमस्कारेण' इति व्यज्ञापयत् । आगतजामातृनिवेदनागतं च तं ज्ञात्वा कृतसत्कारं राजा 'यामिन्याः प्रथमे यामे विवाहकालात्ययकृतो यथा भवति दोषः' इति संदिश्य प्रतीपं प्राहिणोत् ।

उष्ट्रवाम्युष्ट्रभार्या । केचिद्वामीद्वयमन्ये वेसरीमन्ये गुर्वीमाहुः । जोषः सुखम् । एवमित्यादावस्मिन्सत्याजगाम विवाहदिवस इति संबन्धः । निधान इव सुखस्येत्यादौ वर्तमान इत्यनेन संगतिः । मौहूर्तिकैर्गणकैः । अनिबद्धो बाह्यः । यथा न भवति दोष इत्यत्र तथा कार्यमित्यर्थलभ्यम् ।

अथ सकलकमलवनलक्ष्मीं वधूमुख इव संचार्य समवसिते वासरे विवाहदिवसश्रियः पादपल्लव इव रज्यमाने सवितरि, वधूवरानुरागलघूकृतप्रेमलज्जितेष्विव विघटमानेषु चक्रवाकमिथुनेषु, सौभाग्यध्वज इव रक्तांशुकसुकुमारवपुषि नभसि स्फुरति संध्यारागे, कपोतकण्ठकर्बुरे वरयात्रागमनरजसीव कलुषयति दिङ्मुखानि तिमिरे, लग्नसंपादनसज्ज इवोज्जिहाने ज्योतिर्गणे, विवाहमङ्गलकलश इवोदयशिखरिणा समुत्क्षिप्यमाणे वर्धमानधवलच्छाये ताराधिपमण्डले वधूवदनलावण्यज्योत्स्नापरिपीततमसि प्रदोषे वृथोदितमुपहसत्सिव रजनिकरमुत्तानितमुखेषु कुमुदवनेष्वाजगाम मुहुर्मुहुरुल्लासितस्फारस्फुरितारुणचामरैर्मनोरथैरिवोत्थितरागाग्रपल्लवैः पुरोधावमानैः पादातैरुत्कर्णकटकहयप्रतिहेषितदीयमानस्वागतैरिव वाजिनां वृन्दैश्चापूरितदिग्भागश्चलकर्णचामराणां चामीकरमयसर्वोपकरणानां वर्णकलम्बिनां बलिनां घण्टाटाङ्कारिणां करिणां घटाभिः घटयन्निव पुनरिन्दूदयविलीनमन्धकारं नक्षत्रमालामण्डितमुखीं करिणीं निशाकर इव पौरंदरीं दिशमारूढः प्रकटितविविधविहगविरुतैस्तालावचरचारणैः पुरःसरैर्बालो वसन्त इवोपवनैः क्रियमाणकोलाहलो गन्धतैलावसेकसुगन्धिना दीपिकाचक्रवालस्यालोकेन कुङ्कुमपटवासधूलिपटलेनेव पिञ्जरीकुर्वन्सकलं लोकमुत्फुल्लमल्लिकामुण्डमालामध्याध्यासितकुसुमशेखरेण शिरसा हसन्निव सपरिवेषक्षपाकरं कौमुदीप्रदोषमात्मरूपनिर्जितमकरकेतुकरापहृतेन कार्मुकेणेव कौसुमेन दाम्ना विरचितवैकक्ष्यकविलासः कुसुमसौरभगर्वभ्रान्तभ्रमरकुलकलप्रलापसुभगः पारिजात इव जातः श्रिया सह पुनरवतारितो मेदिनीं नववधूवदनावलोकनकुतूहलेनेव कृष्यमाणहृदयः पतन्निव मुखेन प्रत्यासन्नलग्नो ग्रहवर्मा ।

अथेत्यादावेतस्मिन्नेतस्मिन्सत्याजगामेति संबन्धः । कपोतेत्यसाधारणम् । कर्बुर आपाण्डुरे । **रजसीवेति** । रजोऽपि मुखानि कलुषयति । लग्नेत्यादि साधारणम् । उज्जिहान उद्गच्छति । ज्योतिर्गणैस्तारानिकरैः, गणकैश्च । वर्धमानेत्यादि संध्यारागरहितत्वात् । वर्धमानं शरावः । तेन च धवलच्छायम् । तद्धि मङ्गलिकं विवाहे क्रियत इत्याचारः । स्फारः स्फोटकः । पुरो धावमानैरिति साधारणम् । पादातैः पदातिसमूहैः ।

राजा तु तमुपद्वारमागतं चरणाभ्यामेव राजचक्रानुगम्यमानः ससुतः प्रत्युज्जगाम । अवतीर्णं च तं कृतनमस्कारं मन्मथमिव माधवः प्रसारितभुजो गाढमालिलिङ्ग । यथाक्रमं परिष्वक्तराज्यवर्धनहर्षं च हस्ते गृहीत्वाभ्यन्तरं निन्ये । स्वनिर्विशेषासनदानादिना चैनमुपचारेणोपचचार ।

न चिराच्च गम्भीरनामा नृपतेः प्रणयी विद्वान्द्विजन्मा ग्रहवर्माणमुवाच—'तात, त्वां प्राप्य चिरात्खलु राजश्रिया घटितौ तेजोमयौ सकलजगद्गीयमानबुधकर्णानन्दकारिगुणगणौ सोमसूर्यवंशाविव पुष्पभूतिमुखरवंशौ । प्रथममेव कौस्तुभमणिरिव गुणैः स्थितोऽसि हृदये देवस्य । इदानीं तु शशीव शिरसा परमेश्वरेणासि वोढव्यो जातः' इति ।

एवं वदत्येव तस्मिन्नृपमुपसृत्य मौहूर्तिकाः 'देव, समासीदति लग्नवेला । व्रजतु जामाता कौतुकगृहम्' इत्यूचुः । अथ नरेन्द्रेण 'उत्तिष्ठ । गच्छ' इति गदितो ग्रहवर्मा प्रविश्यान्तःपुरं जामातृदर्शनकुतूहलिनीनां स्त्रीणां पतितानि लोचनसहस्राणि विकचनीलकुवलयवनानीव लङ्घयन्नाससाद कौतुकगृहद्वारम् । निवारितपरिजनश्च प्रविवेश ।

अथ तत्र कतिपयाप्तप्रियसखीस्वजनप्रमदाप्रायपरिवाराम्, अरुणांशुकावगुण्ठितमुखीं प्रभातसंध्यामिव स्वप्रभया निष्प्रभान्प्रदीपकान्कुर्वाणाम्, अतिसौकुमार्यशङ्कितेनेव यौवनेन नातिनिर्भरमुपगूढाम्, साध्वसनिरुध्यमानहृदयदेशदुःखमुक्तैर्निर्भृतायतैः श्वसितैरपयान्तं कुमारभावमिवानुशोचन्तीम्, अत्युत्कम्पिनीं पतनभियेव त्रपया निष्पन्दं धार्यमाणाम्, हस्तं तामरसप्रतिपक्षमासन्नग्रहणं शशिनमिव रोहिणीं भयवेपमानमानसामवलोकयन्तीम्,

---

राजश्रिया नृपतिलक्ष्म्यापि । घटितौ । योजितौ, मुक्तौ च । बुधकर्णौ पण्डितश्रोत्रे, सोमसूर्यसूनू च । गुणैरुत्कर्षैः, तन्तुभिश्च । हृदये चेतसि, वक्षसि च । देवस्य राज्ञः, विष्णोश्च । परमेश्वरेण राज्ञा, हरेण च ।

कौतुकगृहं विवाहमङ्गलवेश्म ।

अथेत्यादौ तत्र वधूमपश्यदिति संबन्धः । अरुणांशुकं लोहितं वस्त्रम् । अरुणस्याल्पांशवोऽशुकाः । निभृतैर्गुप्तैः । प्रतिपक्षस्तुल्यः, शत्रुश्च । ग्रहणं हस्तस्य स्वीकारः शशिनश्च ग्रहणं समासन्नं भवति । उद्गमनं सौरभमित्यन्ये । प्रभा-

चन्दनधवलतनुलतां ज्योत्स्नादानसंचितलावण्यात्कुमुदिनीगर्भादिव प्रसूताम्, कुसुमामोदनिर्हारिणीं वसन्तहृदयादिव निर्गताम्, निःश्वासपरिमलाकृष्टमधुकरकुलां मलयमारुतादिवोत्पन्नाम्, कृतकंदर्पानुसरणां रतिमिव पुनर्जाताम्, प्रभालावण्यमदसौरभमाधुर्यैः कौस्तुभशशिमदिरापारिजातामृतप्रभवैः सर्वरत्नगुणैरपरामिव सुरासुररुषा रत्नाकरेण कल्पितां श्रियं स्निग्धेन बालिकालोकेन सितसिन्धुवारकुसुममञ्जरीभिरिव मुक्तादीधितिभिः कल्पितकर्णावतंसाम्, कर्णाभरणमरकतप्रभाहरितशाद्वलेन कपोलस्थलीतलेन विनोदयन्तीमिव हारिणीं लोचनच्छायाम्, अधोमुखं वरकौतुकालोकनाकुलं मुहुर्मुहुः कृतमुखोन्नमनप्रयत्नं सखीजनं हृदयं च निर्भर्त्सयन्तीं वधूमपश्यत् ।

प्रविशन्तमेव तं हृदयचौरं वध्वा समर्पितं जग्राह कंदर्पः । परिहासस्मेरमुखीभिश्च नारीभिः कौतुकगृहे यद्यत्कार्यते जामाता तत्तत्सर्वमतिपेशलं चकार । कृतपरिणयानुरूपवेशपरिग्रहां गृहीत्वा करे वधूं निर्जगाम । जगाम च नवसुधाधवलां निमन्त्रितागतैस्तुषारशैलोपत्यकामिव त्र्यम्बकाम्बिकाविवाहाहृतैर्भूभृद्भिः परिवृताम्, सेकसुकुमारयवाङ्कुरदन्तुरैः पञ्चास्यैः कलशैः कोमलवर्णिकाविचित्रैरमित्रमुखैश्च मङ्गल्यफलहस्ताभिरञ्जलिकारिकाभिरुद्भासितपर्यन्ताम्, उपाध्यायोपवीयमानेन्धनधूमायमानाग्निसंधुक्षणाक्षणिकोपद्रष्टृद्विजाम्, उपकृशानुनिहितानुपहतहरितकुशाम्, संनिहितदृषदजिनाज्यस्रुक्समित्पूलीनिवहाम्, नूतनसूर्पार्पितश्यामलशमीपलाशमिश्रलाजहासिनीं वेदीम् । आरुरोह च तां दिवमिव सज्योत्स्नः शशी । समुत्ससर्प च वेल्लितारुणशिखापल्लवस्य

दीनां कौस्तुभादिभिर्यथासंख्यम् । बालिका ऊर्मिका, कौमारी च । विनोदयन्तीं प्रथयन्तीम् । हारिणीं रम्याम्, मार्गी च । मृगलोचनच्छायां नीलशाद्वलेन स्थालीतले क्रीडति । कौतुकालोकनाकुलं द्वयमपि साधारणम् ।

वध्वा राज्यश्रिया । अथ वेदीं जगामेति संबन्धः । उपत्यकाद्रेः समासन्ना भूः । भूभृद्भृपः, गिरिश्च । वर्णिका खटिका । अमित्रमुखै रूप्यमयैः, शत्रुमुखैश्च अञ्जलिकारिकाभिर्मृण्मयप्रतिमाभिः, सालभञ्जिकाभिर्वा । अक्षणिको व्यग्रः । उपद्रष्टा साक्षी । उपदेश्य इति केचित् । स्रुग्घोमभाण्डम् । वेल्लिता वलिताः । शिखा ज्वाला, शिखाग्राणि च । पल्लवाः प्रान्ताः, किसलयानि च । शिखिनो वृ-

शिखिनः कुसुमायुध इव रतिद्वितीयो रक्ताशोकस्य समीपम्। हुते च हुतभुजि दक्षिणावर्तप्रवृत्ताभिर्वधूवदनविलोकनकुतूहलिनीभिरिव ज्वालाभिरेव सह प्रदक्षिणं बभ्राम। पात्यमाने च लाजाञ्जलौ नखमयूखधवलिततनुरदृष्टपूर्ववधूवररूपविस्मयस्मेर इवादृश्यत विभावसुः।

अत्रान्तरे स्वच्छकपोलोदरसंक्रान्तमनलप्रतिबिम्बमिव निर्वापयन्ती स्थूलमुक्ताफलविमलबाष्पबिन्दुसंदोहदर्शितदुर्दिना निर्वदनविकारं रुरोद वधूः। उदश्रुविलोचनानां च बान्धववधूनामुदपादि महानाक्रन्दः। परिसमापितवैवाहिकक्रियाकलापस्तु जामाता वध्वा समं प्रणनाम श्वशुरौ। प्रविवेश च द्वारपक्षलिखितरतिप्रीतिदैवतं प्रणयिभिरिव प्रथमप्रविष्टैरलिकुलैः कृतकोलाहलम्, अलिकुलपक्षपवनप्रेङ्खोलितैः कर्णोत्पलप्रहारभयप्रकम्पितैरिव मङ्गलप्रदीपैः प्रकाशितम्, एकदेशलिखितस्तवकितरक्ताशोकतरुतलभाजाधिज्यचापेन तिर्यक्कूणितनेत्रत्रिभागेण शरमृजूकुर्वता कामदेवेनाधिष्ठितम्, एकपार्श्वन्यस्तेन काञ्चनाचामरुकेणेतरपार्श्ववर्तिन्या च दान्तशफरुकधारिण्या कनकपुत्रिकया साक्षाल्लक्ष्म्येवोद्दण्डपुण्डरीकहस्तया सनाथेन सोपधानेन स्वास्तीर्णेन शयनेन शोभमानम्, शयनशिरोभागस्थितेन च कृतकुमुदशोभेन कुसुमायुधसाहायकायागतेन शशिनेव निद्राकलशेन राजतेन विराजमानं वासगृहम्।

तत्र च ह्रीताया नववधूकायाः पराङ्मुखप्रसुप्ताया मणिभित्तिदर्पणेषु मुखप्रतिबिम्बानि प्रथमालापाकर्णनकौतुकागतगृहदेवतानानीव मणिगवाक्षकेषु वीक्षमाणः क्षणदां निन्ये। स्थित्वा च श्वशुरकुले शीलेनामृतमिव श्वश्रूहृदये वर्षन्नभिनवाभिनवोपचारैरपुनरुक्तान्यानन्दमयानि दश दिनानि स्थित्वा दत्त्वा राजदौवारिकमिव राजकुले रणरणकं यौतुकनिवेदितानीव शम्बलान्या-

---

क्षस्यापि। उक्तं च—'अग्निः शिखीति च प्रोक्तः शिखी वृक्षो निगद्यते। बर्हिणश्च शिखी प्रोक्तः क्वचित्स्यात्कुक्कुटः शिखी॥' इति च।

निर्वापयन्ती गमयन्ती। प्रविवेशेत्यादौ जामाता वासगृहमिति संबन्धः। पक्षः पार्श्वम्। कूणितः संकोचितः।

क्षणदां रात्रिम्। दश दिनानि स्थित्वेति संगतिः। यौतकं सुदायः।

इति श्रीशंकरविरचिते हर्षचरितसंकेते चतुर्थ उच्छ्वासः।

दाय हृदयानि सर्वलोकस्य कथं कथमपि विसर्जितो नृपेण वध्वा सह स्वदेशमगमदिति।

इति श्रीबाणभट्टकृतौ हर्षचरिते चक्रवर्तिजन्मवर्णनं नाम
चतुर्थ उच्छ्वासः।

पञ्चम उच्छ्वासः ।

नियतिर्विधाय पुंसां प्रथमं सुखमुपरि दारुणं दुःखम् ।
कृत्वा लोकं तरला तडिदिव वज्रं निपातयति ॥ १ ॥
पातयति महापुरुषान्सममेव बहूननादरेणैव ।
परिवर्तमान एकः कालः शैलानिवानन्तः ॥ २ ॥

अथ कदाचिद्राजा राज्यवर्धनं कवचहरमाहूय हूणान्हन्तुं हरिणानिव हरिर्हरिणेशकिशोरमपरिमितबलानुयातं चिरंतनैरमात्यैरनुरक्तैश्च महासामन्तैः कृत्वा साभिसरमुत्तरापथं प्राहिणोत् ।

प्रयान्तं च तं देवो हर्षः कतिचित्प्रयाणकानि तुरङ्गमैरनुवव्राज । प्रविष्टे च कैलासप्रभाभासिनीं ककुभं भ्रातरि वर्तमानो नवे वयसि विक्रमरसानुरोधिनि केसरिशरभशार्दूलवराहबहुलेषु तुषारशैलोपकण्ठेषूत्कण्ठमानवनदेवताकटाक्षांशुशारितशरीरकान्तिः क्रीडन्मृगयां मृगलोचनः कतिपयान्यहानि बहिरेव व्यलम्बत । चकार चाकर्णान्ताकृष्टकार्मुकनिर्गतभासुरभल्लवर्षी स्वल्पीयोभिरेव दिवसैर्निःश्वापदान्यरण्यानि ।

एकदा तु वासतेय्यास्तुरीये यामे प्रत्युषस्येव स्वप्ने चटुलज्वालापुञ्जपिञ्जरीकृतसकलककुभा दुर्निवारेण दवहुतभुजा दह्यमानं केसरिणमद्राक्षीत् । तस्मिन्नेव च दावदहने समुत्सृज्य शावकानुत्प्लुत्य चात्मानं पातयन्तीं सिंहीमपश्यत् । आसीच्चास्य चेतसि— 'लोके हि लोहेभ्यः कठिनतराः खलु स्नेहमया बन्धनपाशाः, यदाकृष्टास्तिर्यञ्चोऽप्येवमाचरन्ति' इति । प्रबुद्धस्य चास्य मुहुर्मु-

---

नियतीत्यादि । नियतिर्दैवम् । लोकं जनम् । तडिद्विद्युत् । तडिदपि तरलालोकं कृत्वा वज्रं निपातयति ॥ १ ॥

अनन्तः पर्यन्तरहितः शेषभट्टारकश्च ॥ २ ॥ आर्यायुगलेनानेन भाविनी राजविपत्तिः सूचिता ।

कवचहर इति वयसि नित्यम् । बलं सैन्यम्, सामर्थ्यं च । साभिसरं ससहायम् ।

केसरिणः सिंहाः । अष्टपादाः प्राणिविशेषाः शरभाः । शार्दूला व्याघ्राः । वराहाः सूकराः । **क्रिडन्मृगयामिति** । 'कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्' इति भावार्थरूपाया मृगयायाः कर्मभावः ।

वासतेयी रात्रिः । तुरीये चतुर्थेऽहनि । संवाह्यमानं भ्राम्यमाणम् । ललितं व्याप्तम् ।

हुर्दक्षिणेतरमक्षि पस्पन्दे । गात्रेषु चाकस्मादेव वेपथुर्विपप्रथे । निर्निमित्तमेवान्तर्बन्धनस्थानाच्चचालेव हृदयम् । अकारणादेव चाजायत गरीयसी दुःखासिका । किमिदमिति च समुत्पन्नविविधविकल्पविमथितमतिरपगतधृतिश्चिन्तावनमितवदनः स्तिमिततारकेण चक्षुषा समुद्विद्यमानस्थलकमलिनीवनामिव चकार चकोरेक्षणः क्षणं क्षोणीम् । अहि च तस्मिञ्शून्येनैव च चेतसा चिक्रीड मृगयाम् । आरोहति च हरितहये मध्यमह्नो भवनमागत्योभयतो मन्दमन्दं संवाह्यमाननतुतालवृन्तः क्षितितलविततामतिशिशिरमलयजरसलवलुलितवपुषमिन्दुधवलोपधानधारिणीं वेत्रपट्टिकामधिशयानः साशङ्क एव तस्थौ ।

अथ दूरादेव लेखगर्भया नीलीरागमेचकरुचा चीरचीरिकया रचितमुण्डमालकम्, श्रमातपाभ्यामारोप्यमाणकायकालिमानम्, अन्तर्गतेन शोकशिखिनाङ्गारतामिव नीयमानम्, अतित्वरागमनद्भुततरपदोद्धूयमानधूलिराजिव्याजेन राजवार्ताश्रवणकुतूहलिन्या मेदिन्येवानुगम्यमानम्, अभिमुखपवनप्रेङ्खत्प्रविततोत्तरीयपटप्रान्तवीज्यमानोभयपार्श्वमतित्वरया कृतपक्षमिवाशु परापतन्तम्, प्रेर्यमाणमिव पृष्ठतः स्वाम्यादेशेन कृष्यमाणमिव पुरस्तादायतैः श्रमश्वासमोक्षैः स्विद्यल्ललाटतटघटमानप्रतिबिम्बकेन कार्यकौतुकादपह्नियमाणलेखमिव भास्वता संभ्रमभ्रष्टैरिवेन्द्रियैः शून्यीकृतशरीरम्, लेखार्पितप्रयोजनगौरवादिव समेपि वर्त्मनि शून्यहृदयतया स्खलन्तम्, कालमेघशकलमिव पतिष्यतो दुर्वार्तावज्रस्य, धूमपल्लवमिव ज्वलिष्यतः शोकज्वलनस्य, बीजमिव फलिष्यतो दुष्कृतशालेरनिमित्तभूतदीर्घाध्वगं कुरङ्गकनामानमायान्तमद्राक्षीत् ।

दृष्ट्वा च पूर्वनिमित्तपरम्पराविर्भावितभीतिरभिद्यत हृदयेन । कुरङ्गकस्तु कृतप्रणामः समुपसृत्य प्रथममाननलग्नं विषादमुपनिन्ये, पश्चाल्लेखम् । तं च देवो हर्षः स्वयमेवादायावाचयत् । लेखार्थेनैव च समं गृहीत्वा हृदयेन संतापमवग्रहरूपोऽभ्यधात्—

अथेत्यादौ दूरादेव कुरङ्गकनामानमध्वगमापतन्तमद्राक्षीदिति संबन्धः । नीली नामौषधिः । बर्हिकण्ठसमानो मेचकः । आरोप्यमाणः क्रियमाणः । इन्द्रियैरिति । शून्यत्वं तेषां जडत्वात्ते । पल्लवं खण्डम् ।

'कुरङ्गक, किं मान्द्यं तातस्य' इति । स चक्षुषा बाष्पजलबिन्दुभिर्मुखेन च खञ्जाक्षरैः क्षरद्भिर्युगपदाचचक्षे—'देव, दाहज्वरो महान्' इति । तच्चाकर्ण्य सहसा सहस्रधेवास्य हृदयं पफाल । कृताचमनश्च जनयितुरायुष्कामोऽपरिमितमणिकनकरजतजातमात्मपरिवर्हमशेषं ब्राह्मणसादकरोत् । अभुक्त एवोच्चचाल । 'दापय वाजिनः पर्याणम्' इति च पुरः स्थितं शिरः कृपाणं बिभ्राणं बभाण युवानम् । वेपमानहृदयश्च ससंभ्रमप्रधावितपरिवर्धकोपनीतमारुह्य तुरङ्गमेकाक्येव प्रावर्तत ।

अकाण्डप्रयाणसंज्ञाशङ्कक्षुभितं तु संभ्रमात्सञ्जीभूतमुद्भूतमुखरखुररवभरितसकलभुवनविवरमागत्यागत्य सर्वाभ्यो दिग्भ्यो धावमानमश्वीयमढौकत । प्रस्थितस्य चास्य प्रदक्षिणेतरं प्रयान्तो विनाशमुपस्थितं राजसिंहस्य हरिणाः प्रकटयांबभूवुः । अशिशिररश्मिमण्डलाभिमुखश्च हृदयमवदारयन्निव दावशुष्के दारुणि दारुणं रराण वायसः । कज्जलमय इव बहुदिवसमुपचितबहलमलपटलमलिनिततनुरभिमुखमाजगाम शिखिपिच्छलाञ्छनो नग्नाटकः । दुर्निमित्तैरनभिनन्द्यमानगमनश्च नितरामशङ्कत । हृदयेन पितृस्नेहाहितभ्रदिम्ना च तत्तदुपेक्षमाणस्तुरङ्गमस्कन्धबद्धलक्ष्यं चक्षुरविचलं दधानो दुःखमवसितहसितसंकथस्तूष्णींभूतेन भूपाललोकेनानुगम्यमानो बहुयोजनसंपिण्डितमध्वानमेकेनैवाह्ना समलङ्घयत् ।

उपलब्धनरेन्द्रमान्द्यवार्ताविषण्ण इव नष्टतेजस्यधोमुखीभवति भगवति भानुमति भण्डिप्रमुखेन प्रणयिना राजपुत्रलोकेन बहुशो विज्ञाप्यमानोऽपि नाहारमकरोत् । पुरःप्रवृत्तप्रतीहारगृह्यमाणग्रामीणपरम्पराप्रकटितप्रगुणवर्त्मा च वहन्नेव निन्ये निशाम् ।

पफाल पुस्फोट । जातेति शब्दः प्रकारे । परिबर्हो भोजनादिपरिच्छेदः । ब्राह्मणसाद्ब्राह्मणाधीनम् । न भुक्तमस्येत्यभुक्तः । शिरोदेशे स्थापितः कृपाणः । परिवर्धकोऽश्वपालः प्रावर्ततेत्यर्थाद्वन्तुम् ।

अश्वीयमश्वसमूहः । सिंहशब्दः प्रशंसायाम् । **हरिणा इति** । मृगाहि स्वैरं चरन्तः सिंहस्य विनाशमभावं सूचयन्ति । नग्नाटको नग्नक्षपणकः । तुरङ्गमेति चक्षुर्विशेषणम् । दुःखेन समवसिता निवृत्ता संकथा कथनं यस्य सः । संपिण्डितं संकलितम् ।

प्रगुणं स्पष्टम् । वहन्नविश्रान्तिं गच्छन् ।

अन्यस्मिन्नहनि मध्यंदिने विगतजयशब्दम्, अस्तमिततूर्यनादमुपसंहृतगीतम्, उत्सारितोत्सवम्, अप्रगीतचारणम्, अप्रसारितापणपण्यम्, स्थानस्थानेषु पवनबलकुटिलाभिः कोटिहोमधूमलेखाभिरुल्लसन्तीभिर्यममहिषविषाणकोटिभिरिवोल्लिख्यमानम्, कृतान्तपाशवागुराभिरिव वेष्ट्यमानम्, उपरि कालमहिपालंकारकालायसकिङ्किणीभिरिव कटु कणन्तीभिर्दिवसम्, वायसमण्डलीभिर्भ्रमन्तीभिरावेद्यमानप्रत्यासन्नाशुभम्, क्वचित्प्रतिशायितस्निग्धबान्धवाराध्यमानाहिर्बुध्नम्, क्वचिद्दीपिकादह्यमानकुलपुत्रकप्रसाद्यमानमातृमण्डलम्, क्वचिन्मुण्डोपहाराहरणोद्यतद्रविडप्रार्थ्यमानामर्दकम्, क्वचिदान्ध्रोद्भ्रियमाणबाहुवप्रोपयाच्यमानचण्डिकम्, अन्यत्र शिरोविधृतविलीयमानगुग्गुलुविकलनवसेवकानुनीयमानमहाकालम्, अपरत्र निशितशस्त्रीनिकृत्तात्ममांसहोमप्रसक्तप्लवर्गम्, अपरत्र प्रकाशनरपतिकुमारकक्रियमाणमहामांसविक्रयप्रक्रमम्, उपहृतमिव श्मशानपांशुभिरमङ्गलैरिव परिगृहीतम्, यातुधानैरिव विध्वस्तम्, कलिकालेनेव कवलितम्, पापपटलैरिव संछादितम्, अधर्मविक्षेपैरिव लुण्ठितम्, अनित्यताधिकारैरिवाक्रान्तम्, नियतिविलासैरिवात्मीकृतम्, शून्यमिव सुप्तमिव मुषितमिव विलक्षितमिव छलितमिव मूर्छितमिव स्कन्धावारं समाससाद ।

प्रविशन्नेव च विपणिवर्त्मनि कुतूहलाकुलबहलबालकपरिवृतमूर्ध्वयष्टिविष्कम्भविततेवामहस्तवर्तिनि भीषणमहिषाधिरूढप्रेतनाथसनाथे चित्रवति पटे परलोकव्यतिकरमितरकरकलितेन शरकाण्डेन कथयन्तं यमपट्टिकं ददर्श । तेनैव च गीयमानं श्लोकमशृणोत्—

'मातापितृसहस्राणि पुत्रदारशतानि च ।
युगे युगे व्यतीतानि कस्य ते कस्य वा भवान् ॥३॥' इति'

अन्यस्मिन्नित्यादौ स्कन्धावारं समाससादेति संबन्धः । आपणेषु हट्टेषु पण्यं विक्रेयं वस्तु । कालो यमः । कालायसं लोहजातिभेदः । किङ्किण्यः सूक्ष्मघण्टिकाः । प्रतिशायिता उपोषिताः । अहिर्बुध्नो हरः । मुण्डं शिरः । द्रविडा आन्ध्राश्च जनपदभेदाः । आमर्दको वेतालः । रौद्रदेवताभेद इत्यन्ये ।

विष्कम्भोऽवष्टम्भः । विततः प्रसारितः । व्यतिकरो वृत्तान्तः । यमपट्टेन जीवति यमपट्टिकः । मन्दं मन्दमित्यादौ राजकुलं विवेशेति संबन्धः । अमृत-

तेन चाधिकतरमवदीर्यमाणहृदयः क्रमेण राजद्वारं प्रतिषिद्धसकललोकप्रवेशं ययौ । तुरगादवतीर्णश्चाभ्यन्तरान्निष्कामन्तमप्रसन्नमुखरागं मुक्तमिवेन्द्रियैः सुषेणनामानं वैद्यकुमारमद्राक्षीत् । कृतनमस्कारं चाप्राक्षीत्—'सुषेण, अस्ति तातस्य विशेषो न वा' इति । सोऽब्रवीत्—'नास्तीदानीं यदि भवेत्कुमारं द्रष्टा' इति । मन्दं मन्दं द्वारपालैः प्रणम्यमानश्च दीयमानसर्वस्वम्, पूज्यमानकुलदेवतम्, प्रारब्धामृतचरुपचनक्रियम्, क्रियमाणषडाहुतिहोमम, हूयमानपृषदाज्यलवलिप्तप्रचलदूर्वापल्लवम्, पठ्यमानमहामयूरीप्रवर्त्यमानगृहशान्तिनिर्वर्त्यमानभूतरक्षाबलिविधानम्, प्रयतविप्रप्रस्तुतसंहिताजपं जप्यमानरुद्रैकादशीशब्दायमानशिवगृहम्, अतिशुचिशैवसंपाद्यमानविरूपाक्षक्षीरकलशसहस्रस्नपनम्, अजिरोपविष्टैश्चानासादितस्वामिदर्शनदूयमानमानसैरभ्यन्तरनिष्पतितनिकटवर्तिपरिजननिवेद्यमानवार्तैर्वार्तीभूतस्नानभोजनशयनैरुज्झितात्मसंस्कारमलिनवेशैर्लिखितैरिव निश्चलैर्नरपतिभिर्नीयमाननक्तंदिवं दुःखदीनवदनेन च प्रघणेषु बद्धमण्डलेनोपांशुव्याहृतैः केनचिच्चिकित्सकदोषानुद्भावयता, केनचिदसाध्यव्याधिलक्षणपदानि पठता, केनचिदुःस्वप्नानावेदयता, केनचित्पिशाचवार्तां विवृण्वता, केनचित्कार्तान्तिकादेशान्प्रकाशयता, केनचिदुपलिङ्गानि गायता, अन्येनानित्यतां भावयता, संसारं चापवदता, कलिकालविलसितानि च निन्दता, दैवं चोपालभमानेनापरेण धर्माय कुप्यता, राजकुलदेवताश्चाधिक्षिपता, अपरेण क्लिष्टकुलपुत्रकभाग्यानि गर्हयता, बाह्यपरिजनेन कथ्यमानकष्टपार्थिवावस्थं राजकुलं विवेश ।

अविरलबाष्पपयःपरिप्लुतलोचनेन पितृपरिजनेन वीक्ष्यमाणो विविधौषधिद्रव्यद्रवगन्धगर्भमुत्कथतां क्वाथानां सर्पिषां तैलानां च पच्यमानानां गन्धमाजिघ्रन्नवाप तृतीयं कक्ष्यान्तरम् ।

चरुः शान्त्यर्थं चरुः । 'प्रजापतये स्वाहा' इति षण्णां देवतानां नाम गृहीत्वा षण्णामेवाहुतीनां प्रक्षेपः षडाहुतिहोम उच्यते । दधिघृते एकीकृत्य पृषदाज्यम् । 'पृषदाज्यं सदध्याज्ये' इति कोशः । महामायूरी बौद्धविद्या । शैवमन्त्र इति केचित् । संहिता वेदपाठः संहितारूपः । रुद्रैकादशी शिवमन्त्रः । वार्तात आगतं वार्तीभूतम् । प्रघनो बहिर्द्वारैकदेशः । कार्तान्तिको दैवज्ञः । उपलिङ्गान्युत्पाताः । अपवदता निन्दता ।

तत्र चातिनिःशब्दे गृहावग्रहणीग्राहिबहुवेत्रिणि, त्रिगुणतिरस्करिणीतिरोहितसुवीथीपथे, पिहितपक्षद्वारके, परिहृतकवाटरटिते, घटितगवाक्षरक्षितमरुति, दूयमानपरिचारके, चरणताडनस्खनत्सोपानप्रकुपितप्रतीहारे, निभृतसंज्ञानिर्दिश्यमानसकलकर्मणि, नातिनिकटोपविष्टकङ्कटिनि, कोणस्थिताह्वानचकिताचमनवाहिनि, चन्द्रशालिकालीनमूकमौललोके, महाधिविधुरबान्धवाङ्गनावर्गगृहीतप्रच्छन्नप्रग्रीवके, संजवनपुञ्जितोद्विग्नपरिजने, प्रविष्टकतिपयप्रणयिनि, गम्भीरज्वरारम्भभीतभिषजि, दुर्भनायमानमन्त्रिणि, मन्दायमानपुरोधसि, सीदत्सुहृदि, निद्राणविपश्चिति, संतप्तप्रसामन्ते, विचित्तचामरग्राहिणि, दुःखक्षामशिरोरक्षिणि, क्षीयमाणप्रसादवित्तमनोरथसंपदि, स्वाभिभक्तिपरित्यक्ताहारहीयमानबलविकलवल्लभभूभृति, क्षितितलपतितसकलरजनीजागरूकराजपुत्रकुमारके कुलक्रमागतकुलपुत्रनिवहोह्यमानशुचिशोकसंकुचितकञ्चुकिनि, निरानन्दवन्दिनि, निःश्वसन्निराशासन्नसेवके, निःसृतताम्बूलधूसराधरवारयोषिति, विलक्षवैद्योपदिश्यमानपथ्याहरणावहितपौरोगवे, अनुजीविपीयमानोच्चषकधारावारिविनोद्यमानास्यशोषरुजि, राजाभिलाषभोज्यमानबहुभुजि, भेषजसामग्रीसंपादनव्यग्रसमग्रव्यवहारिणि, मुहुर्मुहुराहूयमानतोयकर्मान्तिकानुमितघोरातुरतृषि, तुषारपरिकरितकरकशिशिरीक्रियमाणोदश्विति, श्वेतार्द्रकर्पटार्पितकर्पूरपरागशीतलीकृतशलाके, नाश्यानपङ्कलिप्यमाननवभाण्डगतगण्डूषग्रहणमस्तुनि, तिम्यत्कोमलकमलिनीपलाशप्रावृतमृदुमृणालके, सनालनीलोत्पलपूलीसनाथसलिलपानभाजनभुवि, धारानिपा-

---

द्रवो रसः ।

तत्रेत्यादौ तत्र चैवंविधे धवलगृहे स्थितमीदृशं पितरमद्राक्षीदिति संबन्धः । गृहावग्रहणी देहलीद्वारारम्भदेशः । वेत्रिणो द्वाःस्थाः । तिरस्करिणी जवनिका । सुवीथी धवलगृहस्याभ्यन्तरीकृता । 'प्रच्छन्नमन्तर्द्वारं यत्पक्षद्वारं तदुच्यते' । घटितो रक्षितः । निभृतं गुप्तम् । आचमनवाही पानीयहारकः । चन्द्रशालिका धवलगृहस्योपरि प्रासादिका । 'आधिर्ना मानसीपीडा' । 'संजवनं चतुःशाला' । विपश्चित्पण्डितः । आप्ता आश्वस्ताः । प्रसादेन वित्ताः प्रख्याताः प्रसादवित्ताः । जागरूका जागरणशीलाः । विलक्षो लज्जितः । पौरोगवो महानसाध्यक्षः । उच्चषकमपगतपानभाजनम् । भेषजमौषधम् । तोयकर्मान्तिका तोयकर्मशाला । करको जलभाण्डम् । शलाकाः पाषाणकणिकाः । मुखपूरणं गण्डूषः । निर्वाप्यमाणं

तनिर्वाप्यमाणकथिताम्भसि, पटुपाटलशर्करामोदमुचि, मच्चकाश्रितसिकतिलकर्कंरीविश्रान्तान्तरचक्षुषि, सरलशेवलवलयितगलद्दोलयन्त्रके, गल्वर्कशालाजिरोल्लासितलाजसक्तुनिपीतमसारपारीपरिगृहीतकर्कशर्करे, शिशिरौषधरसचूर्णावकीर्णस्फटिकशुक्तिशङ्खसंचये, संचितप्रचुरप्राचीनामलकमातुलुङ्गद्राक्षादाडिमादिफले, प्रतिग्राहितविप्रविप्रकीर्यमाणशान्त्युदकविप्रुषि, प्रेष्यापेष्यमाणललाटलेपोपदिग्धदृषदि धवलगृहे स्थितम्, परलोकविजयाय नीराज्यमानमिव ज्वरज्वलनेनानवरतपरिवर्तनैस्तरङ्गिणि शयनीये शेषमिव विषोष्मणा क्षीरोदन्वति विचेष्टमानम्, मुक्ताफलवालुकाधूलिधवलितं जलधिमिव क्षयकाले शुष्यन्तम्, कालेन कैलासमिव दशाननेनोद्धियमाणम्, अविरतचन्दनचर्चापराणां परिचारकाणामत्युष्णावयवस्पर्शभस्मीभूतोदरैरिव धवलैः करैः स्पृश्यमानं लोकान्तरप्रस्थितम्, स्थास्नुना स्वयशसैव चन्दनानुलेपनच्छलेनापृच्छ्यमानम्, अविच्छिन्नदीयमानकमलकुमुदेन्दीवरदलम्, कालकटाक्षपतनशवलमिव शरीरमुद्वहन्तम्, निबिडदुकूलपट्टनिपीडितकेशान्तकथ्यमानकष्टवेदनानुबन्धं मूर्धानं धारयन्तम्, दुर्धरवेदनोन्नमन्नीलशिराजालककरालेन च कालाङ्गुलिलिख्यमानलेखाख्यातमरणावधिदिवससंख्यानेनेव ललाटफलकेन भयमुपजनयन्तम्, आसन्नयमदर्शनोद्वेगादिव च किंचिदन्तःप्रविष्टतारकम्, शुष्यदशनपङ्क्तिप्रसृतधूसरदीधितितरङ्गिणीं मृगतृष्णिकामिवोष्णां निश्वासपरम्परामुद्वहन्तम्, अत्युष्णनिश्वासदग्धयेव श्यामायमानया रसनया निवेद्यमानदारुणसंनिपातारम्भम्, उरःस्थलस्थापितमणिमौक्तिकहारचन्दनचन्द्रकान्तम्, कृतान्तदूतदर्शनयोग्यमिवात्मानं कुर्वाणम्, अङ्गभङ्गबलनोत्क्षिप्तभुजयुगलम्, पर्यस्तहस्तनखमयूखैर्धारागृहमिव तापशान्तये रचयन्तम्, नेदिष्ठसलिलमणिकुट्टिमादर्शोदरेषु निपतद्भिः प्रतिबिम्बैरपि संतापातिशयमिव कथयन्तम्, स्पृशन्तीं प्रणयिनीमिव विश्वासभूमिं मूर्छां बहु मन्यमानम्, अन्तकाह्वाना-

---

शीतलीक्रियमाणम्।पाटला शर्करा विशेषः। मच्चक आधारभेदः। कर्करी वारिधानी-गोलयन्त्रकं बहुच्छिद्रं जलभाण्डम्। उल्लासिता विस्तारिताः। प्रतिग्राहिताः प्रतिग्रहं ग्राहिताः। प्रेष्या दासी। कालेन यमेन, कृष्णेन च। दशाननो व्याधिः, राक्षसश्च। आपृच्छ्यमानं ज्योक्रियमाणम्। रसना जिह्वा। नेदिष्ठमन्तिकतमम्।

क्षरैरिव सभयभिषग्दृष्टैररिष्टैराविष्टम्, महाप्रस्थानकाले स्वसंतापसंतानमाप्तहृदयेषु संचारयन्तम्, अरतिपरिगृहीतमीर्ष्ययेव छायया मुच्यमानम्, उद्योगमिवोपद्रवाणाम्, सर्वास्त्रमोक्षमिव क्षामतायाः, हस्तीकृतं विहस्ततया, विषयीकृतं वैषम्येण, क्षेत्रीकृतं क्षयेण, गोचरीकृतं ग्लान्या, दृष्टं दुःखासिकया, आत्मीकृतमस्वास्थ्येन, विधेयीकृतं व्याधिना, क्रोडीकृतं कालेन, लक्ष्यीकृतं दक्षिणाशया, पीतमिव पीडाभिः, जग्धमिव जागरेण, निगीर्णमिव वैवर्ण्येन, ग्रासीकृतं गात्रभङ्गेन, ह्रियमाणमिव विपद्भिः, वण्ट्यमानमिव वेदनाभिः, लुण्ट्यमानमिव दुःखैः, आदित्सितं दैवेन, निरूपितं नियत्या, घ्रातमनित्यत्वेन, अभिभूयमानमभावेन, परिकलितं परासुतया, दत्तावकाशं क्लेशस्य, निवासं वैमनस्यस्य, समीपे कालस्य, अन्तिकेऽन्योच्छ्वासस्य, मुखे महाप्रयासस्य, द्वारि दीर्घनिद्रायाः, जिह्वाग्रे जीवितेशस्य वर्तमानम्, विरलं वाचि, चलितं चेतसि, विह्वलं वपुषि, क्षीणमायुषि, प्रचुरं प्रलापे, संततं श्वसिते, जितं जृम्भिकाभिः, पराधीनमाधिभिः, अनुबद्धमनुबन्धिकाभिः, पार्श्वोपतिष्ठद्यानवरतरोदनोच्छूननयनया गृहीतचामरिकयापि निश्वसितैरेव वीजयन्त्या विविधौषधिधूलिधूसरितशरीरया मुहुर्मुहुः 'आर्यपुत्र, स्वपिषि' इति व्याहरन्त्या देव्या यशोवत्या शिरसि वक्षसि च स्पृश्यमानं पितरमद्राक्षीत्।

दृष्ट्वा च प्रथमदुःखसंपातमभ्यमानमतिराशङ्कित इव भागधेयेभ्यः समभवत्। अन्तकपुरवर्तिनमेव च पितरममन्यत। निराकृत इव चान्तःकरणेन क्षणमासीत्। अवधूतश्च धैर्येण, क्षेत्रीकृतः क्षोभेण, रिक्तीकृतो रत्या, विषयीकृतो विषादेन, पावकमयमिव हृदयमुद्वहन्, विषमविदूषितानीव मुह्यन्तीन्द्रियाणि बिभ्राणः, तमसा रसातलमपि विशेषयन्, शून्यत्वेनाकाशमप्यतिशयानो नाविन्दत कर्तव्यम्। पस्पर्श च हृदयेन भियमुत्तमाङ्गेन च गाम्।

अवनिपतिस्तु दूरादेव दृष्ट्वातिदयितं तनयं तदवस्थोऽपि निर्भर-

अरिष्टैर्दुर्लक्षणैः। अरतिरेकत्रानवस्थितिः। छाया कान्तिः। विहस्तो क्षमः। लक्ष्यीकृतम्। आघ्रातमित्यर्थः। वण्ट्यमानं भागीक्रियमाणम्। जीवितेशो यमः। अनुबन्धिका गात्रसंधिपीडा।

भागधेयेभ्यो देवेभ्यः। अन्तःकरणेन मनसा।

स्नेहावर्जितः प्रधावमानो मनसा प्रसार्य भुजौ 'एह्येहि' इत्याह्वयञ्शरीरार्धेन शयनादुदगात्। ससंभ्रममुपसृतं चैनं विनयावनम्रमुन्नमय्य बलादुरसि निवेश्य, विशन्निव प्रेम्णा निशाकरमण्डलमध्यम्, मज्जन्निवामृतमये महासरसि, स्नानिव महति हरिचन्दनरसप्रस्रवणे, अभिषिच्यमान इव तुषाराद्रिद्रवेण, पीडयन्नङ्गैरङ्गानि, कपोलेन कपोलमवघट्टयन्, निमीलयन्पक्ष्माग्रग्रथिताजस्रास्रविस्राविणी विलोचने विस्मृतज्वरसंज्वरः सुचिरमालिलिङ्ग कथं कथमपि चिराद्विमुक्तमुपसृत्य कृतनमस्कारं प्रणतजननीकमुपागतमासीनं च शयनान्तिके पिबन्निव विगतनिमेषनिश्चलेन चक्षुषा व्यलोकयत्। पस्पर्श च पुनः पुनर्वेपथुमता पाणितलेन क्षयक्षामकण्ठश्च कृच्छ्रादिवावादीत्—'वत्स, कृशोऽसि' इति। भण्डिस्त्वकथयत्—'देव, तृतीयमहः कृताहारस्यास्याद्य' इति।

तच्छ्रुत्वा वाष्पवेगगृह्यमाणाक्षरं कथं कथमप्यायतं निःश्वस्योवाच—'वत्स, जानामि त्वां पितृप्रियमतिमृदुहृदयम्। ईदृशेषु विधुरयति धीमतोऽपि धियम्। अतिदुर्धरो बान्धवस्नेहः सर्वप्रमाथी। अतो नार्हस्यात्मानं शुचे दातुम्। उद्दामदाहज्वरदग्धोऽपि दह्ये खल्वहमधिकतरमनेनायुष्मदाधिना। निशितमिव शस्त्रं तक्ष्णोति मां त्वदीयस्तनिमा। सुखं च राज्यं च वंशश्च प्राणाश्च त्वयि मे स्थिताः। यथा मम तथा सर्वासां प्रजानाम्। त्वद्विधानां पीडाः पीडयन्ति सकलमेव भुवनतलम्। न ह्यल्पपुण्यभाजां वंशमलंकुर्वन्ति भवादृशाः फलमस्यानेकजन्मान्तरोपार्जितस्याकलुषस्य कर्मणः। करतलगतमिव कथयन्ति चतुर्णामप्यर्णवानामाधिपत्यं ते लक्षणानि। त्वज्जन्मनैव कृतार्थोऽस्मि। निरभिलाषोऽस्मि जीवितव्ये। भिषगनुरोधः पाययति मामौषधम्। अपि च सर्वप्रजापुण्यैः सकलभुवनतलपरिपालनार्थमुत्पत्स्यमानानां भवादृशां जन्मग्रहणोपायः पितरौ। प्रजाभिस्तु बन्धुमन्तो राजानः, न ज्ञातिभिः। तदुत्तिष्ठ। कुरु पुनरेव सर्वाः क्रियाः। कृताहारे च त्वय्यहमपि स्वयमुपयोक्ष्ये पथ्यम्' इत्येवमभिहितस्य चास्य धक्ष्यन्निव हृदयमतितरां शोकानलः संदुधुक्षे। क्षणमात्रं च स्थित्वा पित्रा

प्रस्रवणे निम्ने। द्रवो रसः। संज्वरः संतापः।
सूची शलाका।

पुनराहारार्थमादिश्यमानो धवलगृहादवततार । चकार च चेतसि—'अकाण्डे खल्वयं समुपस्थितो महाप्रलयो व्यभ्र इव वज्रपातः । सामान्योऽपि तावच्छोकः, सोच्छ्वासं मरणम्, अनुपदिष्टौषधी महाव्याधिः, अभस्मीकरणोऽग्निप्रवेशः, अनुपरतस्यैव नरकवासः, निर्ज्योतिरङ्गारवर्षमशकलीकरणं क्रकचदारणमव्रणो वज्रसूचीपातः । किमुत विशेषाश्रितः । किमत्र करवाणि' इति ।

राजपुरुषेणाधिष्ठितश्च गत्वा स्वधाम धूममयानिव कृताश्रुपातान्, अग्निमयानिव जनितहृदयदाहान् विषमयानिव दत्तमूर्छावेगान्, महापातकमयानिवोत्पादितघृणान्, क्षारमयानिवानीतवेदनान्, कतिचित्कवलानगृह्णान् । आचमंश्च चामरग्राहिणमादिदेश—'विज्ञायागच्छ कथमास्ते तातः' इति गत्वा च प्रतिनिवृत्य च 'देव, तथैव' इति विज्ञापितस्तेनागृहीतताम्बूल एवोत्तम्यता मनसास्ताभिलाषिणि सवितरि सर्वानाहूयोपह्वरे वैद्याः किमस्मिन्नेवंविधे विधेयमधुनेति विषण्णहृदयः पप्रच्छ । ते तु व्यज्ञापयन्—'देव, धैर्यमलम्बस्व । कतिपयैरेव वासरैः पुनः स्वां प्रकृतिमापन्नं स्वस्थं श्रोष्यसि पितरम्' इति ।

तेषां तु भिषजां मध्ये पौनर्वसवो युवाष्टादशवर्षदेशीयस्तस्मिन्नेव राजकुले कुलक्रमागतो गतः पारमष्टाङ्गस्यायुर्वेदस्य भूभुजा सुतनिर्विशेषं लालितः प्रकृत्यैवातिपटीयस्या प्रज्ञया यथावद्विज्ञाता व्याधिस्वरूपाणां रसायनो नाम वैद्यकुमारकः सास्रस्तूष्णीमधोमुखोऽभूत् । पृष्टश्च राजसूनुना—'सखे रसायन, कथय तथ्यं यद्यसाध्विव पश्यसि' इति । सोऽब्रवीत्—'देव, श्वः प्रभाते यथावस्थितमावेदयितास्मि' इति ।

अत्रैव चान्तरे भवनकलिनीपालः कोकमाश्वासयन्नपरवक्त्रमुच्चैरपठत्—

'विहग कुरु दृढं मनः स्वयं त्यज शुचमास्व विवेकवर्त्मनि ।
सह कमलसरोजिनीश्रिया श्रयति सुमेरुशिरो विरोचनः ॥४॥'

धूममयानिवेति । धूमः किलाश्रु मोचयति घृणा जुगुप्सा । उपह्वरे रहसि । स्वां प्रकृतिममन्दत्वम्, अव्यक्तरूपत्वं च । पृथिव्यादिषु वा लयस्वस्थं व्याधिविनिर्मुक्तम्, स्वर्गस्थं च । यतः—'जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च । तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥' इत्युक्तम् ।

तच्चाकर्ण्य वाङ्मित्तज्ञः पितरि सुतरां जीविताशां शिथिलीचकार। गतेषु च भिक्षुषु क्षतधृतिः क्षपामुखे क्षितिपालसमीपमेव पुनरारुरोह। तत्र च—'दाहो महान्। आहर हारान्हरिणि, मणिदर्पणान्मे देहे देहि वैदेहि, हिमलवैर्लिम्प ललाटं लीलावति, घनसारक्षोदधूलीर्निधेहि धवलाक्षि, निक्षिप चक्षुषि चन्द्रकान्तं कान्तिमति, कपोले कलय कुवलयं कलावति, चन्दनचर्चां रचय चारुमते, पाटय पटमारुतं पाटलिके, मन्दय दाहमिन्दुमति, अरविन्दैर्जनय जलार्द्रया मुदं मदिरावति, समुपनय मृणालानि मालति, तरलय तालवृन्तमावन्तिके, मूर्धानं धावमानं बधान बन्धुमति, कंधरां धारय धारणिके, उरसि सशीकरं करं कुरु कुरङ्गवति, संवाहय बाहू बलाहिके, पीडय पादौ पद्मावति, गृहाण गाढमङ्गमनङ्गसेने, का वेला विलासवति नैति निद्रा, कथाः कथय कुमुद्वति' इत्येवंप्रायान्पितुरालापाननवरतमाकर्णयन्दूयमानहृदयो दुःखदीर्घां जाग्रदेव निशामनैषीत्।

उषसि चावतीर्य राजद्वारदेशोपसर्पिणा परिवर्धकेनोपस्थापितेऽपि तुरङ्गे चरणाभ्यामेवाजगाम स्वमन्दिरम्। तत्र च त्वरमाणो भ्रातुरागमनार्थमुपर्युपरि क्षिप्रपातिनो दीर्घाध्वगान्प्रजविनश्चोष्ट्रपालान्प्राहिणोत्। प्रक्षालितवदनश्च परिजनोपनीतमपि प्रतिकर्म नाग्रहीत्। अग्रतः स्थितानां राजपुत्रयूनां विमनसां 'रसायनो रसायनः' इति जल्पितमव्यक्तमश्रौषीत्। पर्यपृच्छच्च तान्—'भद्राः, किं रसायन' इति। पृष्टाश्च ते सर्वे सममेव तूष्णींबभूवुः भूयोभूयश्चानुवध्यमाना दुःखेन कथंकथमप्याचचक्षिरे—'देव, पावकं प्रविष्टः' इति। तच्च श्रुत्वा प्रुष्ट इवान्तस्तापेन सद्यो विव-

---

पुनर्वसोरपत्यं पौनर्वसवः। पुनर्वसुना मुनिना प्रोक्तमायुर्वेदमधीते पौनर्वसव इति। **अष्टाङ्गमिति**। उक्तं च—'कायबालग्रहोर्ध्वाङ्गशल्यदंष्ट्रजरावृषान्। अष्टावङ्गानि तस्याहुश्चिकित्सा तेषु संश्रिता॥' इति। आयुर्वेदस्य वैद्यशास्त्रस्य।

कोकश्चक्रवाकः। विरोचनो रविः। तत्र चेत्यादौ तत्र च क्षितिपालसमीप इत्यादीन्भृत्यकलालापानाकर्ण्यनिशामनैषीदिति संबन्धः। घनसारः कर्पूरः। पाटय पटुं कुरु। कंधरां ग्रीवाम्। संवाहय मर्दय। कुमुद्वतीत्यादयः शब्दत्वाल्लसाधवः।

परिवर्धकोश्वपालः। प्रतिकर्म प्रसाधनम्। कार्तस्वरं हेम। तदपि ज्वल-

र्णतामगात् । उत्पाट्यमानमिव च न शशाक शोकान्धं धारयितुं हृदयम् । आसीच्चास्य चेतसि कामं स्वयं न भवति न तु श्रावयत्यप्रियं वचनमरतिकरमितर इवाभिजातो जनः । कृच्छ्रे च यथानेनानुष्ठितमुज्ज्वलीकृतमधिकतरं ज्वलनप्रवेशेन कल्याणप्रकृति कार्तस्वरमिव कौलपुत्रमस्येति । पुनश्चाचिन्तयत्—'समुचितमेवाथवा स्नेहस्येदम् । किमस्य तातो न तातः, किंवाम्बा न जननी, वयं न भ्रातरः । अन्यस्मिन्नपि तावत्स्वामिनि दुर्लभीभवति भवन्त्यसवो प्रियमाणा हिहेतवो लोके किमुतामृतमयेऽनुजीविनां निर्व्याजबान्धवेऽवन्ध्यप्रसादे सुगृहीतनाम्नि ताते । संप्रति सांप्रतमाचरितमनेनात्मानं दहता । किं वास्याकल्पमवस्थितस्य स्थेयसो यशोमयस्य दह्यते । पतितः स केवलं दहने । दग्धास्तु वयम् । धन्यः खल्वसावग्रणीः पुण्यभाजाम् । अपुण्यभाक्त्वेदमेव राजकुलं कुलपुत्रेण यत्तादृशा वियुक्तम् । अपि च ममापि कः खल्वेतेषां प्राणानां कार्यातिभारः कृतशेषो वा, का वा व्याप्तता, येन नाद्यापि निष्ठुराः प्राणाः प्रतिष्ठन्ते । को वान्तरायो हृदयस्य येन सहस्रधा न दलतीति । दुःखार्तश्च न जगाम राजसद्म । समुत्ससर्ज च सर्वकार्याणि । शयनीये निपत्य उत्तरीयवाससा सोत्तमाङ्गमात्मानमवगुण्ठ्यातिष्ठत् ।

इत्थंभूते च देवे हर्षे राजनि च तदवस्थे सर्वस्य लोकस्य कपोलेषु कीलिता इव कराः, लोचनेषु लेप्यमय्य इवाश्रुस्तुतयः, नासाग्रेषु ग्रथिता इव दृष्टयः, कर्णेपूत्कीर्णा इव रुदितध्वनयः, जिह्वासु सहजानीव हाकष्टानि, लपनेषु पल्लवितानीव श्वसितानि, अधरेषु लिखितानीव परिदेवितपदानि, हृदयेषु निधानीकृतानीव दुःखान्यभवन् । उष्णाश्रुदाहभीतेव नाभजत नेत्रोदराणि निद्रा । निःश्वासतातविधुता इव व्यलीयन्त हासाः । निरवशेषदग्धेव च संतापेन न प्रावर्तत वाणी । कथास्वपि नाश्रूयन्त परिहासाः । कागमन्निति नाज्ञायन्त गीतगोष्ठ्यः । जन्मान्तरातीतानीव नास्मर्यन्त लास्यानि । स्वप्नेऽपि नागृह्यन्त प्रसाधनानि । वार्तापि नाल-

---

नप्रवेशेनाधिकतरमुज्ज्वलम् । सांप्रतं युक्तम् । अतिशयेन स्थिरं स्थेयस्तस्य । व्याप्तता व्यग्रता । प्रष्टा अग्रगामिनः । प्रतिष्ठन्ते प्रतिष्ठां कुर्वते ।

भ्यतोपभोगानाम् । नामापि नाकीर्त्यताहारस्य । खपुष्पप्रतिमान्यासन्नापानमण्डलानि । लोकान्तरमिवानीयन्त बन्दिवाचः । युगान्तर इवावर्तन्त निर्वृतयः । पुनरिवादह्यत शोकाग्निना मकरकेतुः । दिवापि नामुच्यन्त शयनानि । शनैः शनैश्च महापुरुषविनिपातपिशुनाः समं समन्तात्समुदभवन्भुवने भूयांसो भूपतेरभावाय भयमुत्पादयन्तो भूतानां महोत्पाताः ।

तथा हि दोलायमानसकलकुलाचलचक्रवाला पत्या सार्धं गन्तुकामेव प्रथममचलद्धरित्री । धन्वन्तरेरिवान्तरे तस्मिन्स्मरन्तः परस्परास्फालनवाचालवीचयो विजुघूर्णिरेऽर्णवाः । भूभृद्भावभीतानां विततशिखीकलापविकटकुटिलाः केशपाशा इवोर्ध्वीबभूवुर्धूमकेतवः ककुभाम् । धूमकेतुकरालितदिङ्मुखं दिक्पालरक्षायुष्कामहोमधूमधूम्रमिवाभवद्भुवनम् । भ्रष्टभासि तप्तकालायसकुम्भवभ्रुणि भानुमण्डले भयंकरकबन्धकायव्याजेन कोऽपि प्रार्थिवप्राणितार्थी पुरुषोपहारमिवोपजहार । ज्वलितपरिवेशमण्डलाभोगभास्वरो जिघृक्षाजृम्भमाणस्वर्भानुभयादुपरचिताग्निप्राकार इव प्रत्यदृश्यत श्वेतभानुः । अवनिपतिप्रतापप्रसाधिताः प्रथमतरकृतपावकप्रवेशा इवाद्यन्तानुरक्ता दिशः । स्रुतशोणितशीकरासारारुणिततनुरनुमरणाय प्रावृतपाटलांशुकपटेवादृश्यत वसुधावधूः । नराधिपविनाशसंभ्रमभीतैर्लोकपालैरिव कालायसकवाटपुटैरकालकालमेघपटलैरुध्यन्त दिग्द्वाराणि । प्रेतपतिप्रयाणप्रहताः पटवः पटहा इवारटन्तो हृदयस्फोटनाः पस्फायिरे निघातानां घोरा घननिर्घोषाः । निकटीभवद्यममहिषखुरपुटोद्धूता इव द्युमणिधाम धूसरीचक्रुः क्रमेलककचकपिलाः पांशुवृष्टयः । विसरविराविणीनामुन्मुखीनां शिखिनो ज्वालाः प्रतिच्छन्त्य इव पतन्तीरुल्का नभसो ववाशिरे शिवानां राजयः । राजधामनि धूमायमानकबरीविभागविभावितविकाराः प्रकीर्णकेशपाशप्रकाशितशोका इव प्राकाशन्त प्रतिमाः कुलदेवतानाम् । उपसिंहासनमाकुलं कालरात्रिविधूयमानवृजिनवे-

---

शिखी मयूरोऽपि । धूमकेतव उत्पातशंसिनः, अग्नयश्च । करालितानि भीषणीकृतानि, व्याप्तानि च । बभ्रु कपिशम् । श्वेतभानुश्चन्द्रः । प्रसाधिता आवर्जिताः, भूषिताश्च । कचाः केशाः । शिवानां मृगादीनाम् । कबरीशब्देनात्र कचा लक्ष्यन्ते । व्याक्रोशी परैराह्वानशब्दः । वायसानां काकानाम् ।

णीबन्धविभ्रमं बिभ्राणं बभ्राम भ्रामरं पटलम् । अटतामन्तःपुरस्योपरि क्षणमपि न शशाम व्याक्रोशी वायसानाम् । श्वेतातपत्रमण्डलमध्याज्जीवितमिव राज्यस्य सरसपिशितपिण्डलोहितं चञ्चञ्चुरुचैरुच्चखान खण्डं माणिक्यस्य कूजज्जरद्भृो महोत्पातदूयमानश्च कथमपि निनाय निशाम् ।

अन्यस्मिन्नहनि समीपमस्य राजकुलातद्गतिवशविशीर्यमाणालंकारझांकारिणी विजयघोषणेव विपादस्याकुलचरणचलत्तुलाकोटिकणितवाचालिताभिरुद्रीवाभिः, किं किमिति पृच्छमानेव दूरादेव भवनहंसीभिः, स्खलितविशालश्रोणिशिञ्जानरशनानुराविणीभिश्च वाप्यन्धा समुपदिश्यमानमार्गेव गृहसारसीभिः, अदृष्टकवाटपट्टसंघट्टस्फुटितललाटपट्टरुधिरपटलेन पटान्तेनेव रक्तांशुकस्य मुखमाच्छाद्य प्ररुदती, संतापबलविलीनकनकवलयरसधारामिव वेल्लतामुत्सृजन्ती, मुखमरुत्तरङ्गितामुत्तरीयांशुकपटीं स्फुरन्ती फणिनीव निर्मोकमञ्जरीमाकर्षन्ती, नम्रांसस्रंसिनालिविलोलेन नीलतमेन तमालचीरचीवरेणेव शोकोचितेन धम्मिल्लरचनारहितेन शिरोरुहसंचयेन चञ्चता प्रावृतकुचा, कुचताडनपीडया समुच्छूना ताम्रश्यामतलं मुहुर्मुहुरत्युष्णाश्रुप्रमार्जनप्रदग्धमिव करकिशलयं धुनाना, चक्षुर्निर्झरे शीर्यति स्नपयन्तीव शोकाग्निप्रवेशाय स्वकपोलतलप्रतिबिम्बितमासन्नलोकं लोललोचनप्रवृत्तैस्तरलैस्तारकांशुभिः श्यामायमानमात्मदुःखेन दिवसमपि दहन्तीव 'क कुमारः क कुमारः' इति पुरुषं पृच्छन्ती, वेलेति, नाम्ना यशोवत्याः प्रतीहार्या जगाम । विषण्णलोकलोचनप्रत्युद्गता चोपसृत्य कुट्टिमन्यस्तहस्तयुगला गलन्तीभिः सिञ्चन्तीव शुष्यन्तं दशनदीधितिधाराभिराधूसरमधरमधोमुखी विज्ञापितवती—'देव, परित्रायस्व परित्रायस्व । जीवत्येव भर्तरि किमप्यध्यवसितं देव्या' इति ।

ततस्तदपरमाकर्ण्य च्युत इव सत्त्वेन, द्रुत इव दुःखेन, आचान्त इव चिन्तया, तुलित इव तापेन, अङ्कीकृत इवातङ्केनाप्रतिपत्तिरासीत् । आसीच्चास्य चेतसि—प्रतिपन्नसंज्ञस्य बहुशोऽपि हृ-

---

अन्यस्मिन्नित्यादौ समीपस्था यशोवत्याः प्रतीहार्याजगामेति संबन्धः । तुलाकोटिर्नूपुरम् चीरचीवरं वृक्षत्वक्, चीरवासः ।

अप्रतिपत्तिः किंकर्तव्यतामूर्खः । हृदयेऽतिकठिने । अनुक्रोशो दया । तत्रे-

दये दुःखाभिषङ्गो निपतन्नश्मनीव लोहप्रहारः कठिने हुतभुजमुत्थापयति न तु भस्मसात्करोति मे निरनुक्रोशस्य कायम्' इति। उत्थाय च त्वरमाणोऽन्तःपुरमगात्। तत्र च मर्तुमुद्यतानां राजमहिषीणामश्रृणोद्दूरादेव 'तात चूत, चिन्तयात्मानं प्रवसति ते जननी। वत्स जातीगुच्छ, गच्छाम्यापृच्छस्व माम्। मया विनाद्यानाथा भवसि भगिनि भवनदाडिमलते। रक्ताशोक, मर्षणीयाः पादप्रहाराः कर्णपूरपल्लवभङ्गापराधाश्च। पुत्रक अन्तःपुरबालवकुलक वारुणीगण्डूषग्रहणदुर्ललित, दृष्टोऽसि। वत्से प्रियङ्गुलतिके, गाढमालिङ्ग मां दुर्लभा भवामि ते। भद्र भवनद्वारसहकारक, दातव्यो निवापतोयाञ्जलिरपत्यमसि। भ्रातः पञ्जरशुक, यथा न विस्मरसि माम्, किं व्याहरसि दूरीभूतास्मि ते। शारिके, स्वप्ने नः समागमः पुनर्भूयात्। मातः, मार्गलग्नं कस्य समर्पयामि गृहमयूरकम्। अम्ब, सुतवल्लालनीयमिदं हंसमिथुनं मन्दपुण्यया मया न संभावितोऽस्य चक्रवाकयुगलस्य विवाहोत्सवः। मातृवत्सले, निवर्तस्व। गृहहरिणिके, समुपनय सौविदल्लवल्लभवल्लकीं परिष्वजे तावदेनाम्। चन्द्रसेने, सुदृष्टः क्रियतामयं जनः। विन्दुमति, इयं तेऽन्त्या वन्दना। चेटि मुञ्च चरणौ। आर्ये कात्यायनिके किं रोदिषि नीतास्मि दैवेन। तात कञ्चुकिन्, किं मामलक्षणां प्रदक्षिणीकरोषि। धात्रेयि, धारयात्मानं किं पादयोः पतसि। भगिनि, गृहाण मामपश्चिमां कण्ठे कष्टं न दृष्ट्वा प्रियसखी मलयवती। कुरङ्गवति, अयमामन्त्रणाञ्जलिः। सानुमति, अयमन्त्यः प्रणामः। कुवलयवति, एष तेऽवसानपरिष्वङ्गः। सख्यः, क्षन्तव्याः प्रणयकलहाः, इत्येवंप्रायानालापान्।

दह्यमानश्रवणश्च तैः प्रविशन्नेव निर्यान्तीं दत्तसर्वस्वापतेयां गृहीतमरणप्रसाधनाम्, जानकीमिव जातवेदसं पत्युः पुरः प्रवेक्ष्यन्तीम्, प्रत्यग्रस्नानार्द्रदेहतया श्रियमिव भगवतीं सद्यः समुद्रादुत्थिताम्, कुसुम्भवश्रुणी वाससी दिनमिव तेजसी सांध्ये दधानाम्, ताम्बूलदिग्धरागान्धकाराधरप्रभापटलपाटलं पट्टांशुकमिव विधवामरणचिह्नमङ्गलग्नमुद्वहन्तीम्, रक्तकण्ठसूत्रेण कुचान्तरावल-

---

त्यादौ राजमहिषीत्येवंप्रायानालापानश्रृणोदिति संबन्धः। आपृच्छस्व ज्योत्कुरु। वारुणी सुरानिवापोऽमृतमुद्दिश्य दीयते जलादिकम्।

म्बिना स्फुटितहृदयविगलितरुधिरधाराशङ्कां कुर्वतीम्, तिर्यक्कुटिलकुण्डलकोटिकण्टकाकृष्टतन्तुना हारेण वलितेन सितांशुकपाशेनेव कण्ठमुत्पीडयन्तीम्, सरसकुङ्कुमाङ्गरागतया कवलितामिव दिधक्षता चितार्चिष्मता चितानलार्चनाकुसुमैरिव धवलधवलैरश्रुबिन्दुभिरंशुकोत्सङ्गमापूरयन्तीम्, गृहदेवतामत्रणबलिमिव वलयैर्विगलद्भिः पदे पदे विकिरन्तीमाप्रपदीनाम्, कण्ठे गुणकुसुममालां यमदोलामिवारूढाम्, अन्तर्गुञ्जन्मधुकरमुखरेणामत्र्यमाणलोचनोत्पलामिव कर्णोत्पलेन प्रदक्षिणीक्रियमाणमिव मणिनूपुरबन्धुभिर्बद्धमण्डलं भ्रमद्भिर्भवनहंसैः संनिहितप्राणसमं मरणाय चित्तमिव चित्रफलकमविचलं धारयन्तीम्, अर्चावद्धोद्धूयमानधवलपुष्पदामकाम्, पतिव्रतापताकामिव पतिप्रासयष्टिमिष्टामुपगूहमानाम्, बन्धोरिव निजचारित्रधवलस्य नृपातपत्रस्य पुरो नेत्रोदकमुत्सृजन्तीम्, पत्युः पादपतनसमुद्गमदभ्यधिकबाष्पाम्भः प्रवाहप्रतिरुद्धदृशः कथमपि प्रतिपन्नादेशान्सचिवान्संदिशन्तीम्, अनुनयनिवर्तितविधुरवृद्धबन्धुवर्गवर्धमानध्वनिभिर्गृहाक्रन्दैराकृष्यमाणश्रवणाम्, भर्तृभाषितनिभैः पञ्जरसिंहबृंहितैर्ह्रियमाणहृदयाम्, धात्र्या भर्तृभक्त्या च निजया प्रसाधिताम्, जरत्या मूर्च्छया च संस्तुतया धार्यमाणाम्, सख्या पीडया च व्यसनसंगतया समालिङ्गिताम्, परिजनेन संतापेन च गृहीतसर्वावयवेन परीताम्, कुलपुत्रैरुच्छ्वसितैश्च महत्तरैरधिष्ठिताम्, कञ्चुकिभिर्दुःखैश्चातिवृद्धैरनुगताम्, भूपालवल्लभान्कौलेयकानपि सास्रमालोकयन्तीम्, सपत्नीनामपि पादयोः पतन्तीम्, चित्रपुत्रिका अप्यामत्र्यमाणाम्, गृहपतत्रिणामप्यञ्जलिं पुरस्तादुपरचयन्तीम्, पशूनप्यापृच्छ्यमानाम्, भवनपादपानपि परिष्वजमानां मातरं ददर्श ।

दूरादेव च बाष्पायमाणदृष्टिरभ्यधात्—'अम्ब, त्वमपि मां मन्दपुण्यं त्यजसि । प्रसीद । निवर्तस्व' इत्यभिदधान एव च सस्नेहमिव नूपुरमणिमरीचिभिश्चुम्ब्यमानचूडश्चरणयोर्न्यपतत् । देवी तु यशोवती तथा तिष्ठति पादनिहितशिरसि विमनसि क-

---

आपृच्छ्यमाना ज्योत्कारयन्ती ।

बाष्पायमाणा बाष्पमुद्वमन्ती । देवी बाष्पोत्पतनं धारयितुं न शशाकेति संबन्धः । बाष्पोत्पतनमश्रुप्रवाहम् ।

नीयसि प्रेयसि तनये गुरुणा गिरिणेवोद्वेगवेगेनावष्टभ्यमाना, मूर्च्छान्धतमसं रसातलमिव प्रविशन्ती, बाष्पप्रवाहेनेव चिरनिरोधसंपिण्डितेन स्नेहसंभारेण निर्भराविर्भूतेनाभिभूयमानां, कृतप्रयत्नापि निवारयितुं न शशाक बाष्पोत्पतनम्। उत्कटकुचोत्कम्पप्रकटितासह्यशोकाकूता च गद्गदिकागृह्यमाणगलविकला निःसामान्यमन्युतरलीक्रियमाणाधरोद्देशा पुनरुक्तस्फुरणनिबिडितनासापुटा निमील्य नयने नयनाम्भःसेकप्लवेन प्लावयन्ती विमलौ कपोलौ संछाद्य करनखमयूखमालाखचिततनुना तन्वन्तरनिर्गच्छदच्छास्रस्रोतसेवांशुकपटान्तेन किंचिदुत्तानितं वदनेन्दुं दूयमानमानसा स्मरन्ती प्रसूतस्तनी प्रसवदिवसादारभ्य सकलमङ्कशायिनः शैशवमस्य ज्ञातिगृहगतहृदया 'अम्ब, तात, न पश्यतं पापां परलोकप्रस्थितां मामेवमतिदुःखिताम्' इति मुहुर्मुहुराक्रन्दती पितरौ, 'हा वत्स, विश्रान्तभागधेयया न दृष्टोऽसि' इति प्रेष्ठं ज्येष्ठं तनयमसंनिहितं क्रोशन्ती, 'अनाथा जाता' इति श्वशुरकुलवर्तिनीं दुहितरमनुशोचन्ती, 'निष्करुण, किमपराद्धं तवामुना जनेन' इति दैवमुपालभमाना, 'नास्ति मत्समा सीमन्तिनी दुःखभागिनी' इति निन्दन्ती बहुविधमात्मानम्, 'मुपितास्मि नृशंस, त्वया' इत्यकाण्डे कृतान्तं गर्हमाणा मुक्तकण्ठमतिचिरं प्राकृतप्रमदेव प्रारोदीत्।

प्रशान्ते च मन्युवेगे सस्नेहमुत्थापयामास सुतम्। हस्तेन चास्य प्ररुदितस्य पक्ष्मपालीपुञ्जादश्रुकरणनिवहां द्रुतामिवाधिकतरं क्षरन्तीं दृष्टिमुन्ममार्ज। स्वयमपि। कठोररागपरिपीयमानेन धवलिम्ना मुच्यमानोदरे कथदस्रश्चयत्पर्यन्ते शुक्लशीकरतारतारकितपक्ष्मणी सूक्ष्मतराश्रुबिन्दुपरिपाटीपतनानुबन्धविधुरे लोचने पुनः पुनरापूर्यमाणे प्रमृज्य बाष्पार्द्रगण्डगृहीतां च श्रवणशिखरमारोप्य शोकलम्बामलकलतामधःस्रस्तविलोलबालिकाव्याकुलितां च समुत्सार्य तिरश्चीं चिकुरसटामश्रुप्रवाहपूरितमार्द्रं च किंचिच्च्युतमुत्क्षिप्य हस्तेन स्तनोत्तरीयं तरङ्गितमिव मग्नांशुकपटान्ततनुताम्रलेखालाञ्छितलावण्यकुञ्जिकावर्जितराजतराजहंसास्यसमुद्गीर्णेन पयसा प्रक्षाल्य मुखकमलं कलमूकलोकविधृते वासःशकले शुचिनि समुन्मृज्य पाणी सुतवदनविनिहितनिभृतनयनयुगला चिरं स्थित्वा पुनः

पुनरायतं निश्वस्यावादीत्—'वत्स, नासि न प्रियो निर्गुणो वा परित्यागार्हो वा । स्तन्येनैव सह त्वया पीतं मे हृदयम् । अस्मिंश्च समये प्रभूतप्रभुप्रसादान्तरिता त्वां न पश्यति दृष्टिः । अपि च पुत्रक, पुरुषान्तरविलोकनव्यसनिनी राज्योपकरणमकरुणा वा नास्मि लक्ष्मीः क्षमा वा । कुलकलत्रमस्मि चारित्रधना धर्मधवले कुले जाता । किं विस्मृतोऽसि मां समरशतशौण्डस्य पुरुषप्रकाण्डस्य केसरिण इव केसरिणीं गृहिणीम् । वीरजा वीरजाया वीरजननी च मादृशी पराक्रमक्रीता कथमन्यथा कुर्यात् । एवंविधेन पित्रा ते भरतभगीरथनाभागनिभेन नरेन्द्रवृन्दारकेण गृहीतः पाणिः । आसेवितः सेवासंभ्रान्तानन्तसामन्तसीमन्तिनीसमावर्जितजाम्बूनदघटाभिषेकः शिरसा । लब्धो मनोरथदुर्लभो महादेवीपट्टबन्धसत्कारलाभो ललाटेन । आपीतौ युष्मद्विधैः पुत्रैरमित्रकलत्रबन्दीवृन्दविधूयमानचामरमरुच्चलचीनांशुकधरौ पयोधरौ । सपत्नीनां शिरःसु निहितं नमन्निखिलकटककुटुम्बिनीकिरीटमाणिक्यमालार्चितं चरणयुगलकम् । एवं कृतार्थसर्वावयवा किमपरमपेक्षे क्षीणपुण्या । मर्तुमविधवैव वाञ्छामि । न च शक्नोमि दग्धस्य भर्तुरार्यपुत्रविरहिता रतिरिव निरर्थकान्प्रलापान्कर्तुम् । पितुश्च ते पादधूलिरिव पथमं गगनगमनमावेदयन्ती बहुमता भविष्यामि शूरानुरागिणीनां सुराङ्गनानाम् । प्रत्यग्रदृष्टदारुणदुःखदग्धायाश्च मे किं धक्ष्यति धूमध्वजः । मरणाच्च मे जीवितमेवास्मिन्समये साहसम् । अतिशीतलः पतिशोकानलादक्षयस्नेहेन्धनादस्मादनलः । कैलासकल्पे प्रवसति जीवेश्वरे जरत्तृणकणिकालघीयसि जीविते लोभ इति क घटते । अपि च जीवन्तीमपि मां नरपतिमरणावधीरणमहापातकिनीं न स्पृक्ष्यन्ति पुत्र, पुत्रराज्यसुखानि । दुःखदग्धानां च भूतिरमङ्गला चाप्रशस्ता च निरुपयोगा च भवति । वत्स, विश्वस्तानां यशसा स्थातुमिच्छामि लोके न वपुषा । तदहमेव त्वां तावत्तात, प्रसादयामि न पुनर्मनोरथप्रातिकूल्येन कदर्थनीयास्मि ।' इत्युक्त्वा पादयोरपतत् ।

जाम्बूनदं सुवर्णम् । **पादधूलिरिवेति** । सापि प्रथमगतागमनमावेदयति । धक्ष्यति भस्मीकरिष्यति । धूमध्वजोऽग्निः भूतिः समृद्धिः भस्म च । विश्वस्तानां विधवानाम् ।

स तु ससंभ्रममपनीय चरणयुगलमवनमिततनुरुभयकरविधृतवपुषमवनिगतशिरसमुदनमयन्मातरम् । दुर्निवारतां च शुचः समवधार्य कुलयोषिदुचितां च तामेव श्रेयसीं मन्यमानः क्रियां कृतनिश्चयां च तां ज्ञात्वा तूष्णीमधोमुखोऽभवत् ।

अभिनन्दति हि स्नेहकातरापि कुलीनता देशकालानुरूपम् । देव्यपि यशोवती परिष्वज्य समाघ्राय च शिरसि निर्गत्य चरणाभ्यामेव चान्तःपुरात्पौराक्रन्दनिर्भराभिरुध्यमानैव दिग्भिः सरस्वतीतीरं ययौ । तत्र च स्त्रीस्वभावकातरैर्दृष्टिपातैः प्रविकसितरक्तपङ्कजपुञ्जैरिवार्चयित्वा भगवन्तं भानुमन्तमिव मूर्तिरैन्दवी चित्रभानुं प्राविशत् । इतरोऽपि मातृमरणविह्वलो बन्धुवर्गपरिवृतः पितुः पार्श्वं प्रायात् । अपश्यच्च स्वल्पावशेषप्राणवृत्तिं परिवर्त्यमानतारकं तारकराजमिवास्तमभिलषन्तं जनयितारम् । असह्यशोकोद्रेकाभिद्रुतश्च त्याजितः स्नेहे धैर्यम् । आश्लिष्यास्य सकलदुर्मदमहीपालमौलिमालालालितौ पादपद्मावन्तस्तापान्मुखचन्द्रमिव द्रवीभवन्तं दशनज्योत्स्नाजालमिव जलतामापद्यमानं लोचनलावण्यमिव विलीयमानं मुखसुधारसमिव स्यन्दमानम् । अच्छाच्छमश्रुस्रोतसां संतानं महामेघमयविलोचन इव वर्षन्नितरवद्विमुक्तारावश्चिरं रुरोद ।

राजा तु तमुपरुध्यमानदृष्टिरविरतरुदितशब्दाश्रितश्रवणःप्रत्यभिज्ञाय शनैः शनैरवादीत्—'पुत्र, नार्हस्येवं भवितुम् । भवद्विधा न ह्यमहासत्त्वाः । महासत्त्वता हि प्रथममवलम्बनं लोकस्य पश्चाद्राजवीजिता । सत्त्ववतां चाग्रणीः सर्वातिशयाश्रितः क्व भवान्, क्व वैक्लव्यम् । 'कुलप्रदीपोऽसि' इति दिवसकरसदृशतेजसस्ते लघूकरणमिव । 'पुरुषसिंहोऽसि' इति शौर्यपटुप्रज्ञोपबृंहितपराक्रमस्य निन्देव । 'क्षितिरियं तव' इति लक्षणाख्यातचक्रवर्तिपदस्य पुनरुक्तमिव । 'गृह्यतां श्रीः' इति स्वयमेव श्रिया गृहीतस्य विपरीतमिव । 'अध्यास्यतामयं लोकः' इत्युभयलोकविजिगीषोरपुष्कलमिव । 'स्वीक्रियतां कोषः' इति शशिकरनिकरनिर्मलयशःसंचयै-

---

अमावस्यायामिन्दुर्भानुमन्तं प्रविशतीति प्रसिद्धम् । चित्रभानुमग्निम् । तारकराजं चन्द्रम् । असह्येत्यादौ चिरं रुदोदेति संबन्धः । उद्रेक आधिक्यम् ।

उपरुध्यमाना उपरोधवती दृष्टिर्बुद्धिर्यस्य सः । अवलम्बनमाश्रयः । राज

काभिनिवेशिनो निरुपयोगमिव । 'आत्मीक्रियतां राजकम्' इति गुणगणात्मीकृतजगतो गतार्थमिव । 'उह्यतां राज्यभारः' इति भुवनत्रयभारोचितस्यानुचितनियोग इव । 'प्रजाः परिरक्ष्यन्ताम्' इति दीर्घदोर्दण्डार्गलितदिङ्मुखस्यानुवाद इव । 'परिजनः परिपाल्यताम्' इति लोकपालोपमस्यानुपङ्गिकमिव । 'शस्त्राभ्यासः कार्यः' इति धनुर्गुणकिणकलङ्ककालीकृतप्रकोष्ठस्य किमादिश्यते । 'निग्राह्यतां चापलम्' इति नूतनतरवयसि निगृहीतेन्द्रियस्य निरवकाशेव मे वाणी । 'निरवशेषतां शत्रवो नेयाः' इति सहजस्य तेजस एवेयं चिन्ता ।' इत्येवं वदन्नेवापुनरुन्मीलनाय निमिमील राजसिंहो लोचने ।

अस्मिन्नेवान्तरे पूषाप्यायुषेव तेजसा व्ययुज्यत । ततश्च लज्जमान इव नरपतिजीवितापहरणजनितादात्मापराधादधोमुखः समभवत् । भूपालाभावशोकशिखिनेवान्तस्ताप्यमानस्ताम्रतां प्रपेदे । मन्दं मन्दमप्रियप्रश्नार्थमिव लौकिकीं स्थितिमनुवर्तमानोऽवातरद्दिवः । दित्सुरिव जनेशाय जलाञ्जलिमपरजलनिधिसमीपमुपससर्प । सद्योदत्तजलाञ्जलिर्दुःखदहनदग्धमिव करसहस्रमालोहितमधत्त ।

एवं च महानराधिपनिधननिधीयमानविपुलवैराग्य इव शान्तवपुषि, विशति गिरिगुहागह्वरं गभस्तिमालिनि, समुपोह्यमानमहाजनाश्रुदुर्दिनार्द्रीकृत इव निर्वात्यातपे, रोदनताम्रसकललोकलोचनरुचेव लोहितायति जगति, उष्णायमानानेकनरनिश्वाससंतापप्लुष्ट इव च नीलायमाने दिवसे, नृपानुगमनप्रचलितयेव लक्ष्म्या मुच्यमानासु कमलिनीषु, पतिशुचेव परिवृतच्छायायां श्यामायमानायां भुवि कुलपुत्रेष्विव परित्यक्तकलत्रेषु, कृतकरुणप्रलापेषु वनान्तानाश्रयत्सु दुःखितेषु चक्रवाकेषु, छत्रभङ्गभीतेष्विव निगूढ-

---

वीजिता राजान्वयिता । कुलप्रदीपोऽसीत्यादौ पूर्ववदाक्षेपाभ्यूहः । आनुषङ्गिकं प्रस्तावागतम् । अपुनरुन्मीलनाय पुनरप्रबोधनाय। निमिमील प्रत्यपद्यत प्राप्तः।

पूष्ण आत्मजो यमः ।

एवं चेत्यादावस्मिन्सति नरेन्द्रो हुताशनसत्क्रियया यशः शेषतामनीयतेति संबन्धः । गभस्तीन्रश्मीन्मलते धारयतीति गभस्तिमाली सूर्यस्तस्मिन् । समुपोह्यमानं वर्धमानम् । निर्वात्य शाम्यति सति यश्चार्द्रीकृतः । सोऽवश्यं निर्वाति शीतलीभवति । छायातपप्रतिपक्षजातिः,कान्तिश्च । श्यामा रात्रिः,नायिका च । वनं तोयम्, विपिनं च । छत्रभङ्गो राजदण्डः, पत्राणां च छत्राकारताभेदः ।

कोशेषु कुशेशयेषु, स्फुटितदिग्वधूहृदयरुधिरप्लव इव गलिते रक्ततपे, क्रमेण च लोकान्तरमुपगतवत्यनुरागशेषे जाते तेजसामधीशे, गगनतलवितन्यमानबहलरागपटलायां प्रेतपताकायामिव प्रवृत्तायां संध्यायां, शवशिबिकालंकारकृष्णचामरमालास्विव स्फुरन्तीषु दर्शनप्रतिकूलासु तिमिरलेखासु, असितागुरुकालकाष्ठायां केनापि चितायामिव रचितायां रजन्यां, दन्तामलपत्रप्रसाधितकर्णिकासु, केसरमालाकल्पितमुण्डमालिकासु, अनुमर्तुमिवोद्यतासु प्रहसितमुखीषु कुमुदलक्ष्मीषु, अवतरत्रिदशविमानकिङ्किणीकणित इव श्रूयमाणे, शाखिशिखरकुलायलीयमानशकुनिकुलकूजिते, नाकपथप्रस्थितपार्थिवप्रत्युद्गतपुरुहूतातपत्र इव पूर्वस्यां दिशि दृश्यमाने चन्द्रमसि, नरेन्द्रः स्वयं समर्पितस्कन्धैर्गृहीत्वा शवशिबिकां शिबिरसमः सामन्तैः पौरैश्च पुरोहितपुरःसरैः सरितं सरस्वतीं नीत्वा नरपतिसमुचितायां चितायां हुताशसत्क्रियया यशःशेषतामनीयत ।

देवोऽपि हर्षः पुञ्जीभूतेन सकलेनेव जीवलोकेन लोकेन राजकुलसंबद्धेनाशेषेण शोकमूकेन परिवृतोऽन्तर्वर्तिनापि शोकानलतप्तेन स्नेहद्रवेण बहिरिव सिच्यमानो निर्व्यवधानायां धरण्यामुपविष्ट एव तां निशीथिनीं भीमरथीभीमामखिलां सराजको जजागार । अजनि चास्य चेतसि ताते दूरीभूते संप्रत्येतावान्खलु जीवलोकः लोकस्य भग्नाः पन्थानः, मनोरथानां खिलीभूतानि भूतिस्थानानि, स्थगितान्यानन्दस्य द्वाराणि, सुप्ता सत्यवादिता, लुप्ता लोकयात्रा, विलीना बाहुशालिता, प्रलीना प्रियालापिता, प्रोषिताः पुरुषकारविहारविकाराः, समाप्ता समरशौण्डता, ध्वस्ता परगुणप्रीतिः, विश्रान्ता विश्वासभूमयः, अपदान्यपदानानि, निरुपयोगानि शास्त्राणि, निरवलम्बना विक्रमैकरसता, कथावशेषा विशेषज्ञता, ददातु जनो जलाञ्जलिमौर्जित्याय, प्रतिपद्यतां प्रव्रज्यां प्रजापाल-

---

कोशो गजः, कर्णिका च अनुरागो भक्तिः, लौहित्यं च । तेजसामधीशो राजापि । शवशिबिका मृतयानम् । चामरमाला अपि दर्शनप्रतिकूलाः। काष्ठा दिशः, दारु च । काष्ठदन्तवत्तस्य चामलं पत्रम् । कर्णिका कर्णाभरणं च केसरशब्दः किंजल्कबकुलयोः । शिबिर्नाम राजर्षिरभूत् ।

निशीथिनीं रात्रिम् भीमरथी नरकनदी, कालरात्रिर्वा । अन्ये तु सप्तसप्तला वर्षैस्तत्संख्यैश्च मासैर्दिनैश्च तावद्भिर्गतैरेका रात्रिर्भीमरथी भवति तामति-

ता, बध्नातु वैधव्यवेणीं वरमनुष्यता, समाश्रयतु राजश्रीराश्रमपदम्, परिधत्तां धवले वाससी वसुमती, वहतु वल्कले विलासिता, तपस्यतु तपोवनेषु तेजस्विता, प्रावृणोतु चीवरे वीरता, क्व गम्यतां पुनस्तस्य कृते कृतज्ञतया, क्व पुनः प्राप्स्यति तादृशान्महापुरुषनिर्माणपरमाणून्परमेष्ठी, शून्याः संवृत्ता दश दिशो गुणानाम्, जगज्जातमन्धकारं धर्मस्य, निष्फलमधुना जन्म शस्त्रोपजीविनाम्। तातेन विना कुतस्त्या दिवसमसमसमररससमारब्धकलहकथाकण्टकितसुभटकपोलभित्तयो वारिगोष्ठ्यः। अपि नाम स्वप्नेऽपि दृश्येत दीर्घरक्तनयनं पुनस्तन्मुखसरोजम्, जन्मान्तरेऽपि पुनः परिष्वज्येत तल्लोहस्तम्भाभ्यधिकगरिमगर्भं भुजयुगलम्। लोकान्तरेऽपि पुत्रेत्यालपतः श्रूयेत सा सुधारसमुद्विरन्ती मथ्यमानक्षीरसागरोद्गारगम्भीरा भारतीति। एतानि चान्यानि च चिन्तयत एवास्य कथमपि सा क्षयमियाय यामिनी।

ततः शुचेव मुक्तकण्ठमारटत्सु कृकवाककुलेषु गृहगिरितरुशिखरेभ्यः पातयत्स्वात्मानं मन्दिरमयूरेषु परित्यक्तनिवासेषु च वनाय प्रस्थितेषु पत्ररथेषु सद्यस्तनूभूते ताम्यति तमसि मन्दीभूतातमस्नेहेष्वभावमभिलषत्सु प्रदीपेषु, स्फुरदरुणवल्कलप्रावृतवपुषि प्रव्रज्यामिव प्रतिपन्ने नभसि, प्रभातसमयेन समुत्तीर्यमाणासु पार्थिवास्थिशकलकलास्विव कलविङ्ककंधराधूसरासु तारकासु, भूभृद्धातुगर्भकुम्भधारिषु विविधसरःसरित्तीर्थाभिमुखेषु प्रस्थितेषु वनकरिकुलेषु, शावशुचिसिक्थपटलपाण्डुरे, पिण्ड इवापरपयोनिधिपुलिनपरिसरे, पात्यमाने शशिनि, क्रमेण नृपचितानलधूमविसरधूसरीकृततेजसीव, नरपतिशोकपावकदाहकिणकलङ्ककालीकृतचेतसीव, प्रोषितसमस्तान्तःपुरपुरंध्रिमुखचन्द्रवृन्दोद्वेगविद्राणवपुषीव, प्रथमास्तमितरोहिणीरणरणकविमनसीव चास्तमुपगते राजनिकरे, राजतीव देवे दिवमारूढे सवितरि, परिवृत्ते राज्य इव रजनीप्रबन्धे,

क्रान्तो वर्षशतजीवी नरो भवतीति प्राहुः। जीवलोकः संसारः। खिलीभूतानि शून्यानि। लोकयात्रा व्यवहारः। प्रावृणोतु परिदधातु। कलहो रणः।

ततः शुचेत्यादौ चचाल स्नानाय देवो हर्ष इति संबन्धः। **शुचेवेति**। गृहे गिर्यादौ योज्यम्। स्नेहः प्रेम, तैलं च। अरुणो रविसारथिः, लोहितं चारुणम्। कलविङ्को ग्रामचटकः। भूभृद्गिरिः, राजा च। धातवो लघून्यस्थीनि, गैरिकाद्या-

प्रबुद्धराजहंसमण्डलप्रबोध्यमानः पङ्कजाकर इव चचाल देवो हर्षः। ततश्च नूपुरवविराममूकमन्दमन्दिरहंसेषु, शोकाकुलकतिपयकञ्चुकिमात्रावशेषेषु शुद्धान्तेषु, पतितयूथप इव वनगजयूथे, कक्ष्यान्तरवर्तिनि पितृपरिजने, विषादिन्युपरिरुदन्निषादिनि च स्तम्भनिषण्णे, निष्पन्दमन्दे राजकुञ्जरे, मन्दुरापालकाक्रन्दकथिते चाजिरभाजि, राजवाजिनि विश्रान्तजयशब्दकलकले च शून्ये च महास्थानमण्डपे दह्यमानदृष्टिर्निर्जगाम राजकुलात्। अगाच्च सरस्वतीतीरं तस्यां स्नात्वा पित्रे ददावुदकम्। अपस्नातश्चानिष्पीडितमौलिरेव परिधायोद्गमनीयदुकूलवाससी निश्वासपरो निरातपत्रो निरुत्सारणः समुपनीतेऽपि सप्तौ चरणाभ्यामेव नासाग्रासक्तेन रक्ततामरसताम्रेण चक्षुषा हृदयावशेषस्यापि पितुर्दाहशङ्कया शोकाग्निमिव उद्गिरन्नताम्बूलस्यापि सुचिरप्रक्षालितस्य कल्पतरुकिसलयस्येव स्वभावपाटलस्याधरस्याधरपल्लवस्य प्रभया मांसरुधिरकवलानिव हृदयाभिघातादुद्गमन्नुष्णनिश्वासमोक्षैर्भवनमाजगाम।

राजवल्लभास्तु भृत्याः सुहृदः सचिवाश्च तस्मिन्नेवाहनि निर्गत्य प्रियं पुत्रदारमुत्सृज्योद्गाढैर्बन्धुभिर्वार्यमाणा अपि बहुनृपगुणगणहृतहृदयाः केचिदात्मानं भृगुषु बबन्धुः, केचित्तत्रैव तीर्थेषु तस्थुः, केचिदनशनैरास्तीर्णतृणकुशा व्यथमानमानसाः शुचमसमामशमयन्, केचिच्छलभा इव वैश्वानरं शोकावेगविवशा विविशुः, केचिद्दारुणदुःखदहनदह्यमानहृदया गृहीतवाचस्तुषारशिखरिणं शरणं ययुः, केचिद्विन्ध्योपत्यकासु वनकरिकुलकरशीकरासारसिच्यमानतनवः पल्लवशयनशयिनः संतापमशमयन्, केचित्संनिहितानपि विषयानुत्सृज्य सेवाविमुखाः परिच्छिन्नैः पिण्डकैरटवीभुवः शून्या जगृहुः, केचित्पवनाशना धर्मधना धमद्धमनयो मुनयो बभूवुः, के-

---

श्च। कुम्भौ कपाटौ, घटश्च कुम्भः। शावे धूसरे शवसंबन्धिनि च। सिक्थं भक्तम्, मधूच्छिष्टं च। 'राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः'। राजहंसा इव राजानः, हंसाश्च। ततश्चेत्यादावस्मिन्सति दह्यमानदृष्टिर्निर्जगाम राजकुलादिति संबन्धः। निषादी हस्तिपकः। अपस्नातेत्यादौ भवनमाजगामेति संबन्धः अपस्नातो मृतस्नातः मौलयः केशाः। 'तत्स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगम्। सप्तौ हये।

भृगुषु प्रपातेषु। कुशोऽत्र संध्या। पिण्डकैः शरीरैः धमनयो नाड्यः।

चिद्गृहीतकाषायाः कापिलं मतमधिजगिरे गिरिषु, केचिदाचोटितचूडामणिषु शिरःसु शरणीकृतधूर्जटयो जटा जघटिरे । अपरे परिपाटलप्रलम्बचीवराम्बरसंवीताः स्वाम्यनुरागमुज्ज्वलं चक्रुः । अन्ये तपोवनहरिणजिह्वाञ्चलोल्लिह्यमानमूर्तयो जरां ययुः । अपरे पुनःपाणिपल्लवप्रमृष्टैराताम्ररागैर्नयनपुटैः कमण्डलुभिश्च वारि वहन्तो गृहीतव्रता मुण्डा विचेरुः ।

देवमपि हर्षं तदवस्थं पितृशोकविह्वलीकृतम्, श्रियं शाप इति, महीं महापातकमिति, राज्यं रोग इति, भोगान्भुजङ्गा इति, निलयं निरय इति, बन्धुं बन्धनमिति, जीवितमयश इति, देहं द्रोह इति, कल्यतां कलङ्क इति, आयुरपुण्यफलमिति, आहारं विषमिति, विषममृतमिति, चन्दनं दहन इति, कामं ककच इति, हृदयस्फोटनमभ्युदय इति च मन्यमानम्, सर्वासु क्रियासु विमुखम्, पितृपितामहपरिग्रहागताश्चिरंतनाः कुलपुत्राः, वंशक्रमाहितगौरवाश्च ग्राह्यगिरो गुरवः, श्रुतिस्मृतीतिहासविशारदाश्च जरद्विजातयः, श्रुताभिजनशीलशालिनो मूर्धाभिषिक्ताश्चामात्या राजानो, यथावदधिगतात्मतत्वाश्च संस्तुता मस्करिणः, समदुःखसुखाश्च मुनयः, संसारासारत्वकथनकुशलब्रह्मवादिनः, शोकापनयननिपुणाश्च पौराणिकाः पर्यवारयन् ।

अस्वतन्त्रीकृतश्च तैर्मनसापि नालभत शोकमनुप्रचरितुम् । अनुनीयमानश्च कथं कथमप्याहारादिकासु क्रियास्वाभिमुख्यमभजत । भ्रातृगतहृदयश्चाचिन्तयत्—अपि नाम तातस्य मरणं महाप्रलयसदृशमिदमुपश्रुत्य आर्यो बाष्पजलस्नातो न गृह्णीयाद्वल्कले । नाश्रयेद्वा राजर्षिराश्रमपदम् । न विशेद्वा पुरुषसिंहो गिरिगुहाम् । अस्रसलिलनिर्भरभरितनयननलिनयुगलो वा पश्येदनाथां पृथिवीम् । प्रथमव्यसनविषमविह्वलः स्मरेदात्मानं वा पुरुषोत्तमः । अनि-

---

अनेन कार्श्यं लक्ष्यते । अधिजगिरे अध्येषत । आचोटित उत्खातः । धूर्जटिः शिवः । वारि अश्रु, उदकं च ।

देवमित्यादौ देवमपि हर्षमेवंविधा जनाः पर्यवारयन्निति संबन्धः । कल्यतामरोगिताम् । ग्राह्यगिर आदेयवाचः । अध्यात्ममात्मज्ञानम् । तत्त्वमितिकर्तव्यता । मस्करिणः परिव्राजकाः ।

सनाभयः सगोत्राः । शौचानुप्रवणं शरीरबाधादि । बाष्पजलस्नातो न गृह्णी

त्यतया जनितवैराग्यो वा न निराकुर्यादुपसर्पन्तीं राज्यलक्ष्मीम् । दारुणदुःखदहनप्रज्वलितदेहो वा प्रतिपद्येताभिषेकम् । इहागतो वा राजभिरभिधीयमानो न पराचीनतामाचरेत् । अतिपितृपक्षपाती खल्वार्यः । सर्वदा तातश्लाघया मामभिधत्ते—'तात हर्ष, कस्यचिदभूद्भविष्यति वा पुनः काञ्चनतालतरुप्रांशु कायप्रमाणमिदम् । ईदृक्च दिवसकरप्रीत्या दिवसमुन्मुखविकसितं मुखमहाकमलम् । एतौ च वज्रस्तम्भभास्वरौ भुजकाण्डौ । एते च हसितमदालसहलधरविभ्रमा विलासाः कोऽन्यो मानी विक्रान्तो वदान्यो वा' इति । एतानि चान्यानि च चिन्तयन्दर्शनोत्सुकहृदयो भ्रातुरागमनमुदीक्षमाणः कथं कथमप्यतिष्ठदिति ।

इति श्रीबाणभट्टकृतौ हर्षचरिते महाराजमरणवर्णनं
नाम पञ्चम उच्छ्वासः ।

याद्वल्कल इति प्रतीपमानता बोद्धव्या । अत्र च सर्वत्र नेत्याशङ्कायाम् । पुरुषोत्तमो हर्षः,हरिरपि । पराचीनता पराङ्मुखत्वम्, अनानुकूल्यं वा । मुखकमलस्य दिवसकरप्रीतिः प्रतापित्वम् । वदान्यो दाता ॥

इति श्रीशंकरकविरचिते हर्षचरितसंकेते पञ्चम उच्छ्वासः ॥

उच्चित्योच्चित्य भुवि प्रहितनिगूढात्मदूतनीतानाम् ।
विजिगीषुरिव कृतान्तः शूराणां संग्रहं कुरुते ॥ १ ॥
विस्रब्धघातदोषः स्ववधाय खलस्य वीरकोपकरः ।
नवतरुभङ्गध्वनिरिव हरिनिद्रातस्करः करिणः ॥ २ ॥

अथ प्रथमप्रेतपिण्डभुजि भुक्ते द्विजन्मनि, गतेषूद्वेजनीयेष्वशौचदिवसेषु, चक्षुर्दाहदायिनि दीयमाने द्विजेभ्यः शयनासनचामरातपत्रामत्रपत्रशस्त्रादिके नृपनिकटोपकरणकलापे, नीतेषु तीर्थस्थानानि सह जनहृदयैः कीकसेषु, कल्पितशोकशल्ये सुधानिचयचिते चिताचैत्यचिह्ने, वनाय विसर्जिते महाजिजिति राजगजेन्द्रे, क्रमेण च मन्देष्वाक्रन्देषु, विरलीभवत्सु च विलापेषु, विश्राम्यत्यश्रुणि, शिथिलीभवत्सु श्वसितेषु, अविस्पष्टेषु हाकष्टाक्षरेषु, उत्सार्यमाणासु च व्यसनशय्यासु, उपदेशश्रवणक्षमेषु श्रोत्रेषु, अनुरोधावधानयोग्येषु हृदयेषु, गणनीयेषु नृपगुणेषु, प्रदेशवृत्तितामाश्रयति शोके, कृतेषु कविरुदितकेषु, जाते च स्वप्नावशेषदर्शने हृदयावशेषस्थाने, चितावशेषाकृतौ काव्यावशेषनाम्नि नरनाथे देवो हर्षः कदाचिदुत्सृष्टव्यापारः पुञ्जीभूतवृद्धबन्धुवर्गाग्रेसरेणावनतमूकमुखेन महाजनेन

उच्चित्येति । कृतान्तोऽन्तकः शूराणां संग्रहं कुरुते । किं कृत्वा । उच्चित्योच्चित्य यथा प्रधानं प्रहितनिगूढाः स्वभावप्रच्छन्ना यमदूता यमकिंकरास्तैर्नीतानां विजिगीषुर्यथान्विष्यान्विष्यात्मदूतानां शूराणां संग्रहं कुरुते । अनेनोच्छ्वासार्थः संगृहीतः । तथा हि कृतोऽन्तो विनाशो येन स शशाङ्कनामा गौडाधिपतिः । शूराणां राज्यवर्धनानुचराणां प्रधानराजपुत्राणां तत्सहितानां संग्रहमकरोत् । कथम् । उच्चित्योच्चित्यान्विष्यान्विष्य । कीदृशानाम् । प्रहितनिगूढात्मदूतानाम् । तथाहि तेन शशाङ्केन विश्वासार्थं दूतमुखेन कन्याप्रदानमुक्त्वा प्रलोभितो राज्यवर्धनः स्वगेहे सानुचरो भुञ्जान एव छद्मना व्यापादितः ॥ १ ॥

अत एव चाह—**विस्रब्धेत्यादि** । खलोऽत्र गौडापसदः शशाङ्कः । वीरश्च हर्षः ॥ २ ॥

अथ प्रथमेत्यादावस्मिन्नस्मिन्सति देवो हर्षो मौलेन महाजनेनात्मानं सकलं वेष्ठ्यमानमद्राक्षीदिति संबन्धः । भोजनं भुक्तं तदस्यास्तीति । 'अर्शआदिभ्योऽच्' । अमत्राणि पात्राणि । पत्राणि । वाहनानि । कीकसेष्वस्थिषु । चितायां चैत्यचिह्नसमाकारं चिह्नम्, श्मशानदेवगृहं वा । कविरुदितकेषु दुःखोद्दीपनकालेषु । लोकोत्तरो जनसमूहः । मन्युः शोकः ।

मौलेनाकाल आत्मानं वेष्टयमानमद्राक्षीत् । दृष्ट्वा चाकरोन्मनसि—'किमन्यदार्यमागतमावेदयत्ययं शोकपराभूतो लोकाकारः' इति । वेपमानहृदयश्च पप्रच्छ प्रविशन्तमधिकतरप्रचारमन्यतमं पुरुषम् 'अङ्ग, कथय । किमार्यः प्राप्तः'इति । स मन्दमब्रवीत्—'देव, यथादिशसि द्वारि' इति श्रुत्वा च सोदर्यस्नेहनिहितनिरतिशयमन्युमृदूकृतमनाः कथमपि न ववाम बाष्पवारिप्रवाहोत्पीडेन सह जीवितम् ।

अनन्तरं च द्वारपालमुक्तेन प्रथमप्रविष्टेन परिजनेनेवाक्रन्देन कथ्यमानम्, दूरद्रुतागमनमुषितबाहुल्येन विच्छिन्नच्छत्रधारेण लम्बिताम्बरवाहिना भ्रष्टभृङ्गारग्राहिणा च्युताचमनधारिणा ताम्यत्ताम्बूलिकेन खञ्जत्खड्गग्राहिणा कतिपयप्रकाशदासेरकप्रायेण बहुवासरान्तरितस्नानभोजनशयनश्यामक्षामवपुषा परिजनेन परिवृतम्, अविरलमार्गधूलिधूसरितशरीरतया शरणीकृतमिवाशरणया क्रमागतया वसुंधरया हूणनिर्जयसमरशरव्रणबद्धपट्टकैर्दीर्घधवलैः समासन्नराज्यलक्ष्मीकटाक्षपातैरिव शबलीकृतकायम्, अवनिपतिप्राणपरित्राणार्थमिव च शोकहुतभुजि हुतमांसैरतिकृशैरवयवैरावेद्यमानदुःखभारम्, अपगतचूडामणिनि मलिनाकुलकुन्तले शेखरशून्ये शिरसि शुचमारूढां मूर्तिमतीमिव दधानम्, आतपगलितस्वेदराजिना रुदतेव पितृपादपतनोत्कण्ठितेन ललाटपट्टेन लक्ष्यमाणम्, प्रथीयसा बाष्पपयःप्रवाहेनाभिमतपतिमरणमूर्च्छितामिव महीमनवरतं सिञ्चन्तम्, अनन्तसंतताश्रुप्रवाहनिपतननिम्नीकृताविव दुःखक्षामौ कपोलावुद्वहन्तम्, अत्युष्णमुखमारुतमार्गगतेन द्रवतेव गलितताम्बूलरागेणाधरबिम्बेनोपलक्षितम्, पवित्रिकामात्रावशेषेन्द्रनीलिकांशुश्यामायमानमचिरश्रुतपितृमरणमहाशोकाग्निदग्धमिव श्रवणप्रदेशमुद्वहन्तम्, अस्फुटाभिव्यक्तव्यञ्जनेनाप्यधोमुखस्तिमितनयननीलतारकमयूखमालाखचितेन शोकप्ररूढश्मश्रुश्यामलेनेव मुखशशिना लक्ष्यमाणम्, केसरिणमिव महाभूभृद्विनिपातविह्वलनिरवलम्बनम्, दिवसमिव तेजःपतिपतनपरिम्लानश्रियं श्यामीभूतम्, नन्दनमिव भग्नकल्पपादपं

अनन्तरमित्यादौ प्रविशन्तं ज्येष्ठं भ्रातरमद्राक्षीदिति संबन्धः । परिजनेनापि प्रथमप्रविष्टेन द्वारपालप्रमुक्तेन च । आचमनं पतद्ग्रहः । प्रकाशा अतुरङ्गत्वान्निश्चीयमानाः। दासेरका दासीसुताः। शेखर आपीडः। अधरबिम्बेनापीतीत्थंभूतल-

विच्छायम्, दिग्भावमिव प्रोषितदिक्कुञ्जरशून्यम्, गिरिमिव गुरुवज्रपातदारितं कम्पमानम्, क्रीतमिव कृशिम्ना, किंकरीकृतमिव कारुण्येन, दासीकृतमिव दौर्मनस्येन, शिष्यीकृतमिव शोचितव्येन आत्मीकृतमिवाधिना, मूकीकृतमिव मौनेव, पिष्टमिव पीडया, स्विन्नमिव संतापेन, उच्चितमिव चिन्तया, लुप्तमिव विलापेन, धृतमिव वैराग्येण, प्रख्यातमिव प्रतिसंख्यानेन, अवज्ञातमिव प्रज्ञया, दूरीकृतमिव दुरभिभवत्वेन, अबोध्येन वृद्धबुद्धीनाम्, असाध्येन साधुभाषितानाम्, अगम्येन गुरुगिराम्, अशक्येन शास्त्रशक्तीनाम्, अपथेन प्रज्ञाप्रयत्नानाम्, अगोचरेण सुहृदनुरोधानाम्, अविषयेण विषयोपभोगानाम्, अभूमिभूतेन कालक्रमोपचयानां शोकेन कवलीकृतं ज्येष्ठं भ्रातरमपश्यत्। आवेगोद्वृतकृत्स्नस्नेहोत्कलिकाकलापोत्क्षिप्यमाणकाय इव च परवशः समुदगात्।

अथ दूरादेव दृष्ट्वा देवो राज्यवर्धनश्चिरकालकलितं बाष्पवेगं मुमुक्षुः सुदूरप्रसारितेन संकल्पयन्निव सर्वदुःखानि दीर्घेण दोर्दण्डद्वयेन गृहीत्वा कण्ठे मुक्तकण्ठं पुनःपतितक्षौमे क्षामे वक्षसि पुनः कण्ठे पुनः स्कन्धभागे पुनः कपोलोदरे निधाय तथा तथा रुरोद यथा सम्बन्धनानीवोदपाट्यन्त हृदयानि। स्मृतनृपतिना राजवल्लभेनापि प्रतिशब्दनिभेन निर्भरमिवारुद्यत। सुचिराच्च कथं कथमपि निर्वृष्टनयनजलः पर्जन्य इव शरदि स्वयमेवोपशशाम। उपविष्टश्च परिजनोपनीतेन तोयेन तत्करनखमयूखपुञ्जतया महाजलप्लवजायमानफेनलेखमिव पुनः पुनः प्रमृष्टमपि पक्ष्माग्रसंगलद्बिन्दुवृन्दमन्दोन्मेषमुषितदर्शनं कथं कथमपि चक्षुरक्षालयत्। ताम्बूलिकोपस्थापितेन च वाससा चन्द्रातपशकलेनेवोष्णोष्णबाष्पदग्धं वदनमुन्मार्ज। तूष्णीमेव च चिरं स्थित्वोत्थाय स्नानभूमिमगात्। तस्यां च स्थित्वा विभूषं विस्रस्तव्यस्तकुन्तलं मौलिमना-

---

क्षणे तृतीया। अभिव्यञ्जनं श्मश्रु। भूभृद्राजा, गिरिश्च। तेजःपतिर्नृपतिः, सूर्यश्च। श्यामः कृष्णः, श्यामा च रात्रिः। कल्पपादपो राजापि। छाया कान्तिः, आतपाभावश्च। प्रख्याख्यातं त्यक्तम्। प्रतिसंख्यानेन विवेककुशलया बुद्ध्या।

कलितं धृतम्। बन्धनं लाभम्। पर्जन्य इन्द्रः। 'पर्जन्यौ रसदभ्रेन्द्रौ' इत्युक्तेः। स हि मेघान्वर्षति। विस्रस्ता ऊर्ध्वं क्षिप्ताः। निर्गता इत्यन्ये। व्यस्ता विक्षिप्ताः। कुन्तलाः केशाः। उक्तं च—'चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः'।

दरान्निष्पीड्य सावशेषमन्युस्फुरितेन जिजीविषतेव जलधौतसुभगमात्मानमपि चुचुम्बिषतेवाधारेण क्षालितस्य चक्षुषः श्वेतिम्ना च शारदशशिकरविकसितविशदकुमुदवनदलावलिबलिविक्षेपैरिव दिग्देवतार्चनकर्म कुर्वाणश्चतुःशालवितर्दिकायां नीचापाश्रयविनिहितैकोपबर्हायां पर्यङ्किकायां निपत्य जोषमास्थात् ।

देवोऽपि हर्षस्तथैव स्नात्वा धरणितलनिहितकुथाप्रसारितमूर्तिरदूर एवास्य तूष्णीमेव समवातिष्ठत । दृष्ट्वा दृष्ट्वा दूयमानमानसमग्रजन्मानं समस्फुटदिवास्य सहस्रधा हृदयम् । औरसदर्शनं हि यौवनं शोकस्य । लोकस्य तु नरपतिमरणदिवसादपि दारुणः स बभूव दिवसः । सर्वस्मिन्नेव नगरे न केनचिदपाचि न केनचिदस्नायि नाभोजि सर्वत्र सर्वेणारोदि । केवलमनेन क्रमेणातिचक्राम दिवसः । स च प्रत्यग्रत्वष्टृटङ्कतष्टतनुरिव वहद्बहलरुधिररसमांसच्छविरपरपारावारपयसि ममज्ज मज्जिष्ठारुणोऽरुणसारथिः । मुकुलायमानकमलिनीकोपविकलं चकाण चञ्चरीककुलं कमलसरसि । सविधविरहव्याधिविधुरवधूबाध्यमानं बबन्ध बन्धाविव विबुद्धबन्धूकभासि भास्वति सास्रां दृशं चक्रवाकचक्रवालम् । संचरन्त्याः समधुकररवं कैरवाकरं कलहंसरमणीरमणीयं माणिक्यकाञ्चीकिङ्किणीजालमिवाचकाण श्रियः । प्रकटकलङ्कमुदयमानं विशङ्कटविषाणोत्कीर्णपङ्कसंकरशंकरशकुरशक्करककुदकूटसंकाशमकाशताकाशे शशाङ्कमण्डलम् ।

अस्यां च वेलायामनतिक्रमणवचनैरुपसृत्य प्रधानसामन्तैर्विज्ञाप्यमानः कथं कथमप्यभुक्त । प्रभातायां च शर्वर्यां सर्वेषु प्रविष्टेषु राजसु समीपस्थितं हर्षदेवमुवाच—'तात, भूमिरसि गुरुनियो-

---

इति । 'चूडा किरीटं केशाश्च संयता मौलयस्त्रयः' इत्युक्तम् । अत्र तूपचारान्मौलिशब्देन शिर उच्यते । वितर्दिका वेदिका । उपबर्हणमुपधानम् । जोषं तूष्णीम् । कुथो वर्णकंवलः । औरसो भ्राता । त्वष्टा विश्वकर्मा । तस्य टङ्कश्छेदनशस्त्रम् । तेन तनूकृता तनुर्यस्य सः । पुरा स्वभर्तृतेजोविसरोद्विग्नया सूर्यभार्ययावमानितः सूर्यस्त्वष्टारमवोचन्मम तेजस्तनु कुरु । तेनाप्यारोप्य चक्रभ्रमं टङ्कनासौ त्वष्टेति वार्ता । अपरः पश्चिमः । पारावारः समुद्रः चकाण जुगुञ्ज । चञ्चरीका भ्रमराः । 'कादम्बः कलहंसः स्यात्' । आचकाण चुकूज । कैरवाकरं संचरन्त्याः श्रियः कीङ्किणीजालमिव चुकूजेत्युत्प्रेक्षा । विशङ्कटो विशालः । शकुरो दान्तः ।

गानाम् । शैशव एवाग्राहि गुणवत्पताकेव भवता तातस्य चित्तवृत्तिः । यतो भवन्तमेवंविधं विधेयं विधिविधानोपनतनैर्घृण्यमिदं किमपि विभणिषति मे हृदयम् । नावलम्बनीया बालभावसुलभा प्रेमविलोभा वामता । वैधेय इव मा कृथाः प्रत्यूहमीहितेऽस्मिन् । न खलु न जानासि लोकवृत्तम् । लोकत्रयत्रातरि मांधतरि मृते किं कृतं पुरुकुत्सेन भ्रूलतादिष्टाष्टादशद्वीपे दिलीपे वा रघुणा महासुरसमरमध्याध्यासितत्रिदशरथे दशरथे वा रामेण गोष्पदीकृतचतुरुदन्वदन्ते दुष्यन्ते वा भरतेन । तिष्ठन्तु तावदेते तातेनैव शतसमधिकाध्वरधूमविसरधूसरितवासववयसि सुगृहीतनाम्नि तत्रभवति परासुतां गते पितरि किं नाकारि राज्यम् । यं च किल शोकः समभिभवति तं कापुरुषमाचक्षते शास्त्रविदः । स्त्रियो हि विषयः शुचाम् । तथापि किं करोमि । स्वभावस्य सेयं कापुरुषता वा स्त्रैणं वा यदेवमास्पदं पितृशोकहुतभुजो जातोस्मि । मम हि भूभृति पर्यस्ते निरवशेषतः प्रस्रवणानीव स्रुतान्यश्रूण्यस्तमिते महति तेजस्यन्धकारीभूतदशाशस्य प्रनष्टः प्रज्ञानलोकः प्रज्वलितं हृदयम्, आत्मदाहभीत इव स्वप्नेऽपि नोपसर्पति विवेकः, बलीयसा संतापेन जातुषमिव विलीनमखिलं धैर्यम्, पदे पदे दिग्धरोपाहतेव हरिणी मुह्यति मतिः, पुरुषद्वेषिणीव दूरत एव भ्रमन्ती परिहरति स्मृतिः, अम्बेव तातेनैव सह गता धृतिः, वार्धुषिकप्रयुक्तानीव वित्तानि प्रतिदिवसं वर्धन्ते दुःखानि, शोकानलधूमसंभारसंभूताम्भोधरभरितमिव वर्षति नयनवारिधाराविसरं शरीरम् । सर्वः पञ्चजनः पञ्चत्वमुपरतः प्रयाति वितथमेतद्वदति बालो लोकः । ततो हुताशनतामेव केवलमापन्नो येनैवं दहति माम् । इदमसांपरायिकमिव हृद-

---

भातुं प्रवृत्ता प्रभाता तस्याम् । नियोग आदेशः । विधेयमायत्तम् । विभणिषति कथयितुमिच्छति । विलोभानुकूलता । वामता प्रतिकूलता । वैधेयो मूर्खः। धूमेन मलिनीक्रियते । स्त्रैणे स्त्रीत्वे । परासुता मरणम् । मम हीत्यादिवाक्यद्वये श्लेषो व्याख्येयः । प्रस्रवणानि निर्झराः । जतुनो विकारो जातुषम् । 'त्रपुजतुनोः षुक्' । पदे शब्दे, क्रमे च । दिग्धो विषलिप्तः शरः । उक्तं च—'बाणे विषाक्ते दिग्धलिप्तकौ' इति । मेरुर्महीधरवद्रोपशब्दः प्रशंसार्थः । वृद्ध्या जीवति वार्धुषिकः वणिक्वृद्धेर्वृधुषीभावः । पञ्चजनः पञ्चमहाभूतानि, मनुष्यश्च । उक्तं च—'स्युः पुमांसः पञ्जनाः पुरुषाः पूरुषा नराः' इति । पञ्चत्वं मरणम् । वितथ

यमवष्टभ्य व्युत्थितः शोको दुर्निवारः वाडव इव वारिराशिम्, पविरिव पर्वतम्, क्षय इव क्षपाकरम्, राहुरिव रविम्, दहति दारयति तनूकरोति कवलयति। न शक्नोति मे हृदयं तादृशस्य सुमेरुकल्पस्य महापुरुषस्य विनिपातमश्रुभिरेव केवलैरतिवाहयितुम्। राज्ये विष इव चकोरस्य मे विरक्तं चक्षुः। बहुमृतपटावगुण्ठनां रञ्जितरङ्गां जनंगमानामिव वंशवाद्यामनार्यां श्रियं त्यक्तुमभिलषति मे मनः। क्षणमपि दग्धगृहे शकुलिरिव न पारयामि स्थातुम्। सोऽहमिच्छामि मनसि वाससीव मुलग्नं स्नेहमलमिदममलैः शिखरिशिखरप्रस्रवणस्वच्छस्रोतोऽम्बुभिः क्षालयितुमाश्रमपदे। यतस्त्वमन्तरितयौवनसुखामनभिमतामपि जरामिव पूरुराज्ञया गुरोर्गृहाण मे राज्यचिन्ताम्। त्यक्तसकलबालक्रीडेन हरिणेव दीयतामुरो लक्ष्म्यै। परित्यक्तं मया शस्त्रम्।' इत्येवमभिधाय खड्गग्राहिणो हस्तादादाय निजं निस्त्रिंशमुत्ससर्ज धरण्याम्।

अथ तच्छ्रुत्वा निशितशिखेन शूलेनेवाहतः प्रविदीर्णहृदयो देवो हर्षः समचिन्तयत्—किं नु खलु मामन्तरेणार्यः केनचिदसहिष्णुना किंचिद्राहितः कुपितः स्यात्। उतानया दिशा परीक्षितुकामो माम्। उत शोकजन्मा चेतसः समाक्षेपोऽयमस्य। आहोस्विदार्य एवायं न भवति किं वार्येणान्यदेवाभिहितमन्यदेवाश्रावि

मिति। पञ्चसु पृथिव्यादिषु लयात्पुरुषस्ताद्रूप्यं प्रतिपद्यत इत्यलीकम्। यतस्तत इत्याद्यग्निमात्रप्रतिबद्धकायदर्शनादित्यर्थः। आपत्कष्टम्। क्लेश इत्यर्थः। संपरायः सङ्ग्रामः। तस्मै यन्न भवति तदसांपरायिकम्। सभयं यः किल भीतःस कथं व्युत्थितं निवारयेत्। वाडव इत्यादयो दहतीत्यादिभिर्यथाक्रमं योज्याः। पविर्वज्रः। कल्पतेऽस्मादभीष्टार्थ इति कल्पः। चकोरः ककचः। तस्य विषे दृष्टे अक्षिणी विरज्येते। मृतस्य पटः। अवगुण्ठनं मस्तकाच्छादनम्। रङ्गः समाजः। जनंगमश्वण्डालः। उक्तं च—'चण्डालश्वमातङ्गदिवाकीर्तिजनंगमाः। निषादश्वपचावन्तेवासिचण्डालपुक्कसाः॥' इति। वंशोऽभिजननम्। प्रबन्धो वेणुश्च। बाह्या बहिर्भूताः, वहनीया च। शकुलिर्गृहचटिका। गृहशारिकेत्यन्ये। स्नेहः प्रेम, तैलादिश्च। **यतस्त्वमिति**। पुरा ययातिः शुक्रदुहितरं देवयानीमवमन्य देवयान्या दासीभूतां शर्मिष्ठामसकृन्मिथ्याकामयानेन शुक्रेण जरां यास्यसीति शप्तः प्राप्तजरादुःखो विषयलम्पटोऽन्यपुत्रैरगृहीतां जरां पूरौ स्वपुत्रे कृताभ्युपगमे संक्रमयांबभूवेति वार्ता। जराप्यन्तरितयौवनसुखाऽनभिमता च। गुरोर्ययातेरपि मामन्तरेण मां विना, मय्यसंनिहित इत्यर्थः।

मया शोकशून्येन श्रवणेन्द्रियेण । आर्यस्य वान्यदेव विवक्षितमन्यदेवापतितं मुखेन । अथवा सकलवंशविनाशाय निपातनोपायोऽयं विधेः मम वा निखिलपुण्यपरिक्षयोपक्षेपः । कर्मणामननुकूलसमग्रग्रहचक्रवालविलसितं वा । अथवा तातविनाशनिःशङ्ककलिकालक्रिडितं येनायं यःकश्चिदिव यत्किंचनकारिणं मामपुष्पभूतिवंशसंभूतमिव, अतातनयमिव, अनात्मानुजमिव, अभक्तमिव, दृष्टदोषमिव, श्रोत्रियमिव सुरापाने, सद्भृत्यमिव स्वामिद्रोहे, सज्जनमिव नीचोपसर्पणे,सुकलत्रमिव व्यभिचारे, अतिदुष्करे कर्मणि समादिष्टवान् । तदेतत्तावदनुरूपं यच्छौर्योन्मादमदिरोन्मत्तसमस्तसामन्तमण्डलसमुद्रमथनमन्दरे तादृशि पितरि मृते तपोवनं वा गम्यते वल्कलानि वा गृह्यन्ते तपांसि वा सेव्यन्ते । या तु मयि राज्याज्ञा सा दग्धेऽपि दाहकारिणी मय्यवग्रहग्लपिते धन्वनीवाङ्गारवृष्टिः । तदसदृशमिदमार्यस्य । यद्यपि च विभुरनभिमानः, द्विजातिरनेषणः, मुनिररोषणः, कपिरचपलः, कविरमत्सरः, वणिगतस्करः, प्रियजानिरकुहनः, साधुरदरिद्रः, द्रविणवानखलः, कीनाशोऽनक्षिगतिः, मृगयुरहिंस्रः, पाराशरी ब्राह्मण्यः, सेवकः सुखी, कितवः कृतज्ञः, परिव्राडभिक्षुः, नृशंसः प्रियवाक्, अमात्यः सत्यवादी, राजसूनुरदुर्विनीतश्च जगति दुर्लभः, तथापि ममार्य एवाचार्यः । को हि नाम तद्विधे निपतिते राजगन्धकुञ्जरे जनयितरि ईदृशे च विफलीकृतविशालशिलास्तम्भोरुभुजे भूभुजि भ्रातरि त्यक्तराज्ये ज्यायसि नववयसि तपोवनं गच्छति सकललोकलोचनजलपातापवित्रं मृद्वोलकं वसुधाभिधानं धनमदखेलनिखिलखलमुखविकारलक्षणाख्यायमाननीचाचरणां श्रीसंज्ञिकां सुभटकुटुम्बकर्मकुम्भदासीं चण्डालोऽपि कामयेत । कथमिव संभावितमत्यन्तमनुचितमिदमार्येण । किमुपलक्षितमनवदातमिदं मयि । किं वास्य चेतसश्च्युतः सौमित्रिर्विस्मृता वा वृकोदरप्रभृतयः । अनपे-

---

श्रोत्रियो वेदपारगः । धन्वनि मरौ । धन्वन्यपि दग्धे राज्याज्ञापि दाहकारिणी । अनेषणो निरभिलाषः । प्रिया जाया यस्य । 'जायाया निङ्' । कुहना ईर्ष्या,शङ्का वा । कीनाशः क्षुद्रः । उक्तं च—'कृतान्ते पुंसि कीनाशः क्षुद्रकार्षिकयोस्त्रिषु' । अनक्षिगतः प्रियः । मृगयुर्व्याधः । पाराशरी भिक्षुः । कितवो द्यूतकृत् । गोप्यो दासः । राजसूनुरदुर्विनीतश्चेत्येतत्प्रस्तावेन तदुक्तम् । खेलाः सविलासाः । अनव-

क्षितभक्तजना स्वार्थैकनिष्पादननिष्ठुरा नासीदियमार्यस्येदृशी प्रभविष्णुता । अपि चार्ये तपोवनं गते जिजीविषुः को हि नाम महीं मनसापि ध्यायेत् । कुलिशशिखरखरनखरप्रचयप्रचण्डचपेटापाटितमत्तमातङ्गोत्तमाङ्गमदच्छटाच्छुरितचारुकेसरभारभास्वरमुखे केसरिणि वनविहाराय विनिर्गते निवासं गिरिगुहां कः पाति पृष्ठतः । प्रतापसहाया हि सत्त्ववन्तः । कश्चपलां लक्ष्मीं प्रत्यनुरोधोऽयमार्यस्य यदियमपि न चीरान्तरितकुचा कुशकुसुमसमित्पलाशपूलिकां वहन्ती तत्रैव तपोवने वनमृगीव नीयते जराजालिनी । किंवा ममानेन वृथा बहुधा विकल्पितेन तूष्णीमेवार्यमनुगमिष्यामि । गुरुवचनातिक्रमकृतं च किल्बिषमेतत्तपोवने तप एवापास्यति । इत्यवधार्य मनसा प्रथमतरं गतस्तपोवनमधोमुखस्तूष्णीमवातिष्ठत ।

अत्रान्तरे पूर्वादिष्टेनैव रुदता वस्त्रकर्मान्तिकेन समुपस्थापितेषु वल्कलेषु निर्दयकरतलताडनभियेव क्वापि गते हृदये रटति राजस्त्रैणे तारमब्रह्मण्यमूर्ध्वदोष्णि विरुदति, विप्रजने पादप्रणतिपरे, फूत्कुर्वति पौरवृन्दे, विद्राति विद्रुतचेतसि चिरंतने परिजने, परिजनावलम्बिते वेपमानवपुषि, पर्याकुलवाससि, शोकगद्गदवचसि, गलितनयनपयसि, निवारणोद्यतमनसि, वर्षीयसि विशति बन्धुवर्गे, निराशेषु नखलिखितमणिकुट्टिमेष्ववाङ्मुखेषु, निश्चलत्सु सामन्तेषु, सबालवृद्धासु तपोवनाय प्रस्थितासु सर्वासु प्रजासु सहसैव प्रविश्य शोकविक्लवः प्रक्षरितनयनसलिलो राज्यश्रियः परिचारकः संवादको नाम प्रज्ञाततमो विमुक्ताक्रन्दः सदस्यात्मानमपातयत् ।

अथ संभ्रान्तो भ्रात्रा सह स्वयं देवो राज्यवर्धनस्तं पर्यपृच्छत्—'भद्र, भण भण किमस्मद्व्यसनमव्यवसायवर्धनबद्धधृतिः, अवनिपतिमरणमुदितमतिः, अधृतिकरमपरमधिकतरमितः समुप-

---

दातं निर्मलम् । सौमित्रिर्लक्ष्मणः । वृकोदरो भीमसेनः । प्रचयः समूहः । चपेटा करतलाघातः । वनमृग्यपि कुशादि वहति । जालिनी मायिनी ।

अत्रेत्यादौ संवादको नाम सदस्यात्मानमपातयदिति संबन्धः । कर्मान्तिकोऽधिकृतः । **करतलताडनेति** । हृदये वा । स्त्रैणे स्त्रीसमूहे । 'अब्रह्मण्यमवध्योक्तौ' फूत्करणमुद्दामरोदनध्वनिः । विद्रातिः कुत्सितः । गते प्राप्ते । वर्षीयसि वृद्धतरे । कारायां बन्धने । किंवदन्ती लोकवार्ता ।

नयति विधिः' इति । स कथं कथमप्यकथयत्—'देव, पिशाचानामिव नीचात्मनां चरितानि छिद्रप्रहारीणि प्रायशो भवन्ति । यतो यस्मिन्नहन्यवनिपतिरुपरत इत्यभूद्वार्ता तस्मिन्नेव देवो ग्रहवर्मा दुरात्मना मालवराजेन जीवलोकमात्मनः सुकृतेन सह त्याजितः । भर्तृदारिकापि राज्यश्रीः कालायसनिगडयुगलचुम्बितचरणा चौराङ्गनेव संयता कान्यकुब्जे कारायां निक्षिप्ता । किंवदन्ती च यथा किलानायकं साधनं मत्वा जिघृक्षुः सुदुर्मतिरेतामपि भुवमाजिगमिषति ।' इति विज्ञापिते प्रभुः प्रभवतीति ।

ततश्च तादृशमनुप्रेक्षणीयमसंभावितमाकस्मिकमपरं व्यतिकरमाकर्ण्याश्रुतपूर्वत्वात्परिभवस्य, परपरिभवासहिष्णुतया च स्वभावस्य, दर्पबहुलतया च नवयौवनस्य, वीरक्षेत्रसंभवत्वाच्च जन्मनः, कृपाभूमिभूतायाश्च स्वसुः, स्नेहात्स तादृशोऽपि बद्धमूलोऽप्यत्यन्तगुरुरेकपद एवास्य ननाश शोकावेगः । विवेश च सहसा केसरीव गिरिगुहागृहं गम्भीरं हृदयं भयंकरः कोपावेगः । केशिनिषूदशङ्काकुलकालियकुलभङ्गुरभ्रूभङ्गतरङ्गिणी श्यामायमाना यमस्वसेव प्रथीयसि ललाटपट्टे भीषणा भ्रुकुटिरुदभिद्यत । दर्पात्परामृशन्नखकिरणसलिलनिर्झरैः समरभारसंभावनाभिषेकमिव चकार दिङ्नागकुम्भकूटविकटस्य बाहुशिखरकोषस्य वामः पाणिपल्लवः । संगलत्स्वेदसलिलपूरितोदरो निर्मूलं मालवोन्मूलनाय गृहीतकेश इव दुर्मदश्रीकचग्रहोत्कण्ठयेव च कम्पमानः पुनरपि समुत्सर्प भीषणं कृपाणं पाणिरपरः । शस्त्रग्रहणमुदितराजलक्ष्मीक्रियमाणदिष्टवृद्धिविधुतसिन्दूरधूलिरिव कपिलः कपोलयोरदृश्यत रोषरागः । समासन्नसकलमहीपालचूडामणिचक्राक्रमणजाताहंकार इव च समारुरोह वाममूरुदण्डमुत्तानितश्चरणो दक्षिणः । निष्ठुराङ्गुष्ठकषणनिष्ठ्यूतधूमलेखो निर्वीरोर्वीकरणाय विमुक्तशिख इव लिलेख मणिकुट्टिममितरः पादपद्मः । दर्पस्फुटितसरसव्रणोच्छलितरुधि-

---

केशिनिषूदनः कृष्णः । यमस्वसा यमुना । सापि कालियकुला सतरङ्गा, श्यामायमाना च । परामृशन्नित्यर्थाद्बाहुशिखरमेव । कोशो दिव्यम् । 'कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः' इति कोशकारः । पाणिः सलिलपूरितोदरो भवति । कचाः केशाः । यश्च कामी कामिनीकचग्रहणं प्रत्युत्कण्ठते स कम्पते स्वेदवांश्च भवति । दिष्टमानन्दः । **विमुक्त इति** । धीराः किल रोषेण

रच्छटावसेकैः शोकविषप्रसुप्तं प्रबोधयन्निव पराक्रममनुजमवादीत्—'आयुष्मन्, इदं राजकुलम्, अमी बान्धवाः, परिजनोऽयम्, इयं भूमिः भूपतिभुजपरिघपालिताश्चैताः प्रजाः, गतोऽहमद्यैव मालवराजकुलप्रलयाय । इदमेव तावद्बलकलग्रहणमिदमेव तपः शोकापगमोपायश्चायमेव यदत्यन्ताविनीतारिनिग्रहः । सोऽयं कुरङ्गकैः कचग्रहः केसरिणः, भेकैः करपातः कालसर्पस्य, वत्सकैर्बन्दिग्रहो व्याघ्रस्य, अलगर्दैर्गलग्रहो गरुडस्य, दारुभिर्दाहादेशो दहनस्य, तिमिरैस्तिरस्कारो रवेः, यो मालवैः परिभवः पुष्पभूतिवंशस्य । अन्तरितस्तापो मे महीयसा मन्युना । तिष्ठन्तु सर्व एव राजानः करिणश्च त्वयैव सार्धम् । अयमेको भण्डिरयुतमात्रेण तुरङ्गमाणामनुयातु माम् ।' इत्यभिधाय चानन्तरमेव प्रयाणपटहमादिदेश ।

तं च तथा समादिशन्तमाकर्ण्य जामिजामातृवृत्तान्तविज्ञानप्रकोपाधानदूयमाने मनसि निवर्तनादेशेन दूरप्ररूढप्रणयपीड इव प्रोवाच देवो हर्षः—'कमिव दोषं पश्यत्यार्यो ममानुगमनेन । यदि बाल इति नितरां तर्हि न त्याज्योऽस्मि । रक्षणीय इति भवद्भुजपञ्जरं रक्षास्थानम्, अशक्त इति क परीक्षितोऽस्मि, संवर्धनीय इति वियोगस्तनूकरोति, अक्लेशसह इति स्त्रीपक्षे निक्षिप्तोऽस्मि, सुखमनुभवत्विति त्वयैव सह तत्प्रयाति महानध्वनः क्लेश इति विरहोऽविषह्यतरः, कलत्रं रक्षत्विति श्रीस्ते निश्शिशेऽधिवसति, पृष्ठतस्तिष्ठत्विति तिष्ठत्येव प्रतापः, राजकमनधिष्ठितमिति तत्सुबद्धमार्यगुणैः, न वाह्यः सहायो महत इति व्यतिरिक्तमिव मां गणयति प्रलघुपरिकरः, प्रयामीति पादरजसि कोऽतिभारः, द्वयोर्गमनमसांप्रतमिति मामनुगृहाण गमनाज्ञया, कातरो भ्रातृस्नेह इति सदृशो दोषः । का चेयमात्मंभरिता भुजस्य ते यदेकाकी क्षिरोदफेनपटलपाण्डुरममृतमिव यशः पिपासति । अवश्चितपूर्वो-

---

केशसंयमनमा परिभवप्रतीकारं न कुर्वते । भेको मण्डूकः । करपातश्चपेटादानम् । अलगर्दैर्जलसर्पैः ।

जामिर्भगिनी । **न वाह्य इति** । किल य एव त्वं स एवाहमिति । कोऽसौ सहायोऽस्य । आत्मंभरिता स्वार्थमात्रपरता ।

ऽस्मि प्रसादेषु । तत्प्रसीदत्वार्यो नयतु मामपि' इत्यभिधाय क्षितितलविनिहितमौलिः पादयोरपतत् ।

तमुत्थाप्य पुनरम्रजो जगाद—'तात, किमेवमतिमहारम्भपरिग्रहणेन गरिमाणमारोप्यते बलादतिलघीयानप्यहितः । हरिणार्थमतिन्हेपणः सिंहसंभारः । तृणानामुपरि कति कवचयन्त्याशुशुक्षणयः । अपि च तवाष्टादशद्वीपाष्टमङ्गलकमालिनी मेदिन्यस्त्येव विक्रमस्य विषयः । नहि कुलशैलनिवहवाहिनो वायवः संनह्यन्त्यतितरले तूलराशौ । न सुमेरुवप्रप्रणयप्रगल्भा वा दिक्करिणः परिणमन्त्यणीयसि वल्मीके । ग्रहीष्यसि सकलपृथ्वीपतिप्रलयोत्पातमहाधूमकेतुं मांधातेव चारुचामीकरपत्रलतालंकाराङ्ककायं कार्मुकं ककुभां विजये । मम तु दुर्निवारायामस्यां विपक्षक्षपणक्षुधि क्षुभितायां क्षम्यतामयमेकाकिनः कोपकवल एकः । तिष्ठतु भवान् ।' इत्यभिधाय च तस्मिन्नेव वासरे निर्जगामाभ्यमित्रम् ।

अथ तथागते भ्रातरि, उपरते च पितरि, प्रोषितजीविते च जामातरि, मृतायां च मातरि, संयतायां च स्वसरि, स्वयूथभ्रष्ट इव वन्यः करी देवो हर्षः कथं कथमप्येकाकी कालं तमनैषीत् । अतिक्रान्तेषु बहुषु वासरेषु कदाचित्तथैव भ्रातृगमनदुःखासिकया दत्तप्रजागरस्त्रिभागशेषायां त्रियामायां यामिकेन गीयमानामिमामार्यां शुश्राव—

'द्वीपोपगीतगुणमपि समुपार्जितरत्नराशिसारमपि ।
पोतं पवन इव विधिः पुरुषमकाण्डे निपातयति ॥ ३ ॥

तां च श्रुत्वा सुतरामनित्यताभावनया दूयमानहृदयः प्रक्षीणभूयिष्ठायां क्षपायां क्षणमिव निद्रामलभत स्वप्ने चाभ्रंलिहं लोहस्तम्भं भज्यमानमपश्यत् । उत्कम्पमानहृदयश्च पुनः प्रत्यबुध्यत । अचिन्तयच्च—'किं नु खलु मामेवममी सततमनुबध्नन्ति

अतिहेपणोऽत्यन्तलज्जाकारी । कवचयन्ति संनह्यन्ति । आशुशुक्षणयोऽग्नयः । अष्टमङ्गलकं कङ्कणमित्यन्ये । तूलं कार्पासः । परिणमन्ति तटाघातक्रीडां न कुर्वन्ति । अणीयस्यतिस्वल्पे । वल्मीके पिपीलिकोत्खाते मृत्स्थले । अभ्यमित्रं शत्रुसंमुखम् ।

यामिकेन जागरानियुक्तेन । रत्नराशिर्मणिसमूहः, अब्धिश्च । तस्य साराः श्रेष्ठरत्नानि । पोतं यानपात्रम् । निपातयति व्यापादयति । अत्युन्नतमभ्रंलिहं नभःस्पृशम् । अक्षुद्रः प्रधानभूतः । राहोरविकलकायबन्धनं कबन्धयोगात् । कव-

दुःखप्राः । स्फुरति च दिवानिशमकल्याणाख्यानविचक्षणमदक्षिणमक्षि । सुदारुणाश्चाक्षुद्रक्षितिपक्षयमाचक्षाणाः क्षणमपि न शाम्यन्ति पुनरुत्पाताः । प्रत्यहं राहुरविकलकायबन्ध इव कबन्धवति ब्रध्नबिम्बे घटमानो विभाव्यते । तपःकरणकालकवलितानिव धूसरितसमग्रग्रहानुद्विरन्ति धूमोद्गारान्सप्तर्षयः । दिने दिने दारुणा दिशां दाहा दृश्यन्ते । दिग्दाहभस्मकणनिकर इव निपतति नभस्तलात्तारागणः । तारापातशुचेव निष्प्रभः शशी । निशि निशि इतस्ततः प्रज्वलिताभिरुल्काभिरुग्रं ग्रहयुद्धमिव वियति विलोकयन्ति विलोलतारकाः ककुभः । राज्यसंचारसूचकः संचारयतीव क्ष्मां कापि वहद्बहलरजःपटलकलिलशर्कराशकलसूत्कारी मारुतः । न कुशलमिव पश्यामि लग्नस्य । अस्मिन्नस्मद्वंशे करिण इव करीरं कोमलमपि कलयतः कृतान्तस्य कः परिपन्थी । सर्वथा स्वस्ति भवत्वार्याय ।' इति चिन्तयित्वा च अन्तर्भिन्नभ्रातृस्नेहकातरं द्रवदिव हृदयं कथं कथमपि संस्तभ्योत्थाय यथाक्रियमाणं क्रियाकलापमकरोत् ।

आस्थानगतश्च सहसैव प्रविशन्तम्, अनुप्रविशता विषण्णवदनेन लोकेनानुगम्यमानम्, असह्यदुःखोष्णनिश्वासधूमरक्ततन्तुनेव मलिनेन पटेन प्रावृतवपुषम्, जीवितधारणलज्जयेवावनतमुखम्, नासावंशस्याग्रे ग्रथितदृष्टिम्, दुःखदूरप्ररूढरोम्णा मूकेनापि मुखेन स्वामिव्यसनमविच्छिन्नैरश्रुबिन्दुभिर्विज्ञापयन्तं कुन्तलं नाम बृहदश्ववारम्, राज्यवर्धनस्य प्रसादभूमिमभिजाततमं ददर्श । दृष्ट्वा च जाताशङ्कश्चक्षुषि सलिलेन, मुखशशिनि श्वसितेन, हृदये हुताशेन, उत्सङ्गे भुवा, दारुणाप्रियश्रवणसमये सममिव सर्वेष्वङ्गेष्वगृह्यत लोकपालैः । तस्माच्च हेलानिर्जितमालवानीकमपि गौडाधिपेन मिथ्योपचारोपचितविश्वासं मुक्तशस्त्रमेकाकिनं विश्रब्धं स्वभवन एव भ्रातरं व्यापादितमश्रौषीत् ।

न्धदर्शनं चोत्पातसूचकम् । **विलोलतारका इति** । स्त्रीणां च युद्धदर्शनवशादक्ष्णोश्च लोलत्वं भवति । कलिलानि व्याप्तानि । वंशो वेणुरपि । करीरो बंशाङ्कुरः । अपिशब्दः कृतान्तस्येत्यतः परं योज्यः । परिपन्थी रोधकः । परिपूर्वपर्यायः परिपन्थशब्दोऽस्तीति ज्ञापितम् ।

श्रुत्वा च महातेजस्वी प्रचण्डकोपपावकप्रसरपरिचीयमानशोकावेगः सहसैव प्रजज्वाल । ततश्चामर्षविधुतशिरःशीर्यमाणशिखामणिशकलाङ्गारकितमिव रोषाग्निमुद्वमन्ननवरतस्फुरितेन पिबन्निव सर्वतेजस्विनामायूंषि रोषनिर्भुग्नेन दशनच्छदेन लोहितायमानलोचनालोकविक्षेपैर्दिग्दाहानिव दर्शयन्रोषानलेनाप्यसह्यसहजशौर्योष्मदहनदह्यमानेनेव वितन्यमानस्वेदसलिलशीकरासारदुर्दिनः, स्वावयवैरप्यदृष्टपूर्वप्रकोपभीतैरिव कम्पमानैरुपेतः' हर इव कृतभैरवाकारः, हरिरिव प्रकटितनरसिंहरूपः, सूर्यकान्तशैल इवापरतेजःप्रसरदर्शनप्रज्वलितः, क्षयदिवस इवोदितद्वादशदिनकरदुर्निरीक्ष्यमूर्तिः, महोत्पातमारुत इव सकलभूभृत्कम्पकारी, विन्ध्य इव विवर्धमानविग्रहोत्सेधः, महाशीविष इव दुर्नरेन्द्राभिभवरोषितः, पारीक्षित इव सर्वभोगिदहनोद्यतः, वृकोदर इव रिपुरुधिरतृपितः, सुरगज इव प्रतिपक्षवारणप्रधावितः पूर्वागम इव पौरुषस्य, उन्माद इव मदस्य, आवेग इवावलेपस्य, तारुण्यावतार इव तेजसः, सर्वोद्योग इव दर्पस्य, युगागम इव यौवनोष्मणः, राज्याभिषेक इव रणरसस्य, नीराजनदिवस इवासहिष्णुतायाः परां भीषणतामयासीत् ।

अवादीच्च गौडाधिपमपहाय कस्तादृशं महापुरुषं तत्क्षण एव निर्व्याजभुजवीर्यनिर्जितसमस्तराजकं मुक्तशस्त्रं कलशयोनिमिव कृष्णवर्त्मप्रसूतिरीदृशेन सर्वलोकविगर्हितेन मृत्युना शमयेदार्यम् । अनार्य च तं मुक्त्वा भागीरथीफेनपटलपाण्डुराः केषां मनःसु

अप्रियेति । अप्रियग्रहणकाले च दुःखं सर्वाङ्गेषु गृह्यते ।

अत इत्यादौ परां भीषणतामयासीदिति संबन्धः । निर्भुग्नेन वक्रीकृतेन । **दह्यमानेनेति** । दाहभीतेन च सलिलकणा वितन्यन्ते । भैरवो भीषणोऽपि । प्रशस्तो नरो नरसिंहः । इत्थं च—'स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुंजराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥' इति । नृसिंहरूपी च हरिरिति । तेजोऽक्षमता, आतपश्च दिनकरवत्तैश्च दुर्निरीक्षणः । भूभृतो राजानोपि, गिरयश्च । वर्धमानेन देवेन । उत्सेध औन्नत्यं यस्य । नरेन्द्रो मन्त्रज्ञः, राजापि । परीक्षितिदग्धे जनमेजयः पितृपरिभवेन सर्पसत्रे भोगिनां क्षयार्थमयजदिति वार्ता । भोगिनो राजानः । वृकोदरो भीमसेनः । वारणं निषेधः, हस्ती च वारणः । अवलेपस्य दर्पस्य । नीराजनं शान्तिकर्मविशेषः ।

कलशयोनिं द्रोणाचार्यम् । कृष्णवर्त्मप्रसूतिः पापमार्गप्रवर्तकः । धृष्टद्युम्नश्चा-

सरःसु राजहंसा इव परशुरामपराक्रमस्मृतिकृतो न कुर्युरार्यशौर्यगुणाः पक्षपातम् । कथमिवात्युग्रस्यास्यार्यजीवितहरणे निदाघरवेरिव कमलाकरसलिलशोषणेऽनपेक्षितप्रीतयः प्रसृताः कराः । कां नु गतिं गमिष्यति, कां वा योनिं प्रवेक्ष्यति, कस्मिन्वा नरके निपतिष्यति । श्वपाकोऽपि क इदमाचरेत् । नामापि गृह्णतोऽस्य पापकारिणः पापमलेन लिप्यत इव मे जिह्वा । किं वाङ्गीकृत्य कार्यमार्यस्तेन क्षुद्रेणानुप्रविश्य विगतघृणेन घुणेनेव सकलभुवनाह्लादनचतुरश्चन्दनस्तम्भः क्षयमुपनीतः । नूनं नानेन मूढेन मधुरसास्वादलुब्धेन मध्विवार्यजीवितमाकर्षता भावी दृष्टः शिलीमुखसंपातोपद्रवः । निजगृहदूषणं जालमार्गप्रदीपकेन कज्जलमिवातिमलिनं केवलमयशः संचितं गौडाधमेन । नत्वाश्वेवास्तमुपगतवत्यपि त्रिभुवनचूडामणौ सवितरि वेधसादिष्टः सत्पथशत्रोरन्धकारस्य निग्रहाय ग्रहषण्डविहारैकहरिणाधिपः शशी । विनयविधायिनि भग्नेऽपि चाङ्कुशे विद्यत एव व्यालवारणस्य विनयाय सकलमत्तमातङ्गकुम्भस्थलस्थिरशिरोभागभिदुरः खरतरः केसरिनखरः । तादृशाः कुवैकटिका इव तेजस्विरत्नविनाशकाः कस्य न वध्याः । केदानीं यास्यति दुर्बुद्धिः ।' इत्येतदभिदधत एवास्य पितुरपि मित्रं सेनापतिः समग्रविग्रहग्राग्रहरो हरितालशैलावदातदेहः परिणतप्रगुणसालप्रकाण्डप्रकाशः, प्रांशुरतिशौर्योष्मणेव परिपाकमागतो गतभूयिष्ठे वयसि वर्तमानः, बहुशरशयनसुप्तोत्थितोऽपि हसन्निव शान्तनवमतिदीर्घेणायुषा दुरभिभवशरीरतया जरयापि भीतभीतयेव प्रकटितप्रकम्पया परा-

---

म्रिजातः । कृष्णवर्त्मा वह्निः । भागीरथीत्यादि परशुराम इत्यादि च हंसानामपि विशेषणम् । रामेण हि हंसमार्गः कैलासे कृत इति हंसास्तत्कीर्तिं स्मारयन्ति । पक्षपातं स्नेहम्, पक्षैर्गमनं च । अत्युग्रस्यातिक्रूरस्य, अतिचण्डस्य च । अत्रार्यस्य कमलाकरेणोपमा । लक्ष्मीयात्रादिगुणयुक्तत्वात् । करा हस्ताः, रश्मयश्च । क्षुद्रेण क्रूरेण, परिचितपरिपणेन च । अनुप्रविश्य विश्वासं नीत्वान्तर्भूय च । घुणेन काष्ठकृमिणा । शिलीमुखाः शराः, भ्रमराश्च । जालस्य कुसृतेर्मार्गं दीपयति यस्तेन गवाक्षमार्गेण यः प्रदीपः स यथा कज्जलं संचिनुते नत्वाशु इत्यप्रस्तुतप्रशंसा बोद्धव्या । विशेषेण हरणं विहारो विच्छायीकरणं गमनं च । षण्डे हि सिंहो गमनं करोति । व्यालवारणस्य दुष्टदन्तिनः । स्थिरो दृढः शिरोभागो यस्य । यं प्राप्यैव तस्य स्वयं विदारणं भवतीत्यर्थः । वैकटिको रत्नबन्धकः ।

मृष्टः कथमपि सारमयेषु शिरोरुहेषु शशिकरनिकरसितसरलशिरोरुहसटालां सैंहीमिव निष्कपटपराक्रमरसरचितां संक्रान्तो जीवन्नेव जातिम्, अपरस्वामिमुखदर्शनमहापातकपरिजिहीर्षयेव भ्रूयुगलेन वलितशिथिलप्रलम्बचर्मणा स्थगितदृष्टिः, धवलस्थूलगुञ्जापिच्छप्रच्छादितकपोलभागभास्वरेण वमन्निव विक्रमकालमकालेऽपि विकाशिकाशकाननविशदं शरदारम्भं भीमेन मुखेन, मृतमपि हृदयस्थितं स्वामिनमिव सितचामरेण वीजयन्नाभिलम्बेन कूर्चकलापेन परिणामेऽपि धौतासिधाराजलपानतृषितैरिव विवृतवदनैर्बृहद्भिर्व्रणविदरैर्विषमितविशालवक्षाः, निशितशस्त्रटङ्ककोटिकुट्टितबहुबृहद्व्रणाक्षरपङ्क्तिनिरन्तरतया च सकलसमरविजयपर्वगणनामिव कुर्वन्पूर्वपर्वत इव पादचारी, विविधवीररसवृत्तान्तरामणीयकेन महाभारतमपि लङ्घयन्निव, प्रतिपक्षक्षपणातिनिर्बन्धेन परशुराममपि शिक्षयन्निव अभ्रमणेनानादरश्रीसमाकर्षणविभ्रमेण मन्दरमपि मन्दयन्निव, वाहिनीनायकमर्यादानुवर्तनेनाम्भोधिमप्यभिभवन्निव, स्थैर्यकार्कश्योन्नतिभिरचलानपि ह्रेपयन्निव, सहजप्रचण्डतेजःप्रसरपरिस्फुरणेन सवितारमपि तृणीकुर्वन्निव, ईश्वरभारोद्वहनघृष्टपृष्ठतया हरवृषभमपि हसन्निव, अरणिरमर्षाग्नेः, ऐश्वर्यं शौर्यस्यमदो मदस्य, विसर्पो दर्पस्य, हृदयं हठस्य, जीवितं जिगीषुतायाः, उच्छ्वसितमुत्साहस्य, अङ्कुशो दुर्मदानाम्, नागदमनो दुष्टभोगिनाम्, विरामो वरमनुष्यतायाः, कुलगुरुर्वीरगोष्ठीनाम्, तुला शौर्यशालिनाम्, सीमान्तदृश्वा शस्त्रग्रामस्य, निर्वोढा प्रौढवादानाम्,

---

इत्येवमादौ सेनापतिः सिंहनादनामा संनिधावेव समुपविष्टो विज्ञापितवानिति संबन्धः। विग्रहाः संभ्रमास्तेषु प्राग्रहरोऽग्रेसरः। प्रगुणं स्पष्टम्। काण्डं स्कंधः। शान्तनवं भीष्मम्। वलयोऽस्य सन्ति वलिनम्। गुञ्जोत्तरोष्ठोपरि रोमराजिः। **विक्रमकालमिति**। शरदारम्भविशेषणम्। तत्र शत्रुषु जययात्रा विधेयेति। कूर्चकलापः श्मश्रुः। परिणामे वृद्धत्वे। तृषितोऽपि जलं पातुं विवृतवदनो भवति। विदरैः स्फोटैः। शस्त्राण्येव टङ्काः। छेदनभाण्डानि कुण्ठितानि छेदः। पूर्ववृत्तान्तः पूर्वप्रशस्तिः। अब्भ्रमणं समुद्रयात्रा, जले परिवर्तनपि। ताभ्योऽनादरेण यल्लक्ष्मीसमाकर्षणं तदर्थं यो विविधो भ्रमस्तेन। वाहिनी सेना, नदी च। स्थैर्यं व्यवसायादचलनमपि। कार्कश्यं परविषयं निर्दयत्वमपि। उन्नतिरभिमानोऽपि। तेजो क्षमा, घर्म च ईश्वरो हरोऽपि। कार्येषु क्षुण्णो लोकेषु घृष्टपृष्ट

संस्तम्भयिता भग्नानाम्, पारगः प्रतिज्ञायाः, मर्मज्ञो महाविग्रहाणाम्, आघोषणापटहः समरार्थिनाम्, संनिधावेव समुपविष्टः सिंहनादनामा स्वरेणैव दुन्दुभिघोषगम्भीरेण सुभटानां समररसमानयन्विज्ञापितवान्—'देव, न क्वचित्कृताश्रयया मलिनया मलिनतराः कोकिलया काका इव कापुरुषा हतलक्ष्म्या विप्रलभ्यमानमात्मानं न चेतयन्ते। श्रियो हि दोषान्धतादयः कामला विकाराः। छत्रच्छायान्तरितरवयो विस्मरन्त्यन्यं तेजस्विनं जडधियः। किं वा करोतु वराकः येनातिभीरुतया नित्यपराङ्मुखेन नतु दृष्टान्येव सर्वातिशायिशौर्यातिशयश्वयथुकदिलकपोमृपुलकपल्लवितकोपानलानि कुपितानां तेजस्विनां मुखानि। नासौ तपस्वी जानात्येवं यथाविचारा इव विप्रकृताः सद्यः सकलकुलप्रलयमुपहरन्ति मनस्विनः। जलेऽपि ज्वलन्ति ताडितास्तेजस्विनः। सकलवीरगोष्ठीबाह्यस्य तस्यैवेदमुचितमनुत्तारनिरयनिपातनिपुणं कर्म। मनीस्विनां हि प्रधनप्रधानधने धनुषि ध्रियमाणे सति च कमलाकलहंसीकेलिकुवलयकानने कृपाणे कृपणोपायाः पयोधिमथनप्रभृतयोऽपि श्रीसमुत्थानस्य किं पुनरीदृशाः। येषां च धात्रा धरित्रीं त्रातुं नियुक्ताः स्वयमसमर्था इव कुलिशकर्कशभुजपरिघप्रहरणहेतोरुद्विरन्ति गिरयोऽपि लोहानि ते कथमिव बाहुशालिनो मनसापि विमलयशोबान्धवा ध्यायेयुरकार्यम्। सर्वग्रहाभिभवभास्वराणां हि सुभटकराणामग्रतो दिग्ग्रहणे पङ्गवः पतङ्गकराः। महा-

---

उच्यते। नागदमनो गजमर्दनः, गरुडश्च। भोगिनो राजानः, सर्पाश्च। यथा आघोषणापटहः समरार्थिनामुत्साहं जनयति तथासावपीत्यर्थः।

देवेत्यादौ कापुरुषाहतलक्ष्म्या विप्रलभ्यमानं वक्ष्यमानमात्मानं न चेतयन्त इति योजना। न क्वचित्कृताश्रयया सर्वत्र चाश्चल्यात्कस्मात्तान्तलक्ष्मीर्विप्रलभत इत्याह—श्रियो हि दोषान्धतादयः **कमलाविकारा इति**। हि यस्माच्छ्रियो ये दोषान्धतादयो विकारास्ते हि कामलाः कमलसंबन्धिनः। कमलानां दोषायां रात्रौ। अन्धता संकोचः। तन्निवासश्च लक्ष्म्या अपि। स विकारश्चान्यं विप्रलभते। रागादयस्तैरन्धतेवान्धतासत्कार्यानालोचनम्। अथ च पाण्डू रोगभेदः। तेन शङ्खादौ पीतत्वादिज्ञानं तद्विकाराश्च राज्यन्धतादयो दोषा भवन्ति। सर्वातिशायिना शौर्यातिशयेन श्वयथुर्येषां तानि। ततो विशेषणसमासः। विप्रकृता उपद्रुताः। विप्रैर्द्विजैः कृताः। जले निजेऽपि ताडिता आहता वैद्युताश्च तेजस्विनोऽग्नयोऽपि गोष्ठी बाह्यश्च न जानाति धर्मं वृद्धासेवितत्वात्। प्रधनं रणः। गि-

महिषशृङ्गतरङ्गभङ्गभङ्गुरभीषणान्तराला लोकप्रवादमात्रेण दक्षिणाशा परमार्थतोभटभ्रुकुटिरधिवासो यमस्य । चित्रं च यदुन्मुक्तसिंहनादानां सहसा साहसरसरोमाञ्चकण्टकनिकरेण सह न निर्यान्ति सटाः शूराणां रणेषु । द्वयमेव च चतुःसागरसंभूतस्य भूतिसंभारस्य भाजनं प्रतिपक्षदाहि दारुणं वडवामुखं वा महापुरुषहृदयं वा । तेजस्विनः सकलाननवाप्य पयोराशिसहजस्य कुतो निवृत्तिरुष्मणः । वृथावितततविपुलफणाभारो भुजङ्गानां भर्ता बिभर्ति यो भोगेन मृत्पिण्डमेव केवलम् । अप्रतिहतशासनाक्रान्त्युपभोगसुखरसं तु रसायां दिक्कुञ्जरकरभारभास्वरप्रकोष्ठा वीरबाहव एव जानन्ति । रविरिवोन्मुखपद्माकरगृहीतपादपल्लवः सुखेनाखण्डिततेजा दिवसान्नयति शूरः । कातरस्य तु शशिन इव हरिणहृदयस्य पाण्डुरपृष्ठस्य कुतो द्विरात्रमपि निश्चला लक्ष्मीः । अपरिमितयशःप्रकरवर्षी विकासी वीररसः । पुरःप्रवृत्तप्रत्तीपप्रहताः पन्थानः पौरुषस्य । शब्दविद्रुतद्विपन्ति भवन्ति द्वाराणि दर्पस्य । शस्त्रालोकप्रकाशिताः शून्या दिशः शौर्यस्य । रिपुरुधिरशीकरासारेण भूरिव श्रीरप्यनुरज्यते । बहुनरपतिमुकुटमणिशिलाशाणकोणकपणेन चरणनखराजिरिव राजताप्युज्ज्वलीभवति । अनवरतशस्त्राभ्यासेन करतलानीव रिपुमुखानि श्यामीभवन्ति । विविधव्रणवद्धपट्टकशतैः शरीरमिव यशोऽपि धवलीभवति । कवचिषु रिपूरःकवाटेषु पात्यमानाः पावकशिखामिव श्रियमपि वमन्ति निष्ठुरा निस्त्रिंशप्रहाराः । यश्चाहितहतस्वजनो मनस्विजनो द्विषद्योषिदुरस्ताडनेन कथयति हृदयदुःखम् । परुषासिलतानिपातवनेनोच्छ्वसिति निरुच्छ्वसितशत्रुशरीराश्रुधारापातेन रो-

---

रयो लोहान्युद्विरन्ति गिरिभ्य एव लोहोत्पत्तेः । सर्वस्य वस्तुनो ग्रहोपहरणम् । ग्रहाश्चन्द्राद्याः । पतङ्गः सूर्यः । महामहिषशृङ्गयोस्तरङ्गवद्भङ्गुरा ये भङ्गास्तैर्भीषणमन्तरालं यस्याः सा । अन्यत्र महामहिषशृङ्गतुल्या । भूतिर्भस्मापि । तेजस्विनो वडवाग्नेरपि । मुखेन शोभनाकाशेनापि । शूरो रविरपि । हरिणहृदयस्याल्पसत्त्वस्यापि पाण्डुरपृष्ठस्य देशभाषया निर्लज्जस्यापि । द्विरात्रमपीति पौर्णमास्यामेव शशिनः सातिशयं शोभायुक्तत्वात् । लक्ष्मीः श्रीः, कान्तिश्च । शून्या अनावृताः । अनुरज्यतेऽनुरक्ता भवति, उपलिप्ता च भवति । उज्ज्वला रम्या, निर्मला च । श्यामानि कृष्णानि, विच्छायानि च । श्रेयान्प्रशंसनीयः । शिशिरभूमयोऽप्यमि-

दिति विपक्षवनिताचक्षुषा ददाति जलं स श्रेयान्नेतरः । न च स्वप्रदृष्टनष्टेष्विव क्षणिकेषु शरीरेषु निबध्नन्ति बन्धुबुद्धिं प्रबुद्धाः । स्थायिनि यशसि शरीरधीर्वीराणाम् । अनवरतप्रज्वलिततेजःप्रसरभास्वरस्वभावं च मणिप्रदीपमिव कलुषः कज्जलमलो न स्पृशत्येव तेजस्विनं शोकः । स त्वं सत्त्ववतामग्रणीः प्राग्रहरः प्राज्ञानां प्रथमः समर्थानां प्रष्ठोऽभिजातानामग्रेसरस्तेजस्विनामादिरसहिष्णूनाम् । एताश्च सततसंनिहितधूमायमानकोपाग्नयः सुलभासिधारातोयतृप्तयो विकटबाहुवनच्छायोपगूढा धीरताया निवासशिशिरभूमयः स्वायत्ताः सुभटानामुरःकवाटभित्तयः । यतः किं गौडाधिपेनैकेन । तथा कुरु यथा नान्योऽपि कश्चिदाचरत्येवं भूयः । सर्वोर्वीश्रद्धाकामुकानामलीकविजिगीषूणां संचारय चामराण्यन्तःपुरपुरंध्रिनिश्वसितैः । उच्छिन्धि रुधिरगन्धान्धगृध्रमण्डलच्छादनैरुच्छत्रच्छायाव्यसनानि । अपाकुरु कदुष्णशोणितोदकस्वेदैः कुलक्ष्मीकुलटाकटाक्षचक्षूरागरोगान् । उपशमय निशितशरशिरावेधैरकार्यशौर्यश्वयथून् । उन्मूलय लोहनिगडापीडमालामलमहौषदैः पादपीठदोहददुर्ललितपादपटुमान्द्यानि । क्षपय तीक्ष्णाज्ञाक्षरक्षारपातैर्जयशब्दश्रवणकर्णकण्डूः । अपनय चरणनखमरीचिचन्दनचर्चाललाटलेपैरनमितस्तिमितमस्तकस्तम्भविकारान् । उद्धर करदानसंदेशसंदंशैर्द्रविणदर्पोष्मायमाणदुःशीललीलाशल्यानि । भिन्धि मणिपादपीठदीधितिप्रदीपिकाभिः शुष्कसुभटाटोपभ्रुकुटिबन्धान्धकारान् । जय चरणलङ्घनलाघवगलितशिरोगौरवारोग्यैर्मिथ्याभिमानमहासंनिपातान् । मृदय सततसेवाञ्जलिमुकुलितकरसंपुटोष्मभिरिष्वसनगुणकिणकार्कश्यानि । येनैव ते गतः पिता पितामहः प्रपितामहो वा तमेव मा हासीस्त्रिभुवनस्पृहणीयं पन्थानम् । अपहाय कुपुरुषोचितां शुचं प्रतिपद्यस्व कुलक्रमागतां केसरीव कुरङ्गीं राजलक्ष्मीम् । देव, देवभूयं गते नरेन्द्रे दुष्टगौडभुजङ्गजग्धजीविते च राज्यवर्धने वृत्तेऽस्मिन्महाप्रलये धरणी-

---

तोयच्छायायुक्ता भवन्ति । स्वेदैश्च नयनव्याध्युपशमो जायते । एवं निशितशरसिरावेधैरित्यादि बोद्धव्यम्। संदेशः शल्याश्चनम् । सततान्जलिबन्धात्करयोरूष्मसंभवः । इष्वसनं धनुः देवभूयं देवत्वम् । शेषोऽवशिष्टः,शेषभट्टारकश्च । ललाटंतपानिति प्रचण्डतोक्ता । कल्माषपादत्वं चित्रचरणत्वम् । राजन्यकं क्षत्रियसमूहः ।

धारणायाधुना त्वं शेषः । समाश्वासय अशरणाः प्रजाः । क्षमापतीनां शिरःसु शरत्सवितेव ललाटंतपान्प्रयच्छ पादन्यासान् । अहितानामभिनवसेवादीक्षादुःखसंतप्तश्वासधूममण्डलैर्नखंपचैः प्रचलितचूडामणिचक्रवालबालातपैश्चायाहि कल्माषपादताम् । अपि च हते पितर्येकाकी तपस्वी मृगैः सह संवर्धितः सहजब्राह्मण्यमार्दवसुकुमारमनाः कृतनिश्चयश्चण्डचापवनाटनिटांकारनादनिर्मदीकृतदिग्गजं गुञ्जज्याजालजनितजगज्जवरं समग्रमुद्यतमेकविंशतिकृत्वः कृत्तवंशमुत्खातवान्राजन्यकं परशुरामः । किं पुनर्नैसर्गिककायकार्कश्यकुलिशायमानमानसो मानिनां मूर्धन्यो देवः । तदद्यैव कृतप्रतिज्ञो गृहाण गौडाधमजीवितध्वस्तये जीवितसंकलनाकुलकालाकाण्डदण्डयात्राचिह्नध्वजं धनुः । न ह्ययमरातिरक्तचन्दनचर्चाशिशिरोपचारमन्तरेण शाम्यति परिभवानलपच्यमानदेहस्य देवस्य दुःखदाहज्वरः सुदारुणः । निकारसंतापशान्त्युपायपरिक्षये हि हिडिम्बाचुम्बनास्वादितमिव रिपुरुधिरामृतममन्दरोषायमपायि पवनात्मजेन । जामदग्न्येन च शाम्यन्मन्युशिखिशिखासंज्वरसुखायमानस्पर्शशीतलेषु क्षत्रियक्षतजह्रदेष्वस्नायि ।' इत्युक्त्वा व्यरंसीत् ।

देवस्तु हर्षस्तं प्रत्यवादीत्—'करणीयमेवेदमभिहितं मान्येन । इतरथा हि मे गृहीतभुवि भोगिनाथेऽपि दायाददृष्टिरीर्ष्यालोर्भुजस्य । उपरि गच्छतीच्छति निग्रहाय ग्रहगणेऽपि भ्रूलता चलितुम् । अनमत्सुशैलेष्वपि कचग्रहमभिलषति दातुं करः । तेजोदुर्विदग्धानर्ककरानपि चामराणि ग्राहयितुमीहते हृदयम् । राजशब्दरुषा मृगराजानामपि शिरांसि वाञ्छति पादः पादपीठीकर्तुम् । स्वच्छन्दलोकपालस्वेच्छागृहीतानामाक्षेपादेशाय दिशामपि स्फुरत्यधरः किं पुनरीदृशे दुर्जाते जाते जातामर्षनिर्भरे च मनसि नास्त्येवावकाशः शोकक्रियाकरणस्य । अपि च हृदयविषमशल्ये

रामो भार्गवः । नैसर्गिकः स्वाभाविकः । मूर्धन्यो मुख्यः । परिभवो निकारः । हिडिम्बा राक्षसी । पवनात्मजेन भीमसेनेन । क्षतजह्रदेषु रक्ततडागेषु ।

इतरथापीत्यन्यथा यदीदृशं दुर्जातं जातं नाभूत्तदादावेवमद्भुतं भुजस्य भोगिनाथेऽपि दायाददृष्टिः । किं पुनरीदृशे दुर्जाते व्यसने जाते संपन्ने शत्रुवृद्धिर्भवेदिति योजना । एवमृपरिगच्छतीत्यादौ बोद्धव्यम् । आक्षेपोऽपहरणम् मुसलेन वध्यो

मुसल्ये जीवति जाल्मे जगद्विगर्हिते गौडाधिपाधमचण्डाले जिह्मेमि शुष्काधरपुटः पोटेव प्रतिकारशून्यं शुचा सूत्कर्तुम् । अकृतरिपुबलाबलाविलोललोचनोदकदुर्दिनस्य मे कुतः करयुगलस्य जलाञ्जलिदानम् । अदृष्टगौडाधमचिताधूममण्डलस्य वा चक्षुषः स्वल्पमप्यश्रुसलिलम् । श्रूयतां मे प्रतिज्ञा । शपाम्यार्यस्यैव पादपांशुस्पर्शेन यदि परिगणितैरेव वासरैः सकलचापलदुर्ललितनरपतिचरणरणरणायमाननिगडां निर्गौडां न करोमि मेदिनीं ततस्तनूनपाति पीतसर्पिषि पतङ्ग इव पातकी पातयाम्यात्मानम् ।' इत्युक्त्वा च महासंधिविग्रहाधिकृतमवन्तिमन्तिकस्थमादिदेश—'लिख्यताम् । आ रविरथचक्रचीत्कारचकितचारणमिथुनमुक्तसानोरुदयाचलात्, आ त्रिकूटकटककुट्टाकटङ्कलिखितकाकुत्स्थलङ्कालुण्ठनव्यतिकरात्सुवेलात्, आ वारुणीमदस्खलितवरुणवरनारीनूपुररवमुखरकुहरकुञ्जेरस्तगिरेः, आ गुह्यकगेहिनीपरिमलसुगन्धिगन्धपापाणवासितगुहागृहाच्च गन्धमादनात्, सर्वेषां राज्ञां सज्जीक्रियन्तां कराः करदानाय शस्त्रग्रहणाय वा, गृह्यन्तां दिशश्चामराणि वा, नमन्तु शिरांसि धनूंषि वा, कर्णपूरीक्रियन्तामाज्ञा मौर्व्यो वा, शेखरीभवन्तु पादरजांसि शिरस्त्राणि वा, घटन्तामञ्जलयः करिघटाबन्धा वा, मुच्यन्तां भूमय इषवो वा, समालम्ब्यन्तां वेत्रयष्टयः कुन्तयष्टयो वा, सुदृष्टः क्रियतामात्मा मच्चरणनखेषु कृपाणदर्पणेषु वा । परागतोऽहम् । पङ्गोरिव मे कुतो निवृत्तिस्तावद्यावन्न कृतः सर्वद्वीपान्तरसंचारी सकलनरपतिमुकुटमणिशिलालोकमयः पादलेपः ।' इति कृतनिश्चयश्च मुक्तास्थानो विसर्जितराजलोकः स्नानारम्भाकाङ्क्षी सभामत्याक्षीत् । उत्थाय च स्वस्थवन्निःशेषमाह्निककार्षीत् । अमलच्च दर्पप्रसर इव श्रुतप्रतिज्ञस्य शाम्यदुष्मा दिवसस्त्रिभुवनस्य ।

ततश्च निजाधिकारापहारभीत इव भगवत्यपि कापि गते गत-

मुसल्यः । तस्मिन् जाल्मे पापिष्ठे । पोटा नपुंसकम् । निगडो बन्धनश्शृङ्खला । तनूनपाद्वह्निः । चारणा गन्धर्वाः । काकुस्थो रामः । वारुणी सुरा । कुक्षिर्वेदिः । गुह्यका यक्षाः । पङ्गोर्गतिविकलस्य । ऊष्मा औष्ण्यम् ।

ततश्चैत्यादौ प्रदोषास्थाने नातिचिरं तस्थाविति संबन्धः । शरा अपि शिली-

तेजस्यहिमभासि, तामरसवनेष्वपि निगूढशिलीमुखालापेषु त्रासादिव संकुचत्सु, विहगगणेष्वपि समुपसंहृतनिजपक्षविक्षेपनिश्चलेषु भियेवाप्रकटीभवत्सु भुवनव्यापिनीं संध्यां प्रतिज्ञामिव मानयति नतशिरसि घटिनाञ्जलिवने जने सकले, स्वपदच्युतिचकितदिक्पालदीयमानाभ्रंलिहलोहप्राकारवलयास्विव बहलतिमिरमालातिरोधीयमानासु दिक्षु प्रदोषास्थाने नातिचिरं तस्थौ । नमन्नृपलोकलोलांशुकपवनकम्पितशिखैर्दीपिकाचक्रवालैरपि प्रणम्यमान इव प्राहिणोल्लोकं प्रतिषिद्धपरिजनप्रवेशश्च शयनगृहं प्राविशत् । उत्तानश्च मुमोचाङ्गानि शयनतले । दीपद्वितीयं च तमभिसर इव लब्धावसरस्तरसा भ्रातृशोको जग्राह । जीवन्तमिव हृदये निमीलितलोचनो ददर्शाग्रजम् । उपर्युपरि भ्रातृजीवितान्वेषिण इव प्रसस्रुः श्वासाः । धवलांशुकपटान्तेनेव चाश्रुजलप्लवेन मुखमाच्छाद्य निःशब्दमतिचिरं रुरोद । चकार च चेतसि कथं नामाकृतेस्तादृश्या युक्तः परिणामोऽयमीदृशः । पृथुशिलासंघातकर्कशकायबन्धात्तातादचलादिव लोहधातुः कठिनतर आसीदार्यः । कथं चास्य मे हतहृदयस्यार्यविरहे सकृदपि युक्तमुच्छ्वसितुम् । इयं सा प्रीतिर्भक्तिरनुवृत्तिर्वा । बालिशोऽपि कः संभावयेदार्यमरणे मज्जीवितम् । तत्तादृशमैक्यमेकपद एव क्वापि गतम् अयत्नेनैव हतविधिना पृथक्कृतोऽस्मि । दग्धरोपान्तरितशुचा सुचिरं रुदितमपि न मुक्तकण्ठं गतघृणेन मया । सर्वथा लूतातन्तुच्छटाच्छिदुरास्तुच्छाः प्रीतयः प्राणिनाम् । लोकयात्रामात्रनिबन्धना बान्धवता यतोऽहमपि नाम पर इवार्थे स्वर्गस्थे स्वस्थ इवासे । किंच दैवहतकेन फलमासादितमीदृशि परस्परप्रीतिबन्धनिर्वृतहृदये सुखभाजि भ्रातृमिथुने विघटिते । तथा चन्द्रमया इव जगदाह्लादिनो लोकान्तरीभूतस्य लग्नचिताग्नय इवार्यस्य त एव दहन्ति गुणाः । इत्येतानि चान्यानि च हृदयेन पर्यदेवत । प्रभातायां च शर्वर्यां प्रातरेव प्रतीहारमादिदेशाशेषगजसाधनाधिकृतं स्कन्दगुप्तं द्रष्टुमिच्छामीति ।

मुखाः सहाया अपि पक्षाः । अभिसराश्चौराः । लूता तन्तुछटा जालकारसूत्रजालम् । लोकयात्रा लोकाचारः । किं फलमासादितं न किंचिदित्यर्थः पर्यदेवयच्छुशोच ।

अथ युगपत्प्रधावितबहुपुरुषपरम्पराहूयमानः, स्वमन्दिरापप्रतिपालितकरेणुश्चरणाभ्यामेव संभ्रान्तः, ससंभ्रमैर्दण्डिभिरुत्सार्यमाणजनपदः, पदे पदे प्रणमतः प्रतिदिशमिभभिषग्वरान्वरवारणानां विभावरीवार्ताः पृच्छन्नुच्छ्रितशिखिपिच्छलाञ्छितवंशलतावनगहनगृहीतदिगायामैर्विन्ध्यवनैरिव वारणबन्धविमर्दोद्योगागतैः, पुरःप्रधावद्भिरनायतमण्डलैराधोरणगणैश्च मरकतहरितघासमुष्टीश्च दर्शयद्भिर्नवग्रहगजपतींश्च प्रार्थयमानैश्च लब्धाभिमतमत्तमातङ्गमुदितमानसैश्च सुदूरमुपसृत्य नमस्यद्भिरात्मीयमातङ्गमदागमांश्च निवेदयद्भिः, डिण्डिमाधिरोहणाय च विज्ञापयद्भिः, प्रमादपतितापराधापहृतद्विरददुःखधृतदीर्घश्मश्रुभिरग्रतो गच्छद्भिः, अभिनवोपसृतैश्च कर्पटिभिर्वारणाग्निसुखप्रत्याशया धावमानैः, गणिकाधिकारिगणैश्चिरलब्धान्तरैरुच्छ्रितकरैः, कर्मण्यकरेणुकासंकथनाकुलैरुल्लसितपल्लवचिह्नाभिरण्यपालपङ्क्तिभिश्च, निष्पादितनवग्रहनागनिवहनिवेदनोद्यताभिरुत्तम्भितनुङ्गतोत्रवनाभिर्महामात्रपेटकैश्च प्रकटितकरिकर्मचर्मपुटैः, अभिनवगजसाधनसंचरणवार्तानिवेदनविसर्जितैश्च नागवनवीथीपालदूतवृन्दैः, प्रतिक्षणप्रत्यवेक्षितकरिकवलकूटैः, कटभङ्गसंग्रहं ग्रामनगरनिगमेषु निवेदयमानैः, कटककदम्बकैः क्रियमाणकोलाहलः, स्वामिप्रसादसंभृतेन महाधिकाराविष्कारेण स्वाभाविकेन चावष्टम्भाभोगेनोदासीनोऽप्यादिशन्निव, असंख्यकरिकर्णशङ्खसंपत्संपादनाय समुद्रानाज्ञापयन्निव, शृङ्गारगैरिकपङ्काङ्गरागसंग्रहाय गिरीन्मुष्णन्निव, दिग्गजाधिकारं ककुभामैरावृतमिवापहरन्हरेर्हरपदभरनमितकैलासगिरिगुरुभिः पादन्यासैर्गुरुभारग्रहणगर्वमुर्व्याः संहरन्निव, गतिवशविलोलस्य चाजानुवलम्बस्य बाहुदण्डद्वयस्य विक्षेपैरालानशिलास्तम्भमालामिवोभयतो निखनन्नीषदुत्तुङ्गलम्बेनाधरबिम्बेनामृतरसस्वादुना नवपल्लवकोमलेन कवलेनेव श्रीकरेणुकां विलोभयन्निज-

---

अथेत्यादौ स्कंदगुप्त एतैरेतैः क्रियमाणकोलाहलो राजकुलं विवेशेति संबन्धः । भिषग्वरान्वेद्योत्तमान् । बन्धो रोधनम् । अनायत्ता हस्तिपार्श्वरक्षिणः । आधोरणा गजारोहाः । डिण्डिमः पटहः । गणिका गजानां प्रतिलोभनार्था हस्तिनी । कर्मण्यकरेणुका करिग्रहकुशला करिणी । तुदन्त्यनेनेति तोत्रं प्रेषणकम् महामात्राः प्रधानहस्त्यारोहाः । तेषां पेटकैः समूहैः । करिणां कर्मार्थं युद्धशि-

नृपवंशदीर्घं नासावंशं दधानः, अतिस्निग्धमधुरधवलविशालतया पीतक्षीरोदेनेव पिबन्नीक्षणयुग्मायामेन दिशामायामं मेरुतटादपि विकटविपुलालिकः, सततमविच्छिन्नच्छत्रच्छायाप्ररूढिवशादिव नितान्तायतनीलकोमलच्छविसुभगेन स्वभावभङ्गुरेण कुन्तलबालवल्लरीवेल्लितविलासिना लुनन्निव, लुप्तालोकानर्ककरान्बर्बरकेणारिपक्षपरिक्षयपरित्यक्तकार्मुककर्मापि सकलदिगन्तश्रूयमाणगुरुगुणध्वनिः, आत्मस्थसमस्तमत्तमातङ्गसाधनोऽप्यस्पृष्टो मदेन भूतिमानपि स्नेहमयः, पार्थिवोऽपि गुणमयः कारिणामिव दानवतामुपरिस्थितः, स्वामितामिव स्पृहणीयां भृत्यतामप्यपरिभूतामुद्वहन्नेकभर्तृभक्तिनिश्चलां कुलाङ्गनामिवानन्यगम्यां प्रभुप्रसादभूमिमारूढः, निष्कारणबान्धवो विदग्धानाम्, अभृतभृत्यो भजताम्, अक्रीतदासो विदुषाम्, स्कन्दगुप्तो विवेश राजकुलम् । दूरादेव चोभयकरकमलावलम्बितं स्पृशन्मौलिना महीतलं नमस्कारमकरोत् ।

उपविष्टं नातिनिकटे तं तदा जगाद देवो हर्षः—'श्रुतो विस्तर एवास्यार्यव्यतिकरस्यास्मत्किर्पितस्य च । अतः शीघ्रं प्रवेश्यन्तां प्रचारनिर्गतानि गजसाधनानि । न क्षाम्यत्यतिस्वल्पमप्यार्यपरिभवपीडापावकः प्रयाणविलम्बम् ।' इत्येवमभिहितश्च प्रणम्य व्यज्ञापयत्—'कृतमवधारयतु स्वामी समादिष्टं किंतु स्वल्पं विज्ञप्यमस्ति भर्तृभक्तेः । तदाकर्णयतु देवः । देवेन हि पुष्पभूतिवंशसंभूतस्याजात्यस्य सहजस्य तेजसो दिक्करिकरप्रलम्बस्य बाहुयुगललस्यासाधारणस्य च सोदरस्नेहस्य सर्वं सदृशमुपक्रान्तम् । काकोदराभिधानाः कृपणाः कृमयोऽपि न मृष्यन्ति विकारं कि-

---

क्षार्थै । चर्मपुटः कर्मकृतो हस्त्याकारः । कटभङ्गः प्रत्यग्रम् । गोधूमादियवसंघास इत्यर्थः । निगमा वणिक्पथाः । कटका हस्तिपटनियुक्तः, अग्रेसरा वेत्रिण इत्यन्ये । गुणाः शौर्याद्याः, मौर्वी च गुणः । मदो गर्वः । भूतिः संपत्, भस्म च पार्थिवो राजा, पृथिव्यारब्धश्च । गुणास्तन्तवोऽपि नहि घटः पटो भवतीति विरोधः । दानं मदः, नितरणं च ।

प्रचारो भक्षणम् । गजसाधनानि करिसैन्यानि अभिषङ्गा अभिभवाः । **प्रतिग्राममिति** । उपक्रान्तं निदर्शयितुमाह—**यथेति** । अत्र कथा–नागसेननामा पद्मावत्यां राजा मन्त्रिणमर्धराज्यहरमपाकर्तुं शारिकासमक्षं मन्त्रमकरोत् । स चापि मन्त्री शारिकामुखाद्विज्ञाय विस्रम्भपूर्वकं तं दण्डेनावधीदिति । श्रावस्त्यां च श्रुतवर्मा पूर्ववच्छुकश्रावितमन्त्रो राज्याच्युच्याव । अनेन च गूढमन्त्रेण यत्ना-

मुत भवादृशास्तेजसां राशयः । केवलं देवराज्यवर्धनोदन्तेन कियदपि दृष्टमेव देवेन दुर्जनदौरात्म्यम् । ईदृशाः खलु लोकस्वभावाः प्रतिग्रामं प्रतिनगरं प्रतिदेशं प्रतिद्वीपं प्रतिदिशं च भिन्ना वेशाश्चाकाराश्चाहाराश्च व्यवहाराश्च जनपदानाम् । तदियमात्मदेशाचारोचिता स्वभावसरलहृदयजा त्यज्यतां सर्वविश्वासिता । प्रमाददोषाभिषङ्गेषु श्रुतबहुवार्त एव प्रतिदिनं देवः । यथा नागकुलजन्मनः सारिकाश्रावितमन्त्रस्यासीन्नाशो नागसेनस्य पद्मावत्याम् । शुकश्रुतरहस्यस्य च श्रीरशीर्यत श्रुतवर्मणः श्रावस्त्याम् । स्वप्नायमानस्य च मन्त्रभेदोऽभून्मृत्यवे मृत्तिकावत्यां सुवर्णचूडस्य । चूडामणिलग्नलेखप्रतिबिम्बवाचिताक्षरा च चारुचामीकरचामरग्राहिणी यमतां ययौ यवनेश्वरस्य । लोभबहुलं च बहुलनिशि निधानमुत्खनन्तमुत्खातखड्गप्रमाथिनी ममन्थ माथुरं बृहद्रथं विदूरथबरूथिनी । नागवनविहारशीलं च मायामातङ्गाङ्गान्निर्गता महासेनसैनिका वत्सपतिं न्ययंसिषुः । अतिदयितलास्यस्य च शैलूषमध्यमध्यास्य मूर्धानमसिलतया मृणालमिवालुनादग्निमित्रात्मजस्य सुमित्रस्य मित्रदेवः । प्रियतन्त्रीवाद्यस्यालाबूवीणाभ्यन्तरशुषिरनिहितनिशिततरवारयो गान्धर्वच्छात्रच्छद्मानः चिच्छिदुरङ्गमकेश्वरस्य शरभस्य शिरो रिपुपुरुषाः । प्रज्ञादुर्बलं च

द्धाव्यमित्युक्तम् । मृत्तिकावत्यां सुवर्णचूडो नाम राजा कंचिद्विस्रम्भपूर्वकं जिघृक्षन्मन्त्रितवांस्तदेव तस्मै विललास । ततस्तत्पूर्वं तत्प्रयुक्तेन विश्वासिना शिरोरक्षकेन स्वस्वामिप्रयुक्तेन व्यापादित इति । अनेन च कुलस्वभावाद्यपरीक्ष्य न कार्यो भृत्य इत्युक्तम् । यवनेश्वरः केनचिच्छत्रुणासाद्य व्यापादितुमिष्टः । स्वसुहृदा शत्रुदीहं लेखेन बोधितः लेखपृष्ठे च तेन लिखितम् स्वयं वाचयितव्यो लेख इति । ततो यवनेश्वरस्य स्वयं वाचयतश्चूडामणिप्रतिबिम्बितान्यक्षराणि वाचयित्वा तत्प्रहीता चामरग्राहिणी प्रभवे निवेद्य तदाज्ञया तं जघानेति । अनेन सूक्ष्मोपि रहस्यभेदहेतू रक्षणीय इत्युक्तम् । विदूरथप्रयुक्तेन नरेन्द्रवृन्दप्रतारितो बृहद्रथो नाम राजा लोभवशात्खन्यवादे कृष्णनिशिप्रवृत्तस्ततेनया प्रहत इति । अतः प्रवर्तितव्यमित्युक्तम् । महासेनो नामोज्जयिनीपतिः स्वदुहितरं वासवदत्ताख्यामुदयनाय दित्सुः कपटजं नागं वीथ्यां प्रसज्य छद्मप्रहितैःशरैर्नाम गुणान्प्रख्याप्योदयनं लोभितवान् । सोप्यविचार्यैव गजग्रहग्राहिकया कतिपयाप्तपरिवारो घोषवतीं वीणामादाय तत्र गतः कपटकुञ्जरान्तर्गतैर्महासेनसैनकैः संयत इति । अतो नाल्पपरिवारैः संवीक्ष्य च विस्रब्धैर्भाव्यमित्युक्तम् । सुमित्रो राजा मित्रव्यसनी स्त्रीजनपरिवार इव नटजने विस्रब्धो मित्रदेवेन नटत्वमाश्रित्य हतः ।

बलदर्शनव्यपदेशदर्शिताशेषसैन्यः सेनानीरनार्यो मौर्यं बृहद्रथं पिपेष पुष्पमित्रः स्वामिनम् । आश्चर्यकुतूहली च चण्डीपतिर्दण्डोपनतयवननिर्मितेन नभस्तलयायिना यन्त्रयानेनानीयत क्वापि । काकवर्णः शैशुनारिश्च नगरोपकण्ठे कण्ठे निचकृते निस्त्रिंशेन । अतिस्त्रीसङ्गरतमनङ्गपरवशं शुङ्गममात्यो वसुदेवो देवभूतिदासीदुहित्रा देवीव्यञ्जनया वीतजीवितमकारयत् । असुरविवरव्यसनिनं, चापजह्नुरपरिमितरमणीमणिनूपुरझणझणाह्लादरम्यया मागधं गोधनगिरिसुरङ्गया स्वविषयं मेकलाधिपमन्त्रिणः । महाकालमहे च महामांसविक्रयवादवातूलं वेतालस्तालजङ्घो जघान जघन्यजं प्रद्योतस्य पौणकिं कुमारं कुमारसेनम् । रसायनरसाभिनिवेशिनश्च वैद्यव्यञ्जनाः सुबहुपुरुषान्तरप्रकाशितौषधगुणा गणपतेर्विदेहराजसुतस्य राजयक्ष्माणमजनयन् । स्त्रीविश्वासिनश्च महादेवीगृहगूढभित्तिभागभ्राता भद्रसेनस्याभवन्मृत्यवे कालिङ्गस्य वीरसेनः । मातृशयनीयतूलिकातलनिषण्णश्च तनयोऽन्यं तनयमभिषेक्तुकामस्य द्रघ्रस्य करूषाधिपतेरभवन्मृत्यवे । उत्सारकरुचिं च रहसि ससचिवमेव दूरीचकार चकोरनाथं शूद्रकदूतश्चन्द्रकेतुं जीवितात् । मृगयासक्तस्य च मग्नतो गण्डकानुदण्डनङ्वलनलवननिलीनाश्च चम्पाधिपचमूचरभटाश्चामुण्डीपतेराचेमुः प्राणान्पुष्करस्य । बन्दिरागपरं च परप्रयुक्ता जयशब्दमुखरमुखा मङ्का मौखरिं मूर्खं क्षत्रवर्माणमुदखनन् । अरिपुरे च परकलत्रकामुकं

स च योगचूर्णावचूर्णितस्तिरोहितो बभूवेति । अतो व्यसनिभिः प्रकृतलोकविश्वसिभिश्च न भाव्यमित्युक्तम् । शरभोऽतिशयितान्वाद्यवतः प्रवेशमदादिति । गूढायुधै रिपुपुरुषैर्हत इति । अतो मनागपि व्यसनं वर्जनीयमित्युक्तम् । अकार्यमत्र परदारागमनादि । तरवारिरेकधारः खड्गः । प्रज्ञेत्यादि मृष्टा कथा । अनेन च भृत्यबलदर्शनमसंनद्धेन कार्यमित्युक्तम् । मार्यमिति गोत्रनाम । काकवर्णो यवनान्विजित्य तैश्च स्वपुरुषानुपायनीकृत्य यन्त्रयानैस्तद्वत्तै परदारादीन्गच्छन्यवनैरात्मदेशं प्रापय्य निहत इति । अतः शत्रुप्राभृतेषु भृत्येषु न विश्वसनीयमित्युक्तम् । देवीव्यञ्जनया महिषीव्याजया । मेकलाधिपमन्त्रिभिर्वातिकच्छद्मभिरहिविवरं साधितम् । तपसास्माभिरित्युत्क्वा मागधो गुहाद्वारप्रतिद्वारैर्बद्धोऽभूत् । गोधनगिरिः सूर्याख्यः पर्वतः स्वरुं गाविवरम् । मेकलो विन्ध्याद्रिः । मह उत्सवः । वातूलं व्यसनोन्मत्तप्रायम् । जघन्यजं कनीयांसम् । पुणको गोत्रविशेषः । तत्र भवः पौणकिः । वैद्यकं व्यञ्जयन्ति प्रकाशयन्तीति वैद्यव्यञ्जनाः । राजय-

कामिनीवेशगुप्तश्च चन्द्रगुप्तः शकपतिमशातयदिति । प्रमत्तानां प्रमदाकृताः प्रमादाः श्रुतिविषयमागता एव देवस्य । यथा मधुमोदितं मधुरकसंलिप्तैर्लोजैः सुप्रभा पुत्रराज्यार्थं महासेनं काशिराजानं जघान । व्याजजनितकंदर्पदर्पा च दर्पणेन क्षुरधारापर्यन्तेनायोध्याधिपतिं परंतपं रत्नवती जारूथम्, विषचूर्णचुम्बितमकरन्देन च कर्णेन्दीवरेण देवकी देव नुरक्ता देवसेनं सौहृयम्, योगपरागविरसवर्षिणा च मणिनूपुरेण वल्लभा सपत्नीरुषा वैरन्त्यं रन्तिदेवम्, वेणीनिगूढेन च शस्त्रेण विन्दुमती वृष्णिं विदूरथम्, रसदिग्धमध्येन च मेखलामणिना हंसवती सौवीरं वीरसेनम्, अदृश्यागदलिप्तवदना च विषवारुणीगण्डूषपायनेन पौरवी पौरवेश्वरं सोमकम् ।' इत्युक्त्वा विरराम स्वाम्यादेशसंपादनाय च निर्जगाम ।

देवोऽपि हर्षः सकलराज्यस्थितीश्चकार । ततश्च तथा कृतप्रतिज्ञे प्रयाणं विजयाय दिशां समादिशति देवे हर्षे गतायुषां प्रतिसामन्तानामुदवसितेषु बहुरूपाण्युपलिङ्गानि वितेनिरे । तथा ह्यविप्रकृष्टाः कालदूतदृष्टय इवेतस्ततश्चेरुश्चटुलाः कृष्णशारश्येनाश्चयः । प्रचलितलक्ष्मीनूपुरप्रणादप्रतिमा मधुसरघासंघातझंकारा जह्वादिरेऽजिरे । विवृतविकृतवदनविवरविसृतवह्निविसरा वासरेऽपि विरसं विरेसुश्चिरमशिवार्थमशिवाः शिवाः । शवपिशितप्ररूढप्रणयेव कपिपोतकपोलकपिलपक्षतयः काननकपोताः पेतुः । आमन्त्रयमाणा इव दधुरकालकुसुमानि सममुपवनतरवः । तर-

---

क्ष्माणं क्षयरोगम् । दध्नाख्यस्य करूषाधिपतेः । पितुस्तनयो मृत्यवेऽभवदिति । प्राक्तनक्रियया संगतिः । गण्डकाः खड्गाद्याः प्राणिनः । चामुण्डीति नगरीनाम । आचेमुरभक्षयन् । शकानामाचार्यः शकाधिपतिः । चन्द्रगुप्तभ्रातृजायां ध्रुवदेवी प्रार्थयमानश्चन्द्रगुप्तेन ध्रुवदेवीवेषधारिणा स्त्रीवेषजनपरिवृतेन रहसि व्यापादित इति । मधुरकं विषम् । परंतपं प्रतापवन्तम् । जारूथमिति जघानेति । प्राक्तन्येव क्रियोत्तरत्र च । चूर्णो विषक्षोदः । मकरन्दः पुष्परसः । देवरः कनीयान्भ्राता भर्तुः । योगपरागोऽभिचारचूर्णम् । वैरन्ती नाम नगरी । रसदिग्धं विषोपलिप्तम् । अगदो विषहरद्रव्यसमूहः । वारुणी सुरा ।

उदवसितेषु गुहेषु । उपलिङ्गान्यनिमित्तानि । सरघा मधुमक्षिकाः । काननकपोता गृध्राः । व्यघटन्त आसन् । स्तम्बकरिं बद्धस्तम्बम्, पक्वं वा । हरयो हयाः । अकाणीद्ध्वान । कौलेयकाः श्वानः । आट बभ्राम । कोटवी नम्रा

लकरतलप्रहारप्रहतपयोधरा रुरुदुः प्रसभं सभाशालभञ्जिकाः । ददृशुरासन्नकचग्रहभयोद्भ्रान्तोत्तमाङ्गमिवात्मानं कबन्धमादर्शोदरेषु योधाः । चूडामणिषु चक्रशङ्खकमललक्ष्माणः प्रादुरभवन्पादन्यासा राजमहिषीणाम् । चेटीचामराण्यकस्मादधावन्त पाणिपल्लवात् । प्रणयकलहेऽपि दत्तपृष्ठाश्चिरमभवन्भटाः पराङ्मुखा मानिनीनाम्, करिकपोलेषु व्यघटन्त मधुलिहां मधुमदिरापानगोष्ठ्यः । समाघ्रातयममहिषगन्धा इव ताम्यन्तः स्तम्बकरिमपि हरयो हरितं नवयवसं न चेरुः । चलवलयावलीवाचालबालिकातालिकातोद्यलालिता अपि न ननृतुर्मन्दा मन्दिरमयूराः । निशि निशि रजनिकरहरिणनिहितनयन इवोन्मुखस्तारमुपतोरणमकारणमकाणीत्कौलेयकगणः । गणयन्तीव गतायुषस्तर्जनतरलया तर्जन्या दिवसमाट वाटकेषु कोटवी । कुट्टिमेषु कुटिलहरिणखुरवेणीतरङ्गिण्यः शष्पराजयोऽजायन्त । जनितवेणीबन्धानि निरञ्जनरोचनारोचींषि चषकमधुनि मुखकमलप्रतिबिम्बान्यदृश्यन्त भटीनाम् । समासन्नात्मापहारचकिता इव चकम्पिरे भूमयः । वध्यालंकाररक्तचन्दनरसच्छटा इवालक्ष्यन्त शूराणां पतिताः शरीरेषु विकसितबन्धूककुसुमशोणितशोचिषः शोणितवृष्टयः । पर्यग्नीकुर्वाणा इव विनश्वरीं श्रियमविरलस्फुरत्स्फुलिङ्गाङ्गारोद्गारदग्धतारागणा गणशः पतन्तः प्रज्वलन्तो न व्यरंसिषुरुल्कादण्डाः । प्रथममेव प्रतिहारीवापहरन्ती प्रतिभवनं चामरातपत्रव्यजनानि परुषा बभ्राम वात्येति ।

इति श्रीबाणभट्टकृतौ हर्षचरिते राजप्रतिज्ञावर्णनं नाम षष्ठ उच्छ्वासः ।

स्त्री । शष्पं बालतृणम् । बन्धूकं बन्धुजीवः । अपरिगताग्निं परिगताग्निं कुर्वाणाः । अग्नौ समन्ताल्क्षिपन्तः । व्यरंसिषुर्निवृतिरे ॥

इति श्रीशंकरकविरचिते हर्षचरितसंकेते षष्ठ उच्छ्वासः ।

सप्तम उच्छ्वासः ।

अङ्गनवेदी वसुधा कुल्या जलधिः स्थली च पातालम् ।
वल्मीकश्च सुमेरुः कृतप्रतिज्ञस्य वीरस्य ॥ १ ॥
धृतधनुषि बाहुशालिनि शैला न नमन्ति यत्तदाश्चर्यम् ।
रिपुसंज्ञकेषु गणना कैव वराकेषु काकेषु ॥ २ ॥

अथ व्यतीतेषु च केषुचिद्दिवसेषु मौहूर्तिकमण्डलेन शतशः सुगणिते सुप्रशस्तेऽहनि दत्ते चतसृणामपि दिशां विजययोग्ये दण्डयात्रालग्ने सलिलमोक्षविशारदैः शारदैरिवाम्भोधरैः कालधौतैः शातकौम्भैश्च कुम्भैः स्नात्वा विरचय्य परमया भक्त्या भगवतो नीललोहितस्यार्चामुदर्चिषं हुत्वा प्रदक्षिणावर्तशिखाकलापमाशुशुक्षणिं दत्त्वा द्विजेभ्यो रत्नवन्ति राजतानि जातरूपमयानि च सहस्रशस्तिलपात्राणि कनकपत्रलतालंकृतशफशृङ्गशिखरा गाश्चार्बुदशः समुपविश्य विततव्याघ्रचर्मणि भद्रासने विलिप्य प्रथमविलिप्तायुधो निजयशोधवलेनाचरणतश्चन्दनेन शरीरं परिधाय राजहंसमिथुनलक्ष्मणी सदृशे दुकूले परमेश्वरचिह्नभूतां शशिकलामिव कल्पयित्वा सितकुसुममुण्डमालिकां शिरसि नीत्वा कर्णाभरणमरकतमयूखमिव कर्णगोचरतां गोरोचनाच्छुरितमभिनवं दूर्वापल्लवं विन्यस्य सह शासनवलयेन गमनमङ्गलप्रतिसरं प्रकोष्ठे परिपूजितप्रहृष्टपुरोहितकरप्रकीर्यमाणशान्तिसलिलसीकरनिकराभ्युक्षितशिराः संप्रेष्य महार्हाणि वाहनानि बहलरत्नालोकलिप्तककुम्भि च भूषणानि भूभुजां संविभज्य क्लिष्टकार्पटिककुलपुत्रलो-

---

अङ्गनेत्यादिनोद्योगितां सूचयति । शूरा हि स्वशौर्यमात्रेणावर्जितत्रिभुवनाधिपत्या नतु तेषां सामग्र्यन्तरप्रयोजनम् । तथा चाह—कृतप्रयत्नस्य वीरस्य सर्वाभूरङ्गनवेदीत्यनायासेनाक्रमणादनेनेदमति प्रतिक्षिप्तम् । कदाचित्कश्चिद्भूयादभिमानान्मोहाद्वेत्थं हर्षेण प्रतिज्ञातमन्यथा । गिरिगुहादौ पलायितं हर्षः कथं परिभवेत् । कथं च बहुपालितामुर्वीमेको जयेदिति । तत्र । यतोऽङ्गनवेदीत्यादि ।

नन्वेवमपि तत्तुल्यो वीरो न भवेदित्याह—धृतेत्यादि ।

अथेत्यादौ भवनान्निर्जगामेति संबन्धः।मौहूर्तिका गणकाः। दण्डश्चतुरङ्गबलम्। तस्य यात्रा गमनम्। तत्र लग्नो मेषादिस्तस्मिन्। विशारदैः प्रवीणैः, शुक्लैश्च । कालधौतैः कालवशेन धौतैश्च । शातकौम्भैः सौवर्णैः । नीललोहितोऽसितरक्तः । आशुशुक्षणिमग्निम् । रजतं रौप्यम् । जातरूपं सुवर्णम् । पत्रलता पत्रभङ्गः । शफाः

कमोचितैः प्रसाददानैश्च विमुच्य बन्धनानि नियुज्य तत्कालस्मरणस्फुरणेन कथितात्मानमिव चाष्टादशद्वीपजेतव्याधिकारे दक्षिणं भुजस्तम्भमहमहमिकया सेवकैरिव सुनिमित्तैरपि समग्रैरग्रतो भवद्भिः प्रमुदितप्रजाजन्यमानजयशब्दकोलाहलो हिरण्यगर्भ इव ब्रह्माण्डात्कृतयुगकरणाय भवनान्निर्जगाम ।

नातिदूरे च नगरादुपसरस्वति निर्मिते महति तृणमये, समुत्तम्भिततुङ्गतोरणे, वेदीविनिहितपल्लवललामहेमकलशे, बद्धवनमालादाम्नि, धवलध्वजमालिनि, भ्रमच्छुक्लवाससि पठद्विजन्मनि, मन्दिरे प्रस्थानमकरोत् । तत्रस्थस्य चास्य ग्रामाक्षपटलिकः सकलकरणिपरिकरः 'करोतु देवो दिवसग्रहणमद्यैवावन्ध्यशासनः शासनानाम्' इत्यभिधाय वृषाङ्कामभिनवघटितां हाटकमयीं मुद्रामुपनिन्ये । जग्राह च तां राजा । समुपस्थापिते च प्रथमत एव मृत्पिण्डे परिभ्रश्य करकमलादधोमुखी महीतले पपात मुद्रा । मन्दाश्यानपङ्कपटले मृदुमृदि सरस्वतीतीरे स्फुटं व्यराजन्त राजयो वर्णानाम् । अमङ्गलाशङ्किनि च विषीदति परिजने नरपतिरकरोन्मनस्येतत्—'तत्त्वदर्शिन्यो हि भवन्त्यविदग्धानां धियः । तथाहि । एकशासनमुद्राङ्का भूर्भवतो भविष्यतीति निवेदितमपि निमित्तेनान्यथा गृह्णन्ति ग्राम्याः ।' इत्यभिनन्द्य मनसा महानिमित्तं तत्सीरसहस्रसंमितसीम्नां ग्रामाणां शतमदाद्विजेभ्यः । निनाय च तत्र तं दिवसम् । प्रतिपन्नायां शर्वर्यां संमानितसर्वराजलोकः सुष्वाप ।

अथ गलति तृतीये यामे सुप्तसमस्तसत्त्वनिःशब्दे दिक्कुञ्जरजृम्भमाणगम्भीरध्वनिरताड्यत प्रयाणपटहः । अग्रतः स्थित्वा च मुहूर्तमिव पुनः प्रयाणक्रोशसंख्यापकाः स्पष्टमष्टावदीयन्त प्रहाराः पटहे पटीयांसः ।

खुराः । अर्बुदं दशकोटयः । नृपासनं भद्रासनम् । सिंहासनं तु तद्धेममिति । परमेश्वरो राजा, हरश्च । शासनवलयेन मुद्राकटकेन । प्रतिसरं कङ्कणम् ।

ललामं चिह्नम् । 'ललामं पुच्छपुण्ड्राश्वभूषा प्राधान्यकेतुषु' । वनमाला पुष्पपत्रप्रतियोजिता स्रक् । अक्षाणां भूतानाम् । पटले समूहे । नियुक्तोऽक्षपटलिकः । ग्रामाणामक्षपटलिकः । करणिलेख्यम् । कायस्थ इत्यन्ये । मुद्रा बालिका । मन्दाश्यानमीषच्छुष्कम् । एकशासनमुद्रैवाङ्के यस्याः सा । सीरं हलम् । संमितं परिच्छिन्नम् ।

अष्टक्रोशा अद्य गन्तव्यमिति प्रायेण क्रोशसंख्यापकाः ।

ततो रटत्पटहे, नन्दन्नान्दीके, गुञ्जत्कुञ्जे, कूजत्काहले, शब्दायमानशङ्खे, क्रमोपचीयमानकटककलकले, परिजनोत्थापनव्याप्ततव्यवहारिणि, द्रुतद्रुघनघातघट्ट्यमानकोणिकाकीलकोलाहलकलितककुभि, बलाधिकृतबध्यमानपाटीपतिपेटके, जनज्वलितोल्कासहस्रालोकलुप्यमानत्रियामातमसि, यामचेटीचरणचलनोत्थाप्यमानकामिमिथुने, कटुककटुकनिर्देशनश्यन्निद्रोन्मिषन्निषादिनि, प्रबुद्धहास्तिकशून्यीक्रियमाणशय्यागृहे, सुप्तोत्थिताश्वीयविधूयमानसटे, रटत्कटकमुखरखनित्रखन्यमानक्षौणीपाशे, समुत्कील्यमानकीलशिञ्जानहिञ्जीरे, उपनीयमाननिगडतालकलरवोत्तालतुरङ्गतरङ्ग्यमाणखुरपुटे, लेशिकमुच्यमानमदस्यन्दिदन्तिसंदानशृङ्खलाखनखननिनादनिर्भरभरितदशदिशि, घासपूलकप्रहारप्रमृष्टपांसुलकरिपृष्ठप्रसार्यमाणप्रस्फोटितचर्मणि, गृहचिन्तकचेटकसंवेष्ट्यमानपटकुटीकाण्डपटमण्डपपरिवस्त्रावितानके, कीलकलापापूर्यमाणचिपिटचर्मपुटे, संभाण्डायमानभाण्डागारिणि, भाण्डागारवहनवाह्यमानबहुनालीवाहिके, निषादिनिश्चलानेकानेकपारोप्यमाणकोशकलसपीडापीडसंकटायमानसामन्तौकसि, दूरगतदक्षदासेरकक्षिप्रप्रक्षिप्यमाणोपकरणसंभारभ्रियमाणदुष्ट्रदन्तिनि, तिर्यगानमज्जाघनिकरकृच्छ्राकृष्टलम्बमानपरतन्त्रतुन्दिलचुन्दीजनजनितजनहासे, पीड्यमानशारशारिवरत्नागुणग्राहितगात्रविहारबृंहद्बृहद्दुन्मदकरिणि, करिघटाघटमानघण्टाटांकारक्रियमाणकर्णज्वरे, पृष्ठप्रतिष्ठाप्यमान-

---

तत इत्यादावेवंविधे प्रयाणसमये राजभिरापुपूरे राजद्वारमिति संबन्धः। नान्दी मङ्गलपटहः। गुजासंज्ञः शङ्खभेदो यत्पृष्ठे जतु परिकलितं भवति।'सन्ना' इति यस्य प्रसिद्धिः। शङ्खश्च मुण्डशङ्ख इति प्रसिद्धः। द्रुघनोऽयस्ताडनभाण्डम्। कोणिकाः पटहकुट्यादिकेषु याः कालिकाः। पाटी बहुपरिवारपुरुषगृहीतो निवासभूभागः, कुलपुत्रकसमूह इत्यन्ये। पेटकं तत्समूहः 'पाठीपति' इति पाठे 'पाठीपतयः। प्रतिनियतस्वस्थानपरिरक्षिणः। उल्का दीपिका। यामचेटी प्रहरजागरणनियुक्ता। तत्क्षणं चरणचरणं पादेषु स्पर्शः। कन्दुकानां हस्तिपकयोक्त्राणाम्। यः कन्दुको रुक्षः। निर्देश आज्ञा निषादिनां हस्त्यारोहाणाम्। हास्तिकं हस्तिसमूहः। अश्वीयमश्ववृन्दम्। क्षोणीपाशो भूम्या निबन्धनम्। समुत्कील्यमानान्युत्खन्यमानानि। हिञ्जीरं लौही शृङ्खला। निगडार्थं तालकं तालपत्रं निगडसालकम्। लौह एवाश्वबन्धनविशेष इत्यन्ये। तरङ्ग्यमाणाः कुटिलीक्रियमाणाः। लेशिका घासिकाः। संदानशृङ्खला बन्धनादकः। प्रस्फोटितं विपूरितम्। प्रमृष्टं शोधितम्। पटकुट्या-

कण्ठालककदर्थितकूजत्करभे, अभिजातराजपुत्रप्रेष्यमाणकुप्रयुक्ता-
कुलकुलीनकुलपुत्रकलत्रवाहने, गमनवेलाविप्रलब्धवारणाधोरणा-
न्विष्यमाणनवसेवके, प्रसादवित्तपत्तिनीयमाननरपतिवल्लभवारवा-
जिनि, चारुचारभटसैन्यन्यस्यमाननासीरमण्डलाडम्बरस्थूलस्था-
सके, स्थानपालपर्याणलम्बमानलवणकलायीकिङ्किणीनालीसनाथ-
संकलिततलसारके, कुण्डलीकृतावरक्षिणी जालजटिलवल्लभपालाश्व-
घटानिवेश्यमानशाखामृगे, परिवर्धकाकृष्यमाणार्धजग्धप्राभातिक-
योग्याशनप्रारोहके, व्याक्रोशीजृम्भमाणघासिकघोषे, गमनसंभ्रम-
भ्रमदुत्तुण्डतरुणतुरङ्गमतन्यमानानेकमन्दुराविमर्दे, सज्जीकृतकरे-
णुकारोहाह्वानसत्वरसुन्दरीदीयमानमुखालेपने, चलितमातङ्गतुरङ्ग-
प्रधावितप्राकृतप्रातिवेश्यकलोकलुण्ठ्यमाननिर्घाससस्यसंचये, संच-
रच्चेलचक्राक्रान्तचक्रीवति, चक्रचीत्कारिगत्रीगणगृह्यमाणप्रहतवर्त्म-
नि, अकाण्डदीयमानभाण्डभरितानडुहि, निकटघासलाभलुभ्यल्ल-
म्बमानप्रथमप्रसार्यमाणसारसौरभेये, प्रमुखप्रवर्त्यमानमहासामन्त-
महानसे, पुरःप्रधावद्वृजवाहिनि, प्रियशतोपलभ्यमानासंकटकुटीर-
कान्तरालनिःसरणे, करिचरणदलितमठिकोत्थितलोकलोष्टहन्यमा-

दयः स्कन्धावासरणिकाभेदाः । तथा च पटैः कुटी सूक्ष्मगृहम् । काण्डपटकं काण्डैः पटैश्च गृहम् । परिवस्त्रा तिरस्करिणी । वितानको रक्तकः । चिपिटो ह्रस्वः । चर्मपुटश्चर्मप्रसेवकः । संभाण्डायमानो भाण्डानि समाचिन्वन् । 'डात्स-माचयने' इति णिच् संवाह्यमाणाः । प्राप्यमाणाः । नाली वाहिकः । करिणां वा-सप्रहणवियुक्तो हस्तिपको मेठाख्यः । चुन्दी कुट्टनी । शारिर्मञ्जरी । हस्तिपर्याण-मित्यर्थः । तत्स्थैः पीड्यमानदाममिर्ग्राहितेन गात्रविहारेण देहकम्पेन बृंहन्तः श-ब्दायमानाः करिणो यत्र तस्मिन् । प्रसादेन वित्ताः पत्तयः । वारोऽवसरः । 'निवहावसरौ वारः' इत्यमरसिंहः । तत्र वाजिनो ये सेवकानां प्रत्यवसरं विसृ-ज्यन्ते । 'वर' इति पाठः । चारुचारभटसैन्येन त्रस्यमाना आत्मान एव क्रिय-माणाः नासीरेण कूर्परेण । मण्डलाडम्बरार्थः स्थूलाः स्थासकाश्चन्द्रका यत्र । अन्ये नासीरमग्रेसरमाहुः स्थानपालानां पर्याणेषु लम्बमाना लवणकलायी कि-ङ्किणी । नालीसनाथा संकलिता तलसारिका यत्र । स्थानपाला अश्वपालाः । अ-श्वभाण्डागारिका इत्यन्ये । लवणकालायी मृगाकृतिरश्वानां दारुमयी क्रियते । किङ्किण्यः सूक्ष्मघण्टाः । नाली प्रधानार्थं वैणवी नाडिरुच्यते । तलसारिकोऽश्वमु-खपट्टिकोर्णादिसूत्रमयी । उरःपट्टिकेत्यन्ये । कुण्डलीकृतैरवरक्षणीजालैर्जटिला वल्लभपाला यासु ताश्चाश्वघटासु निवेश्यमानाः शाखामृगा यासु । अवरक्षण्यश्वब-न्धनरज्जुः । वल्लभपालोऽश्वपालः । अन्ये तु यो बलवान् । महाकारो हयोप-

नमेण्ठक्रियमाणासन्नसाक्षिणि, संघट्टविघट्टमानव्याघ्रपल्लीपलायमानक्षुद्रकुटुम्बके, कलकलोपद्रवद्रवद्रविणबलीवर्दविद्राणवणिजि, पुरःसरदीपिकालोकविरलायमानलोकोत्पीडप्रस्थितान्तःपुरकरिणीकदम्बके, हयारोहाहूयमानलम्बितशुनि, सरभसचरणनिपतननिश्चलगमनसुखायमानखक्खटस्तूयमानतुङ्गतुङ्गणगुणे, स्रस्तवेसरविसंवादिसीदद्दाक्षिणात्यसादिनि, रजोजग्धजगति, प्रयाणसमये, प्रतिदिशमागच्छद्भिर्गजवधूसमारूढैराधोरणैरूर्ध्वध्रियमाणहेमपत्रभङ्गशारशाङ्गैः, अन्तरासनासीनान्तरङ्गगृहीतासिभिः, ताम्बूलिकविधूयमानचामरपल्लवैः, पश्चिमासनिकापितभस्त्राभरणभिन्दिपालपूलिकैः, पत्रलताकुटिलकलधौतनलकपल्लवितपर्याणैः, पर्याणपक्षकपरिक्षेपपट्टिकाबन्धनिश्चलपट्टोपधानस्थिरावधानैः, प्रचलपादफलिकास्फालनस्फायमानपदबन्धमणिशिलाशब्दैः, उच्चित्रनेत्रसुकुमारस्वस्थगगनस्थगितजङ्घाकाण्डैश्च कार्दमिकपटकल्माषितपिशङ्गपिङ्गैः, अलिनीलमसृणसतुलासमुत्पादितसितसमायोगपरभागैश्चावदातदेहविराजमानराजावर्तमेचकैः, कञ्चुकैश्चोपचितचीनचोलकैश्च तारमुक्तास्तबकितस्तवरकवारबाणैश्च नानाकषायकर्बुरकूर्पास-

---

करणम्। यवसतण्डुलादि वहति स वल्लभपालोऽश्वपाल इत्याहुः। शाखामृगो वानरः। रक्षार्थमश्वानां परिवर्धकोऽश्वपालः। प्रौढिको योग्याशनार्थं प्रसेवको यो बुक्कण इति प्रसिद्धः। व्याक्रोशी परस्पराह्वानम्। उत्तुण्डा उत्प्रोथाः। मुखालेपनं सिन्दूरादिना करेणुकार्थमेव प्रातिवेशिकलोकाः प्रत्यासन्ननिवासा जनाः। निर्धौतो भुक्तशेषो घासः। चेलं वस्त्रम्, वालको वा चेलः। चक्रीवान्गर्दभः, उष्ट्रो वा। गन्त्री शकटिका गृह्यमाणमधिष्ठीयमानम्। प्रहतं क्षुण्णम्। सर्वसेवितमित्यर्थः। लम्बमानो गर्दभदासः, वणिजां कर्मकरो वा। सारसौरभेयी बलवाननड्वान्। प्रमुखेऽग्रे। महासनं सूपकारशाला। कुटीरं मठिका, खल्पगृहम्। मेठो जागरिकः। व्याघ्रपल्ली तृणकुटीभेदः। क्षुद्रमल्पम्। कुटुम्बकं परिवारः। विद्राणाः सशोकाः। लम्बिताः पश्चात्खचिताः। खक्खटा वृद्धाः। तुङ्गा उच्चाः, तद्देशजो वा अश्वस्तं गतः। विसंवादो परिशीलनम्। दक्षिणापथे वेसरा न सन्तीत्यदृष्टदेशाः। सादिनोऽश्वारोहाः। वस्त्राभरणं तूणभेदः। भिन्दिपालः शरभेदः। तोमर इत्यन्ये। पक्षकः प्रान्तः, पार्श्वं वा। परिक्षेपो वेष्टनम्। पादफलिका उभयपार्श्वयोः पर्याणे या क्रियते। आगुल्फं पादत्राणमित्यन्ये आस्फालनं चालनम् स्फायमानो वर्धमानः। पादबन्धः पादकटकः। नेत्रं पटविशेषः। खस्थानं खस्थानेति यस्याः प्रसिद्धिः। कार्दमिकं कर्दमेन रक्तम्। कल्माषिताः शबलिताः। पिशङ्गा लोहिताः। पिङ्गा जङ्घिका। अन्ये जङ्घालेत्याहुः। सतुला अर्धजङ्घिका इत्यन्ये।

कैश्च शुकपिच्छच्छायाच्छादनकैश्च व्यायामोल्लुप्तमार्श्वप्रदेशप्रविष्ट-चारुशस्त्रैश्च गतिवशवेल्लितहारलतागललोलकुण्डलोन्मोचनप्रधावि-तपरिजनैः, चामीकरपत्राङ्कुरकर्णपूरकविघट्टमानवाचालवालपाशै-श्चोष्णीषपट्टावष्टब्धकर्णोत्पलनालैश्च कुङ्कुमरागकोमलोत्तरीयान्तरि-तोत्तमाङ्गैश्च चूडामणिखण्डखचितक्षौमचोलैश्च मायूरपत्रायमाणशे-खरषट्पदपटलैश्च मार्गागतशारिकशारिवाह्वेगदण्डैः, पुनश्चञ्चा-मरकिर्मीरकार्दरङ्गचर्ममण्डलमण्डनोड्डीयमानचटुलडामरचारभट-भरितभुवनान्तरैः, आस्कन्दत्काम्बोजवाजिशतशिञ्जानजातरूपा-यानरवमुखरितदिङ्मुखैश्च निर्दयप्रहतलम्बापटहशतपटुरवबधिरी-कृतश्रवणविवरैः, उद्घोष्यमाणनामभिः, उन्मुखपादातप्रतिपाल्य-मानाज्ञापातै राजभिरापुपूरे राजद्वारम् ।

उदिते च भगवति दिनकृति राज्ञः समायोगग्रहणसमयशंसी सस्वान संज्ञाशङ्खो मुहुर्मुहुः । अथ नचिरादिव प्रथमप्रयाण एव दि-ग्विजयाय दिग्गजसमागममिव गमनविलोलकर्णतालदोलाविला-सैः कुर्वाणया करेणुकयोह्यमानः, वैदूर्यदण्डविकटेनोपरि प्रत्युप्त-पद्मरागखण्डखचिततया सूर्योदयदर्शनकोपादिव लोहितायतया

अर्धजङ्घालेत्याहुः । समायोगो व्यापृतकेषु प्रसिद्धः । परभागो वर्णस्य वर्णान्तरेण शोभातिशयः । राजावर्तः कृष्णपाषाणः । मेचको बर्हिकण्ठवर्णः । 'कञ्चुको वा-रबाणोऽस्त्री' । अपचितं परिहितम्, पूजितं वा । 'चायृ पूजानिशामनयोः' इ-त्यस्यापचितश्चेति निपातनाद्रूपम् । ताराः शुद्धाः । स्तबकिताः संजातपुष्पनिकुरु-म्बाकाराः । स्तवरको वस्त्रभेदः । वारबाणः कञ्चुकः । कर्बुरः कपोतकण्ठवर्णः । कूर्पासकाश्चोलकाः । पिच्छानि पक्षाः । आच्छादनमुत्तरीयम् । उल्लुप्तस्तनूकृतः शस्तं पट्टिकाठोरः । कटिसूत्रमित्यर्थः । वेल्लिताश्चालिताः । कर्णाभरणभेदो वाल-पाशः । कोमलं संछायम् । अन्तरितमाच्छादितम् । खोलः शिरस्त्रम् । मायूरप-त्रायमानम् । वेगदण्डस्तरुणो हस्ती । किर्मीराणि शबलानि । कार्दरङ्गकानि कार्दरङ्गदेशोद्भवानि । बहुसुवर्णसूत्ररचितानि चर्माणि । स्फोटकाः स्निग्धवर्ण-मांसस्फाराणि कार्दरङ्गचर्माणि डामरा उद्भटाः । चारभटाः शूराः । आस्कन्द-न्तश्चलन्तः । काम्बोजा बाह्लीकदेशजाः । आयानमश्वभूषणम् । लम्बापटहाः पटहभेदाः । तमिला इति प्रसिद्धाः ।

संज्ञा संकेतः । अथेत्यादौ दिग्विजयाय निर्जगाम नरपतिरिति संबन्धः । म-ङ्गलातपत्रेण कञ्चुकेन । नतूत्प्रेक्षते द्वितीय इव भोगिनामीश इति योजना । यद्वा मङ्गलातपत्रेणेति इत्थंभूतलक्षणे तृतीया । अम्बरं वस्त्रम्, नभश्च । विलभमानो-ऽर्थिसात्कुर्वन् । मुद्रया हि ससिन्दूरया विलभ्यते । परिक्षिपन्वेष्टयन् । अम्रजो

ध्रियमाणेन मङ्गलातपत्रेण कदलीगर्भाभ्यधिकम्रदिम्ना नवनेत्रनिर्मितेन द्वितीय इव भोगिनामधिपतिरङ्गलग्नेन कञ्चुकेनामृतमथनदिवस इव क्षीरोदफेनपटलधवलाम्बरवाही, बाल एव पारिजातपादप इवाखण्डलभूमिमारूढः, विधूयमानचामरमरुद्विधूतकर्णपूरकुसुममञ्जरीरजसा सकलभुवनवशीकरणचूर्णेनेव दिशश्छुरयन्नभिमुखचूडामणिघटमानपाटलप्रतिबिम्बमुदयमानं सवितारमपि पिबन्निव तेजसा बहलताम्बूलसिन्दूरच्छुरितया विलभमान इव द्वीपान्तराण्योष्ठमुद्रयानुरागस्य स्फुरन्महाहारमरीचिचक्रवालानि चामराणीव दिशोऽपि ग्राहयन्, राजकेक्षणोत्क्षिप्तत्रिभागया त्रीनपि लोकान्करदानायाज्ञापयन्निव सविभ्रमं भ्रूलतया द्राघीयसा बाहुप्राकारेण परिक्षिपन्निव रिरक्षया सप्तापि सागरमहाखातानखिलमिव क्षीरोदमाधुर्यमादायोद्गतया लक्ष्म्या समुपगूढः, गाढममृतमय इव पीयमानः, कुतूहलोत्तानकटकलोकलोचनसहस्रैः स्नेहार्द्रेषु राज्ञां हृदयेषु गुणगौरवेण मज्जन्निव, लिम्पन्निव, सौभाग्यद्रवेण, द्रष्टृणाममरपतिरिवाग्रजवधकलङ्कप्रक्षालनाकुलः, पृथुरिव पृथिवीपरिशोधनावधानसंकलितसकलमहीभृत्समुत्सारणः, पुरःसरैरालोककारकैः सहस्रसंख्यैरर्क इव किरणैरधिकारचातुर्यचञ्चलचरणैर्व्यवस्थास्थापननिष्ठुरैः भयपलायमानलोकोत्पीडान्तरिता दशापि दिशो ग्राहयद्भिरिव, चलितकदलिकासंपातपीतप्रचारं पवनमपि विनये स्थापयद्भिरिव, द्रुतचरणोद्धूतधूलिपटलावधूतान्दिनकरकिरणानप्युत्सारयद्भिरिव, कनकवेत्रलतालोकविक्षिप्यमाणं दिनमपि दूरीकुर्वद्भिरिव, दण्डिभिरितस्ततः समुत्सार्यमानजनसमूहो निर्जगाम नरपतिः ।

अवनमति च विनयमितवपुषि, भयचकितमनसि, चलनशिथिलमणिकनकमुकुटकिरणनिकररुचिरशिरसि, विलुलितकुसुमशे-

---

ज्येष्ठः, राज्यवर्धनः, द्विजश्च । पुरा ब्रह्मणः किल सुतोऽसुरपक्षपाती त्रिशिरास्तद्भ्राता च वृत्रस्तौ तपस्यन्तौ शक्रेण हताविति । महीभृतो राजानः, पर्वताश्च । पृथुना ह्यद्रयो भूमिमास्तीर्य स्थिताश्चापकोट्या समुत्सार्यन्ते प्रक्षिप्ताः । लोक इत्येवं ये वदन्ति ते आलोककारकाः । तैरन्यत्रालोकः प्रकाशः पुरःसरैः सहस्रसंख्यैरिति च साधारणम् दिशो ग्राहयद्भिः पर्यन्तेषु च विसर्जयद्भिः ।

उदश्च ऊर्ध्वप्रसारिणः । चापराशय इवेत्याद्युत्प्रेक्षात्रयं समीचीनम् । उद्वियन्तः

खररजसि राजचक्रं, प्रभामुचां चूडामणीनामवाञ्चस्तिर्यञ्च उद-ञ्चश्च चञ्चन्तो मरीचयश्चापराशय इव सुशकुनसंपादनाय चेलुः । मेधायमानरेणुमेदुरं मन्दिरशिखण्डिन इव खमुड्डीयमानाः कोमल-कल्पपादपपल्लवचन्दनमालाकलापा इवाबध्यन्त दिग्द्वारेषु दिक्पा-लैः प्रणम्यमानश्च नेत्रविभागैश्च कटाक्षैश्च समग्रेक्षितैर्भ्रूवञ्चितैश्चा-र्धस्मितैश्च परिहासैश्च छेकालापैश्च कुशलप्रश्नैश्च प्रतिप्रणामैश्चोन्मत्त-भ्रूवीक्षितैश्चाज्ञादानैश्चाक्रीडन्निव मानमयान्प्राणान्प्रणयदानैः प्र-वीराणां वीरो यथानुरूपं विबभाज राजकम् ।

अथ प्रस्थिते राजनि कलकलत्रस्तदिङ्नागशूत्कारारव इवेतस्तत-स्तस्तार तारतरस्तूर्याणां प्रतिध्वनिराशातटेषु । दिग्गजेभ्यः प्रकु-पितानां त्रिप्रस्रुतानां करिणां मदप्रस्रवणवीथीभिरलिकुलकालीभिः कालिन्दीवेणिकासहस्राणीव सस्यन्दिरे । सिन्दूररेणुराशिभिररु-णायमानबिम्बे रवावस्तमयसमयं शशङ्किरे शकुनयः । करिणां षट्-पदकोलाहलमांसलैः कर्णतालनिस्वनैस्तिरोदधिरे दुन्दुभिध्वनयः । दोधूयमानश्च सचराचरमाचाम चामरसंघातो विश्वम् । अश्वीय-श्वासनिक्षिप्तैः शिश्विन्दे सिन्धुवारदामशुचिभिर्निरन्तरमन्तरिक्षं फे-नपिण्डैः । पिण्डीभूततगरस्तबकपाण्डुराणि पपुरिव परस्परसंघट्ट-नष्टाष्टदिशं दिवसमुच्चचामीकरदण्डान्यातपत्रवनानि । रजोरज-नीनिमीलितो मुकुटमणिशिलावलीवालातपेन विचकास वासरः । राजतैर्हिरण्मयैश्च मण्डनकभाण्डमण्डलैर्ह्रादमानैर्हरितीकृताः परि-ह्वादा हरितो बधिरतां दधुः । अरिप्रतापानलनिर्मूलनायेव मदो-ष्मशीकरैः शिशेकिरे करिणः ककुभां चक्रम् । चक्षुषामुन्मेषं मु-मुषुस्तडिच्चञ्चलानि चूडामणीनामर्चींषि । स्वयमपि विसिस्मिये बला-नां भूपालः सर्वतो विक्षिप्तचक्षुश्चाद्राक्षीदावासस्थानसकाशात्प्रतिष्ठ-

---

प्रसृताः । कटाक्षैरपाङ्गदृष्टैः भ्रूवञ्चितैर्भ्रूचलितैः । 'भ्रूवाञ्चितैः' इति पाठे उन्नतै-कभ्रूक्षिप्तैरित्यर्थः । छेकालापैर्वक्रोक्तिभिः । छेकान्तरान्तरा वा ।

तस्तारेति । विस्तृतोऽभवत् । त्रिप्रस्रुतानां त्रिषु गण्डादिषु मदमुचाम् । शकु-नयोऽत्र चक्रवाकाः । मण्डनकमाद्यानम् । 'स्याद्भाण्डमश्वाभरणे' । अधोक्षजो हरि-कुम्भभुवोऽगस्त्यस्य । प्लावितभुवनं स्कन्धावारम्, नर्मदाप्रवाहं च । पूर्वं कार्तवीर्यै-णान्तःपुरैः सह रेवातीरे विहरता तत्स्रोतो भुजसहस्रेणोभयतो वृत्वा त्यक्तमभूत् । प्रसरतेत्येवमादिप्रवर्तमानानेकसंलापनमिति स्कन्धावारविशेषणम्।**तातेति**।भा-

मानं स्कन्धावारम्, अधोक्षजकुक्षेरिव युगादौ निष्पतन्तं जीवलोकम्, अम्भोनिधिमिव कुम्भभुवो वदनात्प्लावितभुवनमुद्भवन्तम्, अर्जुनबाहुदण्डसहस्रसंपिण्डितोन्मुक्तमिव सहस्रधा प्रवर्तमानं प्रवाहं नर्मदायाः। 'प्रसर तात। भाव, किं विलम्बसे। त्वङ्कति तुरङ्गमः। भद्र, भग्नचरण इव संचरसि यावदमी पुरःसराः सरभसमुपरि पतन्ति। वाहयसि किमुष्ट्रम्। न पश्यसि निर्दय, निःशूकशिशुं शयानम्। वत्स रामिल, रजसि यथा न नश्यसि न पश्यसि। गलति शक्तुप्रसेवकः। किमेवमित्वर, त्वरसे। सौरभेय, सरणिमपहाय हयमध्यं धावसि। धीवरि, विशसि। गन्तुकामा मातङ्गि, मातङ्गमार्गम्। अङ्ग, गलति तिरश्चीना चणकगोणी। गणयसि न मामारटन्तम्। अवटमतटेनावतरसि। सुखमास्स्व स्वैरिणि। सौवीरक, कुम्भो भग्नः। मन्थरक, खादिष्यसि गतः सन्निक्षुम्। उक्षाणं प्रसादय। कियच्चिरं चिनोषि चेट, बदराणि। दूरं गन्तव्यम्। किमद्यैव विद्रासि द्रोणक, द्राघीयसी दण्डयात्रा विनैकेन निष्पुरकेण निष्क्रेयमस्माकम्। अग्रतः पन्थाः स्थपुटक। स्थावरक, यथा न भनक्षि फाणितस्थालीं गरीयान्गण्डकतण्डुलभारको न निर्वहति दम्यः। दासक, मापीणाममुतो द्राग्दात्रेण मुखघासपूलकं लुनीहि। कौ जानाति यवसगतं गतानाम्। धव, वारय बलीवर्दान्। वाहीकरक्षितं क्षेत्रमिदम्। लम्बिता शकटी। शाकरं धुरंधरं धुरि धवलं नियुङ्क्ष्व। यक्षपालित, प्रमदाः पिनक्षि। अक्षिणी किं ते स्फुटिते। हत हस्तिपक रे, दीव्यसि करिकरदण्डे। समद, संमर्दकर्दमे स्खलसि। भ्रातर्भाव विधुरबन्धो, उद्धर पङ्कादनड्वाहम्। इत एहि माणवक, घनेभघटासंघट्टसंकटे नास्ति निस्तरणम्।' इत्येवमादिप्रवर्तमानानेकसंलापं क्वचित्स्वेच्छामृदितोदाम-

---

वेति च। मान्यामन्त्रणम्। लसति गलति। प्रसेवको भस्त्राभरणमित्यन्ये। इत्वरो गमनशीलः। सौरभेयो दान्तः। अङ्गेति इष्टामन्त्रणम्। अवटं श्वभ्रम्। अतटेनामार्गेण। स्वैरिणि स्वतन्त्रे। 'स्वादीरेरिणोः' इति वृद्धिः। सौवीरिकं काञ्जिकम्। विद्रासि लङ्घसि। 'निष्ठा' श्लेवः। स्थपुटो निम्नोन्नतः, विभ्रम इत्यन्ये। फाणितमिक्षुविकारः, गुण इति प्रसिद्धः। दम्यो दान्तः माषाणां भवनं क्षेत्रम्। 'धान्यानां भवने क्षेत्रे खञ्'। किंचिन्मात्रं बुभुक्षानिवृत्तये। घासो मुखघासः। यवसं घासः। उक्तं च 'शष्पं बालतृणं घासो यवसम्' इति। धवः पुरुषः। वाहीकः काष्ठकः, परिपालक इत्यन्ये, गोरक्षक इति चान्ये। लम्बिता मार्गमाक्रान्तुं न शक्नोति। शाकरं शूरम्। तरुणं वा। धवलं महोक्षं नेदीयसि। करदण्डेऽन्यहस्तसंबन्धिनि सति। करी स-

सस्यघासविघससुखसंपन्नान्नपुष्टैः केलिकलैः किलकिलायमानैर्मेण्ठ-वण्ठवठरलम्बनलेशिकलुण्ठकचेटचाटचण्डालमण्डलैराण्डीरैः स्तूयमानम्, क्वचिदसहायैः क्लेशार्जितकुग्रामकुटुम्बिसंपादितसीदत्सौरभेयशम्बलसंवाहनायासावेगागतसंयोगैः स्वयंगृहीतगृहोपस्करणैः 'इयमेका कथंचिद्दण्डयात्रा यातु। यातु पातालतलं तृष्णाभूतेरभवनिः। भवतु शिवम्। सेवा करोतु। स्वस्ति सर्वदुःखकूटाय कटकाय' इति दुर्विधकुलपुत्रकैर्निन्द्यमानम्, क्वचिदतितीक्ष्णसलिलस्रोतःपातिनौगतैरिव ग्रथितैरिव पङ्किभूतैर्जनैरतिद्रुतम्, द्रवद्भिः कृष्णकठिनस्कन्धगुरुलगुडैर्गृहीतसौवर्णपादपीठीकरङ्ककलशपतद्ग्राहावग्राहैः प्रत्यासन्नपार्थिवोपकरणग्रहणगर्वदुर्वारैः सर्वमेव बहिः कारयद्भिर्भूपतिभृतकभारिकैर्महानसोपकरणवाहिभिश्च बद्धवराहवध्रवाध्रीणसैर्लम्बमानहरिणचटुकचटकजूटजटिलैः शिशुशशकशाकपत्रवेत्राग्रसंग्रहसंग्राहिभिः शुक्लकर्पटप्रावृतमुखैकदेशदत्तार्द्रमुद्रागुप्तगोरसभाण्डैस्तलकतापकतापिकाहस्तकताम्रचरुकटाहसंकटपिटकभारिकैः

मदोऽर्थात्संपन्नः। स्वेच्छयानायासेन। मृदितानि क्षुण्णानि। उद्दामानि प्रभूतानि। सस्यानि। तथा घासो यवसम्। तथा विघसो भृत्याद्युपयुक्तशेषमन्नम्, परस्परलुण्ठनं वा तैः सुखेन संपन्नं यदन्नं तेन सुपुष्टैः। केलिकलाः प्रहसनाः, बहुभाषिणो वा मेण्ठा हस्तिजागरिकाः। वण्ठा अकृतविवाहाः। तरुणा ये दण्डमादाय हस्तिनां दर्पमाकर्षयन्ति, पत्तय इत्यन्ये। वठरा मूर्खाः। लम्बना गर्दभदासाः। लेशिका जनपरिचारकाः। लुण्ठकाश्चौराः। चेटा दासाः। शाटा धूर्ताः। चण्डाला अश्वपालाः। आण्डीराः प्रगल्भाः। यद्वा राण्डीराः रण्डापुत्राः। संपादितो दत्तः। सीदन्नसमर्थो यः सौरभेयस्तेन शम्बलसंवाहनाय य आयासो योगस्तेन। गतसंयोगैरुत्पन्नचित्तक्षोभैरिति समासः। अभवनिरिति। आक्रोशे 'नञ्यनिः'। दुर्विधा दरिद्राः। वृद्धाः स्थविराः। कुलपुत्राः कुलक्रमागताः सेवकास्तैर्निन्द्यमानमिति स्कन्धावारविशेषणम्। क्वचिच्च भूमृद्भारिकैर्महानसोपकरणवाहिभिश्च समुत्सार्यमाणपुरोवर्तिजनमिति स्कन्धावारविशेषणम्। अतितीक्ष्णं वेगवत्। ग्रन्थिर्विद्यते येषां तैः। करकस्ताम्बूलाधारः। पतद्ग्रहो निष्ठीवनपात्रम्। अवग्राहः स्नानद्रोणी। बहिःकारयद्भिर्निरस्यद्भिः। महानसा सूपकारशाला। वराहवध्रं सूकरचर्म। सूकरपाठेतिप्रसिद्धम्। वाध्रीणसा यज्ञियाश्छागविशेषाः। हरिणानां चटुकाः पूर्वभागाः। जूटः संघः। वेत्राग्राणि वंशाङ्कुराः। तलकोऽग्निशकटिका। तापकोऽपूपादिकरणस्थानम्। तापिका काकपालिका। यत्र तैलादिना भक्ष्याः पच्यन्ते। हस्तकः शूलम्। पिटका भाण्डानि।

समुत्सार्यमाणपुरोवर्तिजनम्, क्वचित् 'क्लेशोऽस्माकम् । फलकाले-ऽन्य एव विटाः समुपस्थास्यन्ते' इति मुखरैः पदे पदे पततां दुर्बलबलीवर्दानां नियुक्तैः खेटने खेटचेटकैः खेद्यमानासंविभक्तकुलपुत्रलोकम्, क्वचिन्नरपतिदर्शनकुतूहलादुभयतः प्रजवितप्रधावितग्रामेयकजनपदम्, मार्गग्रामनिर्गतैराग्रहारिकजाल्मैः पुरःसरजरन्महत्तरोत्तम्भिताम्भःकुम्भैरुपायनीकृतदधिगुडखण्डकुसुमकरण्डैर्घटितपेटकैः सरभसं समुत्सर्पद्भिः प्रकुपितप्रचण्डदण्डिवित्रासनविद्रुतैर्दूरगतैरपि स्खलद्भिरपि पतद्भिरपि नरेन्द्रनिहितदृष्टिभिरसतोऽपि पूर्वभोगपतिदोषानुद्भावयद्भिरतिक्रान्तायुक्तकशतानि च शंसद्भिश्चिरंतनचाटपराधांश्चाभिदधानैरुद्धूयमानधूलिपटलम्, क्वचिदेकान्तप्रवृत्ताश्ववारचक्रचर्व्यमाणागामिगौडविमृग्यमाणसस्यसंरक्षणम्, अपरैरादिष्टपरिपालकपुरुषपरितुष्टैः 'धर्मः प्रत्यक्षो देवः' इति स्तुतीरातन्वद्भिरपरैर्लूयमाननिष्पत्रसस्यप्रकटितविषादैः क्षेत्रशुचा सकुटुम्बैरेव निर्गतैः प्ररूढप्राणच्छेदैः परितापत्याजितभयैः 'क्व राजा । कुतो राजा । कीदृशो वा राजा' इति प्रारब्धनरनाथनिन्दम्, शशकैश्च पदे पदे प्रजविप्रचण्डदण्डपाणिपेटकानुबद्धैर्गिरिगुडकैरिव हन्यमानैरितस्ततः संचरद्भिरपरैर्युगपत्परापतितमहाजनग्रस्तैस्तिलशो विलुप्यमानैरनेकजन्तुजङ्घान्तरालनिःसरणकुशलिभिः कुटिलिकाव्यंसितसादिबहुश्वभिः पतल्लोष्टलगुडकोणकुठारकीलकुद्दालखनित्रदात्रयष्टिभिरपि निःसरद्भिरायुधो बलात्कृतकलकलम्, अन्यत्र संघशो घासिकैर्बुसधूलीधूसरितघासजालजालकितजघनैश्च पुराणपर्याणैकदेशदोलायमानदात्रैश्च शीर्णोर्णाशकलशि-

---

विटा धूर्ताः । समुपस्थास्यन्ति ढौकयिष्यन्ति । पततां स्खलताम् । स्खलने प्रेरणे । नियुक्तैः स्थापितैः । असंविभक्ता अकृतविभागाः । ग्रामे भवा ग्रामेयकाः। 'ग्रामाद्यन्खञोः' । आग्रहारिकजाल्मैर्मृग्यमाणसस्यसंरक्षणमिति संगतिः । जाल्मा मूर्खाः । उत्तम्भिता ऊर्ध्वीकृताः । अम्भःकुम्भा जलपूर्णकलशाः । खण्ड इक्षुविकारः । समुपसर्पद्भिर्ढौकमानैः । वित्रासनं भयोत्पादनम् । आयुक्तका व्यापृतकाः । चाटा धूर्ताः । अपरैराग्रहारिजाल्मैरुपलक्षितमपरैः । प्रारब्धनरनाथनिन्दमिति योजना । निष्पन्नानि पक्वानि । सकुटुम्बैः सदारैः । शशकैः कृतकलकलमित्यन्वयः। अनुबद्धा अनुसृताः । गिरिगुडकैर्लोष्टैः । कुटिलिकया वक्रगमनेन । व्यंसिता वञ्चिताः । सादिनामश्ववाराणाम् । बहवःश्वानो यैः । कोणो वादनभाण्डम्। अन्यत्र घासिकैः उद्धूयमानधूलीपटलमिति संबन्धः । संघशो बहुशः । घासे नियुक्ता घा-

थिलमलिनमलकुथैश्च प्रभुप्रसादीकृतपाटितपटचरचलच्चोलकधारिभिश्च धावमानैरुद्धूयमानधूलिपटलम्, क्वचिदेकान्तप्रवृत्ताश्ववारचक्रचर्व्यमाणागामिगौडविग्रहम्, क्वचित्पङ्किलप्रदेशपूरणादेशाकुलसकललोकलूयमानतृणपूलकम्, क्वचित्तलवर्तिवेत्रिवेत्रवित्रास्यमानशाखिशिखरगतविक्रोशद्विवादिब्राह्मणम्, क्वचित्कुलुण्ठकपाशविवेष्टमानग्रामीणग्रामाकृष्टकौलेयकम्, क्वचिदन्योन्यविभवस्पर्धोद्धुरराजपुत्रवाह्यमानवाजिसंघट्टमण्डितम्, अनेकवृत्तान्ततया कौतुकजननम्, प्रलयजलधिमिव जगद्ग्रासग्रहणाय प्रवृत्तम्, पातालमिव महाभोगिनां गुप्तये समुत्पादितम्, कैलासमिव परमेश्वरवसतये सृष्टम्, दृश्यमानसकलप्राणिपर्यायं चतुर्युगसर्गकोशमिव प्रजापतीनां क्लेशबहुलमपि तपःकरणमिव क्रमकारिणं कल्याणानाम् एवं च वीक्षमाणः कटकं जगाम ।

आसन्नवर्तिनां च तत्रभवताम् 'मांधात्रा प्रवर्तिताः पन्थानो दिग्विजयाय अप्रतिहतरथरंहसा रघुणा लघुनैव कालेनाकारि ककुभां प्रसादनम् । शरासनद्वितीयः करदीचकार चक्रं क्रमागतभुजबलाभिजनधनमदावलिप्तानां भूभुजां पाण्डुः । पाण्डवः सव्यसाची चीनविषयमतिक्रभ्य राजसूयसंपदे क्रुध्यद्गन्धर्वधनुष्कोटिटांकारकूजितकुञ्जं हेमकूटपर्वतं पराजेष्ट । संकल्पान्तरितो विजयस्तरस्विनाम् । सहिमहिमवद्व्यवहितोऽप्युवाह बाहुबलव्यतिकरकातरः करं कौरवेश्वरस्य किङ्कर इवाकृती द्रुमः । नातिजिगीषवः खलु पूर्वे येनाल्प एव भूभागे भूयांसो भगदत्तदन्तवक्त्रक्राथकर्णकौरवशिशुपालसाल्वजरासंधसिन्धुराजप्रभृतयोऽभवन्भूपतयः । संतुष्टो राजा

सिकाः । घासजालं घाससंघातः । एकदेशः पश्चिमा दिक् । 'मलकुथैः' इति पाठः । मलकुथा मलपट्टी । छविरित्यर्थः । अंसो परिवास इत्यन्ये । पटचरं जीर्णवस्त्रम् । कुलुण्ठकाः । शुनाबन्धनलगुडाः । उद्धुरा उद्दामप्रसराः । जगतो ग्रहणं स्वीकरणम्, ग्रसनं च । भोगिनो भोगवन्तः, सर्पाः । परमेश्वरो हरोऽपि । परितः समन्तादायः आगमनं पर्यायः ।

आसन्नेत्यादौ पार्थिवसुतानामित्येवंप्रायानालापाञ्शृण्वन्नेवाससादावासमिति संबन्धः । तत्रभवता पूज्येन । सव्यसाची अर्जुनः । पराजेष्ट जिगाय । तरस्विनां पराक्रमवताम् । कौरवेश्वरो दुर्योधनः । अकृतोऽकृतार्थः । द्रुमाख्यः किन्नरराजः । सिन्धु-

युधिष्ठिरो यो ह्यसहत समीप एव धनंजयजयजनितजगत्कम्पः किंपुरुषाणां राज्यम्। अलसश्चण्डकोशो यो न प्राविक्षत्क्ष्मां जित्वा स्त्रीराज्यम्। ह्रसीय एवान्तरं तुषारगिरिगन्धमादनयोः। उत्साहिनः किष्कुतुरुष्कविषयाः। प्रादेशः पारसीकदेशः। शशपदं शकस्थानम्। अदृश्यमानप्रतिप्रहारे पारियात्रे यात्रैव शिथिला। शौर्यशुल्कः सुलभो दक्षिणापथः। दक्षिणार्णवकल्लोलानिलचलितचन्दनलतासौरभसुन्दरीकृतदरीमन्दिराद्दर्दुरादद्रेर्नेदीयसि मलयो मलयलग्न एव च महेन्द्रः।' इत्येवंप्रायानुद्योगद्योतकानामालापान्पार्थिवकुमाराणां बाहुशालिनां शृण्वन्नेवाससादावासम्। मन्दिरद्वारि चोभयतः सबहुमानं भ्रूलताभ्यां विसर्जितराजलोकः प्रविश्य चावततार बाह्यास्थानमण्डपस्थापितमासनमाचक्राम। प्रास्तसमायोगश्च क्षणमासिष्ट।

अथ तत्र प्रतीहारः पृथ्वीपृष्ठप्रतिष्ठापितपाणिपल्लवो विज्ञापितवान्—'देव, प्राग्ज्योतिषेश्वरेण कुमारेण प्रहितो हंसवेगनामा दूतोऽन्तरङ्गस्तोरणमध्यास्ते' इति। राजा तु 'तमाशु प्रवेशय' इति सादरमादिदेश। अथ दक्षतया क्षितिपालादराच्च प्रतीहारः स्वयमेव निरगात्। अनन्तरं च हंसवेगः सविनयमाकृत्यैव नयनानन्दसंपादनसुभगाभोगभद्रया समुल्लङ्घ्यमानगुणगरिमा प्रभूतप्राभृतभृतां पुरुषाणां समूहेन महतानुगम्यमानः प्रविवेश राजमन्दिरम्। आरादेव पञ्चाङ्गालिङ्गिताङ्गनः प्रणाममकरोत्। 'एह्येहि' इति सबहुमानमाहूतश्च प्रधावितोऽपसृतः पादपीठलुठितललाटलेखो न्यस्तहस्तः पृष्ठे पार्थिवेनोपसृत्य भूयो नमश्चक्रे। स्निग्धनरेन्द्रदृष्ट्या निर्दिष्टमविप्रकृष्टं स प्रदेशमध्यास्त। ततो राजा तिरश्चीं तनुमीषदिव दधानश्चामरग्राहिणीमन्तरालवर्तिनीं समुत्सार्य संमुखीनस्तं सप्रश्रयं पप्रच्छ—'हंसवेग, श्रीमान्कच्चित्कुशली कुमारः'

नाथो जयद्रथः। ह्रसीयो ह्रस्वतरम्। साङ्गुष्ठया प्रदेशिन्या प्रादेशः। 'प्रादेशतालगोकर्णतर्जन्यादियुते तते। अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुलम्॥' इत्यमरसिंहः। शौर्यकृतः शुल्कः पणो यत्र स शौर्यशुल्कः। अतिशयेनान्तिकं नेदीयः। 'अन्तिकबाढयोर्नेदसाधौ' इति।

प्राग्ज्योतिषं कामरूपाख्यो देशः।समुल्लङ्घ्यमानो नीयमानः।संमुखीनोऽभिमुखः।

इति । स तमन्ववादीत्—'अद्य कुशली येनैवं स्नेहस्नपितया सौहार्दद्रवार्द्रया सगौरवं गिरा पृच्छति देवः' इति ।

स्थित्वा च मुहूर्तमिव पुनः स चतुरमुवाच—'चतुरम्भोधिभोगभूतिभाजनभूतस्य देवस्य सद्भावगर्भमपहाय हृदयमेकमन्यदनुरूपं प्राभृतमेव दुर्लभं लोकं तथाप्यस्मत्स्वामिना संदेशमशून्यतां नयता पूर्वजोपार्जितं वारुणातपत्रमाभोगाख्यमनुरूपस्थानन्यासेन कृतार्थीकृतमेतत् । अस्य च कुतूहलकृन्ति बहूनि आश्चर्याणि दृश्यन्ते । प्रतिदिवसं प्रविशति शैत्यहेतोश्छायायाः किरणसहस्रादेकैकः सोमस्य रश्मिरस्मिन् । अस्मिन्प्रविष्टे प्रध्यानानन्तरं स्वादवो दन्तवीणोपदेशाचार्याश्च्योतन्ति चन्द्रभासामम्भसां मणिशलाकाभ्यो यावदिच्छमच्छा धाराः । प्रचेता इव यश्चतुर्णामर्णवानामधिपतिर्भूतो भावी वा तमनुगृह्णाति च्छायया नेतरम् । इदं च न सप्तार्चिर्दहति, न पृषदश्वो हरति, नोदकमार्द्रयति, न रजांसि मलिनयन्ति, न जरा जर्जरयति । एतत्तावदनुगृह्णातु दृशा देवः संदेशमपि विस्रब्धं श्रोष्यति ।' इत्येवमभिधाय विवृत्यात्मीयं पुरुषमभ्यधात्—'उत्तिष्ठ । दर्शय देवस्य' इति ।

स वचनानन्तरमुत्थाय पुमानूर्ध्वीचकार तद्धौतदुकूलकल्पिताच्च निचोलकादकोषीत् । आकृष्यमाण एव च यस्मिन्नतिसितमहसि सरभसमहासीव हरेण रसातलादुदलासीव शेषफणिफणाफलकमण्डलेन, अस्थायीव चक्रीभूयान्तरिक्षे क्षीरोदेन, अघटीव गगनाङ्गने गोष्ठीबन्धः शारदेन बलाहकव्यूहेन, विश्रान्तमिव विततपक्षतिनावियति पितामहविमानहंसयूथेन, अत्रिनेत्रनिर्गतस्य धवलधाममण्डलमनोहरो दृष्ट इव जनेन जन्मदिवसः कुमुदबन्धोः, प्रत्यक्षीकृत इवोद्गमनक्षणो नारायणनाभिपुण्डरीकस्य, आहितेव कौमुदीप्रदोषदर्शनानन्दतृप्तिरक्ष्णाम्, उदमाङ्क्षीदिव मन्दाकिनीपुलिनम-

---

भोगः पालनम् । शीतोद्भवो दन्तानामन्योन्याघातो दन्तवीणा । सप्तार्चिरग्निः । पृशदश्वो वायुः । विवृत्य स्थित्वा ।

निचोलकादाच्छादनप्रसेवकात् । अकोषीन्निष्कासितवान् । उदलास्युल्लसितम् । अस्थायि स्थितम् । अघटि घटितम् । विश्रान्तं व्यश्रमत । उद्गमनक्षण उत्पत्तिसमयः । उदमाङ्क्षीदुन्मग्नम् । परिवर्तितः स्वरूपः कृतः ।

ण्डलं महदम्बरोदरे, परिवर्तित इव दिवसः पौर्णमासीनिशया मन्दमन्दमिन्दूदयसंदेहहूयमानमानसैर्विघटितं घटमानचञ्चुच्युतमृणालकोटिभिरासन्नकमलिनीचक्रवाकमिथुनैः, शरज्जलधरपटलाशङ्कासंकोचितकेकारवमूकमुखपुटैः पराङ्मुखीभूतं भवनशिखण्डिमण्डलैः, प्रबुद्धमावद्धचन्द्रानन्दोद्दामोद्दलदलपुटाट्टहासविशदं कुमुदषण्डैः ।

चित्रीयमाणचेताश्च सराजको राजा दण्डानुसाराधिरोहिण्या दृष्ट्वा सादरमैक्षिष्ट तत्तिलकमिव त्रिभुवनस्य, शैशवमिव श्वेतद्वीपस्य, अंशावतारमिव शरदिन्दोः, हृदयमिव धर्मस्य, निवेशमिव शशिलोकस्य, दन्तमण्डलधवलं मुखमिव चक्रवर्तित्वस्य, मौक्तिकजालपरिकरसितं सीमन्तचक्रमिव दिवः, बहलज्योत्स्नाशुक्लोदरमैन्दवमिव परिवेशवलयं शौक्लयहसितशङ्खश्रीकं श्रवणमण्डलमिव निश्चलतां गतमैरावतस्य, श्वेतगङ्गावर्तपाण्डुरं पदमिव त्रिभुवनवन्दनीयं त्रिविक्रमस्य, प्रचेतसश्चूडामणिमरीचिशिखाभिरिव श्लिष्टाभिर्मानसबिसतन्तुमयीभिश्चामरिकावलीभिर्विरचितपरिवेशम्, उपरि चक्रवर्तिलक्ष्मीनूपुरस्वनश्रवणदोहदनिश्चलेनेव लक्ष्मणा विततपत्रेण हंसेन सनाथीकृतशिखरम्, स्पर्शवता च प्रभावस्तम्भितेन मन्दाकिनीमृणालेन मुकुलितफणेन वासुकिनेव नीतेन दण्डतां द्योतमानम्, धवलिम्ना क्षालयदिव नक्षत्रपथम्, प्रभाप्रवाहप्रथिम्ना प्रावृण्वदिव दिवसम्, समुच्छ्रायेणाधःकुर्वदिव दिवम्, उपरिस्थितमिव सर्वमङ्गलानाम्, श्वेतमण्डपमिव श्रियः, स्तबकमिव ब्रह्मस्तम्बस्य, नाभिमण्डलमिव ज्योत्स्नायाः, विशदं हासमिव कीर्तेः, फेनराशिमिव खड्गधाराजलानाम्, यशःपटलमिव शौर्यशालितायाः, त्रैलोक्याद्भुतं महच्छत्रम् ।

दृष्टे च तस्मिन्राज्ञा प्रथमे शेषमपि प्राभृतं प्रकाशयांचक्रुः क्रमेण कार्माः । तद्यथा परार्ध्यरत्नांशुशोणीकृतदिग्भागान्, भ-

---

निवेशं स्थानम् । दन्तमण्डलकं दशनकृतं चक्रवालम्, दशनसमूहश्च । मुखमारम्भः, वक्त्रं च । परिकरं परिवेष्टनम् । परिवेशवलयं परिधिकटकम् । 'स्यादावर्तोऽम्भसां भ्रमः' । आवर्तनमावर्तः । प्रावृण्वदाच्छादयत् ।

कार्मा भृतकाः । आहतलक्षणान्गुणैः प्रसिद्धान् । उक्तं च—'गुणैः प्रतीते तु

गदत्तप्रभृतिख्यातपार्थिवपरागतानाहृतलक्षणानलंकारान्, प्रभालेपिनां च चूडामणीनां समुत्कर्षान्, क्षीरोदधेर्धवलताहेतूनिव हारान्, अनेकरागरुचिरवेत्रकरण्डकुण्डलीकृतानि शरच्चन्द्रमरीचिरुचि शौचक्षमाणि क्षौमाणि कुशलशिल्पिलोकोल्लिखितानां च शक्तिशङ्खगल्वर्कप्रमुखानां पानभाजनानां निचयान्, निचोलकरक्षितरुचां च रुचिरकाञ्चनपत्रभङ्गभङ्गुराणामतिबन्धुरपरिवेशानां कार्दरङ्गचर्मणां संभारान्, भूर्जत्वक्कोमलाः स्पर्शवतीः जातीपट्टिकाः चित्रपटानां च अदीयसां समूरुकोपधानादीन्विकारान्, प्रियङ्गुप्रसवपिङ्गलत्वञ्चि चासनानि वेत्रमयान्यगुरुवल्कलकल्पितसंचयानि च सुभाषितभाञ्जि पुस्तकानि, परिणतपाटलपटोलत्विषि च तरुणहारीतहरिन्ति क्षीरक्षारीणि च पूगानां पल्लवलम्बीनि सरसानि फलानि, सहकारलतारसानां च कृष्णागरुतैलस्य च कुपितकपिकपोलकपिलकापोतिकापलाशकोशीकवचिताङ्गीः स्वयीयसीवैणवीर्नाडीश्च पट्टसूत्रप्रसेवकार्पितांश्च भिन्नाञ्जनकृष्णस्य कृष्णागुरुणः, गुरुपरितापमुषश्च गोशीर्षचन्दनस्य, तुषारशिलाशकलशिशिरस्वच्छसितस्य च कर्पूरस्य, कस्तूरिकाकोशकानां च पक्वफलजूटजटिलानां च कक्कोलपल्लवानाम्, लवङ्गपुष्पमञ्जरीणां जातीफलस्तवकानां च राशीन्, अतिमधुरमधुरसामोदनिर्हारिणीश्चोलककलशीः सितासितस्य च चामरजातस्य निचयान्, अवलम्बमानतूलिकालाबुकांश्च लिखितानालेख्यफलकसंपुटान्, कुतूहलकृन्ति कनकशृङ्खलानियमितग्रीवाणां किंनराणां च वनमानुषाणां च जीवञ्जीवकानां च जलमानुषाणां च मिथुनानि, परिमलामोदितककुभश्च कस्तूरिकाकुरङ्गान्, गेहपरिसरणपरिचिताश्च चमरीः, चा-

---

कृतलक्षणाहतलक्षणा' इति । समुत्कर्षानतिशयान् । गल्वर्को मसराख्यो मणिभेदः, चन्द्रकान्त इत्यन्ये । शौचो धावनम् । कार्दरङ्गचर्मणां कार्दरङ्गदेशभवानां स्फेटकानाम् । जातीपट्टिकाः श्रेष्ठानि जघनग्रन्थनानि । संचयाः पत्रसमूहाः । पटोलस्त्तिक्तकः, ओषधिभेदः । उक्तं च—'अथ कुलकं पटोलस्त्तिक्तकः पटुः' इति । कापोतिका ओषधिभेदः । गोशीर्षचन्दनस्य चन्दनभेदस्य । कोशका नाभयः । अतिमधुरं मधुरसाया इवामोदानि हरन्ति मुञ्चन्ति यास्ताः । मधुरसा द्राक्षा । उक्तं च—'मृद्वीका गोस्तनी द्राक्षा माध्वी मधुरसेति च' इति।अन्ये मधुरसं मकरन्दं द्रव

मीकररसचित्रवेत्रपञ्जरान्तर्गतांश्च सबहुसुभाषितजल्पाकजिह्वांश्च शुकशारिकाप्रभृतीन्पक्षिणः, प्रवालपञ्जरगतांश्च चकोरान्, जलहस्तिनामुदग्रकुम्भमुक्ताफलदामदन्तुराणि च दन्तकाण्डकुण्डलानि ।

राजा तु छत्रदर्शनात्प्रहृष्टहृदयः प्रथमप्रयाणे शोभननिमित्तमिति मनसा जग्राह । हंसवेगं च प्रीयमाणो बभाषे—'भद्र, सकलरत्नधाम्नः परमेश्वरशिरोधारणार्हस्यास्य महातपत्रस्य महार्णवादिव कुमुदबान्धवस्य कुमाराल्लाभो न विस्मयाय । बालविद्याः खलु महतामुपकृतयः' इति । अपनीते च तस्मात्प्रदेशात्प्राभृतसंभारे क्षणमिव स्थित्वा 'हंसवेग, विश्रम्यताम्' इति प्रतीहारभवनं विसर्जयांबभूव । स्वयमप्युत्थाय स्नात्वा मङ्गलाकाङ्क्षी प्राङ्मुखः प्राविशदाभोगस्य छायाम् ।

अथ विशत एवास्य छायाजन्मना जडिम्ना चूडामणितामनीयतेव शशिबिम्बमम्बुबिन्दुमुचश्चुचुम्बुरिव चन्द्रकान्तमणयो ललाटतटं कर्पूररेणव इव व्यलीयन्त लोचनयुगले गलत्तुहिनकणनिकरकृतनीहारा हारा इवाबध्यन्तः हरिचन्दनरसासारेणेवापाति संततमुरसि कुमुदमयमिव हृदयमभवदतिशिशिरमन्तर्हितहिमशिलेव विलीयमाना व्यलिम्पदङ्गानि । जातविस्मयश्चाकरोन्मनसि एकमजर्यं संगतमपहाय कास्त्यन्या प्रतिकौशलिकेति । आहारकाले च हंसवेगाय धवलकर्पटप्रावृतधौतनालिकेरपरिगृहीतं विलिप्तशेषं चन्दनमङ्गस्पृष्टे च वाससी शरत्तारकाकारतारमुक्तास्तबकितपदं परिवेशं नाम कटिसूत्रमतिमहार्हपद्मरागालोककलोहितीकृतदिवसं च तरङ्गकं नाम कर्णाभरणं प्रभूतं च भोज्यजातं प्राहिणोत् । एवंप्रायेण च क्रमेण जगाम दिवसः ।

ततः कटकस्थबलबहलधूलिधूसरितवपुरंशुमाली मलीमसमङ्गमिव क्षालयितुमपरजलनिधिमवातरत् । आभोगातपत्रप्रदानवा-

---

माहुः । उल्लकः सुगन्धिफलविशेषरसः । आसवभेद इत्यन्ये । तूलिका ऊर्जिका । यया चित्रं क्रियते । अलाब्व्यस्तुम्ब्यः । प्रवालो विद्रुमः । उक्तं च—'अथ विद्रुमः । पुंसि प्रवालः पुंनपुंसकम्' इति । 'नीहारो मिहिका चाथ' ।

कटकं हस्त्यश्वादीनां सर्वेषां संनिवेशदेशः । तत्स्थं बलं सैन्यम् । तगरं पिण्डी-

र्तामिव निवेदयितुं वरुणाय वारुणीं दिशमयासीत् । मुकुलायमानसकलकमलवना प्रमुख एव बद्धसेवाञ्जलिपुटेव सद्वीपा भूरभूद्भूपतेः । नृपानुरागमय इव निखिलजीवलोकलोकाञ्जलिबन्धबन्धुर्जगज्जग्राह संध्यारागः । गौडापराधशङ्किनीव श्यामतां प्रपेदे दिक्प्राची । प्रचिततिमिरनिवहा निर्वाणान्यनृपप्रतापानलकलापेव कालिमानमतानीन्मेदिनी । मेदिनीशप्रदोषास्थानपुष्पनिकरमिव विकचतगररुचिरमवचकरुरुडुनिकरमविरलं ककुभः । स्कन्धावारगन्धगजमदामोदधावितस्येव मार्गो विजयति विरराज रजःपाण्डुरैरावतस्य । कुपितनृपव्याघ्राघ्रातामुपसृष्टामिव पौरुष्टुतीं विहाय विहायस्तलमारुरोह रोहिणीरमणः । प्रयाणवार्ता इव मानिनीनां हृदयभेदिन्यो ययुरिन्दुदीधितयो दश दिशः । नवनृपदण्डयात्रात्रासातुरा इव तरलितसत्त्ववृत्तयश्चुक्षुभुः पतयो वाहिनीनाम् । चिन्तेव भूभृतां हृदयानि विवेश गुहाविवराणि विमुक्तसर्वाशातिमिरसंततिः । प्रतिसामन्तचक्षुषामिव ननाश निद्रा कुमुदवनानाम् ।

अस्यां च वेलायां विततवितानतलवर्ती नरेन्द्रो 'यात तावत्' इति विसर्ज्यानुजीविनो हंसवेगमादिष्टवान्—'कथय संदेशम्' इति । प्रणम्य स कथयितुं प्रास्तावीत्—'देव, पुरा वराहसंपर्कसंभूतगर्भया भगवत्या भुवा नरको नाम सूनुरसावि रसातले । वीरस्य यस्याभवन्बाल्य एव पादप्रणामप्रणयिनश्चूडामणयो लोकपालानाम् । यस्य च त्रिभुवनभुजो भुजशौण्डस्य भवनकमलिनीचक्रवाकीकोपकुटिलकटाक्षेक्षितोऽपि भयचकितारुणपरिवर्तितरथो नाज्ञया विना रविरस्तमव्राजीत् । यश्च वरुणस्य बहिर्वृत्ति हृदय-

भवनम् । नृपव्याघ्रो राजशार्दूलः, हर्षः । उपसृष्टां सोपद्रवाम् । पौरुष्टुतीं ऐंद्रीम् । रोहिणीरमणश्चन्द्रः, वृषभश्च । रोहिणी गौः । उक्तं च—'माहेयी सौरभेयी गौरुक्षा माता च शृङ्गिणी । अर्जुन्यद्दया रोहिणी स्यादुत्तमा गोषु नैचिकी॥' इति । वृषभश्च कुपितव्याघ्राघ्रातामत एव सोपद्रवां दिशं विहाय स्थानान्तरमारोहति । मानः प्रियाविषये, अन्यत्र धीरविषये । सत्त्वानि प्राणिनः, धैर्यं च सत्त्वम् । वाहिनीनां सेनानाम्, । नदीनां च । आशा दिशः, आस्था च । निद्रा संकोचः, स्वापश्च ।

प्रतिग्रहो द्विजदीयमानोऽर्थः, सैन्यपश्चाद्भागश्च ।

मिदमातपत्रमहार्षीत् । महात्मनस्तस्यान्वये भगदत्तपुष्पदत्तवज्रदत्तप्रभृतिषु व्यतीतेषु बहुषु मेरूपमेषु महत्सु महीपालेषु प्रपौत्रो महाराजभूतिवर्मणः पौत्रश्चन्द्रमुखवर्मणः पुत्रो देवस्य कैलासस्थिरस्थितेः स्थितिवर्मणः सुस्थिरवर्मा नाम महाराजाधिराजो जज्ञे तेजसां राशिर्मृगाङ्क इति यं जना जगुः । योऽयमजेनेवाजायत सहैवाहंकारेण । यश्च बाल एव प्रीत्या द्विजातीनप्रीत्या चारातीन्समप्रान्प्रतिग्रहानग्राहयत् । यत्र चातिदुर्लभं लवणालयसंभूतायाः परं माधुर्यमभूल्लक्ष्म्याः । तथा च यो वाहिनीनाथानां शङ्काज्जहार न रत्नानि, पृथिव्याः स्थैर्यं जग्राह न करम्, अवनिभृतां गौरवमादत्त न नैष्ठुर्यम् । तस्य च सुगृहीतनाम्नो देवस्य देव्यां श्यामादेव्यां भास्करद्युतिर्भास्करवर्मापरनामा तनयः शंतनोर्भागीरथ्यां भीष्म इव कुमारः समभवत् । अयमस्य च शैशवादारभ्य संकल्पः स्थेयान्स्थाणुपादारविन्दद्वयादृते नाहमन्यं नमस्कुर्यामिति । ईदृशश्चायं मनोरथस्त्रिभुवनदुर्लभस्त्रयाणामन्यतमेन संपद्यते सकलभुवनविजयेन वा मृत्युना वा यदि वा प्रचण्डप्रतापज्वलनदिग्दाहेन जगत्येकवीरेण देवोपमेन मित्रेण । मैत्री च प्रायः कार्यव्यपेक्षिणी क्षौणीभृताम् । कार्यं च कीदृशं नाम तद्भवेद्यदुपन्यस्यमानमुपनयेन्मित्रतां देवम् । देवस्य हि यशांसि संचिचीषतो बहिरङ्गभूतानि धनानि । बाहावेव च केवले निषण्णस्य शेषावयवानामपि साहायकसंपादनमनोरथो निरवकाशः किमुत बाह्यजनस्य । चतुःसागरग्रामग्रहणघस्मरस्य पृथिव्येकदेशदानोपन्यासेनापि का तुष्टिः । अभिरूपकन्याविश्राणनविलोभनमपि लक्ष्मीमुखारविन्ददर्शनदुर्ललितदृष्टेरकिंचित्करम् । एवमघटमानसकलोपायसंपादितपदार्थेऽस्मिन्प्रार्थनामात्रमेव केवलमनुरुध्यमानः शृणोतु देवः । प्राग्ज्योतिषेश्वरो हि देवेनैकपिङ्ग इवानङ्गद्विषा, दशरथ इव गोत्रभिदा, धनंजय इव पुष्कराक्षेण, वैकर्तन इव दुर्योधनेन, मलयानिल इव माधवेन, अजर्यं संगतमिच्छति । यदि च देवस्यापि मैत्री यतिहृदयमवगच्छति च पर्यायान्तरितं दास्यमनुतिष्ठन्ति सुहृद इति ततः किमास्यते समाज्ञाप्यतामनुभवतु विष्णोर्मन्दरगिरिरिव विकटकेयूरकोटिमणिविघट्टनकणितकटकमणिशिलाश-

कलानि गाढोपगूढानि देवस्य कामरूपाधिपतिः । अस्मिन्नातृप्तेरनवरतविमललावण्यसौभाग्यसुधानिर्झरिणि मुखशशिनि चिराच्चक्षुषी लालयतु प्राग्ज्योतिषेश्वरश्रीः । नाभिनन्दति चेद्देवः प्रणयमाज्ञापयतु किं कथनीयं मया स्वामिनः' इति ।

विरतवचसि तस्मिन्भूपालः पूर्वोपलब्धैरेव गुरुभिर्गुणैरारोपितबहुमानः कुमारे सुदूरमाभोगातपत्रव्यतिकरेण तु परां कोटिमारोपिते प्रेम्णि लज्जमान इव सादरं जगाद—'हंसवेग, कथमिव तादृशि महात्मनि महाभिजने पुण्यराशौ गुणिनां प्राग्रहरे परोक्षसुहृदि स्निह्यति मद्विधस्यान्यथा स्वप्नेऽपि प्रवर्तेत मनः । सकलजगदुत्तापनपटवोऽपि शिशिरायन्ते त्रिभुवननयनानन्दकरे कमलाकरे करास्तिग्मतेजसः । सुबहुगुणगणक्रीताश्च के वयं सख्यस्य । सज्जनमाधुर्याणामभृतदास्यो दश दिशः । एकान्तावदातोत्तानस्वभावसंभृतसादृश्यस्य कुमुदस्य कृते केनाभिहितः शिशिररश्मिः । श्रेयांश्च संकल्पः कुमारस्य । स्वयं बाहुशाली मयि च समालम्बितशरासने सुहृदि हरादृते कमन्यं नमस्यति । संवर्धिता मे प्रीतिरमुना संकल्पेन । अवलेपिनि पशावपि केसरिणि बहुमानो हृदयस्य किं पुनः सुहृदि । तत्तथा यतेथाः यथा न चिरमियमस्मान्क्लेशयति कुमारदर्शनोत्कण्ठा' इति ।

हंसवेगस्तु विज्ञापयांबभूव—'देव, किमपरमिदानीं क्लेशयत्यभिजातमभिहितं देवेन । सेवाभीरवो हि सन्तः, तत्रापि विशेषेणायमहंकारधनो वैष्णवो वंशः । आस्तां तावदस्मत्स्वामिवंशः । पश्यतु देवः पुरुषस्य हि सेवां प्रति दुर्जनन्येवातिवृद्धया दुर्गत्यावाभिमुखीक्रियमाणस्य, कुटुम्बिन्येवासंतुष्टया तृष्णया वा प्रेर्यमाणस्य, दुरपत्यैरिव यौवनजनितैर्नानाभिलाषिभिरसत्संकल्पैर्वाकुलीक्रियमाणस्य, जरत्कुमारीमिव परमार्गणयोग्यामतिमहतीं वा अवस्थां पश्यतः, स्वगृहे दुर्बन्धुभिरिव दुःस्थितैः समग्रैर्ग्रहैर्वा ग्राह्यमाणस्याभियोगं पुरातनैरतिदुस्त्यजैर्भृत्यैरिव मलिनैः कर्मभिर्वानुवर्त्यमानस्य, सकलशरीरसंतापकरं करीषाग्निमिव दुष्कृतिनः

हस्तिनां युद्धशिक्षार्थं चर्ममयो हस्ती । प्रतिहारमण्डलेन दौवारिकसमूहेन । प्रतिसंहारेण वेष्टनेन मण्डलं यस्य करस्य तत्प्रहारैश्च । निधिपादपप्ररोहो निधानपू-

कृतचित्तस्य संप्रवेष्टुं राजकुलमुपहतसकलेन्द्रियशक्तेरिव मिथ्यैव हृदयगतविषयग्रामग्रहणाभिलाषस्य, प्रथममेव तोरणतले वन्दनमालाकिशलयस्येव शुष्यतो द्वाररक्षिभिर्निरुद्धस्य, पीडितस्य प्रविशतो द्वारे हरिणस्येवापरैर्हन्यमानस्य, करिकर्मचर्मपुटस्येव मुहुर्मुहुः प्रतिहारमण्डलकरप्रहारैर्निरस्यमानस्य, निधिपादपप्ररोहस्येव द्रविणाभिलाषादधोमुखीभवतः, दूरममार्गणस्याप्यतिविप्रकृष्टविवृत्तविसार्जितस्योद्वेगं व्रजतः, अकण्टकस्यापि चरणतललग्नस्याकृष्यक्षेपीयः क्षिप्यमाणस्य, अमकरकेतोरप्यकालोपसर्पणप्रकुपितेश्वरदृष्टिदग्धस्य, प्रलयमुपगच्छतः कपेरिव कोपनिर्भर्त्सितस्याप्यभिन्नमुखरागस्य, ब्रह्मघ्न इव प्रतिदिवसवन्दनोद्भ्रष्टशिरःकपालस्य, स्पर्शरहितस्याशुभकर्माणि निर्वहतः, त्रिशङ्कोरिवोभयलोकभ्रष्टस्य नक्तंदिनमर्वाक्शिरसस्तिष्ठतः, वाजिन इव कवलवशेन सुखवाह्यमात्मानं विदधानस्य, अनशनशायिन इव हृदयस्थापितजीवनाशस्य, शरीरं क्षपयतः शुभ इव निजदारपराङ्मुखस्य, जघन्यकर्मलग्नमात्मानं ताडयतः, प्रेतस्येवानुचितभूमिदीयमानान्नपिण्डस्य, बलिभुज इव जिह्वालौल्योपयुक्तपुरुषवर्चसो वृथा विहितायुषो जीवतः, श्मशानपादपानिव पिशाचस्य दग्धभूत्या परुषीकृतान्राज-

---

ष्टजन्मा । वृक्षाङ्कुरः स च सर्वो निधिप्रभावादधोमुखीभावः । प्रणामः । अमार्गणस्यायाचकस्य च अतिविप्रकृष्टैः प्राकृतैः । पूर्वं विवृतः स्वतश्च लब्धदर्शन एव विसर्जितस्यात एवोद्वेगं मन्युं व्रजतः । मार्गणः शरश्चातिविप्रकृष्टं कर्णान्ते विवृतः। सार्जित उद्वतवेगं याति । अमकरकेतोरशङ्कारिणोऽपि । अकालेऽप्रस्ताव उपसर्पणं यस्य सः । तथा । अप्रकुपितस्येश्वरस्य हर्षस्य दृष्ट्या दग्धः । ततो विशेषणसमासः। प्रलयः प्रकृष्टो लयो भित्त्यादिश्लिष्टत्वम्, नाशश्च । सदृशः । कपेर्लोहितमुक्तत्वात्। **प्रतिदिवसेत्यादि** । ब्रह्मघ्नो हतब्राह्मणः कपालमहरहर्वन्दते । त्रिशङ्कुर्नाम चण्डालभावमास्थितोपि याजयित्वा विश्वामित्रेण स्वर्गमारोपितः कुपितेनेन्द्रेण हुंकारतर्जितः । स च निपित्सुरेव विश्वामित्रप्रभावाद्ध्रुवमनवाप्य तत्रैव पूर्वं लम्बमानोऽद्यापि स्थितः । कवलो ग्रासः । सुखेन वाह्यम् । बवयोरैक्यात् । सुखेभ्यो बहिर्भूतम्, कृच्छ्रेण व्याप्यं च हृदये स्थापिता जीवने वृत्त्युपाय आशा येन, जीवस्य नाशश्च । जघन्यं निकृष्टम्, जघने भवं जघन्यं च सुतम् । अनुचितायामयशस्यायां भूमौ । चितायाः पश्चादनुचितम् । बलिभुजः काकस्य । लौल्यं चापलम्, अभिलाषश्च । उपयुक्तं व्ययीकृतम्, भुक्तं च । वर्चस्तेजः, विष्ठा च । वृथा

वल्लभानुपसर्पतः, विपरीतजिह्वाजनितमाधुर्यैरोष्ठमात्रप्रकटितरागै राजशुकालापैः शिशोरिव मुग्धविलोभ्यमानस्य, वेतालस्येव नरेन्द्रप्रभावाविष्टस्य न किंचिन्नाचरतः, चित्रधनुष इवालीकगुणाध्यारोपणैकक्रियानित्यनम्रस्य निर्वाणतेजसः, संमार्जनीसमुपार्जितरजसोऽवकरकूटस्येव निर्माल्यवाहिनः, कफविकारिण इव दिने दिने कटुकैरुद्वेज्यमानस्य, सौगतस्येवार्थशून्यविज्ञप्तिजनितवैराग्यस्य काषायाण्यभिलषतः, निशास्वपि मातृबलिपिण्डस्येव दिक्षु विक्षिप्यमाणस्य, अशौचगतस्येव कुशयनजनितसमधिकतरदुःखवृत्तेः, तुलायन्त्रस्येव पश्चात्कृतगौरवस्य तोयार्थमपि नमतः, अतिकृपणस्य शिरसा केवलेनासंतुष्टस्य वचसापि पादौ स्पृशतः, निर्दयवेत्रिवेत्रताडनत्रस्तयेव त्रपया त्यक्तस्य, दैन्यसंकोचितहृदयहृतावकाशयेवाहोपुरुषिकया परिवर्जितस्य, कुत्सितकर्माङ्गीकरणकुपितयेवोन्नत्या वियुक्तस्य, धनश्रद्धया क्लेशानुपार्जयतः, स्ववृद्धिबुद्ध्यावमानं वर्धयतो मूढस्य, सत्यपि विविधकुसुमाधिवाससुरभिणि वने तृष्णाञ्जलिमुपरचयतः, कुलपुत्रस्यापि कृतागस इव भीतभीतस्य समीपमुपसर्पतः, दर्शनीयस्याप्यालेख्यकुसुमस्येव निष्फलजन्मनः, विदुषोऽपि वैधेयस्येवापशब्दमुखस्य, शक्तिमतोऽपि श्वित्रिण इव सं-

विहितं कृतमायुर्यस्य, विभ्यः पक्षिभ्य हितमायुर्यस्य, वृथा निष्फलं जीवतः पिशाचस्य मूर्खस्य । भूतिः संपत्, भस्म च राजानः शुका इव राजशुकाश्च । राजशुकभेदाः । नरेन्द्रो राजा, मन्त्रविच । गुण उत्कर्षः, ज्या च गुणः । निर्वाणं प्रशान्तम्, निर्गतबाणतेजश्च । अवकरकूटो मार्जनीक्षिप्तो रजस्तृणादिसंघातः । उक्तं च—'संमार्जनी शोधनी स्यात्संकरोऽवकरस्तथा । क्षिप्तः' इति । अमाल्यवाहित्वेन निःश्रीकत्वमुच्यते । कटुकैः प्रतिहारैः, तीक्ष्णैश्च । अर्थशून्यया निष्फलया । विज्ञप्त्या प्रार्थनया कृतोद्वेगस्य । बौद्धानामपि बाह्यवस्तुशून्यानि विज्ञानानि । अशौचं मृतकादि । कुशयनं कुत्सितशय्या, भूमिश्च कुः । पश्चात्कृतं वर्जितम्, पृष्ठतश्च कृतम् । गौरवं महत्त्वम् गुरुत्वं च । तोयशब्दो जलोपलक्षणार्थः । तोयं जलं च पादस्पर्शनं पथोऽपि । त्रपया लज्जया । 'आहोपुरुषिका दर्पाद्या स्यात्संभावनात्मनि' । स्वमात्मा, धनं च । उक्तं च—'स्वो जातावात्मनि स्वं त्रिष्वात्मीये स्वो स्त्रियां धने' इति । अधिवासः सौगन्ध्यम्, भावना च । वनं काननम्, जलं च । तृष्णा धनस्पृहा मृगतृष्णा च । विदुषो जानानस्य, पण्डितस्य । वैधेयस्य मूर्खस्य । अपगतशब्दं मुखं यस्य, लक्ष्यहीनश्च । शब्दोऽपशब्दः । श्वित्रं कुष्ठव्याधिभेदः ।

कोचितकरयुगलस्य, समसमुत्कर्षेषु निरग्निपच्यमानस्य, नीचसमीकरणेषु निरुच्छ्वासं म्रियमाणस्य, परिभवैस्तृणीकृतस्य, दुःखानिलेनानिर्वृतेः ज्वलतः, भक्तस्याप्यभक्तस्य, निरूष्मणः संतापयतो बन्धून्, विमानस्याप्यगतिकस्य, च्युतगौरवस्याप्यधस्ताद्गच्छतः, निःसत्त्वस्यापि महामांसविक्रयं कुर्वतः, निर्मदस्यास्वतन्त्रवृत्तेः, अयोगिनो ध्यानवशीकृतात्मनः, शय्योत्थायं प्रणमतो दग्धमुण्डस्य, गोत्रविदूषकस्य नक्तंदिनं नृत्यतो मनस्विजनं हासयतः, कुलाङ्गारस्य वंशं दहतः, नृपशोः तृणेऽपि लब्धे कन्धरामवनमयतः, जठरपरिपूरणमात्रप्रयोजनजन्मनो मांसपिण्डस्य गर्भरोगस्य मातुः, अरपुण्यानां कर्मणामाचरणाद्भृतकस्य किं प्रायश्चित्तम्, का प्रतिपत्तिक्रिया, क्व गतस्य शान्तिः, कीदृशं जीवितम्, कः पुरुषाभिमानः, किंनामानो विलासाः, कीदृशी भोगश्रद्धा, प्रबलपङ्क इव सर्वमधस्तान्नयति दारुणो दासशब्दः। धिक्तदुच्छ्वसितमुपयातु तद्धनं निधनमभवनिर्भूतेरस्तु तस्याः नमो भगवद्भ्यस्तेभ्यः सुखेभ्यस्तस्यायमञ्जलिरैश्वर्यस्य तिष्ठतु दूर एव सा श्रीः शिवं स परिच्छदः करोतु यदर्थमुत्तमाङ्गं गां गमिष्यति मुखप्रियरतः क्लीबो पूतिमांसमयः कृमिरगण्यमानो नरकः, पादरजोधूसरोत्तमाङ्गो जङ्गमः पादपीठः पुंस्कोकिलः काकुकणितेषु, शिखी सुखकरकेकासु, स्थू-

---

समास्तुल्यशीलाः। अनिर्वृतेरप्रतीतेः अनिर्वृतेर्गमनत्यागाभावाच्च। भक्तस्य हितैषिणः। अभक्तस्यालब्धभागस्य। विरोधः स्पष्टः सर्वत्र। ऊष्मा गर्वोऽपि। विमानस्य विगतमानस्य, व्योमयानस्य च। गतिरुपायोऽपि। गौरवमादरोपि। महामांसं स्वकायोपि। मदो गर्वः क्षीबता च। अयोगिनो विपरीतदैववतः दरिद्रस्येत्यन्ये, अप्राप्तबलस्येत्यन्ये, चित्तवृत्तिनिरोधाभाववतश्च। दग्धमुण्डस्यातपहतशिरसः, व्रतिभेदश्च दग्धमुण्डः। विदूषको नायकस्य, नर्मसुहृच्च। वंशो वेणुः। दारुणो दुःसहः, काष्ठस्य च। सर्वमस्त्विति योजना। मुखप्रियेत्यादावेवंविधः सेवकोऽपि यदि मर्त्यमध्ये गण्यते तद्राजिलोपि भोगी कथं न भवति। पुलाको व्युप्तः कलमः कथं न स्यादिति संबन्धः। तपस्वी वराकोऽपि। सुखे विद्यमानस्य सुखदायिनः। रतः रक्तः। मुख आरम्भे, वदने च। प्रियं रतं मोहनं यस्य। क्लीबोऽशक्तः, शरण्यश्च। पूति दुष्टगन्धम्। अगण्यमानो न गणनार्हः। कुत्सितो नरो नरकः, अगण्यश्च मानो यस्य सोऽगण्यमानो नरको भौमनामा। अवीच्यादिर्वा। काकुकणितम्, मधुरवचनम्। भिन्नध्वनिर्वक्त्वकथनं निर्व्यापा-

लकूर्मः क्रोडकपणेषु, श्वा नीचचाटुकरणेषु, वेणुर्मूर्च्छनासु, वेश्याकायः करणबन्धक्लेशेषु, पलालं सत्त्वशालिषु, कृकलासः शिरोविडम्बनासु, जाहक आत्मसंकोचनेषु, प्रतिपादकः पादसंबाहनासु, कटुकः करतलताडनेषु, वीणादण्डः कोणाभिघातेषु, वराकः सेवकोऽपि, मर्त्यमध्ये राजिलोऽपि वा, भोगी पुलाकोऽपि वा, कलमः वरं क्षणमपि कृता मानवता मानवता न मतो नमतस्त्रैलोक्याधिराज्योपभोगोऽपि मनस्विनः । तदेवमभिनन्दितास्मदीयप्रणयो देवोऽपि दिवसैः कतिपयैरेव परागतः प्राग्ज्योतिषेश्वर इति करोतु चेतसि' इत्युक्त्वा तूष्णीमभूदचिराच्च नमस्कृत्य निर्जगाम ।

राजापि रजनीं तां कुमारदर्शनौत्सुक्यस्वीकृतहृदयः समनैषीत् । आत्मार्पणं हि महतामसूलमन्त्रमयं वशीकरणम् । प्रभाते च प्रभूतं प्रतिप्राभृतं प्रधानप्रतिदूताधिष्ठितं दत्त्वा हंसवेगं प्राहिणोत् । आत्मनापि ततः प्रभृति प्रयाणकैरनवरतैरभ्यमित्रं प्रावर्तत । कदाचित्तु राज्यवर्धनभुजबलोपार्जितमशेषं मालवराजसाधनमादायागतं समीप एवावासितं लेखहारकाद्भण्डिमश्रृणोत् । श्रुत्वा चाभिनवीभूतभ्रातृशोकहुताशनः कातरहृदयो बभूव मूर्च्छान्धकारमिव विवेशातिष्ठच्च समुत्सृष्टसकलव्यापारः प्रतीहारनिवारणनिभृतनिःशब्दपरिजने निजमन्दिरे सराजकपरिवारस्तदागमनमुदीक्षमाणो मुहूर्तम् ।

अथ भण्डिरेकेनैव वाजिना कतिपयकुलपुत्रपरिवृतो मलिनवासा रिपुशरशल्यपूरितेन, निखातबहुलोहकीलकपरिकररक्षित-

रत्वाच्छोकाद्वा । कृकलासोऽप्यनवरतं शिर उन्नमयन्नास्ते । आखुर्जाहकः प्राणिभेदः, कूर्म इत्यन्ये । मूर्च्छना मोहः, स्वराणां विशिष्टा स्थितिश्च । करणं शरीरम्, मन्त्रो वा । कामशास्त्रोदितकरणानि । कोणो लगुडश्च । यथा । शालिषु पलालमप्रयोजनं तदसौ । राजिलो डिण्डिभाख्यो निर्विषः सर्पः । पुलाकः फलदरिद्रः । शालिः श्यामाकप्रायः । मानवताहंकारिणा, मानवस्य कर्म मानवता पौरूषम् । नमतः नेष्टः नमतः प्रणामं कुर्वतः ।

मूलान्योषधयः । साधनं हस्त्यादि । निभृतः सनयः ।

स्फुटनेनेव हृदयेन, हृदयलग्नैः स्वामिसत्कृतैरिव श्मश्रुभिः, शुचं समुपदर्शयन्दूरीकृतव्यायामशिथिलभुजदण्डदोलायमानमङ्गलवलयैकशेषालंकृतिरनादरोपयुक्तताम्बूलविरलरागेण शोकदहनदह्यमानस्य हृदयस्याङ्गारेणेव, दीर्घनिश्वासवेगनिर्गतेनाधरेण शुष्यता स्वामिविरहविधृतजीवितापराधवैलक्ष्यादिव, बाष्पवारिपटलेन पटेनेव प्रावृतवदनः, विशन्निव दुर्बलीभूतैः स्वाङ्गमपत्रपयाङ्गैः, वमन्निव च व्यर्थीभूतभुजोष्माणमायतैर्निश्वसितैः, पातकीव, अपराधीव, द्रोहीव, मुषित इव, छलित इव, यूथपतिपतनविषण्ण इव वेगदण्डवारणः, सूर्यास्तमयनिःश्रीक इव कमलाकरः, दुर्योधननिधनदुर्मना इव द्रौणिः, अपहृतरत्न इव सागरो राजद्वारमाजगाम। अवतीर्य च तुरङ्गमादवनतमुखो विवेश राजमन्दिरम्। दूरादेव च विमुक्ताक्रन्दः पपात पादयोः॥

अवनिपतिरपि दृष्ट्वा तमुत्थाय विरलैः पदैः प्रत्युद्गम्योत्थाप्य च गाढमुपगूह्य कण्ठे करुणमतिचिरं रुरोद। शिथीलीभूतमन्युवेगश्च पुरेव पुनरागत्य निजासने निषसाद। प्रथमप्रक्षालितमुखे च भण्डौ मुखमक्षालयत्। समतिक्रान्ते च कियत्यपि काले भ्रातृमरणवृत्तान्तमप्राक्षीत्। अथाकथयच्च यथावृत्तमखिलं भण्डिः। अथ नरपतिस्तमुवाच—'राज्यश्रीव्यतिकरः कः' इति। स पुनरवादीत्—'देव, देवभूयं गते देवे राज्यवर्धने गुप्तनाम्ना च गृहीते कुशस्थले देवी राज्यश्रीः परिभ्रश्य बन्धनाद्विन्ध्याटवीं सपरिवारा प्रविष्टेति लोकतो वार्तामशृणवम्। अन्वेष्टारस्तु तां प्रति प्रभूताः प्रहिता जना नाद्यापि निवर्तन्ते' इति। तच्चाकर्ण्य भूपतिरब्रवीत्—'किमन्यैरनुपदिभिः यत्र सा तत्र परित्यक्तान्यकृत्यः स्वयमहं यास्यामि। भवानपि कटकमादाय प्रवर्ततां गौडाभिमुखम्।' इत्युक्त्वा चोत्थाय स्नानभुवमगात्। कारितशोकश्मश्रुवपनकर्मणा च प्रतीहारभवनस्नातेन, शारीरकवसनकुसुमाङ्गरागालंकारप्रेषणप्रकटितप्रसादेन भण्डिना सार्धमभुक्त निनाय च तेनैव सह वासरम्।

अथेत्यादिराजद्वारं भण्डिराजगामेति संबन्धः। **श्मश्रुरिति**। शोकवशेन ततो विक्षिप्तत्वाद्वा।

अथापरेद्युरुषस्येव भण्डिर्भूपालमुपसृत्य व्यज्ञापयत्—'पश्यतु देवः श्रीराज्यवर्धनभुजबलार्जितं साधनं सपरिबर्हं मालवराजस्य' इति । नरपतिना स 'एवं क्रियताम्' इत्यभ्यनुज्ञातो दर्शयांबभूव । तद्यथा—अनवरतगलितमदमदिरामोदमुखरमधुकरजूटजटिलकरटपट्टपङ्किलगण्डान्, गण्डशैलानिव जङ्गमान्, गम्भीरगर्जितरवाञ्जलधरानिव महीमवतीर्णानुत्फुल्लसप्तच्छदवनामोदमुचः, शरद्दिवसानिव पुञ्जभूतान्, अनेकसहस्रसंख्यान्करिणः चारुचामीकरचित्रचामरमण्डलमनोहरांश्च हरिणरंहसो हरीन्, बालातपविसरवर्षिणां च किरणैरनेकेन्द्रायुधीकृतदशदिशामलंकाराणां विशेषान्, विस्मयकृतः स्मरोन्मादितमालवीकुचपरिमलदुर्ललितांश्च निजज्योत्स्नापूरप्लावितदिगन्तानपि तारान्हारान्, उडुपतिपादसंचयशुचीनि निजयशांसीव बालव्यजनानि, जातरूपमयनालं च निवासपुण्डरीकमिव श्रियः श्वेतातपत्रम्, अप्सरस इव बहुसमररससाहसानुरागावतीर्णा वारविलासिनीः, सिंहासनशयनासंदीप्रभृतीनि राज्योपकरणानि, कालायसनिगडनिश्चलीकृतचरणयुगलं च सकलं मालवराजलोकमशेषांश्च ससंख्यालेख्यपत्रान्, सालंकारापीडपीडान् कोपकलशान् । अथालोच्य तत्सर्वमवनिपालः स्वीकर्तुं यथाधिकारमादिक्षदध्यक्षान् । अन्यस्मिंश्चाह्नि हयैः स्वसारमन्वेष्टुमुच्चचाल विन्ध्याटवीमवाप च परिमितैरेव प्रयाणकैस्ताम् ।

अथ प्रविशन्दूरादेव दह्यमानषष्टिकबुसविसरविसारिविभावसूनां वन्यधान्यबीजधानीनां धूमेन धूसरिमाणमादधानैः, शुष्कशाखासंचयरचितगोवाटवेष्टितविकटवटैः, व्यापादितवत्सरूपकरोषरचितव्याघ्रयन्त्रैः, यन्त्रितवनपालहठह्रियमाणपरग्रामीणकाष्ठिककुठारैः, गहनतरुषण्डनिर्मितचामुण्डामण्डपैर्वनप्रदेशैः, प्रकाशमानमटवीप्रायप्रान्ततया कुटुम्बभरणाकुलैः कुदालप्रायकृषिभिः कृषीवलैरबलवद्भिरुच्चभागभाषितेन भज्यमानभूरिशालिखलक्षेत्रखण्डलकमल्पावकाशैश्च कापिलैः, कालायसैरिव कृष्णमृत्तिकाकठिनैः, स्थानस्थानस्थापितस्थाणूत्थितस्थूलपल्लवैः दुरुपगमश्यामाकप्ररूढिभिरलम्बुसबहुलैः, अविरहितकोकिलाक्षक्षुपैर्विरलविरलैः केदारैः,

कृच्छ्रकृष्यमाणैर्नातिप्रभूतप्रवृत्तगतागताप्रहतभुवमुपक्षेत्रमुपरचितैरुच्चैर्मञ्चैश्च सूच्यमानश्वापदोपद्रवं, दिशि दिशि च प्रतिमार्गद्रुमकृतानां पथिकपादप्रस्फोटनधूलिधूसरैर्नवपल्लवैर्लाञ्छितच्छायानाम्, अटवीसुलभसालकुसुमस्तवकाञ्चितनवखातकूपिकोपकण्ठप्रतिष्ठितनागस्फुटानामच्छिद्रकटकल्पितकुटीरकाणाम्, कुटिलकीटवेणीवेष्ट्यमानशकुशारशरावश्रेणीश्रितानाम्, आव्वगजनजग्धजम्बूफलास्थिशबलसमीपभुवाम्, उद्धूलितधूलीकदम्बस्तबकप्रकरपुलकिनीनाम्, कण्टकितकर्करीचक्राक्रान्तकाष्ठमञ्चिकामुषिततृषाम्, तिम्यत्तलशीतलशिकतिलकलशीशमितश्रमाणाम्, आश्यानशैवलश्यामलितालिञ्जरजायमानजलजडिम्नाम्, उदकुम्भाकृष्टपाटलशर्कराशकलशिशिरीकृतदिशाम्, घटमुखघटितकटहारपाटलपुष्पपुटानाम्, शीकरपुलकितपल्लवपूलीपाल्यमानशोष्यसरसशिशुसहकारफलजूटीजटिलस्थाणूनाम्, विश्राम्यत्कार्पटिकपेटकपरिपाटीपीयमानपयसामटवीप्रवेशप्रपाणां शैत्येन त्याजयन्तमिव ग्रैष्ममूष्माणं क्वचिदन्यत्र ग्राहयन्तमिवाङ्गारीयदारुसंग्रहदाहिभिः व्योकारैः, सर्वतश्च प्रातिवेश्यविषयवासिना समासन्नग्रामगृहस्थापितस्थविरपरिपाल्यमानपाथेयस्थगितेन कृतदारुणदारुव्यायामयोग्याङ्गाभ्यङ्गेन स्कन्धाध्यासितकठोरकुठारकण्ठलम्बमानप्रातराशपुटेन पाटच्चरप्रत्यवायप्रतिपन्नपटच्चरेण कालवेत्रकत्रिगुणव्रततिवलयपाशग्रथितग्रीवाग्रथितैः पत्रवीटावृतमुखैः, पीतकूटैरूढवारिणा पुरःसरबलद्बलीवर्दयुगसरेण नैकटिककुटुम्बिकलोकेन काष्ठसंग्रहार्थमटवीं प्रविशता श्वापदव्यधनव्यवधानबहलीसमारोपितकुटीकृतकूटपाशैश्च गृहीतमृगतन्तुतन्त्रीजालवलयवागुरैः, बहिर्व्यापैर्विचरद्भिरंसावसक्तवीतंसव्यालम्बमानबालपाशिकैश्च संगृहीतग्राहकक्रकरकपिञ्जलादिपञ्जरकैः शाकुनिकैः, संचरद्भिश्च्युतलासकलेशलिप्तलतावधूलट्टालम्पटानां चपेटकैः, पाशकशिशूनामटद्भिः तृणस्तम्बान्तरिततित्तिरितरलायमानकौलेयककुलचाटुकारैश्च विहगमृगयां मृगयुयुवभिः क्रीडद्भिः, परिणतचक्रवाककण्ठकषायरुचां शीधव्यानां वल्कलानां कलापान्, नातिचिरोद्धृतानां च धातुत्विषां धातकीकुसुमानां गोणीरगणिताः पिचव्यानां चातसीगणपट्टमूलकानां पुष्कलान्संभा-

रान्, भारांश्च मधुनो माक्षिकस्य मयूराङ्गजस्याक्लिष्टमधूच्छिष्टचक्रमालानां लम्बमानलामज्जकजूटजटानामपत्वचां खदिरकाष्ठानां कुष्ठस्य कठोरकेशरिसटाभारबभ्रुणश्च रोध्रस्य भूयसो भारकान्, लोकेनादाय व्रजता प्रविचितविविधवनफलपूरितपिटकमस्तकाभिश्चाभ्यर्णग्रामगत्वरीभिस्त्वरमाणाभिर्विक्रयचिन्ताव्यग्राभिर्ग्रामेयिकाभिर्व्याप्तदिगन्तरमितस्ततश्च युक्तशूरशकुरशाकराणां पुराणपांसूत्किरकरीषकूटवाहिनीनां धूर्गतधूलिधूसरसैरिभसरोषस्वरसार्यमाणानां संक्रीडच्चटुलचक्रचीत्कारिणीनां शकटश्रेणीनां संपातैः, संपाद्यमानदुर्बलोर्वीविरूक्षक्षेत्रसंस्कारमारक्षक्षिप्तदान्तवाहकदण्डोड्डीयमानहरिणहेलालङ्घिततुङ्गवैणववृत्तिभिश्च निखातगौरकरङ्कशङ्कशङ्कितशशकशकलिततुङ्गशुङ्गैः, प्रयत्नप्रभृतविशङ्कटविटपैर्वाटैरक्षवैर्बहुभिः श्यामायमानोपकण्ठमतिविप्रकृष्टान्तरैर्मरकतस्निग्धस्नुहावाटवेष्टितैः, कार्मुककर्मण्यवंशविटसंकटैः, कण्टकितकरञ्जराजिदुष्प्रवेश्यैः, उरुबूकवचावङ्ककसुरससूरणशिग्रुग्रन्थिपर्णगवेधुकागर्मुद्रुमगहनगृहवाटिकैः, निखातोच्चकाष्ठारोपितकाष्ठालुकलताप्रतानविहितच्छायैः, परिमण्डलबदरीमण्डपकतलनिखातखादिरकीलबद्धवत्सरू-

---

मधुनः क्षौद्रस्य । मयूराङ्गजस्य बर्हिपिच्छस्य । मधूच्छिष्टं सिक्थकम् । **लामज्जकमिति** । 'लामज्जकं लघुलयम्' इत्यमरः । उशीरभेद इत्यन्ये । बभ्रुणः कपिलस्य। **रोध्रस्येति** । रोध्रो लोध्रः । शाबरकः 'शिल्लकः शिल्लकस्तरः । तिरीटः कानहीरश्च शिल्लो शाबरपादपः' । शकुरास्तरुणाः । शाकरा वलीवर्दाः । करीषं शुष्कगोमयम् । उक्तं च—'गोविड्गोमयमस्त्रियाम्। तत्तु शुष्कं करीषोऽस्त्री' इति । सैरिको हालिकः । संक्रीडत्कूजत् । वृतिर्वाटोपान्ते लताकृतः प्राकारमयः । करङ्कः कङ्कालः । तदुपलक्षिताः शङ्कवः शुङ्गोऽग्रभागः । वृतिरित्यन्ये । प्रभृताः पोषिताः । विशङ्कटा विस्तीर्णाः । विटपाः शाखाः । अतिविप्रकृष्टेत्यादि अटवीकुटुम्बिनां गृहैरुपेतमिति वनग्रामविशेषणम् । स्नुहा सुधावृक्षः । उक्तं च—'स्नुक्स्नुहा च सुधावृक्षः शुंभो निस्त्रिंशपत्रकः । समन्तदुग्धी गण्डोरी सेहुण्डो वज्रकन्दकः ॥' इति । कर्मणि साधुः कर्मण्यः । करञ्जो नक्तमालः । उक्तं च—'करञ्जो नक्तमालः स्यात्प्रतीतश्चिरबिल्वकः' इति । उरुबूक एरण्डः । उक्तं च—'उरुबूकस्तथैरण्डो रुचको वातनाशनः । पञ्चाङ्गुलो वर्धमानश्चित्रो गन्धर्वपात्तथा ॥' वचा उग्रगन्धा । उक्तं च—'वचोग्रगन्धा गोलोमी जाटिलो ग्रासलोमशा' इति वल्लको हरितकविशेषः । सुरसा भूतघ्नी । उक्तं च—'सुरसा तुलसी द्रुः स्यादलसो बहुमञ्जरी । अपेतो राक्षसो गौरी भूतघ्नी देवदुन्दुभिः ।' इति । सूरणः कन्दविशेषः । शिग्रुः सौ-

पैः; कथमपि कुक्कुटरटितानुमीयमानसंनिवेशैरङ्गनाशस्तिस्तम्भतल-विरचितक्षिप्रपूपिकावापिकैर्विकीर्णबदरपाटलपटलैः, वेणुपोटदल-नलशरमयवृतिविहितभित्तिभिः, किंशुकरोचनारचितमण्डलमण्ड-पबल्वजबद्धाङ्गाररराशिभिः, शाल्मलिफलतूलसंचयबहुलैः, संनिहि-तनलशालिशालूकखण्डकुमुदबीजवेणुतण्डुलैः, संगृहीतमालबीजैः, भस्ममलनम्लानकाश्मर्यकूटव्याधृतकटैराश्यानराजादनमदनफल-स्फीतैर्मधूकासवमद्यप्रायैः, कुसुम्भकुम्भगण्डकुसूलैरविरहितराज-मापत्रपुषकर्कटिकाकूष्माण्डालाबुबीजैः, पोष्यमाणवनविडालमा-लुधाननकुलशालिजातजातकादिभिरटवीकुटुम्बिनां गृहैरुपेतं वन-ग्रामकं ददर्श तत्रैव चावसदिति ।

इति श्रीबाणभट्टकृतौ हर्षचरिते छत्रलब्धिर्नाम
सप्तम उच्छ्वासः ।

भाजनः। उक्तं च—'सौभाजनः कृष्णगन्धा मुखभञ्जोऽथ शिग्रुकः' इति। ग्रन्थिपर्ण मुस्ताकारः सुगन्धिः कन्दविशेषः । उक्तं च—'ग्रन्थिपर्णोऽशुकं बर्हिपुष्पं स्थाणेय-कुन्दुरे' इति गवेधुका तृणधान्यभेदः। गर्मुछतागुल्मः । 'अग्रकाण्डे स्तम्बगुल्मौ'इति काष्ठालुकलता अलाबुवल्ली । खल्पावत्सा वत्सरूपा । संनिवेशो रचना अगस्ति-र्मुनितरुः। पक्षिपूपिका पक्षाणां वेत्रवलानि भाण्डभेदाः । पोटः शकलः। किंशुकानि पलाशवृक्षपुष्पाणि । बल्वजास्तृणभेदाः । बन्धकाष्ठा इति प्रसिद्धाः । शाल्मली रक्तपुष्पा । उक्तं च—'शाल्मली रक्तपुष्पा च कुकुटी स्थिरजीविता । पिच्छि-ला तूलिनी मोचा कण्टकाढ्या सुपूरिणी ॥' इति । तूलं कर्पासः । नलशालिः शालिभेदः । शालूकं पद्ममूलम् । उक्तं च—'पद्ममूलं तु शालूकं सकिलं तत्किरात-कम् । शालीनं पद्मकन्दं च जालालूकं निगद्यते ॥' इति । काश्मर्यः कश्मीरीहीरः। 'काश्मीरी मधुमल्यपि । श्रीपर्णी सर्वतोभद्रा गाम्भीरी कृष्णमृत्तिका ॥' इति । कूटाः कुनालानि। राजादनः कपीष्टः। उक्तं च—'क्षीरोदकस्तु राजन्यः क्षीरमृत्स्नः कपीनृपः । राजादनो दृढस्कन्धः कपीष्टः प्रियदर्शनः ॥' इति । मदनो रोधः । उक्तं च—'मदनः शल्यको रोधः गालः पिण्डीतकः फलम् । भसरः करहाटश्च सुमनोऽतिसुपुष्पकः ॥' इति । मधूको गुडपुष्पः । उक्तं च—'गुडपुष्पो रोध्रपुष्पो मालप्रस्थोऽथ माधवः' इति । राजमाषो निष्पावः । त्रपुसं लाङुकः । कार्कटि-कादयः प्रसिद्धाः । मालुधाना मालुकावधाख्याः प्राणिभेदाः, नकुलादयश्च ।

इति श्रीशंकरकविरचिते हर्षचरितसंकेते सप्तम उच्छ्वासः ।

अष्टम उच्छ्वासः ।

सहसा संपादयता मनोरथप्रार्थितानि वस्तूनि ।
दैवेनापि क्रियते भव्यानां पूर्वसेवेव ॥ १ ॥
विद्वज्जनसंपर्को नष्टेष्टज्ञातिदर्शनाभ्युदयः ।
कस्य न सुखाय भवने भवति महारत्नलाभश्च ॥ २ ॥

अथापरेद्युरुत्थाय पार्थिवस्तस्माद्रामकान्निर्गत्य विवेश विन्ध्याटवीम् । आट च तस्यामितश्चेतश्च सुबहून्दिवसान् । एकदा तु भूपतेर्भ्रमत एवाटविकसामन्तशरभकेतोः सूनुर्व्याघ्रकेतुर्नाम कुतोऽपि कज्जलश्यामलश्यामलतावलयेनाधिललाटमुच्चैः कृतमौलिबन्धम्, अन्धकारिणीमकारणभुवा भ्रुकुटिभङ्गेन त्रिशाखेन त्रियामामिव साहससहचारिणीं ललाटस्थलीं सदा समुद्वहन्तम्, अवतंसितैकशुकपक्षकप्रभाहरितायमानेन पिनद्धकाचरकाचमणिकर्णिकेन श्रवणेन शोभमानम्, किंचिच्चुल्लस्य प्रविरलपक्ष्मणश्चक्षुषः सहजेन रागरोचिषा रसायनरसोपयुक्तं तारक्षवं क्षतजमिव क्षरन्तम्, अवनाटनासिकम्, चिपिटाधरम्, चिकिनचिबुकम्, अहीनहनूत्कटकपोलकूटास्थिपर्यन्तमीषदवाग्ग्रीवाबन्धम्, स्कन्नस्कन्धार्धभागम्, अनवरतकोदण्डकुण्डलीकरणकर्कशव्यायामविस्तारितेनां-

---

सहसेत्यादियुगलकेन श्रीहर्षाभ्युदयशिवाकारमित्रराज्यश्रीप्राप्त्येकावलीलाभान्सूचयति । भव्यानां पूर्वसेवा दैवेन शुभसंपादनेन । शुभाभ्यासभावितचिन्ता भूयोऽपि क्रियत इति प्रतिपाद्यते ।

एकदा त्विल्यादौ व्याघ्रकेतुर्नाम कुतोऽपि शबरयुवानमादाय भूपतेरर्थात्समीपमाजगामेति संबन्धः । अटव्यां भव आटविकः । श्यामा गन्धप्रियङ्गुः । मौलयः केशाः । अन्धकारिणीं कृष्णाम् । त्रिशाखेन त्रिरेखेन । पिनद्धो बद्धः । काचरस्य कपिलस्य । काचमणेः कर्णिका यत्र तत्तेन । चुल्लश्चिल्लः । उक्तं च—'स्युः क्लिन्नाक्षे चुल्लचिल्लपिल्लाः क्लिन्नेऽक्षिण चाप्यमी' इति । 'तरक्षुस्तु मृगादनः' । आरण्यश्चेत्यर्थः । तस्येदं तारक्षवम् । तच्च क्वचिद्रसायनेनोपयुज्यते । अवनाटो निम्नः । चिपिटः स्थूलः, ईषल्लम्बश्च । चिकिनं स्थूलेषद्रूक्षम् । चिबुकमधराधः । उक्तं च—'अधस्ताच्चिबुकं गण्डो कपोलौ तत्परा हनुः' इति । अवाग्ग्रीवनता । ग्रीवा कंधरा । स्कन्नः शुष्कः, लम्बमानो वा, उन्नतो वा । 'स्कन्धो भुजशिरोंऽसोऽस्त्री' । अंसलेन बलवता । उरसा वक्षसा । अजगरः सर्पभेदः । दाधिमाणं दीर्घलम् । वराहः सूकरः । नागदमनो विषहर ओषधिभेदः । जूटिका लघुमूलम् । वाटिकाः पूल्यः । गोदन्तः

सलेनोरसा हसन्तमिव तटशिलाप्रथिमानम्, विन्ध्यगिरेरजगरगरीयसा च भुजयुगलेन लघयन्तम्, तुहिनशैलशालद्रुमाणां द्राघिमाणम्, वराहबालवलितबन्धनाभिर्नागदमनजूटिकावाटिकाभिर्जटिलीकृतपृष्ठे प्रकोष्ठे प्रतिष्ठां गतं गोदन्तमणिचित्रं त्रापुषं वलयं बिभ्राणम्, अतुन्दिलमपि तुण्डिभम्, अहीरमणीचर्मनिर्मितपट्टिकयोश्चित्रचित्रकत्वक्कारकितपरिवारया संकुचजाजिनजालकितया शृङ्गमयमसृणमुष्टिभागभास्वरया पारदरसलेशलिप्तसमस्तमस्तकया कृपाण्या करालितविसंकटकटिप्रदेशम्, प्रथमयौवनोल्लिख्यमानमध्यभागभ्रष्टमांसभरितावि स्थवीयसावूरुदण्डौ दधतम्, अच्छभल्लचर्ममयेन भल्लीप्रायप्रभूतशरभृता शवलशार्दूलचर्मपटपीडितेनालिकुलकालकम्बललोम्ना पृष्ठभागभाजा भस्त्राभरणेन पल्लवितमिव कार्श्यमुपदर्शयन्तम्, उत्तरत्रिभागोत्तंसितचापपिच्छचारुशिखरे खदिरजटानिर्माणे खरप्राणे प्रचुरमयूरपित्तपत्रलताचित्रितत्वचि त्वचि सारगुरुणि वामस्कन्धाध्यासितधनुषि दोषि लम्बमानेनावाक्शिरसा शितशरकृत्तैकनलकविवरप्रवेशितेतरजङ्घाजनितस्वस्तिकबन्धेन बन्धूकलोहितरुधिरराजिरञ्जितघ्राणवर्त्मना वपुर्विततिव्यक्तविभाव्यमानकोमलक्रोडरोमशुक्लिम्ना शशेन शिताटनीशिखाग्रग्रथितग्रीवेण चापावृत्तचञ्चूत्तानताम्रतालुना तित्तिरिणा वर्णकमुष्टिमिव मृगयाया दर्शयन्तम्, विषमविषदूषितवदनेन च विवर्णेन कृष्णाहिनेव मूलगृहीतेन व्यग्रदक्षिणकराग्रम्, जङ्गममिव गिरितटतमालपादपम्, यत्नोल्लिखितमश्मसारस्तम्भमिव भ्रमन्तम्, अञ्जनशिलाच्छेदमिव चलन्तम्, अयःसारमिव गिरेर्विन्ध्यस्य गलन्तम्, पाकलं करिकुलानाम्, कालपाशं कुरङ्गयूथानाम्, धूमकेतुं मृगराजचक्राणाम्, महानवमीमहं महिषमण्डलानाम्, हृदयमिव हिंसायाः, फलमिव पापस्य, कारणमिव कलिकालस्य, कामुकमिव कालरात्रेः, शबरयुवानमादायाजगाम । दूरे च स्थापयित्वा विज्ञापयांबभूव—'देव, सर्वस्यास्य विन्ध्यस्य स्वामी सर्वपल्लीपतीनां

सर्पभेदः। त्रपुणो विकारस्त्रापुषम्। 'त्रपुजतुनोः षुक्'। अतुन्दिलं कृशोदरम्। तुण्डिभं बृहन्नाभिकम्। 'तुन्दिवल्लिवाटेर्भः'। स हि व्यायामवशात्क्षाममध्य उन्नतनाभि-

प्राग्रहरः शबरसेनापतिर्भूकम्पो नाम । तस्यायं निर्घातनामा स्वसीयः सकलस्यास्य विन्ध्यकान्तारारण्यस्य पर्णानामप्यभिज्ञः किमुत प्रदेशानाम् । एनं पृच्छतु देवः योग्योऽयमाज्ञां कर्तुम् ।' इति कथिते च निर्घातस्तु क्षितितलनिहितमौलिः प्रणाममकरोदुपनिन्ये च तित्तिरिणा सह शशोपायनम् । अवनिपतिस्तु संमानयन्स्वयमेव तमप्राक्षीत्—'अङ्ग, अभिज्ञा यूयमस्य सर्वस्योद्देशस्य । विहारशीलाश्च दिवसेष्वेतेषु भवन्तः । सेनापतेर्वान्यस्य वा तदनुजीविनः कस्यचिदुदाररूपा नार्यागता भवेद्दर्शनगोचरम्' इति ।

निर्घातस्तु भूपालालापनप्रसादेनात्मानं बहुमन्यमानः प्रणनाम दर्शितादरं च व्यज्ञापयत्—'देव, प्रायेणात्र हरिण्योऽपि नापरिगताः संचरन्ति सेनापतेः कुत एव नार्यो नाप्येवंरूपा काचिदबला । तथापि देवादेशादिदानीमन्वेषणं प्रति प्रतिदिनमनन्यकृत्यैः क्रियते यत्नः । इतश्चार्धगव्यूतिमात्र एव मुनिमहिते महति महीधरमालामूलरुहि महीरुहां षण्डे पिण्डपाती प्रभूतान्तेवासिपरिवृतः पाराशरी दिवाकरमित्रनामा गिरिनदीमाश्रित्य प्रतिवसति स यदि विन्देद्वार्ताम्' इति । तच्छ्रुत्वा नरपतिरचिन्तयत्—'श्रूयते हि तत्रभवतः सुगृहीतनाम्नः स्वर्गतस्य ग्रहवर्मणो बालमित्रं मैत्रायणीयस्त्रयीं विहाय ब्राह्मणायनो विद्वानुत्पन्नसमाधिः सौगते मते युवैव कापायाणि गृहीतवान्' इति । प्रायशश्च जनस्य जनयति सुहृदपि दृष्टो भृशमाश्वासम् । अभिगमनीयाश्च गुणाः सर्वस्य । कस्य न प्रतीक्ष्यो मुनिभावः । भगवती वैधेयेऽपि धर्मगृहिणी गरिमाणमापादयति प्रव्रज्या किं पुनः सकलजनमनोमुषि विदुषि जने । यतो नः कुतूहलि हृदयमभूत्सततमस्य दर्शनं प्रति प्रासङ्गिकमेवेदमापतितमतिकल्याणं पश्यामः प्रयत्नप्रार्थितदर्शनं जनमिति । प्रकाशं चाब्रवीत्—'अङ्ग, समुपदिश तमुद्देशं यत्रास्ते स पिण्डपाती' इति । एवमुक्त्वा च तेनैवोपदिश्यमानवर्त्मा प्रावर्तत गन्तुम् ।

स्तुण्डिभः। अहीरमणी नामा द्विवक्रः। चित्रकच्छायया गन्धतोऽप्यपरसर्पत्रासकः। पाराशरी भिक्षुः । विन्देल्लभेत । मैत्रायणीयः शाखाया अध्येता । 'ऋग्यजुःसामनामाथ त्रयी वेदास्त्रयः स्मृताः' । ब्राह्मणायनो द्विजवरिष्ठः । समाधिरेका-

अथ क्रमेण गच्छत एव तस्य अनवकेशिनः कुड्मलितकर्णिकाराः, प्रचुरचम्पकाः स्फीतफलेग्रहयः, फलभरभरितनमेरवः नीलदलनलदनारिकेलनिकराः, हरिकेसरसरलपरिकराः कोरकनिकुरम्बरोमाञ्चितकुरबकराजयः, रक्ताशोकपल्लवलावण्यलिप्यमानदशदिशः, प्रविकसितकेसररजोविसरबध्यमानचारुधूसरिमाणः स्वरजःसिकतिलतिलकतलाः, प्रविचलितहिङ्गवः, प्रचुरपूगफलाः, प्रसवपूगपिङ्गप्रियङ्गवः,परागपिञ्जरितमञ्जरीपुञ्जयमानमधुपमञ्जुशिञ्जाजनितजनमुदः, मदमलमेचकितमुचुकुन्दस्कन्धकाण्डकथ्यमाननिःशङ्ककरिकरटकण्डूतयः, उड्डीयमाननिःशङ्कचटुलकृष्णशारशावसकलशाद्वलसुभगभूमयः, तमःकालतमतमालमालामीलितातपाः, स्तबकदन्तुरितदेवदारवः, तरलताम्बूलीस्तम्बजालकितजम्बूजम्बीरवीथयः, कुसुमरजोधवलधूलीकदम्बचक्रचुम्बितव्योमानः, बहलमधुमोक्षोक्षितक्षितयः, परिमलवटितघ्राणतृप्तयः; कतिपयदिवससूतकुक्कुटीकुटीकृतकुटजकोटराः, चटकासंचार्यमाणत्राचाटचाट-

---

ग्रता । अभिगमनार्हा अभिगमनीयाः । प्रतीक्ष्यः पूज्यः । वैधेये मूर्खे । उक्तं च—'अज्ञे मूर्खे यथाजातमूर्खवैधेयबालिशाः' इति ।

अथ क्रमेण गच्छत एवास्यैवंविधास्तरवो दर्शनमवतेरुरिति संबन्धः । अवकेशी निष्फलतरुः । उक्तं च—'वन्ध्योऽफलोऽवकेशी च कर्णिकारो द्रुमोत्पलः । परिव्याधः' इति पर्यायः । 'स्यादवन्ध्यः फलेग्रहिः' । नमेरुस्तरुभेदः । 'नलदः सल्लकी मांसा नारिकेलस्तु लाङ्गली' इत्यमरः । हरिकेसरः । उक्तं च—'वास्येयः केसरो नागकेसरः काञ्चनाह्वयः' । सरला देवदारवः । कोरकः कलिका कुरबका ये योषितामालिङ्गनैः पुष्यन्ति । रक्ताशोका ये सालक्तककामिनीचरणहताः फुल्लन्ति । केसरा वकुलाः । ये कान्तागण्डूषशीधुसेकेन विकसन्ति । तिलकाः क्षुरकाः । ये प्रसादितकामिनीदर्शनमात्रेण कुसुमिताः संपद्यन्ते । हिङ्गु रामठम् । उक्तं च—'सहस्रवेधि जतुकं बाह्लीकं हिङ्गु रामठम्' इति । पूगः क्रमुकवृक्षः । प्रसवपूगाः पूगफलसमूहाः । प्रियङ्गुः श्यामालता । 'श्यामा तु वनिताह्वया । लता गोवर्धनी गुन्द्रा प्रियङ्गुः फलिनी फली । विष्वक्सेना गन्धफली कारम्भः प्रियकश्च सः ॥' पुञ्जयमानः संहियमाणः । मुचुकुन्दाः पुष्पतरुभेदाः । करटौ गण्डौ । तमालस्तापिच्छः । उक्तं च—'शक्रपादपः पारिभद्रकः । भद्रदारु द्रुकिलिमं पीतदारु च दारु च । पूतिकाष्ठं च सप्त स्युर्देवदारुणि' इति । ताम्बूली नागवल्ली । जम्बू वृक्षभेदः । जम्भीरा दन्तशठाख्याः। उक्तं च—'स्युर्जम्बीरे दन्तशठजम्भजम्भीरजम्भलाः'इति । 'समीरणो मरुबकः प्रस्थपुष्पः फणिञ्जकः । जम्भीरे' इति । धूलीकदम्बाख्या ग्रैष्मिका वृक्ष-

केरक्रियमाणचाटवः, सहचरीचारणचञ्चुरचकोरचञ्चवः, निर्भय-भूरिभुरुण्डभुज्यमानपाककपिलपीलवः, सदाफलकट्फलफलविश-सननिःशूकशुकशकुन्तशातितशलाटवः, शैलेयसुकुमारशिलातल-सुखशयितशशशिशवः, शेफालिकाशिफाविवरविस्रब्धविवर्तमान-गोधेरराशयः, निरातङ्करङ्कवः, निराकुलनकुलकेलयः, कल-कोकिलकुलकवलितकलिकोद्गमाः, सहकाराराम्रोमन्थायमानच-मूरुयूथाः, यथासुखनिषण्णनीलाण्डजमण्डलाः, निर्विकारवृकवि-लोक्यमानपोतपीतगवयधेनवः, श्रवणहारिसनीडगिरिनितम्बनि-र्झरनिनादनिद्रानन्दमन्दायमानकरिकुलकर्णतालदुन्दुभयः, समास-न्नकिन्नरीगीतरवरसमानरुरवः, प्रमुदिततरतरक्षवः, क्षतहरितहरि-द्राद्रवरज्यमाननववराहपोतपोत्रवलयः, गुञ्जाकुञ्जगुञ्जज्जाहकाः, जातीफलकसुप्रशालिजातकवलयः, दशनकुपितकपिपोतपेटकपा-टितपाटलकीटपुटकाः, लकुचलम्पटगोलाङ्गूललङ्घ्यमानलवलयः, बद्धवालुकालवालवलयाः, कुटिलकुटावलिवलितवेगगिरिनदिका-स्रोतसः, निबिडशाखाकाण्डलम्ब्यमानकमण्डलवः, सूत्रशिक्यासक्त-रिक्तभिक्षाकपालपल्लवितलतामण्डपाः, निकटकुटीकृतपाटलमुद्राचै-त्यकमूर्तयः, चीवराम्बररागकषायोदकदूषितोद्देशाः, मेघमया इव कृतशिखण्डिकुलकोलाहलाः, वेदमया इवापरिमितशाखाभेदगहनाः, माणिक्यमया इव महानीलतनवः, तिमिरमया इव सकलजनन-

---

भेदाः । कुटजो गिरिमल्लिका । उक्तं च—'कुटजो गिरिमल्लिका' इति । चटकाया अपत्यानि चाटकेराः । चारणं भोजनम् । चञ्चुरा निपुणाः । भुरुण्डाः पक्षिभेदाः । पीलुफलं स्रंसीकम् । कट्फलः श्रीपर्णाख्यो वृक्षः । उक्तं च—'श्रीपर्णिका कुमुदिका कुम्भी कैदर्यकट्फलौ' इति । विशसनं भेदनम् । निःशूको निर्दयः । शलाटून्यपक्वानि फलानि । उक्तं च—'आमे फले शलाटुः स्यात्' इति । शिलासु भवं शैलेयम् । शेफालिका लताभेदः । 'स्त्रियां गौधेरगोधारगोधेया गोधिकात्मजा' इति । रङ्कवो मृगभेदाः । सहकार आम्रः । उक्तं च—'आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः' इति । रोमन्थायमाना उद्गीर्य चर्वन्तः । चमरा मृगविशेषाः नीलाण्डजा मृगभेदाः । वृका आरण्यश्वानः । पोतः शिशुः । 'पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः' इति । गवया गोसदृशाः प्राणिभेदाः । 'तरक्षुस्तु मृगादनः' हरिद्रा पीतद्रुः । उक्तं च—'अथ पीतद्रुः कालेयकहरिद्रवाः । दार्वी पचंपचा दारु हरिद्रा पर्जनीत्यपि ॥' वराहः सूकरः । पोत्रं सूकरमुखम् । गुञ्जा रक्तिका । जाहकाः

यनमुषः, यामुना इवोर्ध्वीकृतमहाह्रदाः, मरकतमणिश्यामलाः क्रीडापर्वतका इव वसन्तस्य, अञ्जनाचला इव पल्लविताः, तनया इवाटवीजाता विन्ध्यस्य, पातालान्धकारराशय इव भित्त्वा भुवमुत्थिताः, प्रतिवेशिका इव वर्षावासराणाम्, अंशावतारा इव कृष्णरात्रीणाम्, इन्द्रनीलमयाः प्रासादा इव वनदेवतानाम्, पुरस्तादृर्शनपथमवतेरुस्तरवः।

ततो नरपतेरभवन्मनस्यदूरवर्तिना खलु भवितव्यं भदन्तेनेति। अवतीर्य च गिरिसरिति समुपस्पृश्य युगपद्विश्रामसमयसमुन्मुक्तहेषाघोषबधिरीकृताटवीगहनामस्मिन्नेव प्रदेशे स्थापयित्वा वाजिसेनामवलम्ब्य च तपस्विजनदर्शनोचितं विनयं हृदयेन दक्षिणेन च हस्तेन माधवगुप्तमंसे विरलैरेव राजभिरनुगम्यमानश्चरणाभ्यामेव प्रावर्तत गन्तुम्।

अथ तेषां तरूणां मध्ये नानादेशीयैः स्थानस्थानेषु स्थाणूनाश्रितैः शिलातलेपूपविष्टैर्लताभवनान्यध्यावसद्भिररण्यानीनिकुञ्जेषु निलीनैर्विटपच्छायासु निषण्णैस्तरुमूलानि निषेवमाणैर्वीतरागैरार्हतैर्मस्करिभिः श्वेतपटैः पाण्डुरिभिक्षुभिर्भागवतैर्वर्णिभिः केशलुञ्चनैः कापिलैर्जैनैर्लोकायतिकैः काणादैरौपनिषदैरैश्वरकारणिकैः कारन्धमिभिर्धर्मशास्त्रिभिः पौराणिकैः सात्वतन्तवैः शाब्दैः

शालिजातकाश्च प्राणिभेदाः। पाटलाः कीटाः। पुटकाः आलयाः। 'लकुचो लिकुचो डुहुः' इत्यमरः। गोलाङ्गूलाः कृष्णमुखवानराः। लवलयो लताभेदः। कमण्डलुर्मुनिजलभाण्डम्। शिक्यं भिक्षाभाजनम्। जालिका निकटकुटीषु कृताः। मुद्रया कृतानामल्पचैत्यानां मूर्तयो येषु। शाखा लताः, कठाद्याश्च। महानीला अत्यन्तकृष्णाः, महानीलाश्च प्राणिभेदाः। नयनमुषो रम्यत्वात्, प्रकाशनाच्च। प्रतिप्रसवकाः प्रतिच्छन्दकाः।

भदन्त इति सौगतप्रतिमानां पूजावचनमुद्यानमित्यन्ये।

अथेत्यादौ तरूणां मध्ये दिवाकरमद्राक्षीदिति संबन्धः। नानादेशीयैर्वीतरागैरिति चार्हतैरित्यादीनां सर्वेषां विशेषणम्। स्थाणूनाश्रितैरित्यादि। तु केषांचित्। 'स्थाणूरस्त्री ध्रुवः शङ्कुः' इत्यमरः। 'महारण्यमरण्यानी विस्तारो विटपोऽस्त्रियाम्' इत्यमरः। 'मूलं वृक्षयोऽङ्घ्रिनामकः। अर्हन्देवता येषां ते आर्हतास्तैर्नग्नक्षपणकैः। मस्करिभिः परिव्राजकैः। श्वेतपटैः श्वेतोर्णाकम्बलीवासोभिः, नग्नक्षपणभेदैः। पाण्डुरिभिक्षुभिस्त्यक्तकाषायैः। भागवतैर्विष्णुभक्तैः। वर्णिभिर्ब्रह्मचारिभिः। केशलुञ्चनैर्यथार्थ-

पाञ्चरात्रिकैरन्यैश्च स्वान्स्वान्सिद्धान्ताञ्शृण्वद्भिरभियुक्तैश्चिन्तयद्भिश्च प्रत्युच्चरद्भिश्च संशयानैश्च निश्चिन्वद्भिश्च व्युत्पादयद्भिश्च विवदमानैश्चाभ्यस्यद्भिश्च व्याचक्षाणैश्च शिष्यतां प्रतिपन्नैर्दूरादेवावेद्यमानम्, अतिविनीतैः कपिभिरपि चैत्यकर्म कुर्वाणैस्त्रिसरणपरैः परमोपासकैः शुकैरपि शाक्यशासनकुशलैः कोशं समुपदिशद्भिः शिक्षापदोपदेशोपशमशालिनीभिः शारिकाभिरपि धर्मदेशनां दर्शयन्तीभिरनवरतश्रवणगृहीतालिकैः कौशिकैरपि बोधिसत्त्वजातकानि जपद्भिर्जातसौगतशीलशीतलस्वभावैः शार्दूलैरप्यमांसाशिभिरुपास्यमानम्, आसनोपान्तोपविष्टविस्रब्धानेककेसरिशावकतया मुनिपरमेश्वरम्, अकृत्रिम इव सिंहासने निषण्णम्, उपशममिव पिबद्भिर्वनहरिणैर्जिह्वालताभिरुपलिह्यमानपादपल्लवम्, वामकरतलनिविष्टेन नीवारमश्नता पारावतपोतेन कर्णोत्पलेनेव प्रियां मैत्रीं प्रसादयन्तम्, इतरकरकिसलयनखमयूखलेखाभिर्जनितजनव्यामोहम्, उद्ग्रीवं मयूरं मरकतमणिकरकमिव वारिधाराभिः पूरयन्तम्, इतस्ततः पिपीलकश्रेणीनां श्यामाकतण्डुलकणान्स्वयमेव किरन्तम्, अरुणेन चीवरपटलेन म्रदीयसा संवीतम्, बहलबालातपानुलिप्तमिव पौरंदरं दिग्भागम्, उल्लिखितपद्मरागप्रभाप्रतिमया रक्तावदातया देहप्रभया पाटलीकृतानां कापायग्रहणमिव दिशामप्युपदिशन्तम्, अनौद्धत्यादधोमुखेन मन्दमुकुलितकुमुदाकरेण स्निग्धधवलप्रसन्नेन चक्षुषा जनक्षुण्णक्षुद्रजन्तुजीवनार्थममृतमिव वर्षन्तम्, सर्वशास्त्राक्षरपरमाणुभिरिव निर्मितम्, परमसौगतमप्यवलोकितेश्वरम्, अस्खलितमपि

नामभिः । लोकायतिकैश्चार्वाकैः । जैनैर्बौद्धैः । कापिलैः । सांख्यैः । काणादैर्वैशेषतार्किकैः । औपनिषदैर्वेदान्तवादिभिः । ऐश्वरकारणिकैर्नैयायिकैः । कारन्धमिभिर्धातुवादिभिः पाषण्डभेदैरित्यन्यै । धर्मशास्त्रिभिः स्मृतिज्ञैः । शाब्दैर्वैयाकरणैः । पाञ्चरात्रिकैर्वैष्णवभेदैः । सिद्धान्तानागमान् । **त्रिसरणेति** । त्रयो बुद्धधर्मसंघाः । शाक्यो बुद्धः । कोशो बुद्धसिद्धान्तो वसुबंधकृतः । देशना कथनम् । बोधिः समाधिः । तत्प्रधानसत्त्वं बुद्धभट्टारकः । तदीयानि जातकानि जीमूतवाहनादिजन्मकथाः । मुनिपरमेश्वरम् । मुनीश्वरं बुद्धम् । अपकारिण्यभिप्रीतिर्मैत्री । पिपीलकः कीटभेदः । चीवरं मुनिवासः । संवीतमाच्छादितम् । उल्लिखितश्चरणोल्लीढः । क्षुद्राः क्षुल्लाः । अवलोकितेश्वरनामा बुद्धविशेषोऽपि । **अस्खलितमपीति** । स्खलितो ह्यन्यत्र लग्नो भवति सत्त्वभ्रष्टशीलस्तपःस्थश्च ।

तपसि लग्नम्, आलोकमिव यथावस्थितसकलपदार्थप्रकाशकं दर्शनार्थिनाम्, सुगतस्याप्यभिगमनीयमिव, धर्मस्याप्याराधनीयमिव, प्रसादस्यापि प्रसादनीयमिव, मानस्यापि माननीयमिव, वन्द्यत्वस्यापि वन्दनीयमिव, जन्म यमस्य, नेमिं नियमस्य, तत्त्वं तपसः, शरीरं शौचस्य, कोशं कुशलस्य, वेश्म विश्वासस्य, सद्वृत्तं सद्वृत्तताया:, सर्वस्वं सर्वज्ञताया:, दाक्ष्यं दाक्षिण्यस्य, पारं परानुकम्पाया:, निर्वृतिं सुखस्य, मध्यमे वयसि वर्तमानं दिवाकरमित्रमद्राक्षीत्। अतिप्रशान्तगम्भीराकारारोपितबहुमानश्च सादरं दूरादेव शिरसा मनसा वचसा च ववन्दे।

दिवाकरमित्रस्तु मैत्रीमयः प्रकृत्या विशेषतस्तेनापरेणादृष्टपूर्वेणामानुषलोकोचितेन सर्वाभिभाविना महानुभावाभोगभाजा भ्राजिष्णुना भूपतेरप्राकृतेनाकारविशेषेण तेन चाभिजात्यप्रकाशकेन गरीयसा प्रश्रयेण चाह्लादितश्चक्षुषि च चेतसि च युगपदग्रहीत्। वीरस्वभावोऽपि च संपादितससंभ्रमाभ्युत्थानः संकलय्य किंचिदुद्भ्रमनकेन विलोलं विलम्बमानं वामांसाच्चीवरपटान्तमुत्क्षिप्यानेकाभयदानदीक्षादक्षिणो दक्षिणं महापुरुषलक्षणलेखाप्रशस्तं स्निग्धमधुरया वाचा सगौरवमारोग्यदानेन राजानमन्वग्रहीत्। अभ्यनन्दच्च स्वागतगिरा गुरुमिवाभ्यागतं बहु मन्यमानः स्वेनासनेनासद्भमत्रेति निमन्त्रयांचकार। पार्श्वे स्थितं च शिष्यमब्रवीत्—'आयुष्मन्, उपानय कमण्डलुना पादोदकम्' इति। राजा त्वचिन्तयत्—'अलोहः खलु संयमनपाशः सौजन्यमभिजातानाम्। स्थाने खलु तत्रभवान्गुणानुरागी ग्रहवर्मा बहुशो वर्णितवानस्य गुणान्' इति। प्रकाशं चाबभाषे—'भगवन्, दर्शनपुण्यानुगृहीतस्य मम पुनरुक्त इवायमार्यप्रयुक्तः प्रतिभात्यनुग्रहः। चक्षुष्प्रमाणप्रसादस्वीकृतस्य च परकरणमिवासनादिदानोपचारचेष्टितम्। अतिभूमिरेव भवादृशां पुरः संभाषणामृताभिषेकप्रक्षालितसकलवपुषश्च

दिवाकरमित्रस्तु तेन भूपतावाकारविशेषेण प्रश्रयेण च युगपच्चक्षुषि चेतसि च आह्लादितः आनन्दितः सन्नन्वग्रहीदिति संबन्धः। महानुभावानामुत्तमानाम् आभोगं टङ्कं भजत इत्याकारविशेषणम् संकलय्य संयम्य। उद्भ्रमनमुत्थापनम्। आगमनमागतम्। सुखेनागतं स्वागतम्। प्रश्नार्थं गीस्तया अत्रोपविशेति। भूमिमतिक्रान्तातिभूमिः। स्वर्गादिस्थानरूपः। प्रदेशवृत्तिः। एकदेशो वा।

मे प्रदेशवृत्तिः । पाद्यमप्यपार्थकम् । आसतां भवन्तो यथासुखम् । आसीनोऽहम्' इत्यभिधाय क्षितावेवोपाविशत् ।

'अलंकारो हि परमार्थतः प्रभवतां प्रश्रयातिशयः, रत्नादिकस्तु शिलाभारः' इत्याकलय्य पुनः पुनरभ्यर्थ्यमानोऽपि यदा न प्रत्यपद्यत पार्थिवो वचनं तदा स्वमेवासनं पुनरपि भेजे भदन्तः । भूपतिमुखनलिननिहितनिभृतनयनयुगलनिगडनिश्चलीकृतहृदयश्च स्थित्वा कांचित्कालकलां कलिकालकल्मषकालुष्यमिव क्षालयन्नमलाभिर्दन्तमयूखमालाभिर्मूलफलाभ्यवहारसंभवमुद्गमन्निव च परिमलसुभगं विकचकुसुमपटलपाण्डुरं लतावनमवादीत्—'अद्यप्रभृति न केवलमयमनिन्द्यो वन्द्योऽपि प्रकाशितसत्सारः संसारः । किं नाम नालोक्यते जीवद्भिरद्भुतं येन रूपमचिन्तितोपनतमिदं दृक्पथमुपगतम् । एवंविधैरनुमीयन्ते जन्मान्तरावस्थितसुकृतानि हृदयोत्सवैः । इहापि जन्मनि दत्तमेवास्माकममुना तपःक्लेशेन फलमसुलभदर्शनं दर्शयता देवानां प्रियम् । आ तृप्तेः पीतममृतमीक्षणाभ्याम् । जातं निरुत्कण्ठं मानसं निवृत्तिसुखस्य । महद्भिः पुण्यैर्विना न विश्राम्यन्ति सज्जने त्वादृशि दृशः । सुदिवसः सयस्मिञ्जातोऽसि । सा सुजाता जननी या सकलजीवलोकजीवितजनकमजनयदायुष्मन्तम् । पुण्यवन्ति पुण्यान्यपि तानि येषामसि परिणामः । सुकृततपसस्ते परमाणवो ये तव परिगृहीतसर्वावयवाः । तत्सुभगं सौभाग्यमाश्रितोऽसि येन । भव्यः स पुरुषभावो भवत्यवस्थितो यः । यत्सत्यं मुमुक्षोरपि मे पुण्यभाजमालोक्य पुनः श्रद्धा जाता मनुजजन्मनि । नेच्छद्भिरप्यस्माभिर्दृष्टः कुसुमायुधः । कृतार्थमद्य चक्षुर्वनदेवतानाम् । अद्य सफलं जन्म पादपनां येषामसि गतो गोचरम् । अमृतमयस्य भवतो वचसां माधुर्यं कार्यमेव । अस्य त्वीदृशे शैशवे विनयस्योपाध्यायं ध्यायन्नपि न संभावयामि भुवि । सर्वथा शून्य आसीदजाते दीर्घायुषि गुणग्रामः । धन्यः स भूभृद्यस्य वंशे मणिरिव मुक्तामयः संभूतोऽसि । एवंविधस्य च पुण्यवतः कथंचित्प्राप्तस्य केन प्रियं समाच-

---

नयनयुगलमेव निगडो बन्धनशृङ्खला । निवृत्तिश्चित्तविभ्रमः । **अमृतमयस्येति** । यतोऽमृतमयत्वमतो भवद्वचसां माधुर्यं कार्यं प्रयोज्यं कारणसदृशेन

राम इति पारिप्लवं चेतो नः । सकलवनचरसार्थसाधारणस्य कन्दमूलफलस्य गिरिसरिदम्भसो वा के वयम् । अपरोपकरणीकृतस्तु कायकलिरयमस्माकम् । सर्वस्वमवशिष्टमिष्टातिथ्याय । स्वायत्ताश्च विद्यन्ते विद्याबिन्दवः कतिचित् । उपयोगं तु न प्रीतिर्विचारयति । यदि च नोपरुणद्धि कश्चित्कार्यलवमरक्षणीयाक्षरं वा कथनीयं तत्कथयतु भवाञ्श्रोतुमभिलषति हृदयं सर्वमिदं नः । केन कृत्यातिभारेण भव्यो भूषितवान्भूमिमेतामभ्रमणयोग्याम् । कियदवधिर्वा शून्याटवीपर्यटनक्लेशः कल्याणराशेः । कस्माच्च संतप्तरूपेव ते तनुरियमसंतापार्हा विभाव्यते' इति ।

राजा तु सादरतरमब्रवीत्—'आर्य, दर्शितसंभ्रमेणानेन मधुरसविसरममृतमिव हृदयधृतिकरमनवरतं वर्षता वचसैव ते सर्वमनुष्ठितम् । धन्योस्मि यदैवमभ्यर्हितमनुपचरणीयमपि मान्यो मन्यते माम् । अस्य च महावनभ्रमणपरिक्लेशस्य कारणमवधारयतु मतिमान् । मम हि विनष्टनिखिलेष्टबन्धोर्जीवितानुबन्धस्य निबन्धनमेकैव यवीयसी स्वसावशेषा । सापि भर्तुर्वियोगाद्वैरिपरिभवभयाद्भ्रमन्ती कथमपि विन्ध्यवनमिदम्, अशुभशबरबलबहुलम्, अगणितगजकुलकलिलम्, अपरिमितमृगपतिशरभभयम्, उरुमहिषमुषितपथिकगमनम्, अतिनिशितशरकुशपरुषम्, अवटशतविषममाविशत् । अतस्तामन्वेष्टुं वयमनिशं निशिनिशि च सततमिमामटवीमटामः । न चैनामासादयामः । कथयतु च गुरुरपि यदि कदाचित्कुतश्चिद्वनचरतः श्रुतिपथमुपगता तद्वार्ता' इति ।

अथ तच्छ्रुत्वा जातोद्वेग इव भदन्तः पुनरभ्यधात्—'धीमन्, न खलु कश्चिदेवंरूपो वृत्तान्तोऽस्मानभ्युपगतवान् । अभाजनं हि वयमीदृशानां प्रियाख्यानोपायनानां भवताम् ।' इत्येवं

कार्येण भवितव्यमित्युक्तेः । शून्या निराश्रयाः । वंशो वेणुरपि । मुक्तामयस्त्यक्तदोषः, मौक्तिकरूपश्च । परिप्लवं दोलाधिरूढमित्यर्थः । अनेकदुःखहेतुत्वात् । काय एव कलिः । **अरक्षणीयाक्षरमिति** । यद्यस्माकमुपरि विश्वासोऽस्तीत्यर्थः ।

अतिशयेनाल्पा यवीयसी कनिष्ठा । अयोगाविरुद्धविधिवैधुर्यादिदं विन्ध्यवनमनिशं प्रविष्टेति पदयोजना । अनिशं सदा । अटवीमटामो गच्छामः ।

भाषमाण एव तस्मिन्नकस्मादागत्यापरः शमिनि वयसि वर्तमानः संभ्रान्तरूप इव पुरस्तादुपरचिताञ्जलिर्जातकरुणः प्रक्षरितचक्षुर्भिक्षुरभाषत—'भगवन्भदन्त, महत्करुणं वर्तते । बालैव बलवद्व्यसनाभिभूता भूतपूर्वापि कल्याणरूपा स्त्री शोकावेशविवशा वैश्वानरं विशति । संभावयतु तामप्रोषितप्राणां भगवान् । अभ्युपपद्यतां समुचितैः समाश्वासनैः । अनुपरतपूर्वं कृमिकीटमपि दुःखितं दयाराशेरार्यस्य गोचरगतम्' इति ।

राजा तु जातानुजाशङ्कः सोदर्यास्नेहाच्चान्तर्द्रुत इव दुःखेन दोदूयमानहृदयः कथमपि गद्गदिकागृहीतकण्ठो विकलवाग्बाष्पायमाणदृष्टिः पप्रच्छ—'पाराशरिन्, कियद्दूरे सा योषिदेवंजातीया जीवेद्वा कालमेतावन्तमिति । पृष्टा वा त्वया कासि, कस्यासि, कुतोऽसि किमर्थं वनमिदमभ्युपगतासि, विशसि च किंनिमित्तमनलमित्यादितः प्रभृति कात्स्न्र्येन कथ्यमानमिच्छामि श्रोतुं कथमार्यस्य गता गोचरमाकारतो वा कीदृशी' इति ।

तथाभिहितस्तु भूभुजा भिक्षुराचचक्षे—'महाभाग, श्रूयताम् । अहं हि प्रत्यूषस्येवाद्य वन्दित्वा भगवन्तमनेनैव नदीरोधसा सैकतसुकुमारेण यदृच्छया विहृतवानतिदूरम् । एकस्मिंश्च वनलतागहने गिरिनदीसमीपभाजि भ्रमरीणामिव हिमहतकमलाकरकातराणां रसितं सार्यमाणानामतितारतानवर्तिनीनां वीणातन्त्रीणामिव झांकारमेकतानं नारीणां रुदितमधृतिकरमतिकरुणमाकर्णितवानस्मि । समुपजातकुपश्च गतोऽस्मि तं प्रदेशम् । दृष्टवानस्मि च दृषत्खण्डखण्डिताङ्गुलिगलल्लोहितेन च पार्ष्णिप्रविष्टशरशलाकाशल्यशूलसंकोचितचक्षुषा चाध्वनीनश्रमश्वयथुनिश्चलचरणेन च स्थाणवत्रणव्यथितगुल्फबद्धभूर्जत्वचा च वातखुडखेदखञ्जजङ्घाजातज्वरेण च पांसुपाण्डुरपिण्डिकेन च खर्जूरजूटजटाजर्जरितजानुना च शताव-

---

यदृच्छया स्वेच्छया सार्यमाणानां श्रुतिरीत्यास्थाप्यमानानां स्वराणां विशिष्टमवस्थानमेकलोपे द्विलोपे वा । ताना मूर्च्छना वा । वर्णाः स्थायिमद्यादारोह्यवरोहिणश्चत्वारस्तदुपलक्षिताः । तन्त्र्यो वर्णतन्त्र्यः । एकतानमेकरूपम्, अनवरतं वा । दृष्टवानित्यादावस्मि । चैवंविधानामबलानां चक्रवालेन परिवृतां योषितं दृष्टवानिति संबन्धः । लोहितं रक्तम् । पार्ष्णिः पादाधोदेशः । 'स्थाणुरस्त्री ध्रुवः शङ्कुः । स्थाणोरिमे स्थाणवाः । वातखुडो गतिप्रतिघातलक्षणो वातव्याधिः । पिच्छकं केश-

रीविदारितोरुणा च विदारीदारिततनुदुकूलपल्लवेन चोत्कटवंशविट-पकण्टककोटिपाटितकञ्चुककर्पटेन च फललोभालम्बितानम्रबदरी-लताजालकैरुत्कण्टकैरुल्लिखितसुकुमारकरोदरेण च कुरङ्गशृङ्गो-त्खातैः कन्दमूलफलैः कदर्थितबाहुना च ताम्बूलविरहविरसमुखख-ण्डितकोमलामलकीफलेन च कुशकुसुमाहतिलोहितानां श्वयताम-क्ष्णां लेपीकृतमनःशिलेन च कण्टकिलतालूनालकलतेन च केनचि-त्किसलयोपपादितातपत्रकृत्येन केनचित्कदलीदलव्यजनवाहिना के-नचित्कमलिनीपलाशपुटगृहीताम्भसा केनचित्पाथेयीकृतमृणालपू-लिकेन केनचिच्चीनांशुकदशाशिक्यनिहितनालिकेरकोशकलशीक-लितरसालतैलेन, कतिपयावशेषशोकविकलमूककुब्जवामनबधिरब-र्बराविरलेनाबलानां चक्रवालेन परिवृताम्, आपत्कालेऽपि कुलोद्वृ-तेनेवामुच्यमानां प्रभालेपिना लावण्येन, प्रतिबिम्बितैरासन्नवन-लताकिसलयैः सरसैर्दुःखक्षतैरिवान्तःपटलीक्रियमाणकायाम्, क-ठोरदर्भाङ्कुरक्षतक्षारिणा क्षतजेनानुसरणालक्तकेनेव रक्तचरणाम्, उन्नालेनान्यतरनारीधृतेनारविन्दिनीदलेन कृतच्छायमपि विच्छायं मुखमुद्वहन्तीम्, आकाशमपि शून्यतयातिशयानाम्, मृण्मयी-मिव निश्चेतनतया मरुन्मयीमिव निश्वाससंपदा पावकमयी-मिव संतापसंतानेन सलिलमयीमिवास्रप्रस्रवणेन वियन्मयीमिव निरवलम्बनतया तडिन्मयीमिव पारिप्लवतया शब्दमयीमिव प-रिदेवितवाणीबाहुल्येन मुक्तमुक्तांशुकरत्नकुसुमकनकपत्राभरणां कल्पलतामिव महावने पतिताम्, परमेश्वरोत्तमाङ्गपातदुर्ल-लिताङ्गां गङ्गामिव गां गताम्, वनकुसुमधूलिधूसरितपा-

---

कलापः । शतावरी शतमूली । विदारी क्षीरशुक्ली । सरला देवदारवः । शोकेन विकला विक्षिप्ताः । कलामूका पण्डकाः । एवमादयोऽन्तःपुररक्षिणः । बर्बरा एतद्देशजाः । सरसैः प्रत्यग्रैः सान्द्रैश्च । क्षतानि व्रणाः । अरविन्दिनी पद्मिनी । छाया आतपप्रतिपक्षजातिः, छाया च कान्तिः । उक्तं च—'छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः' इति । शून्यतेन्द्रियरहितत्वमपि । संतापसंतानो दुः-खविच्छेदः, औष्ण्यप्रबन्धश्च । मुक्ताख्यमंशुकं मालवदेशजमुत्तरीयम् । मुक्ता मौक्तिकं च । अल्पेंऽशवोंऽशुकाश्च । महावनं विस्तीर्णारण्यम्, विपुलजलं च । परमेश्वरोत्तमाङ्गपातो राजशिरश्छेदो हरमूर्ध्नि पातश्च । इष्टानि ललितानीप्सितानि येषु तान्यङ्गानि यस्याः । दुर्ललितं च हेवाकः । **गां गतामिति** । वाहनाभावा-

दपल्लवाम्, प्रभातचन्द्रमूर्तिमिव लोकान्तरमभिलषन्तीम्, निज-जलमोक्षकदर्थितदर्शितधवलायतनेत्रशोभां मन्दाकिनीमृणालिनी-मिव परिम्लायमानाम्, दुःसहरविकिरणसंस्पर्शखेदनिमीलितां कुमुदिनीमिव दुःखेन दिवसं नयन्तीम्, दग्धदशाविसंवादितां प्रत्यूषप्रदीपशिखामिव क्षामक्षामां पाण्डुवपुषम्, पार्श्ववर्तिवार-णाभियोगरक्ष्यमाणां वनकरिणीमिव महाह्रदे निमग्नाम्, प्रविष्टां वनगहनं ध्यानं च, स्थितां तरुतले मरणे च, पतितां धात्र्यु-त्सङ्गे महानर्थे च, दूरीकृतां भर्त्रा सुखेन च, विरेचितां भ्रमणे-नायुषा च, आकुलां केशकलापेन मरणोपायेन च, विवर्णितामध्वधूलिभिरङ्गवेदनाभिश्च, दग्धां चण्डातपेन वैधव्येन च, धृत-मुखीं पाणिना मौनेन च, गृहीतां प्रियसखीजनेन मन्युना च, तथा च भ्रष्टैर्बन्धुभिर्विलासैश्च, मुक्तेन श्रवणयुगलेनात्मना च, परित्यक्तैर्भूषणैः सर्वारम्भैश्च, भग्नैर्वलयैर्मनोरथैश्च, चरणलग्नाभिः परिचारिकाभिर्दर्भाङ्कुरसूचीभिश्च, हृदयविनिहितेन चक्षुषा प्रियेण च, दीर्घैः शोकश्वासैतैः केशैश्च, क्षीणेन वपुषा पुण्येन च, पादयोः पतन्तीभिर्वृद्धाभिरश्रुधाराभिश्च, स्वल्पावशेषेण परिजनेन जीवितेन च, अलसामुन्मेषे, दक्षामश्रुमोक्षे, संततां चिन्तासु, विच्छिन्नामाशासु, कृशां काये, स्थूलां श्वसिते, पूरितां दुःखेन, रिक्तां सत्त्वेन, अध्यासितामायासेन, शून्यां हृदयेन, निश्चलां निश्चयेन, चलितां धैर्यात्, अपि च वसतिं व्यसनानाम्, आधा-नमाधीनाम्, अवस्थानमनवस्थानाम्, आधारमधृतीनाम्, आवा-समवसादानाम्, आस्पदमापदाम्, अभियोगमभाग्यानाम्, उद्वे-गमुद्वेगानाम्, कारणं करुणायाः, पारं परायत्तताया योषितम्। चिन्तितवानस्मि च चित्रमीदृशीमप्याकृतिमुपतापाः स्पृशन्तीति। सा तु समीपगते मयि तदवस्थापि सबहुमानमानतमौलिः प्र-

---

द्भूमिमवतीर्णा च। वनकुसुमानि जलजातत्वात्कुमुदानि च, पादरश्मयोऽपि। लोकान्तरं परलोकम्, मेरुद्वितीयपार्श्वं च। जलमस्तु नेत्रम्, अक्षिमलं च। द-ग्धदशा दुरवस्थाः, प्रष्टदीपधामानश्च। प्रत्यूषः कल्यम्। वारणा निषेधः, हस्ती च वारणः। महाह्रदे निमग्नामनुसरणार्थं पुण्यजलाशयस्नाताम्, विस्तीर्णसरस्यव-सन्नां च। स्थितां कृतनिश्चयां च। विगतो धवो यस्यास्तद्भावो वैधव्यम्। धवो भर्ता। बन्धुभिरित्यादावित्थंभूतलक्षणे तृतीया। मुक्तेन निरलंकारेण। अलसां दक्षां

णतवती। अहं तु प्रबलकरुणाप्रेर्यमाणस्तामालपितुकामः पुनः कृतवान्मनसि—कथमिव महानुभावामेनामामन्त्रये। 'वत्से' इत्यतिप्रणयः, 'मातः' इति चाटु, 'भगिनि' इत्यात्मसंभावना, 'देवि' इति परिजनालापः, 'राजपुत्रि' इत्यस्फुटम्, 'उपासिके' इति मनोरथः, 'स्वामिनि' इति भृत्यभावाभ्युपगमः, 'भद्रे' इतीतरस्त्रीसमुचितम्, 'आयुष्मति' इत्यवस्थायामप्रियम्, 'कल्याणिनि' इति दशायां विरुद्धम्, 'चन्द्रमुखि' इत्यमुनिमतम्, 'बाले' इत्यगौरवोपेतम्, 'आर्ये' इति जरारोपणम्। 'पुण्यवति' इति फलविपरीतम्, 'भवति' इति सर्वसाधारणम्,। अपि च 'कासि' इत्यनभिजातम्, 'किमर्थं रोदिषि' इति दुःखकारणस्मरणकारि, 'मा रोदीः' इति शोकहेतुमनपनीय न शोभते, 'समाश्वसिहि' इति किमाश्रित्य, 'स्वागतम्' इति यातयामम्, 'सुखमास्यते' इति मिथ्या। इत्येवं चिन्तयत्येव मयि तस्मात्स्त्रैणादुत्थायान्यतरा योषिदार्यरूपेव शोकविक्लवा समुपसृत्य कतिपयपलितशारं शिरो नीत्वा महीतलमतुलहृदयसंतापसूचकैरश्रुबिन्दुभिश्चरणयुगलं दहन्ती ममातिकृपणैरक्षरैश्च हृदयमभिहितवती—'भगवन्, सर्वसत्त्वानुकम्पिनी प्रायः प्रव्रज्या। प्रतिपन्नदुःखक्षपणदीक्षादक्षाश्च भवन्ति सौगताः। करुणाकुलगृहं च भगवतः शाक्यमुनेः शासनम्। सकलजनोपकारसज्जा सज्जनता जैनी। परलोकसाधनं च धर्मो मुनीनाम्। प्राणरक्षणाच्च न परं पुण्यजातं जगति गीयते जनेन। अनुकम्पाभूमयः प्रकृत्यैव युवतयः किं पुनर्विपदभिभूताः। साधुजनश्च सिद्धक्षेत्रमार्तवचसाम्। यत इयं नः स्वामिनी मरणेन पितुरभावेन भर्तुः प्रवासेन च भ्रातुः भ्रंशेन च शेषस्य बान्धववर्गस्यातिमृदुहृदयतयानपत्यतया च निरवलम्बना, परिभवेन च नीचारातिकृतेन, प्रकृतिमनस्विनी अमुना च महाटवीपर्यटनक्लेशेन कदर्थितसौकुमार्या, दग्धदैवदत्तैरेवंविधैर्बहुभिरुपर्युपरि व्य-

---

चेत्यादौ विरोधो बोद्धव्यः। अनवस्थानां दुःखरूपक्रियाणाम्। अभियोगमुद्योगम्। कथमिवेत्यादि समानः प्रश्न इत्यर्थः। महानुभावां मनस्विनीम् अतिप्रणयो महती प्रीतिः। अनभिजातमनुचितम्। यातयामं जीर्णप्रायम्। शासनं शास्त्रम्। सज्जनता साधुजनसमूहः। सिद्धक्षेत्रं सिद्धायतनम्। यत इत्यादौ

सनैर्विक्लवीकृतहृदया, दारुणं दुःखमपारयन्ती सोढुं निवारयन्तमनतिक्रान्तपूर्वं स्वप्नेऽप्यवगणय्य गुरुजनमनुनयन्तीरखण्डितप्रणया नर्मस्वपि समवधीर्य प्रियसखीर्विज्ञापयन्तमशरणमश्रुव्याकुलनयनमपरिभूतपूर्वं मनसापि परिभूय भृत्यवर्गमग्निं प्रविशति । परित्रायताम् । आर्योऽपि तावदसह्यशोकापनयनोपायोपदेशनिपुणां व्यापारयतु वाणीमस्याम्' इति चातिकृपणं व्याहरन्तीमहमुत्थाप्योद्विग्नतरः शनैरभिहितवान्—आर्ये, यथा कथयसि तथा । अस्मद्विरामगोचरोऽयमस्याः पुण्याशयायाः शोकः । शक्यते चेन्मुहूर्तमात्रमपि त्रातुमुपरिष्टान्न व्यर्थेयमभ्यर्थना भविष्यति । मम हि गुरुरपर इव भगवान्सुगतः समीपगत एव । कथिते मयास्मिन्नुदन्ते नियतमागमिष्यति परमदयालुः । दुःखान्धकारपटलभिदुरैश्च सौगतैः सुभाषितैः स्वकैश्च दर्शितनिदर्शनैर्नानागमगुरुभिर्गिरां कौशलैः कुशलशीलामेनां प्रबोधपदवीमारोपयिष्यति' इति । तच्च श्रुत्वा 'त्वरतामार्यः' इत्यभिदधाना सा पुनरपि पादयोः पतितवती । सोऽहमुपगत्य त्वरमाणो व्यतिकरमिममधृतिकरमशरणकृपणबहुयुवतिमरणमतिकरुणमत्रभवते गुरवे निवेदितवान्' इति ।

अथ भूभृद्भिक्षवं समवधार्य तद्भाषितमश्रुमिश्रितमश्रुतेऽपि स्वसुर्नाम्नि निम्नीकृतमना मन्युना सर्वाकारसंवादिन्या दशयैव दूरीकृतसंदेहो दग्ध इव सोदर्यावस्थाश्रवणेन श्रवणयोः श्रमणाचार्यमुवाच—'आर्य, नियतं सैवेयमनार्यस्यास्य जनस्यातिकठिनहृदयस्यातिनृशंसस्य मन्दभाग्यस्य भगिनी भागधेयैरेतामवस्थां नीता निष्कारणवैरिभिर्वराकी विदीर्यमाणं मे हृदयमेवं निवेदयति' इत्युक्त्वा तमपि श्रमणमभ्यधात्—'आर्य, उत्तिष्ठ । दर्शय कासौ । यतः सुप्रभूतप्राणपरित्राणपुण्योपार्जनाय यामः, यदि कथंचिज्जीवन्तीं संभावयामः' इति भाषमाण एवोत्तस्थौ ।

अथ समग्रशिष्यवर्गानुगतेनाचार्येण तुरगेभ्यश्चावतीर्य समस्तेन

यत इयं नः स्वामिन्यग्निं प्रविशति तदार्योऽपि तावदस्यां वाणीं व्यापारयत्विति संबन्धः । निदर्शनं दृष्टान्तः ।

निम्नं संकुचच्छक्ति । यतस्व यत्नं कुरु ।

सामन्तलोकेन पश्चादाकृष्यमाणाश्चीयेनानुगम्यमानः पुरस्ताच्च तेन शाक्यपुत्रीयेण प्रदिश्यमानवर्त्मा पद्भ्यामेव तं प्रदेशमविरलैः पदैः पिबन्निव प्रावर्तत । क्रमेण च समुपगतः शुश्राव लतावनान्तरितस्य मूमुर्षोर्महतः स्त्रैणस्य तत्कालोचिताननेकप्रकारानालापान्—'भगवन्धर्म, धाव शीघ्रम् । क्वासि कुलदेवते । देवि धरणि, धीरयसि न दुःखितां दुहितरम् । क्व नु खलु प्रोषिता पुष्पभूतिकुटुम्बिनी लक्ष्मीः । अनाथां नाथ मुखरवंश्य, विविधाधिविधुरां वधूं विधवां विबोधयसि किमिति नेमाम् भगवन्, भक्तजने संज्वरिणि सुगत सुप्तोऽसि । राजधर्म पुष्पभूतिभवनपक्षपातिन्, उदासीनीभूतोऽसि कथम् । त्वय्यपि विपद्बान्धव विन्ध्य, वन्ध्योऽयमञ्जलिबन्धः । मातर्महाटवि, रटन्तीं न शृणोषीमामापत्पतिताम् । पतङ्ग, प्रसीद पाहि पतिव्रतामशरणाम् । प्रयत्नरक्षित कृतघ्न चारित्रचण्डाल, न रक्षसि राजपुत्रीम् । किमवधूतं लक्ष्मणैः । हा देवि दुहितृस्नेहमयि यशोवति, मुषितासि दग्धदैवदस्युना । देव, दुहितरि दह्यमानायां नापतसि प्रतापशील, शिथिलीभूतमपत्यप्रेम । महाराज राज्यवर्धन, न धावसि मन्दीभूता भगिनीप्रीतिः । अहो निष्ठुरः प्रेतभावः । व्यपेहि पाप पावक स्त्रीघातनिर्घृण, ज्वलन्न लज्जसे । भ्रातर्वात, दासी तवास्मि । संवादय द्रुतं देवीदाहं देवाय दुःखितजनार्तिहराय हर्षाय । नितान्तनिःशूक शोकश्वपाक, सकामोऽसि । दुःखदायिन्वियोगराक्षस, तुष्टोसि । विजने वने क्रमाक्रन्दामि, कस्मै कथयामि, कमुपयामि शरणम् , कां दिशं प्रतिपद्ये, करोमि किमभागधेया । गान्धारि, गृहीतोऽयं लतापाशः । पिशाचि मोचनिके, मुञ्च शाखाग्रहणकलहम् । कलहंसि, हंसि किमतःपरमुत्तमाङ्गम् । मङ्गलिके, मुक्तगलं किमद्यापि रुद्यते । सुन्दरि, दूरीभवति सखीसार्थः । स्थास्यसि कथमिवाशिवे शवशिबिरे शबरिके । सुतनु, तनूनपाति पतिष्यसि त्वमपि । मृणालकोमले मालावति, म्लानासि । मातर्मातङ्गिके, अङ्गीकृतस्त्वयापि मृत्युः । वत्से

अश्वीयमश्वसमूहः । शाक्यपुत्रीयेण दिवाकरमित्रशिष्येण अविरलैर्दीर्घैः । पदैश्चरणक्रमैः । मुमूर्षोर्मरणोन्मुखस्य । स्त्रैणस्य स्त्रीसमूहस्यालापाञ्शुश्रावेत्यन्वयः ।

संज्वरिणि संतापवति । राजधर्मो बुद्धः । गान्धारि मोचनिके कलहंसि इत्यादीनि सहगतसखीनां संबोधनानि । तनूनपाति वह्नौ । वत्सिष्यत्यासिष्यति ।

वत्सिके, वत्स्यसि कथनमभिप्रेते प्रेतनगरे । नागरिके, गरिमाणमागतास्यनया स्वामिभक्त्या । विराजिके, विराजितासि राजपुत्रीविपदि जीवितव्ययव्यवसायेन । भृगुपतनाभ्युद्यमभागाभिज्ञे भृङ्गारधारिणि, धन्यासि । केतकि, कुतः पुनरीदृशी स्वप्नेऽपि सुस्वामिनी । मेनके, जन्मनि जन्मनि देवीदास्यमेव ददातु देवो देहं दहन्दहनः । विजये वीजय कृशानुम् । सानुमति, नमतीन्दीवरिका दिवं गन्तुकामा । कामदासि, देहि दहनप्रदक्षिणावकाशम् । विचरिके, विरचय वह्निम् । विकिर किरातिके, कुसुमप्रकरम् । कुररिके, कुरु कुरुबककोरकाचितां चिताम् । चामरं चामरग्राहिणि, गृहाण । पुनरपि कण्ठे मर्षयितव्यानि नर्मदे, नर्मनिर्मितानि निर्मर्यादहसितानि । भद्रे सुभद्रे, भद्रमस्तु ते परलोकगमनम् । अग्रामीणगुणानुरागिणि ग्रामेयिके, गच्छ सुगतिम् । वसन्तिके, अन्तरं प्रयच्छ । आपृच्छते छत्रधारी देवि, देहि दृष्टिम् । इष्टा तव जहाति जीवितं विजयसेना । सेयं मुक्तिका मुक्तकण्ठमारटति निकटे नाटकसूत्रधारी । पादयोः पतति ते ताम्बूलवाहिनी बहुमता राजपुत्रि, पत्रलता । कलिङ्गसेने, अयं पश्चिमः परिष्वङ्गः । पीडय निर्भरमुरसा माम् । असवः प्रवसन्ति वसन्तसेने । मञ्जुलिके, मार्जयसि कतिकृत्वः सुदुःसहदुःखसहस्रास्रदिग्धं चक्षुरिदं रोदिषि कियदाश्लिष्य च माम् । निर्माणमीदृशं प्रायशो यशोधने । धीरयस्यद्यापि किं मां माधविके । केयमवस्था संस्थापनानाम् । गतः कालः कालिन्दि, सखीजनानुनयाञ्जलीनाम् । उन्मत्तिके मत्तपालिके, कृताः पृष्ठतः प्रणयिनीप्रणिपातानुरोधाः । शिथिलय चकोरवति, चरणग्रहणं ग्रहिणि । कमलिनि, किमनेन पुनः पुनर्दैवोपालम्भेन । न प्राप्तं चिरं सखीजनसंगमसुखम् । आर्ये महत्तरिके तरङ्गसेने, नमस्कारः । सखि सौदामिनि, दृष्टासि । समुपनय हव्यवाहनार्चनकुसुमानि कुमुदिके । देहि चितारोहणाय रोहिणि, हस्तावलम्बनम् । अम्ब धात्रि, धीरा भव । भवन्त्येवंविधा एव कर्मणां विपाकाः पापका-

---

भृगुः प्रपातः । उक्तं च—'प्रपातस्त्ववटो भृगुः' इत्यमरः । निर्माणं विधानम् । अर्थात्संसारस्य । संस्थापनानां सांत्वनानाम् । ग्रहोऽभिनिवेशः । हलहलक उत्कण्ठा । एवमादिना निमित्तेन हर्षागमनं सूच्यते ।

रिणीनाम्। आर्यचरणानामयमञ्जलिः। परः परलोकप्रयाणप्रणामोऽयं मातः। मरणसमये कस्माल्लवलिके, हलहलको बलीयानानन्दमयो हृदयस्य मे। हृष्यन्त्युच्चरोमाञ्चमुच्चि किमङ्गीकृत्याङ्गानि। वामनिके, वामेन मे स्फुरितमक्ष्णा। वृथा विरमसि वयस्य वायस, वृक्षे क्षीरिणि क्षणे क्षणे क्षीणपुण्यायाः पुरः। हरिणि, हेषितमिव हयानामुत्तरतः। कस्येदमातपत्रमुच्चमत्र पादपान्तरेण प्रभावति, विभाव्यते। कुरङ्गिके, केन सुगृहीतनाम्नो नाम गृहीतममृतमयमार्यस्य। देवि, दिष्ट्या वर्धसे देवस्य हर्षस्यागमनमहोत्सवेन।' इत्येतच्च श्रुत्वा सत्वरमुपससर्प। ददर्श च मुह्यन्तीमग्निप्रवेशायोद्यतां राजा राज्यश्रियम्। आललम्बे च मूर्च्छामीलितलोचनाया ललाटं हस्तेन तस्याः ससंभ्रमम्।

अथ तेन भ्रातुः प्रेयसः प्रकोष्ठबद्धानामोषधीनां रसविरसमिव प्रत्युज्जीवनक्षमं क्षरता वमतेव पारिहार्यमणीनामचिन्त्यं प्रभावममृतमिव नखचन्द्ररश्मिभिरुद्गिरता वमतेव चन्द्रोदयच्युतशिशिरशीकरं चन्द्रकान्तचूडामणिं मूर्धनि मृणालमयाङ्गुलिनेवातिशीतलेन निर्वापयता दह्यमानं हृदयं प्रत्यानयतेव कुतोऽपि जीवितमाह्लादकेन हस्तसंस्पर्शेन सहसैव समुन्मिमील राज्यश्रीः। तथा चासंभावितागमनस्याचिन्तितदर्शनस्य सहसा प्राप्तस्य भ्रातुः स्वप्नदृष्टदर्शनस्येव कण्ठे समाश्लिष्य तत्कालाविर्भावनिर्भरेणाभिभूतसर्वात्मना दुःखसंभारेण निर्दयं नदीमुखप्रणालाभ्यामिव मुक्ताभ्यां स्थूलप्रवाहमुत्सृजन्ती बाष्पवारि विलोचनाभ्याम् 'हा तात, हा अम्ब, हा सख्यः' इति व्याहरन्ती, मुहुर्मुहुरुच्चैस्तरां च समुद्भूतभगिनीस्नेहसद्भावभारभावितमन्युना मुक्तकण्ठमतिचिरं विक्रुश्य 'वत्से, स्थिरा भव त्वम्' इति भ्रात्रा करस्थगितमुखी समाश्वास्यमानापि, 'कल्याणिनि, कुरु वचनमग्रजस्य गुरोः' इत्याचार्येण याच्यमानापि, 'देवि, न पश्यसि देवस्यावस्थाम्। अलमतिरुदितेन हति राजलोकेनाभ्यर्थ्यमानापि, 'स्वामिनि, भ्रातरमवेक्षस्व' इति परिजनेन विज्ञाप्यमानापि, 'दुहितर्, विश्रम्य पुनरारटितव्यम्' इति निवार्यमाणापि वान्धववृद्धाभिः, प्रियसखि, कियद्रोदिषि।

अथेत्यादौ भ्रातुर्हस्तसंस्पर्शेन राज्यश्रीः सहसैव समुन्मिमीलेति संबन्धः।

तूष्णीमास्स्व । दृढं दूयते देवः' इति सखीभिरनुनीयमानापि, चिरसंभावितानेकदुःसहदुःखनिवहनिर्वहणबाष्पोत्पीडपीड्यमानकण्ठभागा, प्रभूतमन्युभारभरितान्तःकरणा करुणकाहलेन स्वरेण कतिचित्कालमतिचिरं रुरोद । विगते च मन्युवेगे वह्नेः समीपादाक्षिप्य भ्रात्रा नीता निकटवर्तिनि तरुतले निषसाद ।

शनैराचार्यस्तु तथा हर्ष इति विज्ञाय विवर्धितादरः सुतरां मुहूर्तमिवातिवाह्य निभृतसंज्ञाज्ञापितेन शिष्येणोपनीतं नलिनीदलैः स्वयमादाय नम्रो मुखप्रक्षालनायोदकमुपनिन्ये । नरेन्द्रोऽपि सादरं गृहीत्वा प्रथममनवरतरोदनाताम्रं चिरप्रवृत्ताश्रुजलजालं रक्तपङ्कजमिव स्वसुश्चक्षुरक्षालयत्पश्चादात्मनः । प्रक्षालितमुखशशिनि च महीपाले सर्वतो निःशब्दः संबभूव सकलो लिखित इव लोकः । ततो नरेन्द्रो मन्दमन्दमब्रवीत्स्वसारम्—'वत्से, वन्द्स्वात्रभवन्तं भदन्तम् । एष ते भर्तुर्हृदयं द्वितीयमस्माकं च गुरुः' इति । राजवचनात्तु राजदुहितरि पतिपरिचयश्रवणोद्भातेन पुनरानीतनेत्राम्भसि नमन्त्यामाचार्यः प्रयत्नरक्षितागतबाष्पाम्भःसंभारभज्यमानधैर्यार्द्रलोचनः किंचित्परावृत्तनयनो दीर्घं निश्श्वास । स्थित्वा च क्षणमेकं प्रदर्शितप्रश्रयो मृदुवादी मधुरया वाचा व्याजहार—कल्याणराशे, अलं रुदित्वातिचिरम् । राजलोको नाद्यापि रोदनान्निवर्तते । क्रियतामवश्यकरणीयः स्नानविधिः । स्नात्वा च गम्यतां तामेव भूयो भुवम्' ।

अथ भूपतिरनुवर्तमानो लौकिकमाचारमाचार्यवचनं चोत्थाय स्नात्वा गिरिसरिति सह स्वस्रा तामेव भूमिमयासीत् । तस्यां च सपरिजनां प्रथममाहितावधानः पार्श्ववर्तीं परवतीं शुचा पतिपिण्डप्रदर्शितप्रयत्नप्रतिपन्नाभ्यवहारकरणां भगिनीमभोजयत् । अनन्तरं च स्वयमाहारस्थितिमकरोत् । भुक्तवांश्च बन्धनात्प्रभृति विस्तरतः स्वसुः कान्यकुब्जाद्गौडसंभ्रमं गुप्ततो गुप्तिनाम्ना कुलपुत्रेण निष्कासनं निर्गतायाश्च राज्यवर्धनमरणश्रवणं श्रुत्वा चाहारनि-

---

पारिहार्यं कटकम् । तथा चेत्यादौ साकरोदिति संबन्धः । दुःखनिवहस्य निर्वहणं प्रकटनं यस्माद्बाष्पोत्पीडादिति समासः । काहलेन महता ।

उद्घातः प्रस्तावः । यतोऽयं राजलोकश्चिरं रुदित्वा नाद्यापि रोदनान्निवर्तते तत्स्नानविधिः कियतामिति ।

राकरणमनाहारपराहतायाश्च विन्ध्याटवीपर्यटनखेदं जातनिर्वेदायाः पावकप्रवेशोपक्रमणं यावत्सर्वमशृणोद्वयतिकरं परिजनतः। ततः सुखासीनमेकत्र तरुतले विविक्तभुवि भगिनीद्वितीयं दूरस्थितानुजीविजनं राजानमाचार्यः समुपसृत्य शनैरासांचक्रे। स्थित्वा च कंचित्कालांशं लेशतो वक्तुमुपचक्रमे—'श्रीमन्, आकर्ण्यताम्। आख्येयमस्ति नः किंचित्—

अयं हि यौवनोन्मादात्परिभूय भूयसीर्भार्या यौवनावतारतरलतरास्तारा राजो रजनीकर्णपूरः पुरुहूतपुरोधसो धिषणस्य पुरंध्रीं धर्मपत्नीं पत्नीयन्नतितरलस्तारां नामापजहार। नाकतश्च पलायांचक्रे। चकितचकोरलोचनया तया सहातिकामया सर्वाकाराभिरामया रममाणो रमणीयेषु देशेषु चचार। चिराच्च कथंचित्सर्वगीर्वाणवाणीगौरवाद्विरां पत्युः पुनरपि प्रत्यर्पयामास ताम्। हृदये त्वनिन्धनमदह्यत विरहाद्वरारोहायास्तस्याः सततम्।

एकदा तु शैलादुदयादुदयमानो विमले वारिणि वरुणालयस्य संक्रान्तमात्मनः प्रतिबिम्बं विलोकितवान्। दृष्ट्वा च तदा सस्मार सस्मरः स्मेरगण्डस्थलस्य तारायाः मुखस्य। मुमोच च मन्मथोन्मादमभ्यमानमानसः स्वःस्थोऽप्यस्वस्थः स्वीयसः पीतसकलकुमुदवनप्रभाप्रवाहधवलताराभ्यामिव लोचनाभ्यां बाष्पवारिबिन्दून्। अथ पततस्तानुदन्वति समस्तानेवाचेमुर्मुक्ताशुक्तयः। तासां च कुक्षिकोषेषु मुक्ताफलीभूतानवाप तान्कथमपि रसातलनिवासी वासुकिर्नाम विषमुचामीशः। स च तैर्मुक्ताफलैः पातालतलेऽपि तारागणमिव दर्शयद्भिरेकावलीमकल्पयत्। चकार च मन्दाकिनीति नाम तस्याः। सा च भगवतः सोमस्य सर्वासामोषधीनामधिपतेः प्रभावादत्यन्तविषघ्नी हिमामृतसंभवत्वाच्च स्पर्शेन सर्वसत्त्वसंतापहारिणी बभूव। यतः स तां सर्वदा विषोष्मशान्तये वासुकिः पर्यधत्त।

समतिक्रामति च कियत्यपि काले कदाचित्तामेकावलीं तस्मान्नागराजान्नागार्जुनो नाम नागैरेवानीतः पातालतलं भिक्षुरभि-

---

परवतीं परायत्ताम्। गुप्तितो बन्धनात्।

धिषणस्य बृहस्पतेः। पत्नीयन्नात्मनः पत्नीमिच्छन्। आरोहो नितम्बः। उन्मादः खेदः। स्वःस्थ स्वर्गस्थः। अस्वस्थः पीडितः। अपिर्विरोधस्य सूचकः।

क्षत लेभे च । निर्गत्य रसातलात्त्रिसमुद्राधिपतये सातवाहननाम्ने नरेन्द्राय सुहृदे स ददौ ताम् । सा चास्माकं कालेन शिष्यपरम्परया कथमपि हस्तमुपगता । यद्यपि च परिभव इव भवति भवादृशां दत्रिम उपचारस्तथाप्योषधिबुद्ध्या बुद्धिमता सर्वसत्त्वराशिरक्षाप्रवृत्तेन रक्षणीयशरीरेणायुष्मता विपरक्षापेक्षया गृह्यताम् । इत्यभिधाय भिक्षोरभ्याशवर्तिनश्चीवरपटान्तसंयतां मुमोच तामेकावलीं मन्दाकिनीम् ।

उन्मुच्यमानाया एव यस्याः प्रभालेपिनि लब्धावकाशे विषदमहसि महीयसि विसर्पति रश्मिमण्डले युगपद्धवलायमानेषु दिङ्मुखेषु मुकुलितलतावधूत्कण्ठितैरामूलाद्विकाशितमिव तरुभिः, अभिनवमृणाललुब्धैर्धावितमिव धुतपक्षपुटपटलधवलितगगनं वनसरसीहंसयूथैः, स्फुटितमिव भरवशविशीर्यमाणधूलिधवलैर्गर्भभेदसूचितसूचीसंचयशुचिभिः केतकीवाटैः, उद्गलितदलदन्तुराभिः प्रबुद्धमिव कुमुदिनीभिः, विधुतसितसटाभारभरितदिक्चक्रैश्चलितमिव केसरिकुलैः, प्रहसितमिव दशनांशुमालालोकलिप्यमानवनं वनदेवताभिः, विकसितमिव शिथिलितकुसुमकोशकेसराट्टहासनिरङ्कुशं काशकाननैः, भ्रान्तमिव संभ्रमभ्रमितबालपल्लवपरिवेशश्वेतायमानैश्चमरीकदम्बकैः, प्रसृतमिव स्फायमानफेनिलतरलतरतरङ्गोद्गारिणा गिरिनदीपूरेण, अपतारागरणलाभमुदितेनोदितमिव विकचमरीचिचक्राक्रान्तककुभा, पूर्णचन्द्रेण प्रक्षालित इव दावानलधूलिधूसरितदिगन्तो दिवसः, पुनरिव धौतान्यश्रुजलक्लिष्टानि नारीणां मुखानि ।

राजा तु मांसलैस्तस्याः संमुखैर्मयूखैराकुलीक्रियमाणं मुहुर्मुहुरुन्मीलयन्निमीलयंश्च चक्षुः कथमपि प्रयत्नेन ददर्श सर्वाशापूरणीं पङ्क्तीकृतामिव दिङ्नागकरशीकरसंहतिम्, घनमुक्तां शारदीमिव लेखीकृतां ज्योत्स्नाम्, प्रकटपदकचिह्नां संचारणवीथीमिव बालेन्दोर्निश्चलीभूतां सप्तर्षिमालामिव हस्तमुक्ताम्, अभिभूतसकल-

---

दानेन निर्वृत्तो दत्रिमः । अभ्याशो निकटः ।

महत्सरः सरसी । केतक्यो वृक्षभेदाः । काशास्तृणभेदाः । परिवेशः परिवलनम् । स्फायमाना वर्धमानाः ।

आशा आस्थाः, दिशश्च । घनमुक्तां निरन्तरमौक्तिकाम्, मेघत्यक्तां च ।

भुवनभूषणभूतिप्रभावामैशानीमिव शशिकलाम्, धवलतागुणगृहीतां कान्तिमिव निर्गतां क्षीरराशेः, अनेकमहामहीभृत्परम्परागतां गङ्गामिव दुर्गतिहराम्, अनवरतस्फुरिततरलांशुकां पुरःसरपताकामिव महेश्वरभावागमस्य, घनसारशुक्लां दन्तपङ्क्तिमिवाभिमुखस्येश्वरस्य, वरमनोरथपूरणसमर्थां स्वयंवरस्रजमिव भुवनश्रियः, निजकरपल्लवावरणदुर्लक्ष्यां चक्षूरागविहसतिकामिव वसुधायाः, मन्त्रकोषसाधनप्रवृत्तस्याक्षमालामिव राजधर्मस्य, समुद्रालंकारभूतां संख्यालेख्यपट्टिकामिव कुबेरकोशस्य । पश्यंश्चैतां विस्मयमाजगाम मनसा सुचिरम् । आचार्यस्तु तामुद्भृत्य बबन्ध बन्धुरे स्कन्धभागे भूपतेः । अथ नरपतिरपि प्रीतिमुपदर्शयन्प्रत्यवादीत्—'आर्य, रत्नानामीदृशानामनर्हाः प्रायेण पुरुषाः । तपःसिद्धिरियमार्यस्य देवताप्रसादो वा । के च वयमिदानीमात्मनोऽपि किमुत ग्रहणस्य प्रत्याख्यानस्य वा । दर्शनात्प्रभृति प्रभूतगुरुगुणगणहृतेन हृदयेन परवन्तो वयम् । संकल्पितमिदमामरणादार्योपयोगाय शरीरम् । अत्र कामचारो वः कर्तव्यानाम्' इति ।

समतिक्रान्ते च कियत्यपि काले गते चैकावलीवर्णनालापे लोकस्यानन्तरं लब्धविश्रम्भा राज्यश्रीस्ताम्बूलवाहिनीं पत्रलतामाहूयोपांशु किमपि कर्णमूले शनैरादिदेश । दर्शितविनया च पत्रलता पार्थिवं व्यज्ञापयत्—देव, देवी विज्ञापयति न स्मराम्यार्यस्य पुरः कदाचिदुच्चैर्वचनमपि । कुतो विज्ञापनम् । इयं हि शु-

---

पदकं मध्यमणिः । पदमेव च पदकम् । हस्तमुक्तकाम् । परिवर्तुलत्वाद्धस्ते यः स्थितिं न बध्नाति । हस्तो हस्तसंज्ञा, वा नक्षत्रं च हस्तः । सकलभुवनभूषणं कौस्तुभादिः, हरश्च । भूतिः समृद्धिः, भस्म च गुणो धर्मः, तन्तुश्च । महीभृतो राजानः, पर्वताश्च । दुर्गतिर्दारिद्र्यम्, नरकादिगतिश्च । तरलो हारमध्यगतो मणिः, चञ्चलश्च । अंशुका रश्मयः, उत्तरीयं चांशुकम् । घनसारवच्छुक्लां कर्पूरवच्छुभ्राम्, निरन्तरदृढधवलां च । अभिमुखस्य प्रतिमुखमागच्छतः, दन्तपङ्क्तिश्च मुखस्याभितो भवति । वरः श्रेष्ठः, जामाता च । निजाः कराः सहजा रश्मयः स्वकश्च हस्तो निजकरः । चक्षूरागः प्रीतिस्तया विहसतिका नर्महासः । मन्त्रः कर्तव्यावधारणम् । कोशो गञ्जः । साधनं हस्त्यश्वादि । तेन प्रकृष्टाचरितस्य मन्त्रसमूहाराधनप्रस्तुतस्य । समुद्रः सागरः, सह मुद्रया च यो वर्तते । बन्धुरे हृद्ये । प्रत्याख्यानस्य प्रतिषेधस्य । परवन्तोऽन्यायत्ताः ।

उपांशु गुप्तम् । प्राणितं जीवितम् । अशालीनत्वं धार्ष्ट्यम् ।

चामसह्यता व्यापारयन्ती हतदेवदत्तादेशा शिथिलयति विनयम् । अवलानां हि पतिरपत्यं वावलम्बनम् । उभयविकलानां तु दुःखानलेन्धनायमानं प्राणितमशालीनत्वमेव केवलम् । आर्यागमनेन च कृतोऽपि प्रतिहतो मरणप्रयत्नः । अतः काषायग्रहणाभ्यनुज्ञयानुगृह्यतामयमपुण्यभाजनं जनः' इति । जनाधिपस्तु तदाकर्ण्य तूष्णीमेवावतिष्ठत ।

अथाचार्यः सुधीरमभ्यधात्—'आयुष्मति, शोको हि नाम पर्यायः पिशाचस्य रूपान्तरमाक्षेपस्य तारुण्यं तमसो विशेषणं विषस्यानन्तकः प्रेतनगरनायकः । अयमनिर्वृतिधर्मा दहनः । अयमक्षयो राजयक्ष्मा । अयमलक्ष्मीनिवासो जनार्दनः । अयमपुण्यप्रवृत्तः क्षपणकः । अयमप्रतिबोधो निद्राप्रकारः । अयमनलसधर्मा संनिपातः । अयमशिवसहचरो विनायकः । अयमबुधसेवितो ग्रहवर्गः । अयमयोगसमुत्थो ज्योतिःप्रकारः । अयं स्नेहाद्वायुप्रकोपः, मानसादग्निसंभवः, आर्द्रभावाद्रजःक्षोभः, रसादभिशोषः, रागात्कालपरिणामः । तदस्याजस्रस्रावि[1]णो हृदयमहाव्रणस्य बहुलदोषान्धकारलब्धप्रवेशप्रसरस्य प्राणतस्करस्य शून्यताहेतोर्महाभूतग्रामघातकस्य सकलविग्रहक्षपणदक्षस्य दोषच-

---

आक्षेपस्यापस्मारस्य । अनन्तान्कायति रावयतीत्यनन्तकः । अनिवृतिरस्वास्थ्यम्, निर्वाणाभावश्च । अक्षयश्चिरस्थायी, क्षयरहितश्च । जनानर्दयति पीडयतीति जनार्दनः, कृष्णश्च । अपुण्यप्रवृत्तः पापप्रवृत्तः । क्षपणको यः क्षपयति, नग्नाटनकश्च । प्रतिबोधो विवेकः, स्वापादुत्थानं च । निद्रां प्रकिरति हिनस्ति निद्राप्रकारः । कर्मण्यण् । निद्राविशेषश्च मोहरूपः । अनलेनाग्निना सधर्मा सदृशः । अलसलक्षणो धर्म आलस्यं यस्य सोऽलसधर्मा नालसधर्मानलसधर्मा । सम्यङ्निपातयति घातयति यः । त्रिदोषजो व्याधिश्च स संनिपातः । शिवः श्रेयः, हरश्च शिवः । विशेषेण नयति मारयतीति विनायकः, विनायको विघ्नो वा, गणपतिश्च विनायकः । बुधाः पण्डिताः, ग्रहभेदश्च बुधः । ग्रहो व्यसनम्, सूर्यादिश्च । अयोगोऽननुकूलं दैवम्, चित्तवृत्तिनिरोधाभावश्च । ज्योतिःप्रकारोऽग्निभेदः, परं ज्ञानं च । स्नेहः प्रीतिः, पुष्टिहेतुश्च घृतादिः । वायुप्रकोप उन्मादोऽत्र । मानसं चेतः, देवसरश्च । आर्द्रभावो वत्सलत्वम्, सरसत्वं च रजोगुणविशेषो धूलिश्च । रसः प्रीतिः, रसायनं च । रागोऽभिष्वङ्गः, लौहित्यं च । कालोऽन्तकः, कृष्णश्च । तदस्येत्यादौ तत्तस्मादस्य शोकस्य पारं विदुषामपि हृदयानि सोढुं नालम् । किं पुनरबलानां हृदयमिति संबन्धः । अजस्रं सदा । अस्रं बाष्पः, रक्तं च । व्रणं च रक्तं स्रवति । एवमुत्तरत्रापि ज्ञेयम् ।

क्रवर्तिनः कार्श्यश्वासप्रलापोपद्रवबहलस्य दीर्घरोगस्यासद्ग्रहस्य सकललोकक्षयधूमकेतोर्जीवितापहारदक्षस्याक्षणरुचेरनभ्रवज्रपातस्य स्फुरदनवद्यविद्याविद्युदुद्योतमानानि गहनग्रन्थग्रन्थिगूढगर्भग्रहणगम्भीराणि भूरिकाव्यकथाकठोराणि बहुशास्त्रोद्ग्रहनबृहन्ति विदुषामपि हृदयानि नालं सोढुमापातं किमुत नवनवमालिकाकुसुमकोमलानां सरसबिसतन्तुदुर्बलकमबलानां हृदयम् ।

एवं सति सत्यव्रते, वद किमत्र क्रियते, कतम उपालभ्यते, कस्य पुर उच्चैराक्रन्द्यते, हृदयदाहि दुःखं वा ख्याप्यते । सर्वमक्षिणी निमील्य सोढव्यमूढेन मर्त्यधर्मणा । पुण्यवति, पुरातन्यः स्थितय एताः केन शक्यन्तेऽन्यथाकर्तुम् । संसरन्त्यो नक्तंदिवं द्राघीयस्यो जन्मजरामरणघटनघटीयन्त्रराजिरज्जवः पञ्चजनानाम् । पञ्चमहाभूतपञ्चकुलाधिष्ठितान्तःकरणव्यवहारदर्शननिपुणाः सर्वंकषा विषमा धर्मराजस्थितयः । क्षणमपि क्षममाणा गलन्त्यायुष्कलाकलनकुशला निलये निलये कालनालिकाः । जगति सर्वजन्तुजीवितोपहारपातिनी संचरति झटिति चण्डिका यमाज्ञा । रटन्त्यनवरतमखिलप्राणिप्रयाणप्रकटनपटवः प्रेतपतिपटहाः । प्रतिदिशं पर्यटन्ति पेटकैः प्रतिपुरं प्रतप्तलोहलोहिताक्षाः कालकूट-

---

बहलदोषा बहवोऽपगुणाः, कृष्णपक्षरात्रयश्च । अन्धकारो मोहः, तमश्च । शून्यता किंकर्तव्यतामूढता । महाभूतग्रामो जन्तुसमूहः तद्घातकस्यायं च महान्तो भूताः प्राणिनो यस्मिन् । ग्रामे जनपदसमूहे तस्य यो घातकः स शून्यता । या जनरहितस्य हेतुर्भवति । विग्रहः शरीरम्, विरोधश्च । दोषचक्रे मुख्यतया वर्तते यः स दोषचक्रवर्ती च सार्वभौमः । उपद्रवो बाधा, व्याधेरुपर्यन्यो व्याधिश्च । उक्तं च—'व्याधेरुपरि यो व्याधिर्भवत्युत्तरकालजः । उपक्रमविरोधित्वात्स ह्युपद्रव उच्यते॥' इति । दीर्घरोगः क्षयादिः । असद्ग्रहोऽनर्थासक्तिः, धूमकेतुश्च । अशोभनो मूढः । न विद्यमाना क्षणमपि रुचिर्भोजनाभिलाषः, क्षणरुचिस्तडिच्च । स्फुरन्त्याः प्रकाशमानाया अनवद्याया विद्याया विद्युता किंचिन्मात्रज्ञानेन विद्युदपि सकृदेव स्फुरति । तथा ग्रहणानां दुरवग्रहाणां ग्रन्थानां ये विषतमाः प्रदेशास्तेषां गुप्तो यो गर्भः तद्ग्रहणेन गम्भीराणि ।

पुण्यवति पुरातन्य इत्यादौ ध्वनिच्छायाजन्मजरामरणघटनान्येव घटीयन्त्रराज्या रज्जवः। पञ्चजना मानुषाः। 'मानुष्या मनुषा मर्त्या मनुजा मानवा नराः। स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नराः॥' इति। पञ्चकुलोऽध्यक्षः। अन्तःकरणं मनः। कलाभागाः कलनं संख्यानम्। नालिका होराः । चण्डिका भीषणा, रौद्रदेवता-

कान्तिकालकायाः कालपाशपाणयः कालपुरुषाः । प्रतिभवनं भ्रमन्ति भीषणकिंकरकरघट्टितयमघण्टापुटपटुटांकारभयंकराः सर्वसत्त्वसंघसंहरणाय घोराघातघोषणाः । दिशि दिशि वहन्ति बहुचिताधूमधूसरितप्रेतपतिपताकापटुपतितगृध्रदृष्टयः शोककृतकोलाहलाकुलकुटुम्बिनीविकीर्णकेशकलापशबलशवशिबिकासहस्रसंकुलाः किलकिलायमानश्मशानशिबिरशिवाशावकाः परलोकावसथपथिकसार्थप्रस्थानविशिखावीथयः । सकललोककवलावलेहलम्पटा बहला वहंलिहा लेढि लोहिताचिता चिताङ्गारकाली कालरात्रिजिह्वा जीवितानि जीविनाम् । तृप्तिमशिक्षिता च भगवतः सर्वभूतभुजो बुभुक्षा मृत्योः । अतिद्रुतवाहिनी चानित्यतानदी । क्षणिकाश्च महाभूतग्रामगोष्ठ्यः । रात्रिषु भङ्गुराणि पात्रयन्त्रपञ्जरदारूणि देहिनाम् । अशुभशुभभावेशविवशा विशरवः शरीरनिर्माणपरमाणवः । छिदुरा जीवबन्धनपाशतन्त्रीतन्तवः । सर्वमात्मनोऽनीश्वरं विश्वं नश्वरम् । एवमवधृत्य नात्यर्थमेवार्हसि मेधाविनि मृदुनि मनसि तमसः प्रसरं दातुम् । एको हि प्रतिसंख्यानक्षण आधारीभवति धृतेः । अपि च दूरगतेऽपि हि शोके नन्विदानीमपेक्षणीय एवायं ज्येष्ठः पितृकल्पो भ्राता भवत्या गुरुः । इतरथा को न बहु मन्येत कल्याणरूपमीदृशं संकल्पमत्रभवत्याः काषायग्रहणकृतम् । अखिलमनोज्वरप्रशमनकारणं हि भगवती प्रव्रज्या । ज्यायः खल्विदं पदमात्मवताम् । महाभागस्तु भिनत्ति मनोरथमधुना । यदयमादिशति तदेवानुष्ठेयम् । यदि भ्रातेति यदि ज्येष्ठ इति यदि वत्सल इति यदि गुणवानिति यदि राजेति सर्वथा स्थातव्यमस्य नियोगे ।' इत्युक्त्वा व्यरंसीत् ।

भेदश्च । पेटकैः समूहैः । घोषणा राजाज्ञया पश्वादिसंबद्धः पटहादिशब्दो दिशि दिश्येवंविधा रीतिर्विधेयेति । विशिखा वीथयः । रथ्या मार्गा वहन्तीति संगतिः । कुटुम्बिन्योऽपहेलाः । शिबिका वाहनम् । श्मशानमेव शिबिरं येषां ते । बहला दीर्घगौश्च । उक्तं च—'बहलाः कृत्तिका गावः' इति च । वहंलिहा छिद्रान्वेषिणी, वहंलिहा च गौर्वत्सस्य भवति । देहिनां शरीरवतां जीवाः प्राणिन एव । बन्धनपाशतन्त्रीतन्तवः । आत्मनोऽनीश्वरं न स्वायत्तम् । परतन्त्रमित्यर्थः । प्रतिसंख्यानं विवेककुशला मतिः । दूरगते परधराधिरूढे । ज्येष्ठो भ्रातेत्याद्युत्तरोत्तरं साभिप्रायं व्याख्येयम् ।

उपरतवचसि च तस्मिन्निजगाद नरपतिः—'आर्यमपहाय कोऽन्य एवमभिदध्यात्। अनभ्यर्थितदैवनिर्मिता हि विषमविपदवलम्बनस्तम्भा भवन्तो लोकस्य। स्नेहार्द्रमूर्तयो मोहान्धकारध्वंसिनश्च धर्मप्रदीपाः। किंतु प्रणयप्रदानदुर्ललिता दुर्लभमपि मनोरथमतिप्रीतिरभिलषति। धीरस्यापि धार्ष्ट्यमारोपयति हृदयलघिमलङ्घितमतिवल्लभत्वम्। युक्तायुक्तविचारशून्यत्वाच्च शालीनमपि शिक्षयन्ति स्वार्थतृष्णाः प्रागल्भ्यम्। अभ्यर्थनाया रक्षन्ति च जलनिधय इव मर्यादामार्याः। दत्तमेव च शरीरमिदमनभ्यर्थितेन प्रथममेवातिथ्याय माननीयेन भवता मह्यम्। अतः किंचिदर्थये भदन्तमियं नः स्वसा बाला च बहुदुःखखेदिता च सर्वकार्यावधीरणोपरोधेनापि यावल्लालनीया नित्यम्। अस्माभिश्च भ्रातृवधापकारिरिपुकुलप्रलयकरणोद्यतस्य बाहोर्विधेयैर्भूत्वा सकललोकप्रत्यक्षं प्रतिज्ञा कृता। पूर्वावमाननाभिभवमसहमानैरर्पित आत्मा कोपस्य। अतो नियुङ्क्तां कियन्तमपि कालमात्मानमार्योऽपि कार्ये मदीये। दीयतामतिथये शरीरमिदम्। अद्य प्रभृति यावदयं जनो लघयति प्रतिज्ञाभारमाश्वासयति च तातविनाशदुःखविक्लवाः प्रजाः, तावदिमामत्रभवतः कथाभिश्च धर्म्याभिः, कुशलप्रतिबोधविधायिभिरुपदेशैश्चारजोभिः, शीलोपशमदायिनीभिश्च देशनाभिः, क्लेशप्रहाणहेतुभूतैश्च तथागतैर्दर्शनैः, अस्मत्पार्श्वोपयायिनीमेव प्रतिबोध्यमानामिच्छामि। इयं तु ग्रहीष्यति मयैव समं समाप्तकृत्येन कषायाणि। अर्थिजने च किमिव नातिसृजन्ति महान्तः। सुरनाथमात्मास्थिभिरपि यावत्कृतार्थमकरोद्धैर्योदधिर्दधीचः। मुनिनाथोऽप्यनपेक्षितात्मस्थितिरनुकम्पेति कृत्वा कृपावानात्मानं वठरसत्त्वेभ्यः कतिकृत्वो न दत्तवान्। अतः परं भवन्त एव बहुतरं जानन्ति।' इत्युक्त्वा तूष्णींबभूव भूपतिः।

अनभ्यर्थितेत्यादौ ध्वनिच्छायावगन्तव्या। धीरस्य गम्भीरस्य। लङ्घितमाक्रान्तम्। शालीनमधृष्टत्वम्। भदन्तेति बौद्धकर्मविशेषपूजावचनम्। अवधीरणमुपेक्षणम्। विधेयैरायत्तैः। नियुक्तां स्वीकरोतु। देशनाभिः शिक्षाभिः। क्लेशा अविद्यादयः। तेषां प्रहाणम्। तथागतैर्बौद्धैरात्मास्थिभिरपि। यावदित्यत्र यावच्छाब्दोऽवधारणे। मुनिनाथः सुगतः। वठरसत्त्वा जडप्राणिनः, सिंहाद्याः। एवं किल श्रूयते—पुरा काचन सिंही प्रसवकाले बुभुक्षातुरा स्वशावकान्भक्षयितुं प्रवृत्ता सौगतेन च समालोक्यातिकारुण्यात्स्वमांसप्रदानेन तस्मान्निवारितेति।

भूयस्तु बभाषे भदन्तः—'भव्या न द्विरुच्चारयन्ति वाचम् । चेतसा प्रथममेव प्रतिग्राहिता गुणाः कायबलिमिमाम् । अमुना जनेनोपयोगस्तु निरुपयोगस्यास्य लघुनि गुरुणि वा कृत्ये गुणवदायत्तः' इति । अथ तथा तस्मिन्नभिनन्दितप्रणये प्रीयमाणः पार्थिवस्तत्र तामुषित्वा विभावरीमुषसि वसनालंकारादिप्रदानपरितोषितं विसर्ज्य निर्घातमाचार्येण सह स्वसारमादाय प्रयाणकैः कतिपयैरेव कटकमनुजाह्नवि निविष्टं प्रत्याजगाम ।

तत्र च राज्यश्रीप्राप्तिव्यतिकरकथां कथयत एव प्रणयिभ्यो रविरपि ततार गगनतलम् । वहलमधुपङ्कपिङ्गलः पङ्कजाकर इव संचुकोच चक्रवाकवल्लभो वासरः । प्रकीर्णानि नवरुधिररसारुणवर्णानि लोकालोकजूंषि यजूंषीव कुपितयाज्ञवल्क्यवक्त्रवान्तानि निजवपुषि पूषा पापमुषि पुनरपि संजहार जालकानि रोचिषाम् । क्रमेण च समुपोह्यमानमांसलरागरोचिष्णुरुष्णांशुरुष्णीषबन्धसहजचूडामणिरिव वृकोदरकरपुटोत्पाटितः, प्रत्यग्रशोणितशोणाङ्गरागरौद्रो द्रौणायनस्य रुद्रभिक्षादानशौण्डपुरमथनमुक्तमुण्डशिरानाडिरुधिरपूरणकपिलः, कपालकर्पर इव च पैतामहः, पितृवधरुषितरामरागरचितः, पृथुविकटकार्तवीर्यासकूटकुट्टाककुठारतुण्डतष्टदुष्टक्षत्रियकण्ठकुहररुधिरकुल्याप्रणालसहस्रपूरितो ह्रद इव दूररोधी रौधिरो भयनिगूढकरचरणमुण्डमण्डलाकृतिर्गुरुगरुडनखपञ्जराक्षेपक्षपणक्षिप्तक्षतजोक्षितो व्यसुर्विभावसुः, कमठ इव च लोठ्यमानः, नभस्यरुणगर्भमांसपिण्डाण्ड इव च खण्डमानमानी-

---

भव्या भाग्यवन्तः । काय एव बलिहेतुत्वाद्बलिरिव कायबलिस्ताम् ।

पद्मषण्डोऽपि चक्रवाकप्रियो मुकुलितो भवति । रुधिररसवत्तेन चारुणवर्णानीति । यजूंषीति वेदोपलक्षणार्थः । याज्ञवल्क्यः शाकल्यस्य मुनेर्वेदानधीत्याज्ञामकुर्वन्गुरुणोपालब्धः 'वेदान्परित्यज' इति । ततस्तेन चत्वारोऽपि वेदा रक्तोपलिप्ता उद्वान्ताः। तेच शाकल्यमुनिना स्वे वपुषि संक्रान्ता इति श्रुतिः । क्रमेणेत्यादावुष्णांशुर्मुहूर्तमेवंविधो दृश्यत इति संबन्धः । समुपोह्यमानो वर्धमान इत्यर्थः । उष्णीषो बध्यते यत्र स उष्णीषबन्धो मस्तकः । वृकोदरो भीमसेनः । द्रौणायनोऽश्वत्थामा । अत्र कथा—अश्वत्थामा सौप्तिके हतपुत्रया द्रौपद्या भीमसेनोऽभिधाय यद्यश्वत्थाम्नः शिरश्छित्त्वा नानीयते तदाहं जीवितं त्यजामीति । ततोऽहमेवं करोमीति प्रतिज्ञायायान्तंभीमं दृष्ट्वा व्यासाश्रमस्थो रणश्रान्तो घृताभ्यक्तोऽश्वत्थामा शस्त्राभावादिधीकाः संमन्त्र्य ब्राह्ममस्त्रं भीमवधाय ददौ । एकाकिनश्च भ्रातुर्गमनाद्भीतेनार्जुनेन कृष्ण-

तः, नियतकालातिपातदूयमानदाक्षायणीक्षिप्तः, धातुतट इव च सुमेरोरसुरवधाभिचारचरुपचनपिशुनः, शोणितकाथकषायितकुक्षिरतिविसंकटः, कटाह इव च बार्हस्पत्यः, सद्योगलितगजदानवदेहलोहितोपलेपभीषणः, मुखमण्डलाभोग इव महाभैरवस्य मुहूर्तमदृश्यत। जलनिधिजलप्रतिबिम्बितरविबिम्बराजिभास्वराभ्रावलम्बिनी गृहीतार्द्रमांसभारेव चाबभासे वासरावसानवेला वेतालनिभा। ज्वलत्संध्यारागरज्यमानजलप्रवाहः पुनरिव पुराणपुरुषपीवरोरुसंपुटपिष्टमधुकैटभरुधिरपटलपाटलवपुरभवदधिपतिरर्णसाम्। अवसिते संध्यासमये समनन्तरमपरिमितयशःपानतृषिताय मुक्ताशैलशिलाचषक इव निजकुलकीर्त्या, कृतयुगकरणोद्यतायादिराजराजतशासनमुद्रानिवेश इव राज्यश्रिया, सकलद्वीपजिगीषाचलिताय श्वेतद्वीपदूत इव चायत्या, श्वेतभानुरुपानीयत निशया नरेन्द्रायेति॥

इति श्रीबाणभट्टकृतौ हर्षचरितेऽष्टम उच्छ्वासः।

सहितेन तमेवानुसरता ब्रह्मशिरोऽस्त्रं मुमुचे।तदवसरागतैश्च नारदाद्यैर्मध्यस्थैर्भूत्वोक्तं द्रौणेरस्त्रमभिमन्त्र्य प्रियाया गर्भे पतत्विति। अर्जुनेनाप्यात्मीयेऽस्त्रे संहते भीमोऽश्वत्थाम्नः सहजं मूर्धमणिमुच्चीय नातिचिरेणाजगामेति। मुक्तं त्यक्तम्। मुण्डं शिरः। सिरा नाड्यः। रुधिरवाहन्यो नाड्यः। कुट्टाकरछेदनशीलः। कुठारतुण्डं कुठारधारा। आक्षेपक्षपणमुत्क्षिप्य परित्यागः। क्षिप्तं निःसृतम्। लोठ्यमानः परिभ्रमन्। नियतकालातिपातः प्रलयागमः। दाक्षायणी काली। पिशुनः सूचकः। वेतालोऽपि गृहीतार्द्रमांसभरो भवति। पटलं समूहः। अवसिते निवृत्ते संध्यासमये निशया। नरेन्द्राय श्वेतभानुरुपानीयतोपायनीकृत इति संबन्धः। आदिराजस्य मनोः, वैन्यस्य वा। मुद्रानिवेशो राज्याधिकारमहामुद्रा। चलिताय निर्गताय। आगत्यागामिशुभदैवेनेति भद्रम्॥

दुर्बोधे हर्षचरिते संप्रदायानुरोधतः।
गूढार्थोन्मुद्रणां चक्रे शंकरो विदुषां कृते॥

इति महाकविचूडामणिशंकरकविरचिते हर्षचरितसंकेतेऽष्टम उच्छ्वासः।

समाप्तोऽयं ग्रन्थः।

निर्णयसागरेऽङ्कितानि विक्रेयसंस्कृत-नूतनपुस्तकानि।

अद्वैतसिद्धिः।

श्रीमत्परमहंसमधुसूदनसरस्वतीस्वामिप्रणीता।

विट्ठलेशीयव्याख्योपबृंहित–गौडब्रह्मानन्दीव्याख्यासनाथी-कृता बलभद्रप्रणीतसिद्धिव्याख्या–अनन्तकृष्णशास्त्रिसंगृहीतन्यायामृताऽद्वैतसिद्धितरङ्गिणी-लघुचन्द्रिकासंग्रहश्च।

मूल्यं १० रूप्यकाः, मार्गव्ययः १ रूप्यकः.

द्वैतमिथ्यात्वनिरूपणाधीनाऽद्वैतसिद्धिः द्वैतमिथ्यात्वसमर्थनेन वेदान्तानामखण्डार्थत्वसाधनेन श्रवणादिसाधनस्वरूपादिविवेचनेन मोक्षस्वरूपविनिश्चयेन न्यायामृताख्यद्वैतग्रन्थनिरासेनच भवतीति तत्सर्वमपि चतुर्भिः परिच्छेदैः कुर्वतीयमद्वैतसिद्धिः प्रमेयबहुलोपस्कृताऽतिगम्भीराचेति सुविशदमिदं सर्वेषाम्। तस्यायथार्थानर्थान् गृहीत्वा तत्खण्डयन्तीं तरङ्गिणीं खण्डयन्ती लघुचन्द्रिकाख्या व्याख्या गौडब्रह्मानन्दीयेति प्रथितैवात्युत्तमो ग्रन्थ इत्यत्रापि नास्ति संशयांशः। अपरातु व्याख्या न्यायामृततरङ्गिणी यामृतसौगन्ध्यनिरसनसमर्था सरलातीव मनोहारिणी विद्यते। लघुचन्द्रिकाव्याख्यानं **विट्ठलेशीयं** लघुचन्द्रिकागूढार्थपरिज्ञानेऽत्यन्तमेवोपकारकमतिविस्तृतंच। एतत्सर्वमप्येकत्र संयोज्य अस्माभिरिदानीमान्तं प्रकाशितमस्ति। सिद्धेरपरं व्याख्यानं बलभद्रीयं चातिदुर्लभमपूर्वचेति यावदुपलब्धं तदपि प्रकाशितमस्ति।

न्यायामृताद्वैतसिद्धितरङ्गिणीलघुचन्द्रिकाणां संग्रहोऽपि तत्तन्मतनिष्कर्षावगमार्थमत्र संयोजितोऽस्ति। अपरमिदं सौभाग्यं यद् **अद्वैतरत्नरक्षणाख्यस्य** मधुसूदनसरस्वतीप्रणीतस्य लघुनिबन्धस्याप्यनेनैव साकमन्ते मुद्रणं कृतमस्ति। अनेकातिगभीरग्रन्थपरिकर्मितस्याप्यस्य ग्रन्थस्य मूल्यमल्पमेव १० दशरूप्यकाणि निर्णीतमस्ति।

ब्रह्मसूत्रशाङ्करभाष्यम् ।

भामती-कल्पतरु-परिमलव्याख्यासहितम् ।

ब्रह्मस्वरूपमात्रप्रकाशनार्थं प्रवृत्तत्वाद्यथार्थाभिधानानि **ब्रह्मसूत्राणि** स्वरसतः पर्यालोच्यमानान्यद्वैतमेवावगमयन्ति । तत्परंचेदं **शाङ्करभाष्यं** प्रसन्नगम्भीरं नेतरैर्व्याख्यानैस्तथा चकास्ते यथा **भामत्या** । यस्याहि व्याख्या **कल्पतरु**रमलानन्दसरस्वतीकृतिरतितरामानन्दमलं प्रेक्षकाणामादधाति । तद्विवरणंच **परिमलाभिधानं** कल्पतरोः कल्पतरुभावमादधानं सर्वतन्त्रस्वतन्त्रादिबिरुदाङ्कितात्पर्य्यदीक्षितेन प्रणीतं शब्दन्यायमीमांसादिशास्त्रप्रक्रियाप्रचुरं विदुषामत्यन्तमानन्दमावहतीत्यवचनसिद्धमिदम् । तेषामेषामेकत्रसमावेशेन सहृदयहृदयाह्लादकरीमिमां पञ्चग्रन्थीमद्य प्रकाशयामः ।

मूल्यं १० रु., मार्ग. १ रु.

श्रीमद्भगवद्गीता ।

(व्याख्याष्टक ८ मण्डिता ।)

१ शांकरभाष्यं २ आनन्दगिरिव्याख्या ३ नीलकण्ठी
४ मधुसूदनी ५ भाष्योत्कर्षदीपिका ६ श्रीधरी
अभिनवगुप्तपादाचार्यव्याख्या ८ मधुसूदनी-
व्याख्यागूढार्थतत्वालोकविवरणं च ।

निर्दिष्टगीताव्याख्यासु यद्यपि काश्चन मुद्रिताः सन्ति तथापि तासामेकपद्येन बोधास्वादासंभवादखिलवेदान्तरसिकमानुषप्राणिनो युगपदास्वादयितुं सर्वाभिस्ताभिः सह भवद्भिर्मुद्रणीयेयमिति चिराद्विद्वत्संघैरितेन मया प्रतिव्याख्यानं भिन्नैरपि मनोहरैरायसाक्षरैः सुदृढचिक्कणपत्रेषु मुद्रितास्ति ।

मू. ८ रु. ट. १ रु.

निर्णयसागरयन्त्रालयाधिपतिः
तुकाराम जावजी,
काळबादेवीरोड, मुंबई.

लाल बहादुर शास्त्री राष्ट्रीय प्रशासन अकादमी, पुस्तकालय
Lal Bahadur Shastri National Academy of Administration Library
मसूरी
MUSSOORIE

अवाप्ति सं०
Acc. No.....

कृपया इस पुस्तक को निम्न लिखित दिनांक या उससे पहले वापस कर दें।

Please return this book on or before the date last stamped below.

दिनांक Date	उधारकर्ता की संख्या Borrower's No.	दिनांक Date	उधारकर्ता की संख्या Borrower's No.

GL SANS 891.21
BAN
125556
LBSNAA

अवाप्ति सं० [illegible]
ACC. No.....
वर्ग स. पुस्तक सं.
Class No..... Book No.....
लेखक
Author.....

Sans
891.21 [illegible]

LIBRARY
LAL BAHADUR SHASTRI
National Academy of Administration
MUSSOORIE

Accession No. 125556

1. Books are issued for 15 days only but may have to be recalled earlier if urgently required.
2. An over-due charge of 25 Paise per day per volume will be charged.
3. Books may be renewed on request, at the discretion of the Librarian.
4. Periodicals, Rare and Reference books may not be issued and may be consulted only in the Library.
5. Books lost, defaced or injured in any way shall have to be replaced or its double price shall be paid by the borrower.

Help to keep this book fresh, clean & moving